आनन्दाश्रमसंस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः ४२

पदपाठयुता

कृष्णयजुर्वेदीयतैत्तिरीयसंहिता ।

श्रीमत्सायणाचार्यविरचितभाष्यसमेता ।

(तत्र तृतीयकाण्डगतपञ्चमप्रपाठकमारभ्य चतुर्थकाण्डसमाप्ति-पर्यन्तः षष्ठो भागः (६))

एतत्पुस्तकम्

वे० शा० रा० रा० "काशीनाथ शास्त्री आगाशे" इत्येतैः संशोधितम् ।

तच्च

हरि नारायण आपटे

इत्यनेन

पुण्याख्यपत्तने

आनन्दाश्रममुद्रणालये

आयसाक्षरैर्मुद्रयित्वा

प्रकाशितम् ।

शालिवाहनशकाब्दाः १८२९

खिस्ताब्दाः १९०३

(अस्य सर्वेऽधिकारा राजशासनानुसारेण स्वायत्तीकृताः)

P, O, Box No, 8,
Bengalmandir Lane, Varanasi-1.

समाप्तोऽयं श्रीमत्सायणाचार्यविरचितभाष्यस-
हितकृष्णयजुर्वेदीयतैत्तिरीयसंहिता-
यास्तृतीयः काण्डः ।

अथ सभाष्यसपदपाठकृष्णयजुर्वेदीयतैत्तिरीयसंहितायां

चतुर्थं काण्डम् ।

(तत्र प्रथमप्रपाठके प्रथमोऽनुवाकः ।)

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥ १ ॥
तृतीयकाण्डे सोमस्य शेषः प्रायेण वर्णितः ।
चतुर्थे त्वग्निचित्यङ्गमन्त्राणां पाठ ईर्यते ॥ २ ॥
अवान्तरविशेषास्तु विनियोगे प्रदर्शिताः ।
चतुर्थकाण्डमग्न्याख्यं सद्भिः पाठकैर्युतम् ॥ ३ ॥
उखासंभरणे मन्त्राः प्रथमे पाठके श्रुताः ।
एकादशानुवाकाः स्युस्तदर्थाः स्युः क्रमादमी ॥ ४ ॥
अभ्र्यादानं मृदाक्रान्तिः खननं हरणं तथा ।
उखानिर्माणसंस्कारौ सामिधेन्यस्तथाऽऽप्रियः ॥
अग्न्युत्पादो धारणं च याज्या इत्यनुवाकगाः ॥ ५ ॥ इति ॥

(इति भाष्यकारोपोद्घातः ।)

(अथ कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थोऽष्टकः ।)

(तत्र प्रथमप्रपाठके प्रथमोऽनुवाकः ।)

हरिः ॐ ।

युञ्जानः प्रथमं मनस्तत्त्वाय सविता धियः ।
अग्निं ज्योतिर्निचाय्य पृथिव्या अध्याऽ-
भरत् । युक्त्वाय मनसा देवान्त्सुवर्यतो धिया
दिवम् । बृहज्ज्योतिः करिष्यतः सविता प्र

१ ख. च. °शेषस्तु । २ ख. च. °गेषु दर्शितः । चं° । ३ ख. च. °दर्थास्तु क्रं° । ४ घ. ङ. °ति । अत्रा° ।

सुंवाति तान् । युक्तेन मनसा वयं देवस्य सवितुः सवे । सुवर्गेयाय शक्त्यै । युञ्जते मन उत युञ्जते धियो विप्रा विप्रस्य बृहतो विपश्चितः । वि होत्रा दधे वयुनाविदेक इत् (१) मही देवस्य सवितुः परिष्टुतिः । युजे वां ब्रह्म पूर्व्यं नमोभिर्वि श्लोका यन्ति पथ्येव सूरयः । शृण्वन्ति विश्वे अमृतस्य पुत्रा आ ये धामानि दिव्यानि तस्थुः । यस्य प्रयाणमन्वन्य इद्ययुर्देवा देवस्य महिमानमर्चतः । यः पार्थिवानि विममे स एतशो रजाꣳसि देवः सविता महित्वना । देव सवितः प्र सुव यज्ञं प्रसुव (२) यज्ञपतिं भगाय दिव्यो गन्धर्वः । केतपूः केतं नः पुनातु वाचस्पतिर्वाचमद्य स्वदाति नः । इमं नो देव सवितर्यज्ञं प्र सुव देवायुवꣳ सखिविदꣳ सत्राजितं धनजितꣳ सुवर्जितम् । ऋचा स्तोमꣳ समर्धय गायत्रेण रथंतरम् । बृहद्गायत्रवर्तनि । देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां गायत्रेण छन्दसाऽऽ ददेऽङ्गिरस्वदभ्रिरसि नारिः (३) असि पृथिव्याः सधस्थादग्निं पुरीष्यमङ्गिरस्वदा भर त्रैष्टुभेन त्वा छन्दसाऽऽ ददेऽङ्गिरस्वद्बभ्रिरसि नारिरसि त्वया वयꣳ सधस्थ आऽग्निꣳ शकेम खनितुं पुरीष्यं जागतेन त्वा छन्दसाऽऽ ददेऽङ्गिरस्वद्बस्तं आधायं सविता बिभ्रदग्निꣳ हिरण्ययीम् । तया ज्योतिरजस्रमिदग्निं खात्वी न आ भराऽऽनुष्टुभेन त्वा छन्दसाऽऽ ददेऽङ्गिरस्वत् (४) ॥

(इद्यज्ञं प्र सुव नारिरानुष्टुभेन त्वा छन्दसा त्रीणि च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके प्रथमप्रपाठके प्रथमोऽनुवाकः ॥ १ ॥

(अथ कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थोऽष्टकः ।)

(तत्र प्रथमप्रपाठके प्रथमोऽनुवाकः ।)

हरिः ॐ ।

युञ्जानः । प्रथमम् । मनः । तत्त्वाय । सविता । धियः । अग्निम् । ज्योतिः । निचाय्येति नि—चाय्य । पृथिव्याः । अधि । एति । अभरत् । युक्त्वाय । मनसा । देवान् । सुवः । यतः । धिया । दिवम् ।

बृहत् । ज्योतिः । करिष्यतः । सविता । प्रेति । सुवाति । तान् । युक्तेन । मनसा । वयम् । देवस्य । सवितुः । सवे । सुवर्गेयायेति सुवः—गेयाय । शक्त्यै । युञ्जते । मनः । उत । युञ्जते । धियः । विप्राः । विप्रस्य । बृहतः । विपश्चितः । वीति । होत्राः । दधे । वयुनाविदिति वयुन—वित् । एकः । इत् (१) । मही । देवस्य । सवितुः । परिष्टुतिरिति परि—स्तुतिः । युजे । वाम् । ब्रह्म । पूर्व्यम् । नमोभिरिति नमः—भिः । वीति । श्लोकाः । यन्ति । पथ्या । इव । सूरयः । शृण्वन्ति । विश्वे । अमृतस्य । पुत्राः । एति । ये । धामानि । दिव्यानि । तस्थुः । यस्य । प्रयाणमिति प्र—यानम् । अन्विति । अन्ये । इत् । ययुः । देवाः । देवस्य । महिमानम् । अर्चतः । यः । पार्थिवानि । विमम इति वि—ममे । सः । एतशः । रजांसि । देवः । सविता । महित्वनेति महि—त्वना । देव । सवितः । प्रेति । सुव । यज्ञम् । प्रेति । सुव (२) । यज्ञपतिमिति यज्ञ—पतिम् । भगाय । दिव्यः । गन्धर्वः । केतपूरिति केत—पूः । केतम् । नः । पुनातु । वाचः । पतिः । वाचम् । अद्य । स्वदाति । नः । इमम् ।

नः । देव । सवितः । यज्ञम् । प्रेति । सुव । देवायुवमिति देव—युवम् । सखिविदमिति सखि—विदम् । सत्राजितमिति सत्र—जितम् । धनजितमिति धन—जितम् । सुवर्जितमिति सुवः—जितम् । ऋचा । स्तोमम् । समिति । अर्धय । गायत्रेण । रथंतरमिति रथं—तरम् । बृहत् । गायत्रवर्तनीति गायत्र—वर्तनि । देवस्य । त्वा । सवितुः । प्रसव इति प्र—सवे । अश्विनोः । बाहुभ्यामिति बाहु—भ्याम् । पूष्णः । हस्ताभ्याम् । गायत्रेण । छन्दसा । एति । ददे । अङ्गिरस्वत् । अग्निः । असि । नारिः (३) । असि । पृथिव्याः । सधस्थादिति सध—स्थात् । अग्निम् । पुरीष्यम् । अङ्गिरस्वत् । एति । भर । त्रैष्टुभेन । त्वा । छन्दसा । एति । ददे । अङ्गिरस्वत् । बभ्रिः । असि । नारिः । असि । त्वया । वयम् । सधस्थ इति सध—स्थे । एति । अग्निम् । शकेम । खनितुम् । पुरीष्यम् । जागतेन । त्वा । छन्दसा । एति । ददे । अङ्गिरस्वत् । हस्ते । आधायेत्या—धाय । सविता । बिभ्रत् । अग्निम् । हिरण्ययीम् । तया । ज्योतिः । अजस्रम् । इत् । अग्निम् । खात्वी । नः ।

एतं । भर । आनुष्टुभेनेत्यानु—स्तुभेन । त्वा । छन्दसा ।
एतं । ददे । अङ्गिरस्वत् (४) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके
प्रथमप्रपाठके प्रथमोऽनुवाकः ॥ १ ॥

तत्राभ्यादानप्रतिपादके प्रथमानुवाके प्रथमं तावद्धोममन्त्रा उच्यन्ते ।

कल्पः—"जुह्वामष्टगृहीतं गृहीत्वा युञ्जानः प्रथमं मन इति यजुरष्टमाभिर्ऋग्भिरेकामाहुतिं जुहोति" इति ।

तत्र प्रथमामृचमाह—

युञ्जानः प्रथमं मनस्तत्त्वाय सविता
धियः । अग्निं ज्योतिर्निचाय्य
पृथिव्या अध्याऽभरत् । , इति ।

सविता प्रेरकः परमेश्वरः प्रथममग्निचयनविषये मनो युञ्जानः समादधानो धिय इष्टकादिविषयाणि ज्ञानानि तत्त्वाय तनित्वा विस्तार्याग्निं ज्योतिर्निचाय्य चीयमानमग्निं सफलानां कर्मणां प्रकाशनसाधनभूतं निश्चित्य पृथिव्या अध्याभरद्भूमेरुपर्यानीतवान्[1]। अनन्तरं तमग्निमुखालक्षणपृथिव्यां स्थापयितुमुखानिर्माणादाविमं होमं करोमीति भावः ॥

अथ द्वितीयामाह—

युक्त्वाय मनसा देवान्त्सुवर्यतो धिया
दिवम् । बृहज्ज्योतिः करिष्यतः
सविता प्र सुवाति तान् । , इति ।

सविता तानिन्द्रियविशेषान्प्रकर्षेण सुवाति प्रेरयति । किं कृत्वा, देवान्क्रीडापरत्वेन चपलानिन्द्रियविशेषान्मनसा युक्त्वाय विषयेभ्यो नियम्य । कीदृशानिन्द्रियविशेषान्, सुवर्यतः स्वर्गं गच्छतः स्वर्गप्राप्त्यर्थमुद्यतानित्यर्थः । बृहज्ज्योतिः प्रौढं चीयमानमग्निं धिया दिवं करिष्यतस्तत्तदिष्टकादिविषयया प्रज्ञया द्योतमानं कर्तुमुद्यतान् ॥

---

१ घ. ङ. °कावि° । २ ख. च. °रदा हृतवान्भूमे° । ३ ख. च. °न् । तदनन्तरम° । ४ ख. च. °क्षणं पृ° । ५ ख. च. °रोतीति ।

(मृदाक्रान्त्यभिधानम्)

पातेन(नै) [व समुच्चयः] स्यादिति शङ्कनीयम् । वाचनिकसंख्यया न्याय-सिद्धस्य तस्य बाधितत्वात् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे प्रथमप्रपाठके प्रथमोऽनुवाकः ॥ १ ॥

(अथ चतुर्थाष्टके प्रथमप्रपाठके द्वितीयोऽनुवाकः ।)

इमामगृभ्णन्रशनामृतस्य पूर्व आयुंषि वि-दथेषु कव्या । तया देवाः सुतमा बभूवुर्ऋतस्य सामन्त्सरमारपन्ती । प्रतूर्तं वाजिन्ना द्रव वरिष्ठामनु संवर्तम् । दिवि ते जन्म परममन्तरिक्षे नाभिः पृथिव्यामधि योनिः । युञ्जाथाꣳ रासभं युवमस्मिन्यामे वृषण्वसू । अग्निं भरन्तमस्मयुम् । योगेयोगे तवस्तरं वाजेवाजे हवामहे । सखाय इन्द्रमूतये । प्रतूर्वन् (१) एह्यवक्रामन्नशस्ती रुद्रस्य गाणपत्यान्मयोभू-रेहि । उर्वन्तरिक्षमन्वेहि स्वस्तिगव्यूतिरभयानि कृण्वन् । पूष्णा सयुजा सह । पृथिव्याः सधस्थादग्निं पुरीष्यमङ्गिरस्वदच्छेह्यग्निं पुरीष्यमङ्गिरस्वदच्छेमोऽग्निं पुरीष्यमङ्गिरस्वद्भरिष्यामोऽग्निं पुरीष्यमङ्गिरस्वद्भरामः । अन्व-

---

१ क. घ. ङ. °पातो न ।

ग्निरुषसामग्रमख्यदन्वहानि प्रथमो जातवेदाः। अनु सूर्यस्य (२) पुरुत्रा च रश्मीननु द्यावापृथिवी आ ततान । आगत्य वाज्यध्वनः सर्वा मृधो वि धूनुते । अग्निꣳ सधस्थे महति चक्षुषा नि चिक्रीषते । आक्रम्य वाजिन्पृथिवीमग्निमिच्छ रुचा त्वम् । भूम्या वृत्वाय नो ब्रूहि यतः खनाम तं वयम् । द्यौस्ते पृष्ठं पृथिवी सधस्थमात्माऽन्तरिक्षꣳ समुद्रस्ते योनिः । विख्याय चक्षुषा त्वमभि तिष्ठ (३) पृतन्यतः । उत्क्राम महते सौभगायास्मादास्थानाद्द्रविणोदा वाजिन् । वयꣳ स्याम सुमतौ पृथिव्या अग्निं खनिष्यन्त उपस्थे अस्याः । उदक्रमीद्द्रविणोदा वाज्यर्वाऽकः स लोकꣳ सुकृतं पृथिव्याः । ततः खनेम सुप्रतीकमग्निꣳ सुवो रुहाणा अधि नाके उत्तमे । अपो देवीरुप सृज मधुमतीरयक्ष्माय प्रजाभ्यः । तासाꣳ स्थानादुज्जिहतामोषधयः सुपिप्पलाः। जिघर्मि (४) अग्निं मनसा घृतेन प्रतिक्ष्यन्तं भुवनानि विश्वा । पृथुं तिरश्चा वयसा बृहन्तं व्यचिष्ठमन्नꣳ रभसं विदानम् । आ

त्वा जिघर्मि वचसा घृतेनारक्षसा मनसा तज्जुषस्व । मर्यश्रीः स्पृहयद्वर्णो अग्निर्नाभिमृशे तनुवा जहृषाणः । परि वाजपतिः कविरग्निर्हव्यान्यक्रमीत् । दधद्रत्नानि दाशुषे । परि त्वाऽग्ने पुरं वयं विप्रꣳ सहस्य धीमहि । धृषद्वर्ण दिवेदिवे भेत्तारं भङ्गुरावतः । त्वमग्ने द्युभिस्त्वमाशुशुक्षणिस्त्वमद्भ्यस्त्वमश्मनस्परि । त्वं वनेभ्यस्त्वमोषधीभ्यस्त्वं नृणां नृपते जायसे शुचिः (५) ॥

(प्रतूर्वन्त्सूर्यस्य तिष्ठ जिघर्मि भेत्तारं विꣳशतिश्च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके प्रथमप्रपाठके द्वितीयोऽनुवाकः ॥ २ ॥

(अथ चतुर्थाष्टके प्रथमप्रपाठके द्वितीयोऽनुवाकः ।)

इमाम् । अगृभ्णन् । रशनाम् । ऋतस्य । पूर्वे । आयुषि । विदथेषु । कव्या । तया । देवाः । सुतम् । एति । बभूवुः । ऋतस्य । सामन् । सरम् । आरप्न्तीत्या—रप्न्ती । प्रतूर्तमिति प्र—तूर्तम् । वाजिन् । एति । द्रव । वरिष्ठाम् । अन्विति । संवतमिति सं—वतम् । दिवि । ते । जन्म । परमम् । अन्तरिक्षे । नाभिः । पृथिव्याम् । अधीति । योनिः । युञ्जाथाम् ।

रासभम् । युवम् । अस्मिन् । यामे । वृषण्वसू इति वृषण्—वसू । अग्निम् । भरन्तम् । अस्मयुमित्यस्म—युम् । योगेयोग इति योगे—योगे । तवस्तरमिति तवः—तरम् । वाजेवाज इति वाजे—वाजे । हवामहे । सखायः । इन्द्रम् । उतये । प्रतूर्वन्निति प्र—तूर्वन् (१) । एति । इहि । अवक्रामन्नित्यव—क्रामन् । अशस्तीः । रुद्रस्य । गार्णपत्यादिति गार्ण—पत्यात् । मयोभूरिति मयः—भूः । एति । इहि । उरु । अन्तरिक्षम् । अन्विति । इहि । स्वस्तिगव्यूतिरिति स्वस्ति—गव्यूतिः । अभयानि । कृण्वन् । पूष्णा । सयुजेति स—युजा । सह । पृथिव्याः । सधस्थादिति सध—स्थात् । अग्निम् । पुरीष्यम् । अङ्गिरस्वत् । अच्छ । इहि । अग्निम् । पुरीष्यम् । अङ्गिरस्वत् । अच्छ । इमः । अग्निम् । पुरीष्यम् । अङ्गिरस्वत् । भरिष्यामः । अग्निम् । पुरीष्यम् । अङ्गिरस्वत् । भरामः । अन्विति । अग्निः । उषसाम् । अग्रम् । अख्यत् । अन्विति । अहानि । प्रथमः । जातवेदा इति जात—वेदाः । अन्विति । सूर्यस्य (२) । पुरुत्रेति पुरु—त्रा । च । रश्मीन् । अन्विति । द्यावापृथिवी इति द्यावा—पृथिवी । एति । तनान् । आगत्येत्या—गत्य । वाजी ।

अध्वनः । सर्वाः । मृधः । वीति । धूनुते । अग्निम् । सधस्थ इति सध—स्थे । महति । चक्षुषा । नीति । चिकीषते । आक्रम्येत्या—क्रम्य । वाजिन् । पृथिवीम् । अग्निम् । इच्छ । रुचा । त्वम् । भूम्याः । वृत्वाय । नः । ब्रूहि । यतः । खनाम । तम् । वयम् । द्यौः । ते । पृष्ठम् । पृथिवी । सधस्थमिति सध—स्थम् । आत्मा । अन्तरिक्षम् । समुद्रः । ते । योनिः । विख्यायेति वि—ख्याय । चक्षुषा । त्वम् । अभीति । तिष्ठ (३) । पृतन्यतः । उदिति । क्राम । महते । सौभगाय । अस्मात् । आस्थानादित्या—स्थानात् । द्रविणोदा इति द्रविणः—दाः । वाजिन् । वयम् । स्याम । सुमताविति सु—मतौ । पृथिव्याः । अग्निम् । खनिष्यन्तः । उपस्थ इत्युप—स्थे । अस्याः । उदिति । अक्रमीत् । द्रविणोदा इति द्रविणः—दाः । वाजी । अर्वा । अकः । सः । लोकम् । सुकृतमिति सु—कृतम् । पृथिव्याः । ततः । खनेम । सुप्रतीकमिति सु—प्रतीकम् । अग्निम् । सुवः । रुहाणाः । अधीति । नाके । उत्तम इत्युत्—तमे । अपः । देवीः । उपेति । सृज । मधुमतीरिति

मधु—मतीः । अयक्ष्मायं । प्रजाभ्य इति प्र—जाभ्यः । तासाम् । स्थानात् । उदिति । जिहताम् । ओषधयः । सुपिप्पला इति सु—पिप्पलाः । जिघर्मि (४) । अग्निम् । मनसा । घृतेन । प्रतिक्ष्यन्तमिति प्रति—क्ष्यन्तम् । भुवनानि । विश्वा । पृथुम् । तिरश्चा । वयसा । बृहन्तम् । व्यचिष्ठम् । अन्नम् । रभसम् । विदानम् । एति । त्वा । जिघर्मि । वचसा । घृतेन । अरक्षसा । मनसा । तत् । जुषस्व । मर्यश्रीरिति मर्य—श्रीः । स्पृहयद्वर्ण इति स्पृहयत्—वर्णः । अग्निः । न । अभिमृश इत्यभि—मृशे । तनुवा । जर्हृषाणः । परीति । वाजपतिरिति वाज—पतिः । कविः । अग्निः । हव्यानि । अक्रमीत् । दधत् । रत्नानि । दाशुषे । परीति । त्वा । अग्ने । पुरम् । वयम् । विप्रम् । सहस्य । धीमहि । धृषद्वर्णमिति धृषत्—वर्णम् । दिवेदिव इति दिवे—दिवे । भेत्तारम् । भङ्गुरावत इति भङ्गुरा—वतः । त्वम् । अग्ने । द्युभिरिति द्यु—भिः । त्वम् । आशुशुक्षणिः । त्वम् । अद्भ्य इत्यत्—भ्यः । त्वम् । अश्मनः । परि । त्वम् । वनेभ्यः । त्वम् । ओषधीभ्य इत्योषधि—भ्यः । त्वम् । नृणाम् । नृपत इति नृ—पते । जायसे । शुचिः (५) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके प्रथमप्रपाठके द्वितीयोऽनुवाकः ॥ २ ॥

(अथ चतुर्थकाण्डे प्रथमप्रपाठके द्वितीयोऽनुवाकः ।)

प्रथमेऽनुवाकेऽभ्यादानमुक्तम् । अथ द्वितीये मृदाक्रान्तिरुच्यते । कल्पः—"इमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीꣳ रशनामादाय" इति । पाठस्तु—

इमामगृभ्णन्रशनामृतस्य पूर्व आयुषि विदथेषु कव्या । तया देवाः सुतमा बभूवुर्ऋतस्य सामन्त्सरमारपन्ती, इति ।

कवयो विद्वांस ऋत्विजस्तानर्हन्तीति कव्या यज्ञाः । कव्या विदथेषु कव्येषु यज्ञेषु ज्योतिष्टोमादिषु ऋतस्याऽऽयुषि आयुरागमनमश्वस्याऽऽगमने निमित्तभूते सति । ऋतशब्दो यज्ञवाची सन्नत्र तत्साधनमश्वमुपलक्षयति । पूर्वे महर्षय इमां रशनामगृभ्णन्स्वीकृतवन्तः । अयमर्थः—रशनया बद्धमश्वमानीय मृत्खननस्थाने तमश्वमाक्रमय्य तया मृदा निष्पन्नायामुखायामग्निमुत्पाद्येष्टकाचिते देशे ज्योतिष्टोमादय ऋत्विग्भिरनुष्ठेयाः । एतत्सर्वं मनसि निधाय पूर्वे महर्षयाऽश्वागमनं निमित्तीकृत्य रशनां स्वीकृतवन्त इति । षोऽन्तकर्मणीत्यस्माद्धातोरुत्पन्नत्वात्सामञ्शब्दोऽवसानवाची । ऋतस्य सामन्यज्ञस्य परिसमाप्तये सरं सरणमृत्विग्यजमानानां प्रवृत्तिमारपन्ती कथयन्ती प्रापयन्तीत्यर्थः । या रशना पूर्वोक्तरीत्या यज्ञसमाप्तिपर्यन्तं प्रवृत्तिकारिणी भवति तया रशनया पुरा देवाः सुतमाबभूवुः सोमयागं प्राप्नुयुः । तादृशीमिमां रशनां गृहीतवन्तः ॥

तमिमं मन्त्रं विनियुङ्क्ते—

" व्यृद्धं वा एतद्यज्ञस्य यदयजुष्केण क्रियत इमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादत्ते यजुष्कृत्यै यज्ञस्य समृद्ध्यै "[सं०का०५प्र०१अ०२] इति ।

यदङ्गमयजुष्केण मन्त्ररहितेन व्यापारेण निष्पाद्यते यज्ञस्य संबन्धि तदेतदङ्गं समृद्धिहीनमेव । तस्मादिमामिति मन्त्रमुच्चार्य रशनामाददीत । अश्वोऽ-

पूर्वं प्रशस्ताऽपि मध्यवर्तिन्यनुष्टुप्पुनरपि पार्श्वस्थाभ्यां सह प्रशस्यते। यज्ञनिष्पादकवाग्रूपत्वादनुष्टुभो यज्ञत्वम्। तस्मादुभयतो गायत्रीत्रिष्टुभोः पाठेन मध्यवर्तिनं यज्ञमेव तेजसा चैवेन्द्रियेण चोभयतः परिगृहीतवान्भवति॥

अत्र विनियोगसंग्रहः—

इमां रज्जुं समादाय प्रतू तुरगबन्धनम्।
युञ्जा गर्दभमाबध्य योगे यान्ति त्रिभिर्मृदम्॥ १॥
इमोन्तादग्निमित्यादेर्गमने द्वेष्यमन्त्रणम्।
ष्यामोन्तेन वपा जप्या रामोन्ताद्द्वेष्यमन्त्रणम्॥ २॥
अन्वग्नि गच्छेदागत्य द्वाभ्यामाक्रमयेद्ध्रुवम्।
द्यौस्तेऽश्वपृष्ठं संमार्ष्टि ह्युत्का द्वाभ्यां तदुत्क्रमः॥ ३॥
अपः पदेऽपो निनयेज्जिघद्वाभ्यां जुहोति हि।
परित्रिभिः परिलिखेदेकविंशतिरीरिताः॥ ४॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे प्रथमप्रपाठके द्वितीयोऽनुवाकः॥ २॥

(अथ चतुर्थाष्टके प्रथमप्रपाठके तृतीयोऽनुवाकः।)

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां पृथिव्याः सधस्थेऽग्निं पुरीष्यमङ्गिरस्वत्खनामि। ज्योतिष्मन्तं त्वाऽग्ने सुप्रतीकमजस्रेण भानुना दीद्यानम्। शिवं प्रजाभ्योऽहिꣳसन्तं पृथिव्याः सधस्थेऽग्निं पुरीष्यमङ्गिरस्वत्खनामि। अपां पृष्ठमसि सप्रथा उर्वीमग्निं भरिष्यदपरावपिष्ठम्। वर्धमानं महो आ च पुष्करं दिवो मात्रया वरिणा

---

१ क. घ. ङ. °सा. चेन्द्रि°। २ ख. °मृदा। इ°। ३ ख. च. °दुद्रमः।

प्रथस्व। शर्म च स्थः (१) वर्म च स्थो अच्छिद्रे बहुले उभे। व्यचस्वती सं वसाथां भर्तमग्निं पुरीष्यम्। सं वसाथाꣳ सुवर्विदा समीची उरसा त्मना। अग्निमन्तर्भरिष्यन्ती ज्योतिष्मन्तमजस्रमिद्। पुरीष्योऽसि विश्वभराः। अथर्वा त्वा प्रथमो निरमन्थदग्ने। त्वामग्ने पुष्करादध्यथर्वा निरमन्थत। मूर्ध्नो विश्वस्य वाघतः। तमु त्वा दध्यङ्ङृषिः पुत्र ईधे (२) अथर्वणः। वृत्रहणं पुरंदरम्। तमु त्वा पाथ्यो वृषा समीधे दस्युहन्तमम्। धनंजयꣳ रणेरणे। सीदं होतः स उ लोके चिकित्वान्त्सादया यज्ञꣳ सुकृतस्य योनौ। देवावीर्देवान्हविषा यजास्यग्ने बृहद्यजमाने वयो धाः। नि होता होतृषदने विदानस्त्वेषो दीदिवाꣳ असदत्सुदक्षः। अदब्धव्रतप्रमतिर्वसिष्ठः सहस्रंभरः शुचिजिह्वो अग्निः। सꣳ सीदस्व महाꣳ असि शोचस्व (३) देववीतमः। वि धूममग्ने अरुषं मियेध्य सृज प्रशस्त दर्शतम्। जनिष्वा हि जेन्यो अग्रे अह्नाꣳ हितो हितेष्वरुषो वनेषु।

दमेंदमे सप्त रत्ना दधानोऽग्निर्होता नि षसादा यजीयान् (४)॥

(स्थ ईधे शोचस्व सप्तविंशतिश्च।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहिताया चतुर्थाष्टके प्रथमप्रपाठके तृतीयोऽनुवाकः॥ ३॥

(अथ चतुर्थाष्टके प्रथमप्रपाठके तृतीयोऽनुवाकः।)

देवस्यं। त्वा। सवितुः। प्रसव इतिं प्र—सवे। अश्विनोः। बाहुभ्यामितिं बाहु—भ्याम्। पूष्णः। हस्तांभ्याम्। पृथिव्याः। सधस्थ इतिं सध—स्थे। अग्निम्। पुरीष्यंम्। अङ्गिरस्वत्। खनामि। ज्योतिंष्मन्तम्। त्वा। अग्ने। सुप्रतीकमितिं सु—प्रतीकम्। अजस्रेण। भानुना। दीद्यानम्। शिवम्। प्रजाभ्य इतिं प्र—जाभ्यः। अहिंस्सन्तम्। पृथिव्याः। सधस्थ इतिं सध—स्थे। अग्निम्। पुरीष्यंम्। अङ्गिरस्वत्। खनामि। अपाम्। पृष्ठम्। असि। सप्रथा इतिं स—प्रथाः। उरु। अग्निम्। भरिष्यत्। अपरावपिष्ठमित्यपरा—वपिष्ठम्। वर्धमानम्। महः। एतिं। च। पुष्करम्। दिवः। मात्रया। वरिणा। प्रथस्व। शर्मं। च। स्थः (१)। वर्मं। च। स्थः। अच्छिद्रे इतिं। बहुले

इतिं। उभे इतिं। व्यचस्वती इतिं। समितिं। वसाथाम्। भर्तम्। अग्निम्। पुरीष्यंम्। समितिं। वसाथाम्। सुवर्विदेतिं सुवः—विदा। समीची इतिं। उरसा। त्मना। अग्निम्। अन्तः। भरिष्यन्ती इतिं। ज्योतिंष्मन्तम्। अजस्रम्। इत्। पुरीष्यः। असि। विश्वभरा इतिं विश्व—भराः। अथर्वा। त्वा। प्रथमः। निरितिं। अमन्थत्। अग्ने। त्वाम्। अग्ने। पुष्करात्। अधीतिं। अथर्वा। निरितिं। अमन्थत। मूर्ध्नः। विश्वस्य। वाघतः। तम्। उ। त्वा। दध्यङ्। ऋषिः। पुत्रः। ईधे (२)। अथर्वणः। वृत्रहणमितिं वृत्र—हनम्। पुरंदरमितिं पुरं—दरम्। तम्। उ। त्वा। पाथ्यः। वृषा। समितिं। ईधे। दस्युहन्तंममितिं दस्यु—हन्तंमम्। धनंजयमितिं धनं—जयम्। रणेंरण इति रणें—रणे। सीदं। होतः। स्वे। उ। लोके। चिकित्वान्। सादय। यज्ञम्। सुकृतस्येतिं सु—कृतस्य। योनौ। देवावीरितिं देव—अवीः। देवान्। हविषा। यजासि। अग्ने। बृहत्। यजमाने। वयः। धाः। नीतिं। होता। होतृषदंन इतिं होतृ—सदंने। विदानः। स्वेषः। दीदिवान्। असदत्। सुदक्ष इतिं सु—दक्षः। अदंब्धव्रतप्रमति-

रित्यदब्धव्रत—प्रमतिः । वसिष्ठः । सहस्रंभर इति सहस्रं—भरः । शुचिंजिह्व इति शुचिं—जिह्वः । अग्निः । समितिं । सीदस्व । महान् । असि । शोचस्व (३) । देववीतंम इति देव—वीतंमः । वीतिं । धूमम् । अग्ने । अरुषम् । मियेध्य । सृज । प्रशस्तेतिं प्र—शस्त । दर्शतम् । जनिंष्व । हि । जेन्यः । अग्ने । अह्नां । हितः । हितेषु । अरुषः । वनेषु । दमेदम इति दमे—दमे । सप्त । रत्ना । दधानः । अग्निः । होता । नीतिं । ससाद । यजीयान् (४) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके प्रथमप्रपाठके तृतीयोऽनुवाकः ॥ ३ ॥

(अथ चतुर्थकाण्डे प्रथमप्रपाठके तृतीयोऽनुवाकः ।)

द्वितीये मृदाक्रमणमुक्तम् । अथ तृतीये खननमभिधीयते ।

कल्पः—" देवस्य त्वा सवितुः प्रसव इति द्वाभ्यां खनति " इति ।

प्रथममन्त्रपाठस्तु—

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बा-
हुभ्यां पूष्णो हस्ताभ्यां पृथिव्याः सध-
स्थेऽग्निं पुरीष्यमङ्गिरस्वत्खनामि।, इति ।

स्पष्टोऽर्थः ॥

द्वितीयमन्त्रपाठस्तु—

ज्योतिष्मन्तं त्वाऽग्ने सुप्रतीकमजस्रेण भानुना
दीद्यानम् । शिवं प्रजाभ्योऽहिꣳसन्तं पृथिव्याः

सधस्थेऽग्निं पुरीष्यमङ्गिरस्वत्खनामि । , इति ।

हेऽग्ने पृथिव्याः सधस्थ उपरिप्रदेशे पुरीष्यं पांसुयोग्यमग्निं त्वामङ्गिरस इवाहं खनामि । कीदृशं त्वां, ज्योतिष्मन्तं ज्वालायुक्तं, सुप्रतीकं सुमुखम्, अजस्रेण भानुना दीद्यानं निरन्तरं वर्तमानेन रश्मिना प्रकाशमानं प्रजाभ्यः प्रजोपकारार्थं शिवं शान्तमत एवाहिंसन्तं हिंसामकुर्वन्तम् ॥

एतन्मन्त्रद्वयसाध्यं खननं विधत्ते—

" देवस्य त्वा सवितुः प्रसव इति खनति प्रसूत्या अथो धूमपेवैतेन जनयति ज्योतिष्मन्तं त्वाऽग्ने सुप्रतीकमित्याह ज्योतिरेवैतेन जनयति " [सं० का० ५ प्र० १ अ० ४] इति ।

प्रथममन्त्रे सवितुः प्रसव इत्युच्चारणं प्रेरणाय संपद्यते । किं चैतेन मन्त्रेण धूममेवोत्पादयति नतु ज्वालां, तस्माद्द्वितीयमन्त्रादौ ज्योतिष्मन्तमित्येतेन शब्देन ज्योतिर्जनयत्येव ॥

तस्य मन्त्रस्य द्वितीयार्धे शिवशब्दतात्पर्यं दर्शयति—

" सोऽग्निर्जातः प्रजाः शुचार्पयत्तं देवा अर्धर्चेनाशमयञ्छिवं प्रजाभ्योऽहिꣳसन्तमित्याह प्रजाभ्य एवैनꣳ शमयति " [सं०का०५प्र०१अ०४]इति ।

ज्वालासहित उत्पन्नमात्रेणैव प्रजाः सर्वाः संतापेनायोजयत्तं तादृशमग्निं शिवमित्यार्धर्चेन देवाः शान्तमकुर्वन् । तस्मादस्यार्धर्चस्य पाठेन प्रजोपकारायैवैनं शान्तं करोति ॥

मन्त्रद्वित्वं प्रशंसति—

" द्वाभ्यां खनति प्रतिष्ठित्यै " [सं० का० ५ प्र० १ अ० ४] इति ॥

कल्पः—" अपां पृष्ठमसीति पुष्करपर्णमाहृत्यैतयैव विवेष्ट्य " इति ।

मृदं प्रक्षेप्तुं पुटिकां कृत्वेत्यर्थः ।

पाठस्तु—

अपां पृष्ठमसि सप्रथा उर्वग्निं भरिष्यद-
परावपिष्ठम् । वर्धमानं मह आ च
पुष्करं दिवो मात्रया वरिणा प्रथस्व।, इति ।

हे पुष्करपर्ण त्वमपां पृष्ठमसि पृष्ठवदुपरिभागे वर्तमानमसि । कीदृशं त्वम् । सप्रथाः सविस्तारमत एवोर्वग्निं भरिष्यदग्निसाधनमृदं बहुलं यथा भवति तथा भरितुं समर्थम् । अपरावपिष्ठं परावपो विनाशः, अतिशयेन तद्रहितम् । वर्धमानमप्संबन्धादिने दिने वृद्धियुक्तं, महो निर्लेपत्वाद्युक्त्या पूजनीयं, पुष्कर-

"यं कामयेत वसीयान्त्स्यादित्युभयीभिस्तस्य सं भरेत्तेजश्चैवास्मा इन्द्रियं च समीची दधाति" [सं० का० ५ प्र० १ अ० ४] इति।

तत्र गायत्रीभिस्तेजःप्राप्तिस्त्रिष्टुग्भिरिन्द्रियप्राप्तिः॥

समुचितमन्त्रगतामष्टत्वसंख्यां प्रशंसति—

"अष्टाभिः सं भरत्यष्टाक्षरा गायत्री गायत्रोऽग्निर्यावानेवाग्निस्तꣳ सं भरति" [सं० का० ५ प्र० १ अ० ४] इति॥

चतस्रस्त्रिष्टुभः प्रत्येकं क्रमेण प्रशंसति—

"सीद होतरित्याह देवता एवास्मै सꣳ सादयति नि होतेतिमनुष्यान्त्सꣳ सीदस्वेति वयाꣳसि जनिष्ठा हि जेन्यो अग्ने अह्नामित्याह देवमनुष्यानेवास्मै सꣳसन्नान्प्र जनयति" [सं० का० ५ प्र० १ अ० ४] इति।

सीद होतरित्येतस्यां प्रथमायां त्रिष्टुभि देवावीरिति पदेन देवतानां संसादनं सूचितम्। यद्वा देवान्हविषा यजासीत्यनेन तत्सूचितम्। निहोतेत्यस्यां द्वितीयायां त्रिष्टुभि होतृषदन इति पदेन होत्रादीनां मनुष्याणां संसादनं सूचितम्। सꣳ सीदस्वेत्यस्यां तृतीयायां त्रिष्टुभि धूमं विसृजेत्येवमन्तरिक्षगामिना(णा) धूमेनान्तरिक्षचारिणां पक्षिणां सूचितत्वात्तेषां संसादनमुक्तम्। जनिष्वेत्यस्यां चतुर्थ्यां त्रिष्टुभि जनिष्वेत्युत्पादनस्य सूचितत्वात्पूर्वोक्तान्संसन्नान्देवान्मनुष्यांस्तदुपलक्षितानि वयांसि च प्रकर्षेण जनयति॥

अत्र विनियोगसंग्रहः—

देव द्वाभ्यां खनेच्चापां पद्मपत्रं समाहरेत्।
शर्म द्वाभ्यां चर्मपत्रे स्तृणात्यथ पुरीष्यतः॥ १॥
चतुष्टय्या संभरति विप्रस्य क्षत्रियस्य तु।
सीदेत्यादिचतुष्केण मन्त्रा द्वादश वर्णिताः॥ २॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे प्रथमप्रपाठके तृतीयोऽनुवाकः॥ ३॥

अथ चतुर्थकाण्डे प्रथमप्रपाठके चतुर्थोऽनुवाकः।

सं ते वायुर्मातरिश्वा दधातूत्तानायै हृदयं

---

१ ख. °ष्टुब्भिरि°। २ ख. च. ष्टसं°। ३ ख. च. °कं प्र°। ४ ख. च. °न्देवमनु°। ५ ख. च. °रीत्यतः। ६ ख. च. °ष्टयात्सम°।

यद्विलिष्टम्। देवानां यश्चरति प्राणथेन तस्मै च देवि वषडस्तु तुभ्यम्। सुजातो ज्योतिषा सह शर्म वरूथमाऽसदः सुवः। वासो अग्ने विश्वरूपꣳ सं व्ययस्व विभावसो। उदु तिष्ठ स्वध्वरावा नो देव्या कृपा। दृशे चं मासा बृहता सुशुक्वनिराऽग्ने याहि सुशस्तिभिः (१) ऊर्ध्व ऊ षु णं ऊतये तिष्ठा देवो न सविता। ऊर्ध्वो वाजस्य सनिता यदञ्जिभिर्वाघद्भिर्विह्वयामहे। स जातो गर्भो असि रोदस्योरग्ने चारुर्विभृत ओषधीषु। चित्रः शिशुः परि तमाꣳस्यक्तः प्र मातृभ्यो अधि कनिक्रदद्गाः। स्थिरो भव वीड्वङ्ग आशुर्भव वाज्यर्वन्। पृथुर्भव सुषदस्त्वमग्नेः पुरीषवाहनः। शिवो भव (२) प्रजाभ्यो मानुषीभ्यस्त्वमङ्गिरः। मा द्यावापृथिवी अभि शूशुचो माऽन्तरिक्षं मा वनस्पतीन्। प्रेतु वाजी कनिक्रदन्नानदद्रासभः पत्वा। भरन्नग्निं पुरीष्यं मा पाद्यायुषः पुरा। रासभो वां कनिक्रदत्सुयुक्तो वृषणा रथे। स वामग्निं पुरीष्यमाशुर्दूतो वहादितः। वृषाऽग्निं वृषणं भरन्नपां गर्भꣳ समुद्रियम्। अग्न आ

यांहि (३) वीतयं ऋतꣳ सत्यम् । ओषधयः प्रतिं गृह्णीताग्निमेतꣳ शिवमायन्तंमभ्यत्रं युष्मान् । व्यस्यन्विश्वा अमतीररातीर्निषीदन्नो अपं दुर्मतिꣳ हनत् । ओषधयः प्रतिं मोदध्वमेनं पुष्पावतीः सुपिप्पलाः । अयं वो गर्भ ऋत्वियः प्रत्नꣳ सधस्थमाऽसदत् (४)॥

(सुशस्तिभिः शिवो भव याहि षट्त्रिꣳशच्च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके प्रथमप्रपाठके चतुर्थोऽनुवाकः ॥ ४ ॥

(अथ चतुर्थाष्टके प्रथमप्रपाठके चतुर्थोऽनुवाकः ।)

समितिं । ते । वायुः । मातरिश्वा । दधातु । उत्तानाया इत्युत्—तानायैं । हृदयम् । यत् । विलिंष्टमिति वि—लिष्टम् । देवानाम् । यः । चरंति । प्राणथेनेतिं प्र—अनथेन । तस्मै । च । देवी । वषट् । अस्तु । तुभ्यंम् । सुजात इति सु—जातः । ज्योतिंषा । सह । शर्म । वरूथम् । एतिं । असदः । सुवः । वासः । अग्ने । विश्वरूपमितिं विश्व—रूपम् । समितिं । व्ययस्व । विभावसो इतिं विभा—वसो । उदितिं । उ । तिष्ठ । स्वध्वरेतिं सु—अध्वर । अवं । नः । देव्या । कृपा । दृशे । च । भासा । बृहता ।

सुशुक्रनिरितिं सु—शुक्रनिः । एतिं । अग्ने । याहि । सुशस्तिभिरितिं सुशस्ति—भिः (१) । ऊर्ध्वः । उ । स्वितिं । नः । ऊतयें । तिष्ठ । देवः । न । सविता । ऊर्ध्वः । वाजस्य । सनिता । यत् । अञ्जिभिरित्यञ्जि—भिः । वाघद्भिरितिं वाघत्—भिः । विह्वयामहे इतिं वि—ह्वयामहे । सः । जातः । गर्भः । असि । रोदस्योः । अग्ने । चारुः । विभृत इति वि—भृतः । ओषधीषु । चित्रः । शिशुः । परीतिं । तमाꣳसि । अक्तः । प्रेतिं । मातृभ्य इतिं मातृ—भ्यः । अधीतिं । कनिक्रदत् । गाः । स्थिरः । भव । वीड्वङ्ग इतिं वीडु—अङ्गः । आशुः । भव । वाजी । अर्वन् । पृथुः । भव । सुषद इतिं सु—सदः । त्वम् । अग्नेः । पुरीषवाहन इतिं पुरीष—वाहनः । शिवः । भव (२)॥ प्रजाभ्य इतिं प्र—जाभ्यः । मानुषीभ्यः । त्वम् । अङ्गिरः । मा । द्यावापृथिवी इति द्यावा—पृथिवी । अभीतिं । शूशुचः । मा । अन्तरिक्षम् । मा । वनस्पतीन् । प्रेतिं । एतु । वाजी । कनिक्रदत् । नानदत् । रासभः । पत्वा । भरन् । अग्निम् । पुरीष्यम् । मा । पादि । आयुषः । पुरा । रासभः । वाम् । कनिक्रदत् । सुयुक्त इति सु—युक्तः । वृषणा । रथे ।

सः । वाम् । अग्निम् । पुरीष्यम् । आशुः । दूतः ।
वहात् । इतः । वृषा । अग्निम् । वृषणम् । भरन् ।
अपाम् । गर्भम् । समुद्रियम् । अग्ने । एति । याहि
(३) । वीतये । ऋतम् । सत्यम् । ओषधयः ।
प्रतीति । गृह्णीत । अग्निम् । एतम् । शिवम् ।
आयन्तमित्या—यन्तम् । अभीति । अत्र । युष्मान् ।
व्यस्यन्निति वि—अस्यन् । विश्वाः । अमतीः ।
अरातीः । निषीदन्निति नि—सीदन् । नः । अपेति ।
दुर्मतिमिति दुः—मतिम् । हनत् । ओषधयः ।
प्रतीति । मोदध्वम् । एनम् । पुष्पावतीरिति पुष्प—
वतीः । सुपिप्पला इति सु—पिप्पलाः । अयम् ।
वः । गर्भः । ऋत्वियः । प्रत्नम् । सधस्थमिति
सध—स्थम् । एति । असदत् (४) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके
प्रथमप्रपाठके चतुर्थोऽनुवाकः ॥ ४ ॥

(अथ चतुर्थकाण्डे प्रथमप्रपाठके चतुर्थोऽनुवाकः ।)

तृतीयानुवाके मृत्खननमुक्तम् । अथ चतुर्थे मृदाहरणमुच्यते ।
कल्पः—" सं ते वायुरिति मृत्खनेऽप आनीय " इति ।
पाठस्तु—

सं ते वायुर्मातरिश्वा दधातूत्तानायै हृदयं

(उखानिर्माणाभिधानम्)

द्वितीयपादे सुपिप्पलशब्दतात्पर्यं दर्शयति—

" पुष्पावतीः सुपिप्पला इत्याह तस्मादोषधयः फलं गृह्णन्ति " [सं० का० ५ प्र० १ अ० ५] इति ।

यस्मादत्र सुपिप्पला इत्युक्तं तस्माल्लोकेऽप्योषधयः स्वकाले संपूर्णं फलं गृह्णन्ति ॥

द्वितीयार्धे सधस्थमाऽसददित्यस्य तात्पर्यं दर्शयति—

" अयं वो गर्भ ऋत्वियः प्रत्नꣳ सधस्थमासददित्याह याभ्य एवैनं प्रच्यावयति तास्वेवैनं प्रति ष्ठापयति " [सं० का० ५ प्र० १ अ० ५] इति ।

मृत्खनेनभूमौ पूर्वमुत्पन्नाभ्यो याभ्य ओषधीभ्यः प्रच्याव्यायमग्निरानीतस्तमग्निमुपावहरणप्रदेशे तास्वेवौषधिजातिषु स्थापितवान्भवति ॥

ओषधयः प्रतिगृह्णीतेत्यादिकं मन्त्रद्वयं विनियुङ्क्ते—

" द्वाभ्यामुपावहरति प्रतिष्ठित्यै " [सं० का० ५ प्र० १ अ० ५] इति ॥

अत्र विनियोगसंग्रहः—

" सं मृत्खनेऽपो निनयेत्सुजा[1] संभृतबन्धम् ।
उदुद्वाभ्यां समुत्थाय सजातस्त्वाहरेन्मृदम् ॥ १ ॥
स्थिरो गर्दभ आधाय शिव आहितमन्त्रणम् ।
प्रैतुत्रिभिः शनैर्याति ह्योषद्वाभ्यामिमां मृदम् ।
उपाहरेदोषधीषु मन्त्रा द्वादश वर्णिताः ॥ २ ॥ " इति ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे प्रथमप्रपाठके
चतुर्थोऽनुवाकः ॥ ४ ॥

(अथ चतुर्थकाण्डे प्रथमप्रपाठके पञ्चमोऽनुवाकः ।)

वि पाजसा पृथुना शोशुचानो बाधस्व
द्विषो रक्षसो अमीवाः । सुशर्मणो बृहतः
शर्मणि स्याममेरहꣳ सुहवस्य प्रणीतौ । आपो

---

१ च. °नभू' । २ ख. च. °षधीषु । ३ ख. ज. °जातो हृत' ।

हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन । महे
रणाय चक्षसे । यो वः शिवतमो रसस्तस्य
भाजयतेह नः । उशतीरिव मातरः । तस्मा
अरं गमाम वो यस्य क्षयाय जिन्वथ । आपो
जनयथा च नः । मित्रः (१) संसृज्य
पृथिवीं भूमिं च ज्योतिषा सह । सुजातं जात-
वेदसमग्निं वैश्वानरं विभुम् । अयक्ष्माय त्वा
सं सृजामि प्रजाभ्यः । विश्वे त्वा देवा वैश्वा-
नराः सं सृजन्त्वानुष्टुभेन छन्दसाऽङ्गिरस्वत् ।
रुद्राः संभृत्य पृथिवीं बृहज्ज्योतिः समीधिरे ।
तेषां भानुरजस्र इच्छुक्रो देवेषु रोचते । सं-
सृष्टां वसुभी रुद्रैर्धीरैः कर्मण्यां मृदम् ।
हस्ताभ्यां मृद्वीं कृत्वा सिनीवाली करोतु (२)
ताम् । सिनीवाली सुकपर्दा सुकुरीरा
स्वौपशा । सा तुभ्यमदिते मह ओखां दधातु
हस्तयोः । उखां करोतु शक्त्या बाहुभ्याम-
दितिर्धिया । माता पुत्रं यथोपस्थे साऽग्निं
बिभर्तु गर्भ आ । मखस्य शिरोऽसि यज्ञस्य
पदे स्थः । वसवस्त्वा कृण्वन्तु गायत्रेण छन्द-
साऽङ्गिरस्वत्पृथिव्यसि रुद्रास्त्वा कृण्वन्तु त्रैष्टु-

भेन छन्दसाऽङ्गिरस्वदन्तरिक्षमसि (३)
आदित्यास्त्वा कृण्वन्तु जागतेन छन्दसाऽङ्गि-
रस्वद्द्यौरसि विश्वे त्वा देवा वैश्वानराः कृण्व-
न्त्वानुष्टुभेन छन्दसाऽङ्गिरस्वद्दिशोऽसि ध्रुवाऽसि
धारया मयि प्रजाꣳ रायस्पोषं गौपत्यꣳ सुवी-
र्यꣳ सजातान्यजमानायादित्यै रास्नाऽस्यदि-
तिस्ते बिलं गृह्णातु पाङ्क्तेन छन्दसाऽङ्गिर-
स्वत् । कृत्वाय सा महीमुखां मृन्मयीं योनि-
मग्नये । तां पुत्रेभ्यः सं प्रायच्छददितिः श्रप-
यानितिं (४)॥

(मित्रः करोत्वन्तरिक्षमसि प्र चत्वारिं च।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके
प्रथमप्रपाठके पञ्चमोऽनुवाकः॥ ५॥

(अथ चतुर्थाष्टके प्रथमप्रपाठके पञ्चमोऽनुवाकः।)

वीतिं। पाजसा। पृथुना। शोशुचानः। बाधस्व।
द्विषः। रक्षसः। अमीवाः। सुशर्मण इतिं सु—
शर्मणः। बृहतः। शर्मणि। स्याम्। अग्नेः। अहम्।
सुहवस्येतिं सु—हवस्य। प्रणीताविति प्र—नीतौ।
आपः। हि। स्थ। मयोभुव इतिं मयः—भुवः।
ताः। नः। ऊर्जे। दधातन। महे। रणाय। चक्षसे।

यः । वः । शिवतम इति शिव—तमः । रसः । तस्य । भाजयत । इह । नः । उशतीः । इव । मातरः । तस्मै । अरम् । गमाम । वः । यस्य । क्षयाय । जिन्वथ । आपः । जनयथ । च । नः । मित्रः (१) । संसृज्येति सं—सृज्य । पृथिवीम् । भूमिम् । च । ज्योतिषा । सह । सुजातमिति सु—जातम् । जातवेदसमिति जात—वेदसम् । अग्निम् । वैश्वानरम् । विभुमिति वि—भुम् । अयक्ष्माय । त्वा । समिति । सृजामि । प्रजाभ्य इति प्र—जाभ्यः । विश्वे । त्वा । देवाः । वैश्वानराः । समिति । सृजन्तु । आनुष्टुभेनेत्यानु—स्तुभेन । छन्दसा । अङ्गिरस्वत् । रुद्राः । संभृत्येति सं—भृत्य । पृथिवीम् । बृहत् । ज्योतिः । समिति । ईधिरे । तेषाम् । भानुः । अजस्रः । इत् । शुक्रः । देवेषु । रोचते । संसृष्टामिति सं—सृष्टाम् । वसुभिरिति वसु—भिः । रुद्रैः । धीरैः । कर्मण्याम् । मृदम् । हस्ताभ्याम् । मृद्वीम् । कृत्वा । सिनीवाली । करोतु (२) । ताम् । सिनीवाली । सुकपर्देति सु—कपर्दा । सुकुरीरेति सु—कुरीरा । स्वौपशेति सु—औपशा । सा । तुभ्यम् । अदिते । महे । एति । उखाम् । दधातु । हस्तयोः ।

उखाम् । करोतु । शक्त्या । बाहुभ्यामिति बाहु—भ्याम् । अदितिः । धिया । माता । पुत्रम् । यथा । उपस्थ इत्युप—स्थे । सा । अग्निम् । बिभर्तु । गर्भे । आ । मखस्य । शिरः । असि । यज्ञस्य । पदे इति । स्थः । वसवः । त्वा । कृण्वन्तु । गायत्रेण । छन्दसा । अङ्गिरस्वत् । पृथिवी । असि । रुद्राः । त्वा । कृण्वन्तु । त्रैष्टुभेन । छन्दसा । अङ्गिरस्वत् । अन्तरिक्षम् । असि (३) । आदित्याः । त्वा । कृण्वन्तु । जागतेन । छन्दसा । अङ्गिरस्वत् । द्यौः । असि । विश्वे । त्वा । देवाः । वैश्वानराः । कृण्वन्तु । आनुष्टुभेनेत्यानु—स्तुभेन । छन्दसा । अङ्गिरस्वत् । दिशः । असि । ध्रुवा । असि । धारय । मयि । प्रजामिति प्र—जाम् । रायः । पोषम् । गौपत्यम् । सुवीर्यमिति सु—वीर्यम् । सजातानिति स—जातान् । यजमानाय । अदित्यै । रास्ना । असि । अदितिः । ते । बिलम् । गृह्णातु । पाङ्क्तेन । छन्दसा । अङ्गिरस्वत् । कृत्वाय । सा । महीम् । उखाम् । मृन्मयीमिति मृत्—मयीम् । योनिम् । अग्नये । ताम् । पुत्रेभ्यः । सम् । प्रेति । अयच्छत् । अदितिः । श्रपयान् । इति (४) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके प्रथमप्रपाठके पञ्चमोऽनुवाकः ॥ ५ ॥

कृत्वाय सा महीमुखां मृन्मयीं योनिमग्नये । तां
पुत्रेभ्यः सं प्रायच्छददितिः श्रपयानिति॥, इति ॥

सेयमदितिर्मृन्मयीं मृत्कार्यामग्नये योनिमग्नेः कारणभूतां महीं महतीमुखां कृत्वाय निष्पाद्य ततस्तामुखां पुत्रेभ्यः स्वपुत्रसदृशेभ्यः श्रपणकारिभ्यः संप्रायच्छत्सम्यग्दत्तवती । किं ब्रुवतीति तदुच्यते—श्रपयानिति श्रपयन्तु भवन्त इति ब्रुवती ॥

तमेतं मन्त्रं विनियुङ्क्ते—

" कृत्वाय सा महीमुखामिति नि दधाति देवतास्वेवैनां प्रति ष्ठापयति "
[सं० का० ५ प्र० १ अ० ६] इति ।

अदितिपुत्राणां देवतारूपत्वादेवतासु प्रतिष्ठापनं संपद्यते ॥

अत्र विनियोगसंग्रहः—

वि पा विस्रंसयेदापस्त्रिभिर्मृदि जलं क्षिपेत् ।
मित्रोद्वाभ्यां शर्करादियोगो रुद्रेति संक्षिपेत् ॥ १ ॥
संसृत्रिभिर्मृत्तिकां तामुखाकर्त्रे प्रयच्छति ।
मख पिण्डकृतिर्यज्ञ चर्मपर्णाभिमर्शनम् ॥ २ ॥
कुर्याद्वसचतुर्भिस्तां ध्रुवाऽसीत्यनुषज्यते ।
अदि रास्नामदि बिलं कुर्यात्कृत्वाय तामुखाम् ॥
सिकतासु स्थापयीत मन्त्रा एकोनविंशतिः ॥ ३ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे प्रथमप्रपाठके
पञ्चमोऽनुवाकः ॥ ५ ॥

(अथ चतुर्थाष्टके प्रथमप्रपाठके षष्ठोऽनुवाकः ।)

वसवस्त्वा धूपयन्तु गायत्रेण छन्दसाऽङ्गि-
रस्वद्रुद्रास्त्वा धूपयन्तु त्रैष्टुभेन छन्दसाऽङ्गिर-
स्वदादित्यास्त्वा धूपयन्तु जागतेन छन्दसाऽ-
ङ्गिरस्वद्विश्वे त्वा देवा वैश्वानरा धूपयन्त्वानु-

१ ख. च. किं कुर्वती' ।

ष्टुभेन छन्दसाऽङ्गिरस्वदिन्द्रस्त्वा धूपयत्वङ्गिर-
स्वद्विष्णुस्त्वा धूपयत्वङ्गिरस्वद्बृहस्पतिस्त्वा धूप-
यत्वङ्गिरस्वददितिस्त्वा देवी विश्वदेव्यावती
पृथिव्याः सधस्थेऽङ्गिरस्वत्खनत्ववट देवानां
त्वा पत्नीः (१) देवीर्विश्वदेव्यावतीः
पृथिव्याः सधस्थेऽङ्गिरस्वद्ध्रुवे धिषणास्त्वा
देवीर्विश्वदेव्यावतीः पृथिव्याः सधस्थेऽङ्गिरस्व-
दभीन्धतामुखे ग्नास्त्वा देवीर्विश्वदेव्यावतीः
पृथिव्याः सधस्थेऽङ्गिरस्वच्छ्रपयन्तूखे वरूत्रयो
जनयस्त्वा देवीर्विश्वदेव्यावतीः पृथिव्याः सध-
स्थेऽङ्गिरस्वत्पचन्तूखे । मित्रैतामुखां पचैषा
मा भेदि । एतां ते परिं ददाम्यभित्त्यै ।
अभीमाम् (२) महिना दिवं मित्रो बभूव
सप्रथाः । उत श्रवसा पृथिवीम् । मित्रस्य
चर्षणीधृतः श्रवो देवस्य सानसिम् । द्युम्नं
चित्रश्रवस्तमम् । देवस्त्वा सवितोद्वपतु सुपाणिः
स्वङ्गुरिः । सुबाहुरुत शक्त्या । अपद्यमाना
पृथिव्याशा दिश आ पृण । उत्तिष्ठ बृहती
भवोर्ध्वा तिष्ठ ध्रुवा त्वम् । वसवस्त्वाऽऽ
च्छृन्दन्तु गायत्रेण छन्दसाऽङ्गिरस्वद्रुद्रास्त्वाऽऽ

च्छृन्दन्तु त्रैष्टुभेन छन्दसाऽङ्गिरस्वदादित्या-
स्त्वाऽऽ च्छृन्दन्तु जागतेन छन्दसाऽङ्गिरस्व-
द्विश्वे त्वा देवा वैश्वानरा आ च्छृन्दन्त्वानुष्टु-
भेन छन्दसाऽङ्गिरस्वत् (३)॥

(पत्नीरिमाश्च रुद्रास्त्वाऽऽ च्छृन्दन्त्वेकान्नविंशतिश्च।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके
प्रथमप्रपाठके षष्ठोऽनुवाकः॥ ६॥

(अथ चतुर्थाष्टके प्रथमप्रपाठके षष्ठोऽनुवाकः।)

वसवः। त्वा। धूपयन्तु। गायत्रेण। छन्दसा।
अङ्गिरस्वत्। रुद्राः। त्वा। धूपयन्तु। त्रैष्टुभेन।
छन्दसा। अङ्गिरस्वत्। आदित्याः। त्वा। धूप-
यन्तु। जागतेन। छन्दसा। अङ्गिरस्वत्। विश्वे।
त्वा। देवाः। वैश्वानराः। धूपयन्तु। आनुष्टुभेनेत्या-
नु—स्तुभेन। छन्दसा। अङ्गिरस्वत्। इन्द्रः। त्वा।
धूपयतु। अङ्गिरस्वत्। विष्णुः। त्वा। धूपयतु।
अङ्गिरस्वत्। वरुणः। त्वा। धूपयतु। अङ्गिरस्वत्।
अदितिः। त्वा। देवी। विश्वदेव्यावतीति विश्वदे-
व्य—वती। पृथिव्याः। सधस्थ इति सध—स्थे।
अङ्गिरस्वत्। खनतु। अवट। देवानाम्। त्वा।
पत्नीः (१)। देवीः। विश्वदेव्यावतीरिति विश्व-

देव्य—वतीः। पृथिव्याः। सधस्थ इति सध—स्थे।
अङ्गिरस्वत्। दधतु। उखे। धिषणाः। त्वा। देवीः।
विश्वदेव्यावतीरिति विश्वदेव्य—वतीः। पृथिव्याः।
सधस्थ इति सध—स्थे। अङ्गिरस्वत्। अभीति।
इन्धताम्। उखे। ग्नाः। त्वा। देवीः। विश्वदेव्या-
वतीरिति विश्वदेव्य—वतीः। पृथिव्याः। सधस्थ इति
सध—स्थे। अङ्गिरस्वत्। श्रपयन्तु। उखे। वरूत्रयः।
जनयः। त्वा। देवीः। विश्वदेव्यावतीरिति विश्वदे-
व्य—वतीः। पृथिव्याः। सधस्थ इति सध—स्थे।
अङ्गिरस्वत्। पचन्तु। उखे। मित्र। एताम्। उखा-
म्। पच। एषा। मा। भेदि। एताम्। ते। परी-
ति। ददामि। अभित्यै। अभीति। इमाम्(२)।
महिना। दिवम्। मित्रः। बभूव। सप्रथा इति स—
प्रथाः। उत। श्रवसा। पृथिवीम्। मित्रस्य। चर्ष-
णीधृत इति चर्षणि—धृतः। श्रवः। देवस्य। सान-
सिम्। द्युम्नम्। चित्रश्रवस्तममिति चित्रश्रवः—
तमम्। देवः। त्वा। सविता। उदिति। वपतु।
सुपाणिरिति सु—पाणिः। स्वङ्गुरिरिति सु—अङ्-
गुरिः। सुबाहुरिति सु—बाहुः। उत। शक्त्या।
अपद्यमाना। पृथिवि। आशाः। दिशः। एति।

पृण । उदितिं । तिष्ठ । बृहती । भव । ऊर्ध्वा । तिष्ठ । ध्रुवा । त्वम् । वसवः । त्वा । एतिं । छृन्दन्तु । गायत्रेण । छन्दसा । अङ्गिरस्वत् । रुद्राः । त्वा । एतिं । छृन्दन्तु । त्रैष्टुभेन । छन्दसा । अङ्गिरस्वत् । आदित्याः । त्वा । एतिं । छृन्दन्तु । जागतेन । छन्दसा । अङ्गिरस्वत् । विश्वे । त्वा । देवाः । वैश्वानराः । एतिं । छृन्दन्तु । आनुष्टुभेनेत्यानुं—स्तुभेन । छन्दसा । अङ्गिरस्वत् (३) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके प्रथमप्रपाठके षष्ठोऽनुवाकः ॥ ६ ॥

(अथ चतुर्थकाण्डे प्रथमप्रपाठके षष्ठोऽनुवाकः ।)

पञ्चमेऽनुवाक उखानिर्माणमुक्तम् । अथ षष्ठे तत्संस्कारोऽभिधीयते ।

कल्पः—" वसवस्त्वा धूपयन्तु गायत्रेण छन्दसेति सप्तभिरश्वशकेनोखां धूपयन्ति " इति ।

पाठस्तु—

वसवस्त्वा धूपयन्तु गायत्रेण छन्दसाऽङ्गिरस्वद्रुद्रास्त्वा धूपयन्तु त्रैष्टुभेन छन्दसाऽङ्गिरस्वदादित्यास्त्वा धूपयन्तु जागतेन छन्दसाऽङ्गिरस्वद्विश्वे त्वा देवा वैश्वानरा धूपयन्त्वानुष्टुभेन छन्दसाऽङ्गिरस्वदिन्द्रस्त्वा धूपयत्वङ्गिरस्वद्विष्णुस्त्वा धूपयत्वङ्गिरस्वद्बृहस्पतिस्त्वा धूपयत्वङ्गिरस्वत् , इति ।

(पञ्चपश्वङ्गभूताग्निकसामिधेन्यभिधानम्)

(अथ चतुर्थकाण्डे प्रथमप्रपाठके सप्तमोऽनुवाकः ।)

समास्त्वाऽग्न ऋतवो वर्धयन्तु संवत्सरा ऋषयो यानि सत्या । सं दिव्येन दीदिहि रोचनेन विश्वा आ भाहि प्रदिशः पृथिव्याः । सं चेध्यस्वाग्ने प्र च बोधयैनमुच्चा तिष्ठ महते सौभगाय । मा च रिषदुपसत्ता ते अग्ने ब्रह्माणस्ते यशसः सन्तु माऽन्ये । त्वामग्ने वृणते ब्राह्मणा इमे शिवो अग्ने (१)। संवरणे भवा नः । सपत्नहा नो अभिमातिजिच्च स्वे गये जागृह्यप्रयुच्छन् । इहैवाग्ने अधि धारया रयिं मा त्वा नि क्रन्पूर्वचितो निकारिणः । क्षत्रमग्ने सुयममस्तु तुभ्यमुपसत्ता वर्धतां ते अनिष्टृतः । क्षत्रेणाग्ने स्वायुः सꣳ रभस्व मित्रेणाग्ने मित्रधेये यतस्व । सजातानां मध्यमस्थाएधि राज्ञामग्ने विहव्यो दीदिहीह । अति (२) निहो अति स्निधोऽत्यचित्तिमत्यरातिमग्ने । विश्वा ह्यग्ने दुरिता सहस्वाथास्मभ्यꣳ सहवीराꣳ रयिं दाः । अनाधृष्यो जातवेदा अनिष्टृतो विराडग्ने क्षत्रभृद्दीदिहीह । विश्वा आशाः प्रमुञ्चन्मानुषीभ्यः शिवाभिरद्य परि पाहि

नो वृधे । बृहस्पते सवितर्बोधयैनꣳ सꣳशितं चित्संतराꣳ सꣳ शिशाधि । वर्धयैनं महते सौभगाय (३) विश्व एनमनु मदन्तु देवाः । अमुत्र भूयादध यद्यमस्य बृहस्पते अभिशस्तेरमुञ्चः । प्रत्यौहतामश्विना मृत्युमस्माद्देवानामग्ने भिषजा शचीभिः । उद्वयं तमसस्परि पश्यन्तो ज्योतिरुत्तरम् । देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम् (४) ॥

(इमे शिवो अग्नेऽति सौभगाय चतुस्त्रिꣳशच्च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके प्रथमप्रपाठके सप्तमोऽनुवाकः ॥ ७ ॥

(अथ चतुर्थाष्टके प्रथमप्रपाठके सप्तमोऽनुवाकः ।)

समाः । त्वा । अग्ने । ऋतवः । वर्धयन्तु । संवत्सरा इति सं—वत्सराः । ऋषयः । यानि । सत्या । समिति । दिव्येन । दीदिहि । रोचनेन । विश्वाः । एति । भाहि । प्रदिश इति प्र—दिशः । पृथिव्याः । समिति । च । इध्यस्व । अग्ने । प्रेति । च । बोधय । एनम् । उदिति । च । तिष्ठ । महते । सौभगाय । मा । च । रिषत् । उपसत्तेत्युप—सत्ता । ते । अग्ने । ब्रह्माणः । ते । यशसः । सन्तु । मा । अन्ये ।

त्वाम् । अग्ने । वृणते । ब्राह्मणाः । इमे । शिवः । अग्ने (१) । संवरण इति सं—वरणे । भव । नः । सपत्नहेति सपत्न—हा । नः । अभिमातिजिदित्यभिमाति—जित् । च । स्वे । गये । जागृहि । अप्रयुच्छन्नित्यप्र—युच्छन् । इह । एव । अग्ने । अधीति । धारय । रयिम् । मा । त्वा । नीति । क्रन् । पूर्वचित इति पूर्व—चितः । निकारिण इति नि—कारिणः । क्षत्रम् । अग्ने । सुयममिति सु—यमम् । अस्तु । तुभ्यम् । उपसत्तेत्युप—सत्ता । वर्धताम् । ते । अनिष्टृतः । क्षत्रेण । अग्ने । स्वायुरिति सु—आयुः । समिति । रभस्व । मित्रेण । अग्ने । मित्रधेय इति मित्र—धेये । यतस्व । सजातानामिति स—जातानाम् । मध्यमस्था इति मध्यम—स्थाः । एधि । राज्ञाम् । अग्ने । विहव्य इति वि—हव्यः । दीदिहि । इह । अतीति (२) । निहः । अतीति । स्निधः । अतीति । अचित्तिम् । अतीति । अरातिम् । अग्ने । विश्वा । हि । अग्ने । दुरितेति दुः—इता । सहस्व । अथ । अस्मभ्यमित्यस्म—भ्यम् । सहवीरामिति सह—वीराम् । रयिम् । दाः । अनाधृष्य इत्यना—धृष्यः । जातवेदा

इति जात—वेदाः । अनिष्टृतः । विराडिति वि—राट् । अग्ने । क्षत्रभृदिति क्षत्र—भृत् । दीदिहि । इह । विश्वाः । आशाः । प्रमुञ्चन्निति प्र—मुञ्चन् । मानुषीः । भियः । शिवाभिः । अद्य । परीति । पाहि । नः । वृधे । बृहस्पते । सवितः । बोधय । एनम् । सꣳशितमिति सं—शितम् । चित् । संतरामिति सं—तराम् । समिति । शिशाधि । वर्धय । एनम् । महते । सौभगाय (३) । विश्वे । एनम् । अन्विति । मदन्तु । देवाः । अमुत्रभूयादित्यमुत्र—भूयात् । अधं । यत् । यमस्य । बृहस्पते । अभिशस्तेरित्यभि—शस्तेः । अमुञ्चः । प्रतीति । औहताम् । अश्विना । मृत्युम् । अस्मात् । देवानाम् । अग्ने । भिषजा । शचीभिरिति शचि—भिः । उदिति । वयम् । तमसः । परीति । पश्यन्तः । ज्योतिः । उत्तरमित्युत्—तरम् । देवम् । देवत्रेति देव—त्रा । सूर्यम् । अगन्म । ज्योतिः । उत्तममित्युत्—तमम् (४) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके
प्रथमप्रपाठके सप्तमोऽनुवाकः ॥ ७ ॥

———

(आप्रीनामकप्रयाजयाज्याभिधानम्)

(अथ चतुर्थाष्टके प्रथमप्रपाठकेऽष्टमोऽनुवाकः ।)

ऊर्ध्वा अस्य समिधो भवन्त्यूर्ध्वा शुक्रा शोचीꣳष्यग्नेः । द्युमत्तमा सुप्रतीकस्य सूनोः। तनूनपादसुरो विश्ववेदा देवो देवेषु देवः । पथ आऽनक्ति मध्वा घृतेन । मध्वा यज्ञं नक्षसे प्रीणानो नराशꣳसो अग्ने । सुकृद्देवः सविता विश्ववारः । अच्छायमेति शवसा घृतेनेडानो वह्निर्नमसा । अग्निꣳ स्रुचो अध्वरेषु प्रयत्सु । स यक्षदस्य महिमानमग्नेः सः (१) ईं मन्द्रासु प्रयसः । वसुश्चेतिष्ठो वसुधातमश्च । द्वारो देवीरन्वस्य विश्वे व्रता ददन्ते अग्नेः । उरुव्यचसो धाम्ना पत्यमानाः । ते अस्य योषणे दिव्ये न योनावुषासानक्ता । इमं यज्ञमवतामध्वरं नः। दैव्या होतारावूर्ध्वमध्वरं नोऽग्नेर्जिह्वामभि गृणीतम् । कृणुतं नः स्विष्टिम् । तिस्रो देवीर्बर्हिरेदꣳ सदन्त्विडा सरस्वती (२) भारती । मही गृणाना । तन्नस्तुरीपमद्भुतं पुरुक्षु त्वष्टा सुवीरम् । रायस्पोषं वि ष्यतु नाभिमस्मे । वनस्पतेऽव सृजा रराणस्त्मना देवेषु । अग्निर्हव्यꣳ शमिता सूदयाति । अग्ने

स्वाहा॑ कृणुहि जातवेद इन्द्रा॑य ह॒व्यम् । विश्वे॑
दे॒वा ह॒विरि॒दं जु॑षन्ताम् । हि॒र॒ण्य॒ग॒र्भः सम॑व-
र्त॒ताग्रे॑ भू॒तस्य॑ जा॒तः प॒तिरेक॑ आसीत् । स
दा॑धार पृथि॒वीं द्याम् (३) उ॒तेमां कस्मै॑
दे॒वाय॑ ह॒विषा॑ विधेम । यः प्रा॑ण॒तो नि॑मिष॒-
तो म॑हि॒त्वैक॒ इद्राजा॒ जग॑तो ब॒भूव॑ । य ईशे॑
अ॒स्य द्वि॒पद॒श्चतु॑ष्पदः॒ कस्मै॑ दे॒वाय॑ ह॒विषा॑
विधेम । य आ॑त्म॒दा ब॑ल॒दा यस्य॒ विश्व॑
उपास॑ते प्र॒शिषं॒ यस्य॑ दे॒वाः । यस्य॑ छा॒या॒ऽ-
मृतं॒ यस्य॑ मृ॒त्युः कस्मै॑ दे॒वाय॑ ह॒विषा॑ विधेम ।
यस्ये॒मे हि॒मव॑न्तो महि॒त्वा यस्य॑ स॒मुद्रं॑ र॒सया॑
स॒ह (४) आ॑हुः । यस्ये॒माः प्र॒दिशो॒ यस्य॑
बा॒हू कस्मै॑ दे॒वाय॑ ह॒विषा॑ विधेम । यं क्र॒न्दसी॑
अव॑सा तस्तभा॒ने अ॒भ्यै॑क्षेतां॑ मन॑सा रेज॑माने ।
यत्राधि॒ सूर॒ उदि॑तौ॒ व्येति॒ कस्मै॑ दे॒वाय॑
ह॒विषा॑ विधेम । येन॒ द्यौरु॒ग्रा पृ॑थि॒वी च॑ दृ॒ढे
येन॒ सुव॑ः स्तभि॒तं येन॒ नाक॑ः । यो अ॒न्तरि॑क्षे॒
रज॑सो वि॒मान॑ः कस्मै॑ दे॒वाय॑ ह॒विषा॑ विधेम ।
आपो॑ ह॒ यन्म॑हती॒र्विश्व॑म् (५) आय॒न्दक्षं॑
दधा॑ना ज॒नय॑न्ती॒र॒ग्निम् । ततो॑ दे॒वाना॑ नि॒र्-

व॑र्त॒तासु॒रेक॑ः कस्मै॑ दे॒वाय॑ ह॒विषा॑ विधेम ।
यश्चि॒दापो॑ महि॒ना पर्यप॑श्यद्दक्षं॑ दधा॑ना ज॒न-
य॑न्ती॒र॒ग्निम् । यो दे॒वेष्वधि॑ दे॒व एक॑ आसी॒-
त्कस्मै॑ दे॒वाय॑ ह॒विषा॑ विधेम (६) ॥

(अग्नेः स सर॑स्वती॒ द्याꣳ सह॒ विꣳश॑ चतु॑स्त्रिꣳशच्च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके
प्रथमप्रपाठकेऽष्टमोऽनुवाकः ॥ ८ ॥

(अथ चतुर्थाष्टके प्रथमप्रपाठकेऽष्टमोऽनुवाकः ।)

ऊ॒र्ध्वाः । अ॒स्य । स॒मि॒ध॒ इति॑ सम्—इ॒धः । भ॒व॒न्ति॒ । ऊ॒र्ध्वा । शु॒क्रा । शो॒चीꣳषि॑ । अ॒ग्नेः । द्यु॒म॒त्त॒मेति॑ द्युम॒त्—त॒मा॒ । सु॒प्र॒ती॒क॒स्येति॑ सु—प्र॒ती॒-
क॒स्य॒ । सू॒नोः । त॒नू॒न॒पादिति॑ तनू—नपा॑त् । असु॑रः । विश्ववे॑दा॒ इति॑ विश्व—वे॒दाः॒ । दे॒वः । दे॒वेषु॑ । दे॒वः । प॒थः । एति॑ । अ॒न॒क्ति॒ । मध्वा॑ । घृ॒तेन॑ । मध्वा॑ । य॒ज्ञम् । न॒क्ष॒से॒ । प्री॒णा॒नः । न॒रा॒श॒ꣳस॑ः । अ॒ग्ने॒ । सु॒कृ॒दिति॑ सु—कृ॒त् । दे॒वः । स॒वि॒ता । वि॒श्ववा॑र॒ इति॑ विश्व—वा॒रः॒ । अच्छ॑ । अ॒यम् । एति॑ । शव॑सा । घृ॒तेन॑ । ई॒डा॒नः । व॒ह्निः । नम॑सा । अ॒ग्निम् । स्रुचः॑ । अ॒ध्व॒रेषु॑ । प्रय॑स्वतीति॒ प्रय॑त्—सु॒ । सः । य॒क्ष॒त् । अ॒स्य॒ । म॒हि॒मान॑म् । अ॒ग्नेः । सः (१) । ई॒म् ।

मन्द्रासुं । प्रयसंः । वसुंः । चेतिंष्ठः । वसुधातंम इतिं वसु—धातंमः । च । द्वारंः । देवीः । अन्वितिं । अस्य । विश्वें । व्रता । ददन्ते । अग्नेः । उरुव्यचंस इत्युंरु—व्यचंसः । धाम्नां । पत्यंमानाः । ते इतिं । अस्य । योषंणे इतिं । दिव्ये इतिं । न । योनौं । उषासानक्तां । इमम् । यज्ञम् । अवताम् । अध्वरम् । नः । दैव्या । होतारौ । ऊर्ध्वम् । अध्वरम् । नः । अग्नेः । जिह्वाम् । अभीतिं । गृणीतम् । कृणुतम् । नः । स्विंष्टिमिति सु—इष्टिम् । तिस्रः । देवीः । बर्हिः । एतिं । इदम् । सदन्तु । इडा । सरंस्वती (२) । भारंती । मही । गृणाना । तत् । नः । तुरीपंम् । अद्भुतम् । पुरुक्षु । त्वष्टा । सुवीरमितिं सु—वीरंम् । रायः । पोषंम् । वीतिं । स्यतु । नाभिंम् । अस्मे इतिं । वनंस्पते । अवेतिं । सृज । ररांणः । त्मना । देवेषुं । अग्निः । हव्यम् । शमिता । सूदयातिं । अग्नें । स्वाहा । कृणुहि । जातवेद इतिं जात—वेदः । इन्द्रांय । हव्यम् । विश्वें । देवाः । हविः । इदम् । जुषन्ताम् । हिरण्यगर्भ इतिं हिरण्य—गर्भः । समितिं । अवर्तत । अग्रें । भूतस्यं । जातः । पतिंः । एकंः । आसीत् । सः । दाधार ।

पृथिवीम् । द्याम् (३) । उत । इमाम् । कस्मैं । देवायं । हविषा । विधेम । यः । प्राणत इतिं प्र—अनतः । निमिषत इतिं नि—मिषतः । महित्वेतिं महि—त्वा । एकंः । इत् । राजा । जगंतः । बभूवं । यः । ईशें । अस्य । द्विपद इतिं द्वि—पदंः । चतुंष्पद इति चतुंः—पदः । कस्मैं । देवायं । हविषा । विधेम । यः । आत्मदा इत्यांत्म—दाः । बलदा इतिं बल—दाः । यस्यं । विश्वें । उपासंत इत्युंप—आसंते । प्रशिषमितिं प्र—शिषंम् । यस्यं । देवाः । यस्यं । छाया । अमृतंम् । यस्यं । मृत्युः । कस्मैं । देवायं । हविषा । विधेम । यस्यं । इमे । हिमवंन्त इतिं हिम—वन्तः । महित्वेतिं महि—त्वा । यस्यं । समुद्रम् । रसया । सह (४) । आहुः । यस्यं । इमाः । प्रदिश इतिं प्र—दिशंः । यस्यं । बाहू इतिं । कस्मैं । देवायं । हविषा । विधेम । यम् । क्रन्दंसी इतिं । अवंसा । तस्तभाने इतिं । अभ्यैक्षेतामित्यंभि—ऐक्षेताम् । मनंसा । रेजंमाने इतिं । यत्र । अधीतिं । सूरंः । उदिंतावित्युत्—इतौ । व्येतीतिं वि—एतिं । कस्मैं । देवायं । हविषा । विधेम । येनं । द्यौः । उग्रा । पृथिवी । च । दृढे इतिं । येनं । सुवंः ।

स्तभितम् । येन । नाकः । यः । अन्तरिक्षे । रजसः ।
विमान इति वि—मानः । कस्मै । देवाय । हविषा ।
विधेम । आपः । ह । यत् । महतीः । विश्वम् (५)।
आयन् । दक्षम् । दधानाः । जनयन्तीः । अग्निम् ।
ततः । देवानाम् । निरिति । अवर्तत । असुः ।
एकः । कस्मै । देवाय । हविषा । विधेम । यः । चित् ।
आपः । महिना । पर्यपश्यदिति परि—अपश्यत् ।
दक्षम् । दधानाः । जनयन्तीः । अग्निम् । यः । देवे-
षु । अधीति । देवः । एकः । आसीत् । कस्मै ।
देवाय । हविषा । विधेम (६) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके
प्रथमप्रपाठकेऽष्टमोऽनुवाकः ॥ ८ ॥

(अथ चतुर्थकाण्डे प्रथमप्रपाठकेऽष्टमोऽनुवाकः ।)

सप्तमेऽनुवाकेऽग्निचयनाङ्गभूते पशौ सामिधेन्योऽभिहिताः । अथाष्टमे प्रयाजयाज्या आप्रीनाम(मि)का उच्यन्ते ।

कल्पः—" ऊर्ध्वा अस्य समिधो भवन्तीति प्रयाजानामाप्रियो भवन्ति " इति ।

तत्र प्रथमामाह—

ऊर्ध्वा अस्य समिधो भवन्त्यूर्ध्वा शुक्रा शोचीꣳ-
ष्यग्नेः । द्युमत्तमा सुप्रतीकस्य सूनोः । , इति ।

प्रयाजानां सर्वेषामग्निविशेषा एव देवताः । तत्र प्रथमप्रयाजदेवतामग्निविशे-षरूपामयं समिच्छब्द आचष्टे । सम्यगिन्धे प्रकाशत इति व्युत्पत्तेः । बहुवचनं

(अग्न्युत्पादनाभिधानम्)

याज्यानुवाक्ये हि वपापुरोडाशहविःषु ताः।
यश्चिद्विकल्पितो मन्त्र इति विंशतिरीरिताः ॥ २ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे प्रथमप्रपाठ-
केऽष्टमोऽनुवाकः ॥ ८ ॥

(अथ चतुर्थाष्टके प्रथमप्रपाठके नवमोऽनुवाकः।)

आकूंतिमग्निं प्रयुजꣳ स्वाहा मनो मेधा-
मग्निं प्रयुजꣳ स्वाहा चित्तं विज्ञातमग्निं प्रयु-
जꣳ स्वाहा वाचो विधृतिमग्निं प्रयुजꣳ स्वाहा
प्रजापतये मनवे स्वाहाऽग्नये वैश्वानराय स्वा-
हा विश्वे देवस्य नेतुर्मर्तो वृणीत सख्यं विश्वे
राय इषुध्यसि द्युम्नं वृणीत पुष्यसे स्वाहा मा
सु मित्था मा सु रिषो दꣳहस्व वीडयस्व सु।
अम्ब धृष्णु वीरयस्व (१) अग्निश्चेदं करि-
ष्यथः। दꣳहस्व देवि पृथिवि स्वस्तय आसुरी
माया स्वधया कृताऽसि। जुष्टं देवानामिद-
मस्तु हव्यमरिष्टा त्वमुदिहि यज्ञे अस्मिन्।
मित्रैतामुखां तपैषा मा भेदि। एतां ते परि
ददाम्यभित्त्यै। द्वन्नः सर्पिरासुतिः प्रत्नो होता
वरेण्यः। सहसस्पुत्रो अद्भुतः। परस्या अधि
संवतोऽवराꣳ अभ्या (२) तर। यत्राहमस्मि

तां॰ अव । परमस्याः परावतो रोहिदश्व इहाऽऽ गंहि । पुरीष्यः पुरुप्रियोऽग्ने त्वं तरा मृधः । सीद त्वं मातुरस्या उपस्थे विश्वान्यग्ने वयुनानि विद्वान् । मैनामर्चिषा मा तपसाऽभि शूंशुचोऽन्तरस्याः शुक्रज्योतिर्वि भांहि । अन्तरग्ने रुचा त्वमुखायै सदने स्वे । तस्यास्त्वꣳ हरसा तपञ्जातवेदः शिवो भव । शिवो भूत्वा मह्यमग्नेऽथो सीद शिवस्त्वम् । शिवाः कृत्वा दिशः सर्वाः स्वां योनिमिहाऽसदः (३) ॥

(वीरयस्वाऽऽतपंन्विꣳशतिश्च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके प्रथमप्रपाठके नवमोऽनुवाकः ॥ ९ ॥

(अथ चतुर्थाष्टके प्रथमप्रपाठके नवमोऽनुवाकः ।)

आकूंतिमित्या—कूतिम् । अग्निम् । प्रयुजमितिं प्र—युजंम् । स्वाहां । मनंः । मेधाम् । अग्निम् । प्रयुजमितिं प्र—युजंम् । स्वाहां । चित्तम् । विज्ञांतमिति वि—ज्ञातम् । अग्निम् । प्रयुजमितिं प्र—युजंम् । स्वाहां । वाचः । विधृंतिमिति वि—धृतिम् । अग्निम् । प्रयुजमितिं प्र—युजंम् । स्वाहां । प्रजापंतय इतिं प्रजा—पतये ।

मनवे । स्वाहां । अग्नयें । वैश्वानरायं । स्वाहां । विश्वें । देवस्यं । नेतुः । मर्तंः । वृणीत । सख्यम् । विश्वें । रायः । इषुध्यसि । द्युम्नम् । वृणीत । पुष्यसें । स्वाहां । मा । स्वितिं । भित्थाः । मा । स्वितिं । रिषः । दꣳहस्व । वीडयंस्व । सु । अम्बं । धृष्णु । वीरयंस्व (१) । अग्निः । च । इदम् । करिष्यथः । दꣳहस्व । देवि । पृथिवि । स्वस्तयें । आसुरी । माया । स्वधयेतिं स्व—धयां । कृता । असि । जुष्टम् । देवानांम् । इदम् । अस्तु । हव्यम् । अरिष्टा । त्वम् । उदितिं । इहि । यज्ञे । अस्मिन् । मित्रं । एताम् । उखाम् । तप । एषा । मा । भेदि । एताम् । ते । परीतिं । ददामि । अभित्त्यै । द्रव्यन्न इति द्रु—अन्नः । सर्पिरांसुतिरितिं सर्पिः—आसुतिः । प्रत्नः । होतां । वरेण्यः । सहसः । पुत्रः । अद्भुतः । परस्याः । अधीतिं । संवत इतिं सं—वतः । अवरान् । अभि । एतिं (२) । तर । यत्र । अहम् । अस्मिं । तान् । अव । परमस्याः । परावत इतिं परा—वतः । रोहिदश्व इतिं रोहित्—अश्वः । इह । एतिं । गहि । पुरीष्यः । पुरुप्रिय इतिं पुरु—प्रियः । अग्ने । त्वम् । तर । मृधः । सीद । त्वम् । मातुः ।

अस्याः । उपस्थ इत्युप—स्थे । विश्वानि । अग्ने ।
वयुनानि । विद्वान् । मा । एनाम् । अर्चिषा ।
मा । तपसा । अभीति । शुशुचः । अन्तः ।
अस्याम् । शुक्रज्योतिरिति शुक्र—ज्योतिः । वीति ।
आहि । अन्तः । अग्ने । रुचा । त्वम् । उखायै ।
सदने । स्वे । तस्याः । त्वम् । हरसा । तपन् ।
जातवेद इति जात—वेदः । शिवः । भव । शिवः ।
भूत्वा । मह्यम् । अग्ने । अथो इति । सीद । शिवः ।
त्वम् । शिवाः । कृत्वा । दिशः । सर्वाः । स्वाम् ।
योनिम् । इह । एति । असदः (३) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके
प्रथमप्रपाठके नवमोऽनुवाकः ॥ ९ ॥

(अथ चतुर्थकाण्डे प्रथमप्रपाठके नवमोऽनुवाकः ।)

अष्टमेऽनुवाक आप्रियो याज्यानुवाक्याः प्रोक्ताः । अथ नवमेऽनुवाकेऽग्न्युत्पादनमभिधत्ते ।

कल्पः—" यत्प्राग्दीक्षाहुतीभ्यस्तत्कृत्वाऽऽकूत्यै प्रयुजेऽग्नये स्वाहेति पञ्चाऽऽध्वरिकीर्हुत्वाऽऽकूतिमग्निमिति षडाग्निकीर्विश्वे देवस्य नेतुरिति पूर्णाहुतिं सप्तमीम् " इति ।

पाठस्तु—

आकूतिमग्निं प्रयुजꣳ स्वाहा मनो मेधामग्निं
प्रयुजꣳ स्वाहा चित्तं विज्ञातमग्निं प्रयुजꣳ
स्वाहा वाचो विधृतिमग्निं प्रयुजꣳ स्वाहा प्रजा-

(अथ चतुर्थाष्टके प्रथमप्रपाठके दशमोऽनुवाकः ।)

यदग्ने यानि कानि चाऽऽ ते दारूणि दध्मसि । तदस्तु तुभ्यमिद्घृतं तज्जुषस्व यविष्ठ्य । यदत्त्युपजिह्विका यद्वम्रो अतिसर्पति । सर्वं तदस्तु ते घृतं तज्जुषस्व यविष्ठ्य । रात्रिꣳरात्रिमप्रयावं भरन्तोऽश्वायेव तिष्ठते घासमस्मै । रायस्पोषेण समिषा मदन्तोऽग्ने मा ते प्रतिवेशा रिषाम । नाभा (१) पृथिव्याः समिधानमग्निꣳ रायस्पोषाय बृहते हवामहे । इरंमदं बृहदुक्थं यजत्रं जेतारमग्निं पृतनासु सासहिम् । याः सेना अभित्वरीराव्याधिनीरुगणा उत । ये स्तेना ये च तस्कारास्ताꣳस्ते अग्नेऽपि दधाम्यास्ये । दꣳष्ट्राभ्यां मलिम्लून्जम्भ्यैस्तस्कराꣳ उत । हनूभ्याꣳ स्तेनान्भगवस्ताꣳस्त्वं खाद सुखादितान् । ये जनेषु मलिम्लवः स्तेनासस्तस्करा वने । ये (२) कक्षेष्वघायवस्ताꣳस्ते दधामि जम्भयोः । यो अस्मभ्यमरातीयाद्यश्च नो द्वेषते जनः । निन्दाद्यो अस्मान्दिप्साच्च सर्वं तं भस्मसा कुरु । सꣳशितं मे ब्रह्म सꣳशितं वीर्यं बलम् । सꣳशितं

क्षत्रं जिष्णु यस्याहमस्मि पुरोहितः । उदेषां बाहू अतिरमुद्वर्च उदू बलम् । क्षिणोमि ब्रह्मणाऽमित्रानुन्नयामि (३) स्वाꣳ अहम् । दृशानो रुक्म उर्व्या व्यद्यौद्दुर्मर्षमायुः श्रिये रुचानः । अग्निरमृतो अभवद्वयोभिर्यदेनं द्यौरजनयत्सुरेताः । विश्वा रूपाणि प्रति मुञ्चते कविः प्रासावीद्भद्रं द्विपदे चतुष्पदे । वि नाकमख्यत्सविता वरेण्योऽनु प्रयाणमुषसो वि राजति । नक्तोषासा समनसा विरूपे धापयेते शिशुमेकꣳ समीची । द्यावा क्षामा रुक्मः (४) अन्तर्वि भाति देवा अग्निं धारयन्द्रविणोदाः । सुपर्णोऽसि गरुत्मान्त्रिवृत्ते शिरो गायत्रं चक्षुः स्तोम आत्मा साम ते तनूर्वामदेव्यं बृहद्रथन्तरे पक्षौ यज्ञायज्ञियं पुच्छं छन्दाꣳस्यङ्गानि धिष्ण्याः शफा यजूꣳषि नाम । सुपर्णोऽसि गरुत्मान्दिवं गच्छ सुवः पत (५) ॥

(नाभा वने ये नयामि क्षामा रुक्मोऽष्टात्रिꣳशच्च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके प्रथमप्रपाठके दशमोऽनुवाकः ॥ १० ॥

(अथ चतुर्थाष्टके प्रथमप्रपाठके दशमोऽनुवाकः ।)

यत् । अग्ने । यानि । कानि । च । एति । ते । दारूणि । दध्मसि । तत् । अस्तु । तुभ्यम् । इत् । घृतम् । तत् । जुषस्व । यविष्ठ्य । यत् । अत्ति । उपजिह्विकेत्युप—जिह्विका । यत् । वम्रः । अतिसर्पतीत्यति—सर्पति । सर्वम् । तत् । अस्तु । ते । घृतम् । तत् । जुषस्व । यविष्ठ्य । रात्रिंरात्रिमिति रात्रिं—रात्रिम् । अप्रयावमित्यप्र—यावम् । भरन्तः । अश्वाय । इव । तिष्ठते । घासम् । अस्मै । रायः । पोषेण । समिति । इषा । मदन्तः । अग्ने । मा । ते । प्रतिवेशा इति प्रति—वेशाः । रिषाम । नाभा (१) । पृथिव्याः । समिधानमिति सम्—इधानम् । अग्निम् । रायः । पोषाय । बृहते । हवामहे । इरंमदमितीरं—मदम् । बृहदुक्थमिति बृहत्—उक्थम् । यजत्रम् । जेतारम् । अग्निम् । पृतनासु । सासहिम् । याः । सेनाः । अभीत्वरीरित्यभि—इत्वरीः । आव्याधिनीरित्या—व्याधिनीः । उगणाः । उत । ये । स्तेनाः । ये । च । तस्कराः । तान् । ते । अग्ने । अपीति । दधामि । आस्ये । दंष्ट्राभ्याम् । मलिम्लून् । जम्भ्यैः । तस्करान् । उत । हनूभ्यामिति हनु—

भ्याम् । स्तेनान् । भगव इति भग—वः । तान् । त्वम् । खाद । सुखादितानिति सु—खादितान् । ये । जनेषु । मलिम्लवः । स्तेनासः । तस्कराः । वने । ये (२) । कक्षेषु । अघायव इत्यघ—यवः । तान् । ते । दधामि । जम्भयोः । यः । अस्मभ्यमित्यस्म—भ्यम् । अरातीयात् । यः । च । नः । द्वेषते । जनः । निन्दात् । यः । अस्मान् । दिप्सात् । च । सर्वम् । तम् । मस्मसा । कुरु । सꣳशितमिति सं—शितम् । मे । ब्रह्म । सꣳशितमिति सं—शितम् । वीर्यम् । बलम् । सꣳशितमिति सं—शितम् । क्षत्रम् । जिष्णु । यस्य । अहम् । अस्मि । पुरोहित इति पुरः—हितः । उदिति । एषाम् । बाहू इति । अतिरम् । उदिति । वर्चः । उदिति । उ । बलम् । क्षिणोमि । ब्रह्मणा । अमित्रान् । उदिति । नयामि (३) । स्वान् । अहम् । दृशानः । रुक्मः । उर्व्या । वीति । अद्यौत् । दुर्मर्षमिति दुः—मर्षम् । आयुः । श्रिये । रुचानः । अग्निः । अमृतः । अभवत् । वयोभिरिति वयः—भिः । यत् । एनम् । द्यौः । अजनयत् । सुरेता इति सु—रेताः । विश्वा । रूपाणि । प्रतीति । मुञ्चते । कविः । प्रेति ।

असावीत् । भद्रम् । द्विपद इति द्वि—पदे । चतुष्पद इति चतुः—पदे । वीतिं । नाकम् । अरुहत् । सविता । वरेण्यः । अन्वितिं । प्रयाणमिति प्र—यानम् । उषसः । वीतिं । राजति । नक्तोषासा । समनसेति स—मनसा । विरूपे इति वि—रूपे । धापयेते इतिं । शिशुम् । एकम् । समीची इतिं । द्यावा । क्षामं । रुक्मः (४)। अन्तः । वीतिं । भाति । देवाः । अग्निम् । धारयन् । द्रविणोदा इतिं द्रविणः—दाः । सुपर्ण इतिं सु—पर्णः । असि । गरुत्मान् । त्रिवृदितिं त्रि—वृत् । ते । शिरः । गायत्रम् । चक्षुः । स्तोमः । आत्मा । साम । ते । तनूः । वामदेव्यमितिं वाम—देव्यम् । बृहद्रथंतरे इतिं बृहत्—रथंतरे । पक्षौ । यज्ञायज्ञियम् । पुच्छम् । छन्दांसि । अङ्गानि । धिष्ण्याः । शफाः । यजूंषि । नाम । सुपर्ण इतिं सु—पर्णः । असि । गरुत्मान् । दिवम् । गच्छ । सुवः । पत (५)॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके प्रथमप्रपाठके दशमोऽनुवाकः ॥ १० ॥

(अथ चतुर्थकाण्डे प्रथमप्रपाठके दशमोनुवाकः ।)

नवमेऽनुवाकेऽग्न्युत्पादनमुक्तम् । अथ दशमेऽग्निधारणमुच्यते ।

हेऽग्ने त्वं गरुड इव पक्षिरूपोऽसि । अत आकाशं प्रति गच्छ । ततोऽपि स्वर्गलोकं प्रामुहि ॥

मन्त्रस्य स्वर्गप्राप्तिपरत्वं दर्शयति—

" दिवं गच्छ सुवः पतेत्याह सुवर्गमेवैनं लोकं गमयति " [सं० का० ५ प्र० १ अ० १०] इति ।

एनं यजमानमात्मानम् ॥

अत्र विनियोगसंग्रहः—

यदग्ने पञ्चभिः काष्ठं वह्नावौदुम्बरं क्षिपेत् ।
दृष्ट्वाऽऽश्वत्थीमादधाति ये ज वैकङ्कतीं तथा ॥ १ ॥
यो अस्मभ्यं शमीकाष्ठं संशितद्वयवाचनम् ।
दृशा रुक्मं निजे कण्ठे बद्ध्वा विश्वेतिमन्त्रतः ॥ २ ॥
साग्न्युखाशिक्यपाशं तु स्वाम्यत्र प्रतिमुञ्चते ।
नक्तोऽजिनं चोपरिष्टात्सुपर्णोऽग्निमवेक्षते ॥
सुपर्णः साग्निरुत्तिष्ठेन्मन्त्राः पञ्चदशेरिताः ॥ ३ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे प्रथमप्रपाठके दशमोऽनुवाकः ॥ १० ॥

(अथ चतुर्थाष्टके प्रथमप्रपाठक एकादशोऽनुवाकः ।)

अग्ने यं यज्ञमध्वरं विश्वतः परिभूरसि ।
स इद्देवेषु गच्छति । सोम यास्ते मयोभुव
ऊतयः सन्ति दाशुषे । ताभिर्नोऽविता भव ।
अग्निर्मूर्धा भुवः । त्वं नः सोम या ते
धामानि । तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि ।
धियो यो नः प्रचोदयात् । अचित्ती यच्चकृमा
दैव्ये जने दीनैर्दक्षैः प्रभूती पूरुषत्वता (१) ।

देवेषु च सवितर्मानुषेषु च त्वं नो अत्र सुव-
तादनागसः । चोदयित्री सूनृतानां चेतन्ती
सुमतीनाम् । यज्ञं दधे सरस्वती । पावीरवी
कन्या चित्रायुः सरस्वती वीरपत्नी धियं धात् ।
ग्नाभिरच्छिद्रं शरणं सजोषा दुराधर्षं गृणते
शर्म यंसत् । पूषा गा अन्वेतु नः पूषा रक्ष-
त्वर्वतः । पूषा वाजं सनोतु नः । शुक्रं ते
अन्यद्यजतं ते अन्यत् (२) विषुरूपे अहनी
द्यौरिवासि । विश्वा हि माया अवसि स्वधावो
भद्रा ते पूषन्निह रातिरस्तु । तेऽवर्धन्त स्वत-
वसो महित्वनाऽऽ नाकं तस्थुरुरु चक्रिरे सदः ।
विष्णुर्यद्धाऽऽवदूषणं मदच्युतं वयो न सीदन्नधि
बर्हिषि प्रिये । प्र चित्रमर्कं गृणते तुराय मारु-
ताय स्वतवसे भरध्वम् । ये सहांसि सहसा
सहन्ते (३) रेजते अग्ने पृथिवी मखेभ्यः । विश्वे
देवा विश्वे देवाः । द्यावा नः पृथिवी इमꣳ
सिग्रमद्य दिविस्पृशम् । यज्ञं देवेषु यच्छताम् ।
प्र पूर्वजे पितरा नव्यसीभिर्गीर्भिः कृणुध्वꣳ
सदने ऋतस्य । आ नो द्यावापृथिवी दैव्येन
जनेन यातं महि वां वरूथम् । अग्निꣳ स्तोमेन

बोधय समिधानो अमर्त्यम् । हव्या देवेषु नो दधत् । स हव्यवाडमर्त्य उशिग्दूतश्चनोहितः । अग्निर्धिया समृण्वति । शं नो भवन्तु वाजे-वाजे (४) ॥

(पूरुषत्वतां यजतं ते अन्यत्सहन्ते चनोहितोऽष्टौ च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके प्रथमप्रपाठक एकादशोऽनुवाकः ॥ ११ ॥

युञ्जान इमामगृभ्णन्देवस्य सं ते वि पाजसा वसवस्त्वा समास्त्वोर्ध्वा अस्याऽऽकूतिं यदग्ने यान्यग्ने यं यज्ञमेकादश ॥ ११ ॥

युञ्जानो वर्म च स्थ आदित्यास्त्वा भारती स्वाꣳ अहꣳ षट्चत्वारिꣳशत् ॥ ४६ ॥

हरिः ॐ ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके प्रथमः प्रपाठकः ॥ १ ॥

(अथ चतुर्थाष्टके प्रथमप्रपाठक एकादशोऽनुवाकः ।)

अग्ने । यम् । यज्ञम् । अध्वरम् । विश्वतः । परि-भूरिति परि—भूः । असि । सः । इत् । देवेषु । गच्छति । सोम । याः । ते । मयोभुव इति मयः—भुवः । ऊतयः । सन्ति । दाशुषे । ताभिः । नः । अविता । भव । अग्निः । मूर्धा । भुवः । त्वम् । नः ।

सोम । या । ते । धामानि । तव् । सवितुः । वरेण्यम् । भर्गः । देवस्य । धीमहि । धियः । यः । नः । प्रचोदयादिति प्र—चोदयात् । अचित्ती । यत् । चकृम । दैव्ये । जने । दीनैः । दक्षैः । प्रभूतीति प्र—भूती । पूरुषत्वतेति पूरुष—त्वता (१) । देवेषु । च । सवितः । मानुषेषु । च । त्वम् । नः । अत्रं । सुवतात् । अनागसः । चोदयित्री । सूनृतानाम् । चेतन्ती । सुमतीनामिति सु—मतीनाम् । यज्ञम् । दधे । सरस्वती । पावीरवी । कन्या । चित्रायुरिति चित्र—आयुः । सरस्वती । वीरपत्नीति वीर—पत्नी । धियम् । धात् । ग्राभिः । अच्छिद्रम् । शरणम् । सजोषा इति स—जोषाः । दुराधर्षमिति दुः—आधर्षम् । गृणते । शर्म । यꣳसत् । पूषा । गाः । अन्वितिं । एतु । नः । पूषा । रक्षतु । अर्वतः । पूषा । वाजम् । सनोतु । नः । शुक्रम् । ते । अन्यत् । यजतम् । ते । अन्यत्(२) । विषुरूपे इति विषु—रूपे । अहनी इति । द्यौः । इव । असि । विश्वाः । हि । मायाः । अवसि । स्वधाव इति स्वधा—वः । भद्रा । ते । पूषन् । इह । रातिः । अस्तु । ते । अवर्धन्त । स्वतवस इति

स्व—तवसः । महित्वनेति महि—त्वना । एति ।
नाकम् । तस्थुः । उरु । चक्रिरे । सदः । विष्णुः ।
यत् । ह । आवत् । वृषणम् । मदच्युतमिति मद—
च्युतम् । वयः । न । सीदन् । अधीति । बर्हिषि ।
प्रिये । प्रेति । चित्रम् । अर्कम् । गृणते । तुराय ।
मारुताय । स्वतवस इति स्व—तवसे । भरध्वम् ।
ये । सहांसि । सहसा । सहन्ते (३) ।
रेजते । अग्ने । पृथिवी । मखेभ्यः । विश्वे ।
देवाः । विश्वे । देवाः । द्यावा । नः ।
पृथिवी इति । इमम् । सिध्रम् । अद्य ।
दिविस्पृशमिति दिवि—स्पृशम् । यज्ञम् । देवेषु ।
यच्छताम् । प्रेति । पूर्वजे इति पूर्व—जे । पितरा ।
नव्यसीभिः । गीर्भिः । कृणुध्वम् । सदने इति ।
ऋतस्य । एति । नः । द्यावापृथिवी इति द्यावा—
पृथिवी । दैव्येन । जनेन । यातम् । महि । वाम् ।
वरूथम् । अग्निम् । स्तोमेन । बोधय । समिधान
इति सम्—इधानः । अमर्त्यम् । हव्या । देवेषु ।
नः । दधत् । सः । हव्यवाडिति हव्य—वाट् । अम-
र्त्यः । उशिक् । दूतः । चनोहितः । अग्निः । धिया ।

समिति । ऋण्वति । शम् । नः । भवन्तु । वाजेवा-
ज इति वाजे—वाजे (४) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके
प्रथमप्रपाठक एकादशोऽनुवाकः ॥ ११ ॥

हरिः ॐ ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके
प्रथमः प्रपाठकः ॥ १ ॥

(अथ चतुर्थकाण्डे प्रथमप्रपाठक एकादशोऽनुवाकः ।)

दशमेऽनुवाके वह्निधारणमुक्तम् । अथैकादशे चातुर्मास्यगते वैश्वदेवाख्ये प्रथमपर्वणि विहितानां हविषां याज्यानुवाक्या उच्यन्ते ।

तत्र प्रथमस्याऽऽज्यभागस्य चोदकप्राप्तामपवदितुमन्यां पुरोनुवाक्यामाह—

अग्ने यं यज्ञमध्वरं विश्वतः परिभू-
रसि । स इद्देवेषु गच्छति । , इति ।

हेऽग्नेऽध्वरं हिंसारहितं यं यज्ञं विश्वतः परिभूरसि सर्वतः प्राप्तवानसि, स इत्स एव यज्ञो देवेषु गच्छति ॥

अथ द्वितीयस्याऽऽज्यभागस्य पुरोनुवाक्यामाह—

सोम यास्ते मयोभुव ऊतयः सन्ति
दाशुषे । ताभिर्नोऽविता भव ।, इति ।

हे सोम दाशुषे हविर्दत्तवते यजमानाय मयोभुवः सुखं भावयितुस्ते तव या ऊतयो रक्षणप्रकाराः सन्ति ताभिरूतिभिर्नोऽस्माकमविता रक्षको भव ॥

अथाऽऽग्नेयमष्टाकपालं निर्वपतीत्यस्मिन्हविषि याज्यापुरोनुवाक्ययोः प्रतीके दर्शयति—

अग्निर्मूर्धा भुवः । , इति ।

अग्निर्मूर्धेति पुरोनुवाक्या । भुवो यज्ञस्येति याज्या । एतयोभयमैष्टिके

कीदृशोऽग्निः। हव्यं वहतीति हव्यवाट्। अमर्त्यो मरणरहितः। उशिगनुग्रह-पूर्वमस्मान्कामयमानः। दूतो देवानामाज्ञाकारी। चनोहितः, चनसां मनुष्याणां यजमानानां हितोऽभीष्टकारी॥

अथ वाजिनो यजतीति विहिते कर्मणि याज्यानुवाक्ययोः प्रतीके दर्शयति—

शं नो भवन्तु वाजेवाजे। , इति।

शं नो भवन्तु वाजिन इति पुरोनुवाक्या। वाजेवाजेऽवत वाजिन इति याज्या। एतच्चोभयं देवस्याहꣳ सवितुः प्रसव इत्यनुवाके व्याख्यातम्॥

अत्र विनियोगसंग्रहः—

अथ याज्या वैश्वदेवे चातुर्मास्यादिपर्वणि।
अग्ने सो अनुवाक्ये ते अग्नीषोमाज्यभागयोः॥ १॥
अग्निर्भुवस्तथाऽऽग्नेये त्वं नो या ते च सौमिके।
तत्सेति युग्मं सावित्रे चोद सारस्वते तथा॥ २॥
पूषा पौष्णे मारुते ते विश्वे द्वे वैश्वदेविके।
द्यावा द्यावापृथिव्ये स्यादग्नि स्विष्टकृतो यजेः।
शं वाजे वाजिने मन्त्रा द्वाविंशतिरुदीरिताः॥ ३॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे प्रथमप्रपाठक एकादशोऽनुवाकः॥ ११॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्॥
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः॥ १॥

इति श्रीमद्विद्यातीर्थमहेश्वरापरावतारस्य श्रीमद्राजाधिराजपरमेश्वरस्य श्रीवीरबुक्कमहाराजस्याऽऽज्ञापरिपालकेन माधवाचार्येण विरचिते वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे प्रथमः प्रपाठकः॥ १॥

---

१ क. ख. च. यजिः।

(अथ चतुर्थाष्टके द्वितीयः प्रपाठकः।)

(तत्र प्रथमोऽनुवाकः।)

हरिः ॐ।

विष्णोः क्रमोऽस्यभिमातिहा गायत्रं छन्द आ रोह पृथिवीमनु वि क्रमस्व निर्भक्तः स यं द्विष्मो विष्णोः क्रमोऽस्यभिशस्तिहा त्रैष्टुभं छन्द आ रोहान्तरिक्षमनु वि क्रमस्व निर्भक्तः स यं द्विष्मो विष्णोः क्रमोऽस्यरातीयतो हन्ता जागतं छन्द आ रोह दिवमनु वि क्रमस्व निर्भक्तः स यं द्विष्मो विष्णोः (१) क्रमोऽसि शत्रूयतो हन्ताऽऽनुष्टुभं छन्द आ रोह दिशोऽनु वि क्रमस्व निर्भक्तः स यं द्विष्मः। अक्रन्ददग्निस्तनयन्निव द्यौः क्षामा रेरिहद्वीरुधः समञ्जन्। सद्यो जज्ञानो वि हीमिद्धो अख्यदा रोदसी भानुना भात्यन्तः। अग्नेऽभ्यावर्तिन्नभि न आ वर्तस्वाऽऽयुषा वर्चसा सन्या मेधया प्रजया धनेन। अग्ने (२) अङ्गिरः शतं ते सन्त्वावृतः सहस्रं त उपावृतः। तासां पोषस्य पोषेण पुनर्नो नष्टमा कृधि पुनर्नो रयिमा कृधि।

पुनर्ऊर्जा नि वर्तस्व पुनरग्न इषाऽऽयुषा ।
पुनर्नः पाहि विश्वतः । सह रय्या नि वर्त-
स्वाग्ने पिन्वस्व धारया । विश्वप्स्न्या विश्वत-
स्परि । उदुत्तमं वरुण पाशमस्मदवाधमम्
(३) वि मध्यमꣳ श्रथाय । अथा वयमा-
दित्य व्रते तवानागसो अदितये स्याम । आ
त्वाऽहार्षमन्तरमूर्ध्वस्तिष्ठाविचाचलिः । विशं-
स्त्वा सर्वा वाञ्छन्त्वस्मिन्राष्ट्रमधि श्रय ।
अग्ने बृहन्नुषसामूर्ध्वो अस्थान्निर्जगमिवान्तमसो
ज्योतिषाऽगात् । अग्निर्भानुना रुशता स्वङ्ग
आ जातो विश्वा सध्म्यप्राः । सीद त्वं मातु-
रस्याः (४) उपस्थे विश्वान्यग्ने वयुनानि
विद्वान् । मैनामर्चिषा मा तपसाऽभि शूशु-
चोऽन्तरस्याꣳ शुक्रज्योतिर्वि भाहि । अन्तरग्ने
रुचा त्वमुखाये सदने स्वे । तस्यास्त्वꣳ हरसा
तपञ्जातवेदः शिवो भव । शिवो भूत्वा मह्य-
मग्नेऽथो सीद शिवस्त्वम् । शिवाः कृत्वा
दिशः सर्वाः स्वां योनिमिहाऽसदः । हꣳसः
शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोण-

सत् । नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा
अद्रिजा ऋतं बृहत् (५) ॥
(दिवमनु वि क्रमस्व निर्भक्तः स यं द्विष्मो विष्णोर्धनेनाग्नेऽधममस्याः
शुचिषत्षोडश च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके
द्वितीयप्रपाठके प्रथमोऽनुवाकः ॥ १ ॥

(अथ चतुर्थाष्टके द्वितीयः प्रपाठकः ।)

(तत्र प्रथमोऽनुवाकः ।)

हरिः ॐ ।

विष्णोः । क्रमः । असि । अभिमातिहेत्यभि-
माति—हा । गायत्रम् । छन्दः । एति । रोह ।
पृथिवीम् । अनु । वीतिं । क्रमस्व । निर्भक्त इति
निः—भक्तः । सः । यम् । द्विष्मः । विष्णोः ।
क्रमः । असि । अभिशस्तिहेत्यभिशस्ति—हा ।
त्रैष्टुभम् । छन्दः । एति । रोह । अन्तरिक्षम् । अनु ।
वीतिं । क्रमस्व । निर्भक्त इति निः—भक्तः । सः ।
यम् । द्विष्मः । विष्णोः । क्रमः । असि । अरा-
तीयतः । हन्ता । जागतम् । छन्दः । एति । रोह ।
दिवम् । अनु । वीतिं । क्रमस्व । निर्भक्त इति
निः—भक्तः । सः । यम् । द्विष्मः । विष्णोः (१) ।

क्रमः । असि । शत्रूयत इति शत्रु—यतः । हन्ता ।
आ । उमित्यानु—स्तुभम् । छन्दः । एति । रोह ।
दिशः । अनु । वीति । क्रमस्व । निर्भक्त इति
निः—भक्तः । सः । यम् । द्विष्मः । अक्रन्दत् ।
अग्निः । स्तनयन् । इव । द्यौः । क्षामं । रेरिहत् ।
वीरुधः । समञ्जन्निति सम्—अञ्जन् । सद्यः । जज्ञा-
नः । वीति । हि । ईम् । इद्धः । अख्यत् । एति ।
रोदसी इति । भानुना । भाति । अन्तः । अग्नेः ।
अभ्यावर्तिन्नित्यभि—आवर्तिन् । अभीति । नः ।
एति । वर्तस्व । आयुषा । वर्चसा । सन्या । मेधया ।
प्रजयेति प्र—जया । धनेन । अग्ने (२) । अङ्गिरः ।
शतम् । ते । सन्तु । आवृत इत्या—वृतः । सहस्रम् ।
ते । उपावृत इत्युप—आवृतः । तासाम् । पोषस्य ।
पोषेण । पुनः । नः । नष्टम् । एति । कृधि । पुनः ।
नः । रयिम् । एति । कृधि । पुनः । ऊर्जा । नीति ।
वर्तस्व । पुनः । अग्ने । इषा । आयुषा । पुनः । नः ।
पाहि । विश्वतः । सह । रय्या । नीति । वर्तस्व ।
अग्ने । पिन्वस्व । धारया । विश्वप्स्नियेति विश्व—
प्स्निया । विश्वतः । परि । उदिति । उत्तममित्युत्—
तमम् । वरुण । पाशम् । अस्मत् । अवेति । अध-

मम् (३) । वीति । मध्यमम् । अथाय । अथ ।
वयम् । आदित्य । व्रते । तव । अनागसः । अदि-
तये । स्याम । एति । त्वा । अहार्षम् । अन्तः ।
अभूः । ध्रुवः । तिष्ठ । अविचाचलिरित्यवि—चाच-
लिः । विशः । त्वा । सर्वाः । वाञ्छन्तु । अस्मिन् ।
राष्ट्रम् । अधीति । श्रय । अग्ने । बृहन् । उषसाम् ।
ऊर्ध्वः । अस्थात् । निर्जग्मिवानिति निः—जग्मि-
वान् । तमसः । ज्योतिषा । एति । अगात् । अग्निः ।
भानुना । रुशता । स्वङ्ग इति सु—अङ्गः । एति ।
जातः । विश्वा । सह्मानि । अप्राः । सीद । त्वम् ।
मातुः । अस्याः (४) । उपस्थ इत्युप—स्थे ।
विश्वानि । अग्ने । वयुनानि । विद्वान् । मा । एना-
म् । अर्चिषा । मा । तपसा । अभीति । शूशुचः ।
अन्तः । अस्याम् । शुक्रज्योतिरिति शुक्र—ज्योतिः ।
वीति । माहि । अन्तः । अग्ने । रुचा । त्वम् । उखायै ।
सदने । स्वे । तस्याः । त्वम् । हरसा । तपन् ।
जातवेद इति जात—वेदः । शिवः । भव । शिवः ।
भूत्वा । मह्यम् । अग्ने । अथो इति । सीद । शिवः ।
त्वम् । शिवाः । कृत्वा । दिशः । सर्वाः । स्वाम् ।
योनिम् । इह । एति । असदः । हरसः । शुचिष-

दितिं शुचि—सत् । वसुः । अन्तरिक्षसदित्यन्तरिक्ष—सत् । होता । वेदिषदितिं वेदि—सत् । अतिथिः । दुरोणसदितिं दुरोण—सत् । नृषदितिं नृ—सत् । वरसदितिं वर—सत् । ऋतसदित्यृत—सत् । व्योमसदितिं व्योम—सत् । अब्जा इत्यप्—जाः । गोजा इतिं गो—जाः । ऋतजा इत्यृत—जाः । अद्रिजा इत्यद्रि—जाः । ऋतम् । बृहत् (५) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके द्वितीयप्रपाठके प्रथमोऽनुवाकः ॥ १ ॥

(अथ चतुर्थकाण्डे द्वितीयः प्रपाठकः ।)

तत्र प्रथमोऽनुवाकः ।

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥ १ ॥
आद्यप्रपाठके ह्युक्ष्यो योऽग्निः सोऽयं प्रपञ्चितः ।
प्रपाठके द्वितीये तु स्याद्देवयजनग्रहः ॥ २ ॥
चयनार्थस्तत्र चानुवाका एकादशेरिताः ।
आसन्द्यां स्थापनं वात्सप्रसूक्तेन ह्युपस्थितिः ॥ ३ ॥
+ उखाग्नेर्नयनं गार्हपत्याग्निचयनं भुवः ।
कर्षणं चौषधावापो लोष्टक्षेपादिकं तथा ॥ ४ ॥
रुक्मादेरुपधानं स्वयमातृण्णादिकस्य च ।
निधानं पशुशीर्षाणां याज्या अर्था उदीरिताः ॥ ५ ॥

तत्र प्रथमानुवाक आसन्द्यामुखाग्निस्थापनं प्रतिपाद्यते । कल्पः—" उपरि नाभेर्धारयमाणो विष्णोः क्रमोऽसीति चतुरो विष्णुक्रमान्प्राचः क्रामति " इति ।

पाठस्तु—

+ उखाग्नेश्चयनमिति ख. पुस्तके टिप्पण्यां पाठः ।

एतन्मन्त्रसाध्यमग्निस्थापनं विधत्ते—

" चतसृभिः सादयति चत्वारि छन्दाꣳसि छन्दोभिरेव " [सं० का० ५ प्र० २ अ० १] इति ।

सादयतीत्यनुवर्तते । सीद त्वं मातुरित्यादिभिश्चतसृभिरौदुम्बर्यामुख्याग्निं स्थापयेत् । छन्दोभिरेव स्थापितवान्भवति ॥

हꣳस इत्यादिकायामुत्तमायामृचि च्छन्दोविशेषं प्रशंसति—

" अतिच्छन्दसोत्तमया वर्ष्म वा एषा छन्दसां यदतिच्छन्दा वर्ष्मैवैनꣳ समानानां करोति " [सं० का० ५ प्र० २ अ० १] इति ।

अतिच्छन्दस्यन्यच्छन्दसामन्तर्भावात्सर्वेषामन्येषां छन्दसामियमतिच्छन्दा ऋक्शरीरम् । अ(य)त ईदृश्योत्तमया सादनेनैनं यजमानं समानानामन्येषां पुरुषाणां शरीरस्थानीयमेव करोति, तस्मादनयोत्तमया सादयति ॥

अत्रोत्तमायां ये बहवः सच्छब्दाः शुचिषदित्यादयस्तान्प्रशंसति—

" सद्वती भवति सत्त्वमेवैनं गमयति " [सं०का०५प्र०२अ०१] इति ।

ऋचो बहुभिः सच्छब्दैरुपेतत्वेनैनं यजमानं सत्त्वं चिरकालावस्थत्वं गमयति प्रापयति ॥

अत्र विनियोगसंग्रहः—

विष्णोश्चतुर्भिराक्रामेदक्रन्देत्यनुवक्त्यथ ।
अग्ने चतुर्भिरावृत्त उदु पाशं विमुञ्चति ॥ १ ॥
आ त्वोख्यमाहरेदग्रेऽभ्युपस्थाय चतुष्टयात् ।
सीदेत्यादेस्तथाऽऽसन्द्यां सादयेत्षोडशोदिताः ॥ २ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे द्वितीयप्रपाठके
प्रथमोऽनुवाकः ॥ १ ॥

(अथ चतर्थाष्टके द्वितीयप्रपाठके द्वितीयोऽनुवाकः ।)

दिवस्परि प्रथमं जज्ञे अग्निरस्मद्द्वितीयं परि जातवेदाः । तृतीयमप्सु नृमणा अजस्र-

---

१ क. घ. ङ. °विषयं प्र° । २ ख. च. °च्छन्दोयुक्तगतिच्छन्दाः शरी° । ३ ख. च. °ति । हंस इत्यादिकाया ऋ° । ४ ख. च. °तत्वात्सैव सद्वती । एनं । ५ ख. च. °वस्थायित्वं प्रा° ।

मिन्धान एनं जरते स्वाधीः । विद्मा ते अग्ने त्रेधा त्रयाणि विद्मा ते सद्म विभृतं पुरुत्रा । विद्मा ते नाम परमं गुहा यद्विद्मा तमुत्सं यत आजगन्थ । समुद्रे त्वा नृमणा अप्स्वन्तर्नृचक्षा ईधे दिवो अग्न ऊधन् । तृतीये त्वा (१) रजसि तस्थिवाꣳसमृतस्य योनौ महिषा अहिन्वन् । अक्रन्ददग्निः स्तनयन्निव द्यौः क्षामा रेरिहद्वीरुधः समञ्जन् । सद्यो जज्ञानो वि हीमिद्धो अख्यदा रोदसी भानुना भात्यन्तः । उशिक्पावको अरतिः सुमेधा मर्तेष्वग्निरमृतो नि धायि । इयर्ति धूममरुषं भरिभ्रदुच्छुक्रेण शोचिषा द्यामिनक्षत् । विश्वस्य केतुर्भुवनस्य गर्भ आ (२) रोदसी अपृणाज्जायमानः । वीडुं चिदद्रिमभिनत्परायञ्जना यदग्निमयजन्त पञ्च । श्रीणामुदारो धरुणो रयीणां मनीषाणां प्रार्पणः सोमगोपाः । वसोः सूनुः सहसो अप्सु राजा वि भात्यग्र उषसामिधानः । यस्ते अद्य कृणवद्भद्रशोचेऽपूपं देव घृतवन्तमग्ने । प्र तं नय प्रतरं वस्यो अच्छाभि द्युम्नं देवभक्तं यविष्ठ । आ (३) तं भज

सौश्रवसेष्वग्न उक्थउक्थ आ भज शस्यमाने ।
प्रियः सूर्ये प्रियो अग्ना भवात्युज्जातेन भिन-
दुदुज्जनित्वैः । त्वामग्ने यजमाना अनु द्यून्विश्वा
वसूनि दधिरे वार्याणि । त्वया सह द्रविण-
मिच्छमाना व्रजं गोमन्तमुशिजो वि वव्रुः ।
दृशानो रुक्म उर्व्या व्यद्यौद्दुर्मर्षमायुः श्रिये
रुचानः । अग्निरमृतो अभवद्वयोभिर्यदेनं द्यौर-
जनयत्सुरेताः (४) ॥

(तृतीये त्वा गर्भ आ यविष्ठाऽऽ यच्चत्वारिं च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके
द्वितीयप्रपाठके द्वितीयोऽनुवाकः ॥ २ ॥

(अथ चतुर्थाष्टके द्वितीयप्रपाठके द्वितीयोऽनुवाकः ।)

दिवः । परीतिं । प्रथमम् । जज्ञे । अग्निः ।
अस्मत् । द्वितीयम् । परीतिं । जातवेदा इति जात—
वेदाः । तृतीयम् । अप्स्वित्यप्—सु । नृमणा इति
नृ—मनाः । अजस्रम् । इन्धानः । एनम् । जरते ।
स्वाधीरिति स्व—धीः । विश्म । ते । अग्ने । त्रेधा ।
त्रयाणि । विश्म । ते । सप्त । विभृतमिति वि—
भृतम् । पुरुत्रेति पुरु—त्रा । विश्म । ते । नाम ।

परमम् । गुहा । यत् । विश्म । तम् । उत्सम् । यतः ।
आजगन्थेत्या—जगन्थ । समुद्रे । त्वा । नृमणा इति
नृ—मनाः । अप्स्वित्यप्—सु । अन्तः । नृचक्षा इति
नृ—चक्षाः । ईधे । दिवः । अग्ने । ऊधन् । तृतीये ।
त्वा (१) । रजसि । तस्थिवाꣳसम् । ऋतस्य ।
योनौ । महिषाः । अहिन्वन् । अक्रन्दत् । अग्निः ।
स्तनयन् । इव । द्यौः । क्षाम । रेरिहत् । वीरुधः ।
समञ्जन्निति सम्—अञ्जन् । सद्यः । जज्ञानः । वीति ।
हि । ईम् । इद्धः । अख्यत् । एति । रोदसी इति ।
भानुना । भाति । अन्तः । उशिक् । पावकः ।
अरतिः । सुमेधा इति सु—मेधाः । मर्तेषु । अग्निः ।
अमृतः । नीति । धायि । इयर्ति । धूमम् । अरु-
षम् । भरिभ्रत् । उदिति । शुक्रेण । शोचिषा ।
द्याम् । इनक्षत् । विश्वस्य । केतुः । भुवनस्य ।
गर्भः । एति (२) । रोदसी इति । अपृणात् ।
जायमानः । वीडुम् । चित् । अद्रिम् । अभिनत् ।
परायन्निति परा—यन् । जनाः । यत् । अग्निम् ।
अयजन्त । पञ्च । श्रीणाम् । उदारः । धरुणः ।
रयीणाम् । मनीषाणाम् । प्रार्पण इति प्र—अर्पणः ।
सोमगोपा इति सोम—गोपाः । वसोः । सूनुः ।

सहंसः । अप्स्वित्यप्—सु । राजा । वीतिं । भाति ।
अग्ने । उषसाम् । इधानः । यः । ते । अद्य । कृण-
वत् । भद्रशोच इति भद्र—शोचे । अपूपम् । देव ।
घृतवन्तमिति घृत—वन्तम् । अग्ने । प्रेति । तम् ।
नय । प्रतरामिति प्र—तराम् । वस्यः । अच्छ ।
अभीति । द्युम्नम् । देवभक्तमिति देव—भक्तम् ।
यविष्ठ । एति (३) । तम् । भज । सौश्रवसेषु ।
अग्ने । उक्थउक्थ इत्युक्थे—उक्थे । एति । भज ।
शस्यमाने । प्रियः । सूर्ये । प्रियः । अग्ना । भवा-
ति । उदिति । जातेन । अभिनदत् । उदिति । जनि-
त्वैः । त्वाम् । अग्ने । यजमानाः । अन्विति । द्यून् ।
विश्वा । वसूनि । दधिरे । वार्याणि । त्वया । सह ।
द्रविणम् । इच्छमानाः । व्रजम् । गोमन्तमिति गो—
मन्तम् । उशिजः । वीतिं । वव्रुः । दृशानः । रुक्मः ।
उर्व्या । वीतिं । अद्यौत् । दुर्मर्षमिति दुः—मर्षम् ।
आयुः । श्रिये । रुचानः । अग्निः । अमृतः । अभ-
वत् । वयोभिरिति वयः—भिः । यत् । एनम् ।
द्यौः । अजनयत् । सुरेता इति सु—रेताः (४) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके
द्वितीयप्रपाठके द्वितीयोऽनुवाकः ॥ २ ॥

(अथ चतुर्थकाण्डे द्वितीयप्रपाठके द्वितीयोऽनुवाकः ।)

प्रथमेऽनुवाके वह्नेरासन्द्यां स्थापनमुक्तम् । द्वितीये तस्याग्नेरुपस्थानमुच्यते । कल्पः—" दिवस्परीत्येकादशभिर्द्वादशभिस्त्रयोदशभिर्वा वात्सप्रेणोपतिष्ठते पूर्वेद्युर्विष्णुक्रमान्क्रामत्युत्तरेद्युरुपतिष्ठत एवं सदा कुर्याद्यदहः सोमं क्रीणीयात्तदहरुभयं समस्येत्प्र च क्रामेदुप च तिष्ठति " इति ।

तत्र प्रथमामाह—

दिवस्परि प्रथमं जज्ञे अग्निरस्मद्द्वितीयं परि
जातवेदाः । तृतीयमप्सु नृमणा अजस्र-
मिन्धान एनं जरते स्वाधीः । , इति ।

अग्निः प्रथमं दिवस्परि द्युलोकस्योपरि जज्ञे सूर्यरूपेणोत्पन्नः । अस्मत्पर्यस्मदीयस्य मनुष्यलोकस्योपरि जातवेदा द्वितीयं जज्ञे प्रसिद्धवह्निरूपेण द्वितीयं जन्म प्राप्तवान् । अप्सु समुद्रे तृतीयं जज्ञे वडवानलरूपेणोत्पन्नः । अजस्रं त्रिष्वपि जन्मसु नृमणा नृषु यजमानेषु मनोऽनुग्रहबुद्धिर्यस्यासौ नृमणाः । एनमीदृशमग्निमिन्धानः पुरोडाशादिभिर्दीपयन्स्वाधीः स्वायत्तचित्तो जरते जीर्यते जरापर्यन्तं परिचरतीत्यर्थः ॥

अथ द्वितीयामाह—

विद्मा ते अग्ने त्रेधा त्रयाणि विद्मा ते सद्म
विभृतं पुरुत्रा । विद्मा ते नाम परमं
गुहा यद्विद्मा तमुत्सं[1] यत आजगन्थ । , इति ।

हेऽग्ने यानि पूर्वस्मिन्मन्त्रे दिवस्परीत्यादिना त्रेधा स्वरूपाण्युक्तानि आदित्याग्निवडवानलरूपाणि तानि त्रयाणि त्रित्वसंख्याकानि रूपाणि वयं विद्म ज्ञातुमिच्छाम । किंच ते तव पुरुत्रा पुरुषु प्रदेशेषु गार्हपत्याहवनीयान्वाहार्यपचनाग्नीध्रीयशामित्ररूपेषु सद्म विभृतमवस्थानं संपादितं तदपि विद्म ज्ञातुमिच्छाम । किंच ते तव परममुत्कृष्टं गुहा गुह्यं गोप्यं देवेद्ध मन्विद्धेत्यादिमन्त्रप्रतिपाद्यं नाम यदास्ति तदपि विद्म । देवेद्धादीनां नामत्वं मन्त्रान्तरे संबुद्धिबलादवगम्यते—अग्ने देवेद्ध मन्विद्ध मन्द्रजिह्वेति । किंच यत उत्साहृष्टिरूपात्प्रस्रवणादाजगन्थ वैद्युतरूपेण त्वमागतोऽसि तमुत्सं विद्म ॥

१ ख. च. तमप्युत्सं ।

मन्यन्त इतः परमर्जयितुमशक्त्या व्ययभीरवः । तदिदं प्रजानां मनोवैलक्षण्यं क्रमे(म)णोपस्थानकालहेतुकम् । यस्मात्प्रयाणशीलस्य पुरुषस्यार्जयितुमवकाशो नास्ति तस्माद्यायावरः प्रयाणशीलः पुरुषः क्षेम्यस्येशे विद्यमानद्रव्यरक्षणस्यैव प्रभुर्भवति । यस्मादेवं लोके दृष्टं तस्मादत्र देवयजनदेशं प्रति यायावरो यजमानः साधनान्तरसंपादनेच्छां परित्यज्य विद्यमानान्येवाग्न्यादिसाधनान्युपस्थानादिव्यापारैः परि[र]क्षितुमध्यवस्यति ॥

सोमविकृतित्वं द्योतयितुं तदङ्गानुष्ठानकालविशेषं चावगमयितुं दीक्षाङ्गं किंचिद्विधत्ते—

" मुष्टी करोति वाचं यच्छति यज्ञस्य धृत्यै " [सं० का० ५ प्र० २ अ० १] इति ।

स्वाहा यज्ञं मनसेत्यादिभिर्मन्त्रैर्हस्तयोरङ्गुल्याकुञ्चनं मुष्टीकरणम् । मौनं वाग्यमः । तदुभयं यज्ञस्य पलायनपरिहाराय भवति ॥

अत्र विनियोगसंग्रहः—

दिवस्परीत्यनुवाके वात्सप्रेणोपतिष्ठते ॥ १ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे द्वितीयप्रपाठके द्वितीयोऽनुवाकः ॥ २ ॥

(अथ चतुर्थाष्टके द्वितीयप्रपाठके तृतीयोऽनुवाकः ।)

अन्नपतेऽन्नस्य नो देह्यनमीवस्य शुष्मिणः ।
प्र प्रदातारं तारिष ऊर्जं नो धेहि द्विपदे चतुष्पदे । उदु त्वा विश्वे देवा अग्ने भरन्तु चित्तिभिः । स नो भव शिवतमः सुप्रतीको विभावसुः । प्रेदग्ने ज्योतिष्मान्याहि शिवेभिरर्चिभिस्त्वम् । बृहद्भिर्भानुभिर्भासन्मा हिꣳ-

---

१ ख. च. °न्येवोल्याग्रयां । २ ख. च. परीक्षिं° । ३ ख. च. °स्य पालनदार्ढ्याय भ° । ४ ख. च. °व इत्य° । ५ ख. च. °केन वा° ।

सीस्तनुवा प्रजाः । समिधाऽग्निं दुवस्यत घृतैर्बोधयतातिथिम् । आ (१) अस्मिन्हव्या जुहोतन । प्रप्रायमग्निर्भरतस्य शृण्वे वि यत्सूर्यो न रोचते बृहद्भाः । अभि यः पूरुं पृतनासु तस्थौ दीदाय दैव्यो अतिथिः शिवो नः । आपो देवीः प्रति गृह्णीत भस्मैतत्स्योने कृणुध्वꣳ सुरभावु लोके । तस्मै नमन्तां जनयः सुपत्नीर्मातेव पुत्रं बिभृता स्वेनम् । अप्स्वग्ने सधिष्टवं (२) सौषधीरनु रुध्यसे । गर्भे सञ्जायसे पुनः । गर्भो अस्योषधीनां गर्भो वनस्पतीनाम् । गर्भो विश्वस्य भूतस्याग्ने गर्भो अपामसि । प्रसद्य भस्मना योनिमपश्च पृथिवीमग्ने । सꣳसृज्य मातृभिस्त्वं ज्योतिष्मान्पुनराऽसदः । पुनरासद्य सदनमपश्च पृथिवीमग्ने । शेषे मातुर्यथोपस्थेऽन्तरस्याꣳ शिवतमः । पुनरूर्जा (३) नि वर्तस्व पुनरग्न इषाऽऽयुषा । पुनर्नः पाहि विश्वतः । सह रय्या नि वर्तस्वाग्ने पिन्वस्व धारया । विश्वप्स्न्या विश्वतस्परि । पुनस्त्वाऽऽदित्या रुद्रा वसवः समिन्धतां पुनर्ब्रह्माणो वसुनीथ यज्ञैः । घृतेन

त्वं तनुवो वर्धयस्व सत्याः सन्तु यजमानस्य
कामाः । बोधा नो अस्य वचसो यविष्ठ
मꣳहिष्ठस्य प्रभृतस्य स्वधावः । पीयति त्वो
अनु त्वो गृणाति वन्दारुस्ते तनुवं वन्दे अग्ने ।
स बोधि सूरिर्मघवा वसुदावा वसुपतिः ।
युयोध्यस्मद्द्वेषाꣳसि (४) ॥

(आ तवोर्जाऽनु षोडश च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके
द्वितीयप्रपाठके तृतीयोऽनुवाकः ॥ ३ ॥

(अथ चतुर्थाष्टके द्वितीयप्रपाठके तृतीयोऽनुवाकः ।)

अन्नपत इत्यन्न—पते । अन्नस्य । नः । देहि ।
अनमीवस्य । शुष्मिणः । प्रेति । प्रदातारमिति प्र—
दातारम् । तारिषः । ऊर्जम् । नः । धेहि । द्विपद्
इति द्वि—पदे । चतुष्पद् इति चतुः—पदे । उदिति ।
उ । त्वा । विश्वे । देवाः । अग्ने । भरन्तु । चित्ति-
भिरिति चित्ति—भिः । सः । नः । भव । शिवतम
इति शिव—तमः । सुप्रतीक इति सु—प्रतीकः ।
विभावसुरिति विभा—वसुः । प्रेति । इत । अग्ने ।
ज्योतिष्मान् । याहि । शिवेभिः । अर्चिभिरि-

त्यर्चि—भिः । त्वम् । बृहद्भिरिति बृहत्—भिः ।
भानुभिरिति भानु—भिः । भासन् । मा । हिꣳसीः ।
तनुवा । प्रजा इति प्र—जाः । समिधेति सम्—
इधा । अग्निम् । दुवस्यत । घृतैः । बोधयत । अति-
थिम् । एति (१) । अस्मिन् । हव्या । जुहोतन ।
प्रप्रेति प्र—प्र । अयम् । अग्निः । भरतस्य । शृण्वे ।
वीति । यत् । सूर्यः । न । रोचते । बृहत् । भाः ।
अभीति । यः । पूरुम् । पृतनासु । तस्थौ । दीदायं ।
दैव्यः । अतिथिः । शिवः । नः । आपः । देवीः ।
प्रतीति । गृह्णीत । भस्म । एतत् । स्योने । कृणु-
ध्वम् । सुरभौ । उ । लोके । तस्मै । नमन्ताम् ।
जनयः । सुपत्नीरिति सु—पत्नीः । माता । इव ।
पुत्रम् । बिभृत । स्विति । एनम् । अप्स्वित्यप्—सु ।
अग्ने । सधिः । तव (२) । सः । ओषधीः ।
अन्विति । रुध्यसे । गर्भे । सन् । जायसे । पुनः ।
गर्भः । असि । ओषधीनाम् । गर्भः । वनस्पती-
नाम् । गर्भः । विश्वस्य । भूतस्य । अग्ने । गर्भः ।
अपाम् । असि । प्रसद्येति प्र—सद्य । भस्मना ।
योनिम् । अपः । च । पृथिवीम् । अग्ने । सꣳसृ-
ज्येति सं—सृज्य । मातृभिरिति मातृ—भिः । त्वम् ।

ज्योतिष्मान् । पुनः । एतिं । असदः । पुनः । आस-
द्येत्या—सद्य । सदनम् । अपः । च । पृथिवीम् ।
अग्ने । शेषे । मातुः । यथा । उपस्थ इत्युप—स्थे ।
अन्तः । अस्याम् । शिवतम इति शिव—तमः ।
पुनः । ऊर्जा (३) । नीतिं । वर्तस्व । पुनः । अग्ने ।
इषा । आयुषा । पुनः । नः । पाहि । विश्वतः ।
सह । रय्या । नीतिं । वर्तस्व । अग्ने । पिन्वस्व ।
धारया । विश्वप्स्नियेति विश्व—प्स्निया । विश्वतः ।
परिं । पुनः । त्वा । आदित्याः । रुद्राः । वसवः ।
समितिं । इन्धताम् । पुनः । ब्रह्माणः । वसुनी-
थेति वसु—नीथ । यज्ञैः । घृतेन । त्वम् । तनुवः ।
वर्धयस्व । सत्याः । सन्तु । यजमानस्य । कामाः ।
बोध । नः । अस्य । वचसः । यविष्ठ । मꣳहि-
ष्ठस्य । प्रमृतस्येति प्र—मृतस्य । स्वधाव इति स्व-
धा—वः । पीयति । त्वः । अन्वितिं । त्वः ।
गृणाति । वन्दारुः । ते । तनुवम् । वन्दे । अग्ने ।
सः । बोधि । सूरिः । मघवेति मघ—वा । वसु-
दावेति वसु—दावा । वसुपतिरिति वसु—पतिः ।
युयोधि । अस्मत् । द्वेषाꣳसि (४) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके
द्वितीयप्रपाठके तृतीयोऽनुवाकः ॥ ३ ॥

(अथ चतुर्थकाण्डे द्वितीयप्रपाठके तृतीयोऽनुवाकः ।)

द्वितीयानुवाके वह्नेरुख्यस्योपस्थानमुक्तं, तृतीये चयनार्थस्य देवयजनस्य परिग्रहोऽभिधीयते ।

कल्पः—" व्रतकालेऽन्नपतेऽन्नस्य नो देहीत्यौदुम्बरीं समिधं व्रतेऽक्त्वाऽभ्यादधाति " इति । व्रतार्थे क्षीरद्रव्ये ।

पाठस्तु—

अन्नपतेऽन्नस्य नो देह्यनमीवस्य शु-
ष्मिणः । प्र प्रदातारं तारिष ऊर्जं
नो धेहि द्विपदे चतुष्पदे ।, इति ।

हेऽन्नपतेऽग्नेऽनमीवस्य रोगरहितस्य शुष्मिणो बलहेतोरन्नस्य प्राप्तिं नोऽस्मभ्यं देहि । प्रकर्षेण हविषो दातारं यजमानं प्रतारिषः प्रकर्षेण दुरितात्तारय । नोऽस्माकं द्विपदे चतुष्पदे मनुष्याय पशवे चोर्जं बलं धेहि संपादय ॥

अस्य मन्त्रस्य प्रथमपादेऽन्नपतिशब्दार्थं दर्शयति—

" अन्नपतेऽन्नस्य नो देहीत्याहाग्निर्वा अन्नपतिः स एवास्मा अन्नं प्र यच्छति " [सं० का० ५ प्र० २ अ० २] इति ॥

द्वितीयपादेऽनमीवशब्दार्थं दर्शयति—

" अनमीवस्य शुष्मिण इत्याहायक्ष्मस्येति वावैतदाह " [सं० का० ५ प्र० २ अ० २ इति ॥

उत्तरार्धे तारिषो धेहीति पदयोस्तात्पर्यं दर्शयति—

" प्र प्रदातारं तारिष ऊर्जं नो धेहि द्विपदे चतुष्पद इत्याहाऽऽशिषमेवैतामा शास्ते " [सं० का० ५ प्र० २ अ० २] इति ॥

कल्पः—" उदु त्वा विश्वे देवा इत्युख्यमुद्यम्य " इति ।

पाठस्तु—

उदु त्वा विश्वे देवा अग्ने भरन्तु चित्तिभिः । स
नो भव शिवतमः सुप्रतीको विभावसुः ।, इति ।

हेऽग्ने विश्वे सर्वेऽपि देवाः प्राणरूपाश्चित्तिभिरुद्यमनकुशलाभिर्धीवृत्तिभिरुर्ध्वमेव त्वां भरन्तु । स त्वं नोऽस्माकं शिवतमः शान्ततमः सुप्रतीकः सुमुखो विभावसुः प्रभया वासयिता च भव ॥

अस्य मन्त्रस्य प्रथमपादे देवशब्दार्थं दर्शयति—

(गार्हपत्यचयनाभिधानम्)

अत्र विनियोगसंग्रहः—

अन्नाऽऽदधाति समिधमुद्यच्छेदुद्दचाऽनलम् ।
प्रेत्पयात्यथ समिधा गम्यन्ते समिधं क्षिपेत् ॥ १ ॥
राजन्यश्चेत्प्रेति मन्त्र आपो भस्माप्सु वेशयेत् ।
त्रिभिः प्रसेति तु द्वाभ्यामुखायां स्थापयेदमुम् ॥ २ ॥
पुनर्द्वाभ्यामुदैत्यग्निं पुनस्त्वेति समिन्धयेत् ।
बोधद्वाभ्यामुपस्थानं मन्त्राः पञ्चदशेरिताः ॥ ३ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे द्वितीयप्रपाठके
तृतीयोऽनुवाकः ॥ ३ ॥

(अथ चतुर्थाष्टके द्वितीयप्रपाठके चतुर्थोऽनुवाकः ।)

अपेत॒ वीत॒ वि च॑ सर्पतातो॒ येऽत्र॒ स्थ पु॑रा॒णा ये च॒ नूत॑नाः । अदा॑दिदं य॒मोऽव॑सानं पृथि॒व्या अक्र॑न्नि॒मं पि॒तरो॑ लो॒कमस्मै॑ । अग्ने॒र्भस्मा॑स्यग्नेः पुरी॒षमसि॑ संज्ञा॒नम॑सि काम॒धर॑णं मयि॑ ते कामधर॑णं भूयात् । सं या वः॑ प्रि॒यास्त॒नुवः॑ सं प्रि॒या हृद॑यानि वः । आ॒त्मा वो॑ अस्तु (१) सं॒प्रि॒यः सं॑प्रि॒यास्त॒नुवो॒ मम॑ । अय॒ꣳ सो अ॒ग्निर्य॑स्मि॒न्त्सोम॒मिन्द्रः॑ सु॒तं द॒धे ज॒ठरे॑ वावशा॒नः । स॒ह॒स्रि॒यं वाज॒मत्यं॒ न स॒प्तिꣳ स॑स॒वान्त्स॒न्त्स्तूय॑से जातवेदः । अग्ने॑ दि॒वो अ॑र्ण॒मच्छा॑ जिगा॒स्यच्छा॑ दे॒वाꣳ ऊ॑चिषे धि॒ष्ण्या॑ ये । याः पर॒स्ताद्रो॑च॒ने सू॒र्य॑स्य

याश्चावस्तादुपतिष्ठन्त आपः । अग्ने यत्ते दिवि वर्चः पृथिव्यां यदोषधीषु (२) अप्सु वा यजत्र । येनान्तरिक्षमुर्वाततन्थ त्वेषः स भानुरर्णवो नृचक्षाः । पुरीष्यासो अग्नयः प्रावणेभिः सजोषसः । जुषन्तां हव्यमाहुतमनमीवा इषो महीः । इडामग्ने पुरुदꣳसꣳ सनिं गोः शश्वत्तमꣳ हवमानाय साध । स्यान्नः सूनुस्तनयो विजावाऽग्ने सा ते सुमतिर्भूत्वस्मे । अयं ते योनिर्ऋत्वियो यतो जातो अरोचथाः । तं जानन् (३) अग्न आ रोहाथा नो वर्धया रयिम् । चिदसि तया देवतयाऽङ्गिरस्वद्ध्रुवा सीद परिचिदसि तया देवतयाऽङ्गिरस्वद्ध्रुवा सीद लोकं पृण छिद्रं पृणाथो सीद शिवा त्वम् । इन्द्राग्नी त्वा बृहस्पतिरस्मिन्योनावसीषदन् । ता अस्य सूददोहसः सोमꣳ श्रीणन्ति पृश्नयः । जन्मन्देवानां विशस्त्रिष्वा रोचने दिवः (४) ॥

(अस्त्वोषधीषु जानन्नष्टाचत्वारिꣳशच्च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके द्वितीयप्रपाठके चतुर्थोऽनुवाकः ॥ ४ ॥

(अथ चतुर्थाष्टके द्वितीयप्रपाठके चतुर्थोऽनुवाकः ।)

अपेतिं । इत । वीतिं । इत । वीतिं । च । सर्पत । अतः । ये । अत्र । स्थ । पुराणाः । ये । च । नूतनाः । अदात् । इदम् । यमः । अवसानमित्यव—सानम् । पृथिव्याः । अक्रन् । इमम् । पितरः । लोकम् । अस्मै । अग्नेः । भस्म । असि । अग्नेः । पुरीषम् । असि । संज्ञानमितिं सं—ज्ञानम् । असि । कामधरणमितिं काम—धरणम् । मयि । ते । कामधरणमितिं काम—धरणम् । भूयात् । समितिं । याः । वः । प्रियाः । तनुवः । समितिं । प्रिया । हृदयानि । वः । आत्मा । वः । अस्तु (१) । संप्रिय इति सं—प्रियः । संप्रिया इति सं—प्रियाः । तनुवः । मम । अयम् । सः । अग्निः । यस्मिन् । सोमम् । इन्द्रः । सुतम् । दधे । जठरे । वावशानः । सहस्रियम् । वाजम् । अत्यम् । न । सप्तिम् । ससवानितिं स—सवान् । सन् । स्तूयसे । जातवेद इतिं जात—वेदः । अग्ने । दिवः । अर्णम् । अच्छ । जिगासि । अच्छ । देवान् । ऊचिषे । धिष्णियाः । ये । याः । परस्तात् । रोचने । सूर्यस्य । याः । च । अवस्तात् । उपतिष्ठन्त इत्युप—तिष्ठन्ते । आपः । अग्ने । यत् । ते । दिवि ।

वर्चः । पृथिव्याम् । यत् । ओषधीषु (२) ।
अप्स्वित्यप्—सु । वा । यजत्र । येन । अन्तरिक्षम् ।
उरु । आततन्थेत्या—ततन्थ । त्वेषः । सः । भानुः ।
अर्णवः । नृचक्षा इति नृ—चक्षाः । पुरीष्यासः ।
अग्नयः । प्रावणेभिरिति प्र—वनेभिः । सजोषस इति
स—जोषसः । जुषन्ताम् । हव्यम् । आहुतमित्या—
हुतम् । अनमीवाः । इषः । महीः । इडाम् । अग्ने ।
पुरुदꣳसमिति पुरु—दꣳसम् । सनिम् । गोः । शश्व-
त्तममिति शश्वत्—तमम् । हवमानाय । साध ।
स्यात् । नः । सूनुः । तनयः । विजावेति वि—जावा ।
अग्ने । सा । ते । सुमतिरिति सु—मतिः । भूतु ।
अस्मे इति । अयम् । ते । योनिः । ऋत्वियः । यतः ।
जातः । अरोचथाः । तम् । जानन् (३) । अग्ने ।
एति । रोह । अथ । नः । वर्धय । रयिम् । चित् ।
असि । तया । देवतया । अङ्गिरस्वत् । ध्रुवा । सीद ।
परिचिदिति परि—चित् । असि । तया । देवतया ।
अङ्गिरस्वत् । ध्रुवा । सीद । लोकम् । पृण । छिद्रम् ।
पृण । अथो इति । सीद । शिवा । त्वम् । इन्द्राग्नी
इतीन्द्र—अग्नी । त्वा । बृहस्पतिः । अस्मिन् ।
योनौ । असीषदन् । ताः । अस्य । सूददोहस इति

सूद—दोहसः । सोमम् । श्रीणन्ति । पृश्नयः ।
जन्मन् । देवानाम् । विशः । त्रिषु । एति । रोचने ।
दिवः (४) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके
द्वितीयप्रपाठके चतुर्थोऽनुवाकः ॥ ४ ॥

(अथ चतुर्थकाण्डे द्वितीयप्रपाठके चतुर्थोऽनुवाकः ।)

तृतीयेऽनुवाके वह्नेरुरुव्यस्य चयनदेशं प्रति नयनमुक्तम् । अथ चतुर्थे गार्हपत्यचयनमुच्यते ।

कल्पः—"अपवृत्ते दीक्षापरिमाणेऽपेत वीतेति गार्हपत्यचितेरायतनं +व्यायममात्रं चतुरस्रं परिमण्डलं वोद्धत्य" इति ।

पाठस्तु—

अपेत वीत वि च सर्पतातो येऽत्र स्थ पुराणा
ये च नूतनाः । अदादिदं यमोऽवसानं
पृथिव्या अक्रन्निमं पितरो लोकमस्मै । ,इति ।

यमस्य सर्वभूम्यधिपतित्वात्तद्भृत्याः पृथिव्यां सर्वत्र वर्तन्ते । हे यमभृत्या अत्र देवयजनस्थाने पुरातना ये यूयं स्थ नूतनाश्च ये यूयं स्थ ते सर्वेऽप्यपेतास्मात्स्थानादपगच्छत । वीतात्यन्तं विदूरं गच्छत । विसर्पत चातोऽस्मात्स्थानादपेत्य सांनिध्यं परित्यज्य विविधं गच्छत । पृथिव्या इदमवसानं स्थानमस्मभ्यं यमोऽदात् । पितरश्चास्मै यजमानायेमं लोकमक्रन्नेतच्चयनस्थानं कृतवन्तः ॥

तमेतं मन्त्रं विनियुङ्क्ते—

"यावती वै पृथिवी तस्यै यम आधिपत्यं परीयाय यो वै यमं देवयजनमस्या अनिर्याच्याग्निं चिनुते यमायैनꣳ स चिनुतेऽपेतेत्यध्यवसाययति यममेव देवयजनमस्यै निर्याच्याऽऽत्मनेऽग्निं चिनुते" [सं० का० ५ प्र० २ अ० ३] इति ।

+ सर्वपुस्तकेषु व्यायाममात्रमिति पाठो दृश्यते, स प्रामादिकः ।

---

१ क. घ. ङ. °यं नूं ।

वेदनं प्रशंसति—

" न दुश्चर्मा भवति य एवं वेद " [सं० का० ५ प्र० २ अ० ३] इति ॥

चितिगतां पुरीषगतां च संख्यां मिलित्वा प्रशंसति—

" पञ्च चितयो भवन्ति पञ्चभिः पुरीषैरभ्यूहति दश संपद्यन्ते दशाक्षरा विराडन्नं विराड्विराज्येवान्नाद्ये प्रति तिष्ठति" [सं०का०५प्र०२अ०३] इति ।

एकां चितिं कृत्वा पुरीषेणाऽऽच्छादयेत् । तस्या उपरि द्वितीयां चितिं कृत्वा तामप्याच्छादयेत् । एवं चितिपञ्चकेन पुरीषपञ्चकेन च दशसंख्या-संपत्तेर्विराट्छन्दोद्वारेणान्ने प्रतितिष्ठति ॥

अत्र विनियोगसंग्रहः—

अपोद्धन्ति चितिस्थानमग्नेस्तु सिकतां (ता) वपेत् ।
संज्ञानमूषान्निवपेत्संया(याः) संसृजते द्वयम् ॥ १ ॥
अयं चतसृभिः प्राचीरिष्टका आदधाति हि ।
इडां द्वाभ्यां पुरस्ताद्वै चिद्वाभ्यां पश्चिमे द्वयम् ।
लोकं लोकंपृणा द्वाभ्यां मन्त्रा अत्र चतुर्दश ॥ २ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे द्वितीयप्रपाठके चतुर्थोऽनुवाकः ॥ ४ ॥

(अथ चतुर्थाष्टके द्वितीयप्रपाठके पञ्चमोऽनुवाकः ।)

समितꣳ सं कल्पेथाꣳ संप्रियौ रोचिष्णू सुमनस्यमानौ । इषमूर्जमभि संवसानौ सं वां मनाꣳसि सं व्रता समु चित्तान्याऽकरम् । अग्ने पुरीष्याधिपा भवा त्वं नः । इषमूर्जे यजमानाय धेहि । पुरीष्यस्त्वमग्ने रयिमान्पुष्टिमाꣳ असि । शिवाः कृत्वा दिशः सर्वाः स्वां योनिमिहाऽसदः । भवतं नः समनसौ समोकसौ

(१) अरेपसौ । मा यज्ञꣳ हिꣳसिष्टं मा यज्ञपतिं जातवेदसौ शिवौ भवतमद्य नः । मातेव पुत्रं पृथिवी पुरीष्यमग्निꣳ स्वे योनावभारुखा । तां विश्वैर्देवैर्ऋतुभिः संविदानः प्रजापतिर्विश्वकर्मा वि मुञ्चतु । यदस्य पारे रजसः शुक्रं ज्योतिरजायत । तन्नः पर्षदति द्विषोऽग्नेः वैश्वानर स्वाहा । नमः सु ते निर्ऋते विश्वरूपे (२) अयस्मयं वि चृता बन्धमेतम् । यमेन त्वं यम्या संविदानोत्तमं नाकमधि रोहयेमम् । यत्ते देवी निर्ऋतिराबबन्ध दामं ग्रीवास्वविचर्त्यम् । इदं ते तद्वि ष्याम्यायुषो न मध्यादथा जीवः पितुमद्वि प्रमुक्तः । यस्यास्ते अस्याः क्रूर आसञ्जुहोम्येषां बन्धानामवसर्जनाय । भूमिरिति त्वा जना विदुर्निर्ऋतिः (३) इति त्वाऽहं परि वेद विश्वतः । असुन्वन्तमयजमानमिच्छ स्तेनस्येत्यां तस्करस्यान्वेषि । अन्यमस्मदिच्छ सा ते इत्या नमो देवि निर्ऋते तुभ्यमस्तु । देवीमहं निर्ऋतिं वन्दमानः पितेव पुत्रं दसये वचोभिः । विश्वस्य या जायमानस्य वेद शिरः

शिरः प्रति सूरी वि चष्टे । निवेशनः संगमनो वसूनां विश्वा रूपाऽभि चष्टे (४) शचीभिः । देव इव सविता सत्यधर्मेन्द्रो न तस्थौ समरे पथीनाम् । सं वरत्रा दधातन निराहावान्कृणोतन । सिञ्चामहा अवटमुद्रिणं वयं विश्वाऽहाऽदस्तमक्षितम् । निष्कृताहावमवटꣳ सुवर्त्रꣳ सुषेचनम् । उद्रिणꣳ सिञ्चे अक्षितम् । सीरा युञ्जन्ति कवयो युगा वि तन्वते पृथक् । धीरा देवेषु सुम्नया । युनक्त सीरा वि युगा तनोत कृते योनौ वपतेह (५) बीजम् । गिरा च श्रुष्टिः सभरा असन्नो नेदीय इत्सृण्यां पक्वमाऽयत् । लाङ्गलं पवीरवꣳ सुशेवꣳ सुमतित्सरु । उदित्कृषति गामविं प्रफर्व्यं च पीवरीम् । प्रस्थावद्रथवाहनम् । शुनं नः फाला वि तुदन्तु भूमिꣳ शुनं कीनाशा अभि यन्तु वाहान् । शुनं पर्जन्यो मधुना पयोभिः शुनासीरा शुनमस्मासु धत्तम् । कामं कामदुघे धुक्ष्व मित्राय वरुणाय च । इन्द्रायाग्नये पूष्ण ओषधीभ्यः प्रजाभ्यः । घृतेन सीता मधुना समक्ता विश्वैर्देवैरनुमता मरुद्भिः ।

ऊर्जस्वती पयसा पिन्वमानाऽस्मान्त्सीते पयसाऽभ्याववृत्स्व (६) ॥

(समोकसौ विश्वरूपे विदुर्निर्ऋतिरभि चष्ट इह मित्राय द्वाविꣳशतिश्च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुष्टिके द्वितीयप्रपाठके पञ्चमोऽनुवाकः ॥ ५ ॥

(अथ चतुर्थाष्टके द्वितीयप्रपाठके पञ्चमोऽनुवाकः ।)

समिति । इतम् । समिति । कल्पेथाम् । संप्रियाविति सं—प्रियौ । रोचिष्णू इति । सुमनस्यमानाविति सु—मनस्यमानौ । इषम् । ऊर्जम् । अभीति । संवसानाविति सं—वसानौ । समिति । वाम् । मनाꣳसि । समिति । व्रता । समिति । उ । चित्तानि । एति । अकरम् । अग्ने । पुरीष्य । अधिपा इत्यधि—पाः । भव । त्वम् । नः । इषम् । ऊर्जम् । यजमानाय । धेहि । पुरीष्यः । त्वम् । अग्ने । रयिमानिति रयि—मान् । पुष्टिमानिति पुष्टि—मान् । असि । शिवाः । कृत्वा । दिशः । सर्वाः । स्वाम् । योनिम् । इह । एति । असदः । भवतम् । नः । समनसाविति स—मनसौ । समोकसाविति सम्—ओकसौ (१) । अरेपसौ । मा । यज्ञम् । हिꣳसिष्टम् । मा । यज्ञपतिमिति यज्ञ—पतिम् । जातवेद-

सावितिं जात—वेदसौ । शिवौ । भवतम् । अद्य । नः । माता । इव । पुत्रम् । पृथिवी । पुरीष्यम् । अग्निम् । स्वे । योनौ । अभाः । उखा । ताम् । विश्वैः । देवैः । ऋतुभिरित्यृतु—भिः । संविदान इतिं सं—विदानः । प्रजापतिरितिं प्रजा—पतिः । विश्वकर्मेतिं विश्व—कर्मा । वीतिं । मुञ्चतु । यत् । अस्य । पारे । रजसः । शुक्रम् । ज्योतिः । अजायत । तत् । नः । पर्षत् । अतीतिं । द्विषः । अग्ने । वैश्वानर । स्वाहा । नमः । स्वितिं । ते । निर्ऋत इतिं निः—ऋते । विश्वरूप इतिं विश्व—रूपे (२) । अयस्मयम् । वीतिं । चृत । बन्धम् । एतम् । यमेन । त्वम् । यम्या । संविदानेतिं सं—विदाना । उत्तमित्युत्—तमम् । नाकम् । अधीतिं । रोहय । इमम् । यत् । ते । देवी । निर्ऋतिरिति निः—ऋतिः । आबबन्धेत्या—बबन्ध । दाम । ग्रीवासु । अविचर्त्यमित्यवि—चर्त्यम् । इदम् । ते । तत् । वीतिं । स्यामि । आयुषः । न । मध्यात् । अथ । जीवः । पितुम् । अद्धि । प्रमुक्त इति प्र—मुक्तः । यस्याः । ते । अस्याः । क्रूरे । आसन् । जुहोमि । एषाम् । बन्धानाम् । अवसर्जनायेत्यव—सर्जनाय । भूमिः । इतिं ।

त्वा । जनाः । विदुः । निर्ऋतिरिति निः—ऋतिः (३) । इतिं । त्वा । अहम् । परीतिं । वेद । विश्वतः । असुन्वन्तम् । अयजमानम् । इच्छ । स्तेनस्य । इत्याम् । तस्करस्य । अन्वितिं । एषि । अन्यम् । अस्मत् । इच्छ । सा । ते । इत्या । नमः । देवि । निर्ऋत इतिं निः—ऋते । तुभ्यम् । अस्तु । देवीम् । अहम् । निर्ऋतिमिति निः—ऋतिम् । वन्दमानः । पिता । इव । पुत्रम् । दसये । वचोभिरिति वचः—भिः । विश्वस्य । या । जायमानस्य । वेद । शिरःशिर इति शिरः—शिरः । प्रतीतिं । सूरी । वीतिं । चष्टे । निवेशन इतिं नि—वेशनः । संगमन इतिं सं—गमनः । वसूनाम् । विश्वा । रूपा । अभीतिं । चष्टे (४) । शचीभिरिति शचि—भिः । देवः । इव । सविता । सत्यधर्मेतिं सत्य—धर्मा । इन्द्रः । न । तस्थौ । समर इतिं सम्—अरे । पथीनाम् । समितिं । वरत्राः । दधातन । निरितिं । आहावानित्या—हावान् । कृणोतन । सिञ्चामहै । अवटम् । उद्रिणम् । वयम् । विश्वा । अहा । अदस्तम् । अक्षितम् । निष्कृताहावमिति निष्कृत—आहावम् । अवटम् । सुवरत्र-

मितिं सु—वस्त्रम् । सुषेचनमितिं सु—सेचनम् । उद्रिणम् । सिञ्चे । अक्षितम् । सीरा । युञ्जन्ति । कवयः । युगा । वीतिं । तन्वते । पृथक् । धीराः । देवेषु । सुम्नया । युनक्त । सीरा । वीतिं । युगा । तनोत । कृते । योनौ । वपत । इह (५) । बीजम् । गिरा । च । श्रुष्टिः । सभरा इति स—भराः । असत् । नः । नेदीयः । इत् । सृण्या । पक्वम् । एतिं । अयत् । लाङ्गलम् । पवीरवम् । सुशेवमितिं सु—शेवम् । सुमतित्सर्वितिं सुमति—त्सरु । उदितिं । इत् । कृषति । गाम् । अविम् । प्रफर्व्यमितिं प्र—फर्व्यम् । च । पीवरीम् । प्रस्थाव-दितिं प्रस्थ—वत् । रथवाहनमितिं रथ—वाहनम् । शुनम् । नः । फालाः । वीतिं । तुदन्तु । भूमिम् । शुनम् । कीनाशाः । अभीतिं । यन्तु । वाहान् । शुनम् । पर्जन्यः । मधुना । पयोभिरिति पयः—भिः । शुनासीरा । शुनम् । अस्मासु । धत्तम् । कामम् । कामदुघ इतिं काम—दुघे । धुक्ष्व । मित्राय । वरुणाय । च । इन्द्राय । अग्नये । पूष्णे । ओषधीभ्य इत्योषधि—भ्यः । प्रजाभ्य इतिं प्र—जाभ्यः । घृतेन । सीता । मधुना । समक्तेति सम्—

अक्ता । विश्वैः । देवैः । अनुमतेत्यनु—मता । मरुद्भिरितिं मरुत्—भिः । ऊर्जस्वती । पयसा । पिन्वमाना । अस्मान् । सीते । पयसा । अभ्यावर्तस्वेत्यभि—आवर्तस्व (६) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके द्वितीयप्रपाठके पञ्चमोऽनुवाकः ॥ ५ ॥

(अथ चतुर्थकाण्डे द्वितीयप्रपाठके पञ्चमोऽनुवाकः ।)

चतुर्थेऽनुवाके गार्हपत्यचयनमुक्तम् । अथ पञ्चमेऽनुवाक आहवनीयचयनार्थं भुवः कर्षणमुच्यते ।

कल्पः—" समितमिति तस्यां चतसृभिरुख्यं संनिवपति " इति ।

तत्र प्रथमामाह—

समितꣳ सं कल्पेथाꣳ संप्रियौ रोचिष्णू सुमनस्यमानौ । इषमूर्जमभि संवसानौ सं वां मनाꣳसि सं व्रता समु चित्तान्याऽकरम्[1], इति ।

येयं गार्हपत्यचितिः पूर्वानुवाकेऽभिहिता तस्यामुख्याग्निसंनिवपनवेलायां द्वावग्नी संपद्येते । पूर्वसिद्धोऽग्निरेको द्वितीयसिद्धोऽग्निरपरः । तावुभौ संबोध्येदमुच्यते—हेऽग्नी युवामुभौ समितं संगतौ भवतम् । संगत्य च संकल्पेथां सम्यग्यज्ञस्य कल्पनं निष्पादनं कुरुतम् । कीदृशावग्नी, संप्रियौ सम्यक्परस्परं प्रीतियुक्तौ, रोचिष्णू दीप्यमानौ, सुमनस्यमानौ परस्परं सौमनस्यं प्राप्तौ, इषमन्नमूर्जं रसं च (चाभि) संवसानौ [सर्वतः] सम्यक्संपादयन्तौ । वां युवयोर्मनांसि मनोजन्यान्संकल्पान्समाकरं सर्वतः संगतानि करोमि । तथा व्रतानि कर्माणि समाकरम् । तथा चित्तानि कर्मविषयज्ञानानि समाकरम् ॥

अथ द्वितीयामाह—

अग्ने पुरीष्याधिपा भवा त्वं नः । इषमूर्जं यजमानाय धेहि । , इति ।

---

१ क. घ. ङ. भवेत° ।

ऐन्द्र्या निवेशनेत्याग्निं गार्हपत्यं भजेदिति ।
प्रकाश्यो मुख्य इन्द्रो वा गौणो मुख्यस्तु पूर्ववत् ॥
एकस्य गौणताद्रौव्ये मन्त्रस्यैवानुवादतः ।
गौणताऽतोऽन्युपस्थाने मन्त्रः श्रुत्या नियुज्यते ॥

अग्निचयने निवेशनः संगमन इत्यादिका काचिदैन्द्री समाम्नाता । तस्या उत्तरार्ध इन्द्रो न तस्थाविति विद्यमानत्वात् । तन्मन्त्रविषयं ब्राह्मणं चैवमाम्नायते—" निवेशनः संगमनो वसूनामित्यैन्द्र्या गार्हपत्यमुपतिष्ठते " इति । एतेन ब्राह्मणेन गार्हपत्ये विनियुज्यमानो मन्त्रोऽर्थं प्रकाशयन्मुख्यमिन्द्रं प्रकाशयति । मुख्यश्चेन्द्रः स्वर्गाधिपतिः सहस्राक्षस्तत्रैवेन्द्रशब्दस्य रूढत्वात् । गौणस्त्विन्द्रो गार्हपत्यस्तस्यैश्वर्यगुणयोगेन यज्ञसाधनत्वेन मुख्येन्द्रसदृशत्वात् । तत्र पूर्वन्यायेन शीघ्रप्रतीत्या मुख्येन्द्रे मन्त्रेण प्रकाशिते सति मन्त्रब्राह्मणयोर्विसंवादं वारयितुं गार्हपत्यशब्देन मुख्येन्द्रो गार्हपत्यसमीपदेशो वा लक्षणीय इति प्राप्ते ब्रूमः—इन्द्रगार्हपत्ययोरन्यतरस्य गौणत्वेऽवश्यंभाविनि सति ब्राह्मणवाक्यस्य विधायकत्वादप्राप्तार्थत्वेन विधौ लक्षणाया अन्याय्यत्वात्प्राप्तार्थत्वेनानुवादको मन्त्र एव स्वघटकेन्द्रशब्देन वह्निं लक्षयति । ततो गार्हपत्यप्रकाशने समर्थं मन्त्रमैन्द्र्येति तृतीयाश्रुतिर्वन्ह्युपस्थाने विनियुङ्क्ते ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे द्वितीयप्रपाठके
पञ्चमोऽनुवाकः ॥ ५ ॥

(अथ चतुर्थाष्टके द्वितीयप्रपाठके षष्ठोऽनुवाकः ।)

या जाता ओषधयो देवेभ्यस्त्रियुगं पुरा ।
मन्दामि ब्रह्मणामहꣳ शतं धामानि सप्त च ।
शतं वो अम्ब धामानि सहस्रमुत वो रुहः ।
अधा शतक्रत्वो यूयमिमं मे अगदं कृत ।
पुष्पावतीः प्रसूवतीः फलिनीरफला उत ।

१ ख. च. °त्वात्तन्मन्त्र इन्द्रविषयः । ब्रा° ।

अश्वा इव सजित्वरीर्वृरुधः पारयिष्णवः ।
ओषधीरिति मातरस्तद्वो देवीरुप ब्रुवे । रपाꣳसि विघ्नतीरित रपः (१) चातयमानाः ।
अश्वत्थे वो निषदनं पर्णे वो वसतिः कृता ।
गोभाज इत्किलासथ यत्सनवथ पूरुषम् । यद्हं वाजयन्निमा ओषधीर्हस्त आदधे । आत्मा यक्ष्मस्य नश्यति पुरा जीवगृभो यथा । यदोषधयः संगच्छन्ते राजानः समिताविव । विप्रः स उच्यते भिषग्रक्षोहाऽमीवचातनः । निष्कृतिर्नाम वो माताऽथा यूयꣳ स्थ संकृतीः ।
सराः पतत्रिणीः (२) स्थन यदामयति निष्कृत । अन्या वो अन्यामवत्वन्याऽन्यस्या उपावत । ताः सर्वा ओषधयः संविदाना इदं मे प्रावता वचः । उच्छुष्मा ओषधीनां गावो गोष्ठादिवेरते । धनꣳ सनिष्यन्तीनामात्मानं तव पूरुष । अति विश्वाः परिष्ठाः स्तेन इव व्रजमक्रमुः । ओषधयः प्राचुच्यवुर्यत्किं च तनुवाꣳ रपः । याः (३) त आतस्थुरात्मानं या आविविशुः परुःपरुः । तास्ते यक्ष्मं वि बाधन्तामुग्रो मध्यमशीरिव । साकं यक्ष्म प्र पत

श्येनेनं किंकिदीविनां । साकं वातस्य ध्राज्या साकं नंश्य निहाकया । अश्वावतीः सोमवती-मूर्जयन्तीमुदोजसम् । आ विंत्सि सर्वा ओषधीरस्मा अरिष्टतातये । याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः । बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वंहसः । याः (४) ओषधयः सोमराज्ञीः प्रविष्टाः पृथिवीमनु । तासां त्वमस्युत्तमा प्र णो जीवातवे सुव । अवपतन्तीरवदन्दिव ओषधयः परि । यं जीवमश्नवामहै न स रिष्याति पूरुषः । याश्चेदमुपशृण्वन्ति याश्च दूरं परागताः । इह संगत्य ताः सर्वा अस्मै सं दत्त भेषजम् । मा वो रिषत्खनिता यस्मै चाहं खनामि वः । द्विपच्चतुष्पदस्माकꣳ सर्वमस्त्वनातुरम् । ओषधयः सं वदन्ते सोमेन सह राज्ञा । यस्मै करोति ब्राह्मणस्तꣳ राजन्पारयामसि (५) ॥

(रपः पतत्रिणीर्या अꣳहसो याः खनामि वोऽष्टादश च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके द्वितीयप्रपाठके षष्ठोऽनुवाकः ॥ ६ ॥

(अथ चतुर्थाष्टके द्वितीयप्रपाठके षष्ठोऽनुवाकः ।)

याः । जाताः । ओषधयः । देवेभ्यः । त्रियुगमिति त्रि—युगम् । पुरा । मन्दामि । बभ्रूणाम् । अहम् । शतम् । धामानि । सप्त । च । शतम् । वः । अम्ब । धामानि । सहस्रम् । उत । वः । रुहः । अधं । शतक्रत्व इति शत—क्रत्वः । यूयम् । इमम् । मे । अगदम् । कृत । पुष्पावतीरिति पुष्प—वतीः । प्रसूवंतीरिति प्र—सूवंतीः । फलिनीः । अफलाः । उत । अश्वाः । इव । सजित्वंरीरिति स—जित्वंरीः । वीरुधः । पारयिष्णवः । ओषधीः । इति । मातरः । तत् । वः । देवीः । उपेति । ब्रुवे । रपाꣳसि । विघ्नतीरिति वि—घ्नतीः । इत । रपः (१) । चातयमानाः । अश्वत्थे । वः । निषदनमिति नि—सदनम् । पर्णे । वः । वसतिः । कृता । गोभाज इति गो—भाजः । इत् । किल । असथ । यत् । सनवथ । पूरुषम् । यत् । अहम् । वाजयन् । इमाः । ओषधीः । हस्ते । आदध इत्या—दधे । आत्मा । यक्ष्मस्य । नश्यति । पुरा । जीवगृभ इति जीव—गृभः । यथा । यत् । ओषधयः । संगच्छन्त इति सं—गच्छन्ते । राजानः । समिताविति सम्—

इतौ । इव । विप्रः । सः । उच्यते । भिषक् । रक्षो-
हेति रक्षः—हा । अमीवचातन इत्यमीव—चातनः ।
निष्कृतिरिति निः—कृतिः । नाम । वः । माता ।
अथ । यूयम् । स्थ । संकृतीरिति सं—कृतीः । सराः ।
पतत्रिणीः (२) । स्थन । यत् । आमयति ।
निरितिं । कृत । अन्या । वः । अन्याम् । अवतु ।
अन्या । अन्यस्याः । उपेतिं । अवत । ताः । सर्वाः ।
ओषधयः । संविदाना इतिं सं—विदानाः । इदम् ।
मे । प्रेतिं । अवत । वचः । उदितिं । शुष्माः । ओष-
धीनाम् । गावः । गोष्ठादितिं गो—स्थात् । इव ।
ईरते । धनम् । सनिष्यन्तीनाम् । आत्मानम् । तव ।
पूरुष । अतीतिं । विश्वाः । परिष्ठा इतिं परि—स्थाः ।
स्तेनः । इव । व्रजम् । अक्रमुः । ओषधयः । प्रेतिं ।
अचुच्यवुः । यत् । किम् । च । तनुवाम् । रपः ।
याः (३) । ते । आतस्थुरित्या—तस्थुः । आत्मा-
नम् । याः । आविविशुरित्या—विविशुः । परुःपरु-
रिति परुः—परुः । ताः । ते । यक्ष्मम् । वीतिं ।
बाधन्ताम् । उग्रः । मध्यमशीरितिं मध्यम—शीः ।
इव । साकम् । यक्ष्म । प्रेतिं । पत । श्येनेन ।
किंकिदीविना । साकम् । वातस्य । ध्राज्या ।



साकम् । नश्य । निहाकयेतिं नि—हाकया । अश्वा-
वतीमित्यश्व—वतीम् । सोमवतीमितिं सोम—वतीम् ।
ऊर्जयन्तीम् । उदोजसमित्युत्—ओजसम् । एतिं ।
वित्सि । सर्वाः । ओषधीः । अस्मै । अरिष्टतातय
इत्यरिष्ट—तातये । याः । फलिनीः । याः । अफलाः ।
अपुष्पाः । याः । च । पुष्पिणीः । बृहस्पतिप्रसूता
इति बृहस्पतिं—प्रसूताः । ताः । नः । मुञ्चन्तु । अं-
हसः । याः (४) । ओषधयः । सोमराज्ञीरितिं
सोमं—राज्ञीः । प्रविष्टा इति प्र—विष्टाः । पृथिवीम् ।
अनु । तासाम् । त्वम् । असि । उत्तमेत्युत्—तमा ।
प्रेतिं । नः । जीवातवे । सुव । अवपतन्तीरित्यव—
पतन्तीः । अवदन् । दिवः । ओषधयः । परिं । यम् ।
जीवम् । अश्रवामहै । न । सः । रिष्याति ।
पूरुषः । याः । च । इदम् । उपशृण्वन्तित्युप—
शृण्वन्तिं । याः । च । दूरम् । परागता इति
परा—गताः । इह । संगत्येतिं सं—गत्य । ताः ।
सर्वाः । अस्मै । समितिं । दत्त । भेषजम् । मा ।
वः । रिषत् । खनिता । यस्मै । च । अहम् ।
खनामि । वः । द्विपदितिं द्वि—पत् । चतुष्पदितिं
चतुः—पत् । अस्माकम् । सर्वम् । अस्तु । अनातुर-

मित्यना—तुरम् । ओषधयः । समिति । वदन्ते ।
सोमेन । सह । राज्ञा । यस्मै । करोति । ब्राह्मणः ।
तम् । राजन् । पारयामसि (५) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके
द्वितीयप्रपाठके षष्ठोऽनुवाकः ॥ ६ ॥

(अथ चतुर्थकाण्डे द्वितीयप्रपाठके षष्ठोऽनुवाकः ।)

पञ्चमेऽनुवाकेऽग्निक्षेत्रकर्षणमुक्तम् । अथ षष्ठ ओषधिवापो विधीयते। कल्पः—" या जाता ओषधय इति चतुर्दशभिरोषधीर्वपति " इति । तत्र प्रथमामाह—

या जाता ओषधयो देवेभ्यस्त्रियुगं पुरा ।
मन्दामि बभ्रूणामहꣳ शतं धामानि सप्त च।,इति।

युगशब्दः कालवाची । त्रियुगं वर्षाः शरद्वसन्त इति कालत्रयमुद्दिश्य पुरा सृष्ट्यादौ देवेभ्यः सकाशाद्या ओषधय उत्पन्ना बभ्रूणां प्राणिभरणसमर्थानां परिपाकेन(ण) पिङ्गलवर्णानां वा तासामोषधीनां शतं धामानि शतसंख्याकाञ्जातिभेदान्सप्त च विशेषाकारेण ग्राम्यानारण्यांश्च सप्त धान्यभेदानवेक्ष्य मन्दामि हृष्यामि ॥

अथ द्वितीयामाह—

शतं वो अम्ब धामानि सहस्रमुत वो रुहः। अथा
शतक्रत्वो यूयमिमं मे अगदं कृत । , इति ।

हेऽम्ब मातृस्थानीया ओषधयो वो युष्माकं धामानि जातिभेदाः क्षेत्राणि वा शतं सन्ति । उतापि च वो युष्माकं रुहः प्ररोहा अङ्कुराश्च सहस्रं सन्ति । शतं सहस्रमित्याभ्यामपरिमितत्वमुपलक्ष्यते । अथैवं बहुभेदोपेतत्वे सति शतसंख्याकाः क्रतवो याभिर्युष्माभिर्निष्पाद्यन्ते तादृश्यः शतक्रत्वो यूयं मे मदीयमिमं यजमानमगदं कृत क्षुत्पिपासादिरोगरहितं कुरुत ॥

अथ तृतीयामाह—

---

१ ख. च. 'धीर्निवप' । २ ख. च. 'हुर्विधोपे' ।

पुष्पावतीः प्रसूवतीः फलिनीरफला उत ।
अश्वा इव सजित्वरीर्वीरुधः पारयिष्णवः।,इति ।

अत्रौषधयो नानाविधैर्विशेषणैः प्रशस्यन्ते । पुष्पावतीः काश्चिदोषधयः पुष्पमात्रपर्यवसायिन्यो नतु फलन्ति । प्रसूवतीरन्या ओषधयः पुष्पपूर्वकफलोत्पत्तिस्थायिन्यः । फलिनीरपराः काश्चिदोषधयः पुष्पं विना केवलेन फलेन युक्ताः । उतापि चाफला अन्याः काश्चिदोषधयः फलेन तद्धेतुपुष्पेण च विरहिताः । तदेतत्सर्वं लोकसिद्ध्यनुसारेणोदाहरणीयम् । वीरुधः काश्चिदोषधयो लतारूपाः, पारयिष्णवः फलपाकान्तत्वं परित्यज्य पारं बहुसंवत्सरावसानं प्राप्तुं शीलं यासां तास्तथाविधाः । तद्यथा नागवल्लीप्रभृतय एताः सर्वा ओषधयोऽश्वा इव सजित्वरीः । यथाऽश्वा युद्धे बहवः सह शीघ्रं गत्वा जयशीला भवन्ति एवमोषधयोऽपि बहव्यः सहोत्पन्नाः फलपर्यन्तलक्षणजयशीला भवन्ति ॥

अथ चतुर्थीमाह—

ओषधीरिति मातरस्तद्वो देवीरुप ब्रुवे । रपाꣳसि विघ्नतीरित रपश्चातयमानाः । , इति ।

हे मातरो मातृसमाना देवीर्देव्यः । इतिशब्दोऽत्र हेत्वर्थे वर्तते । यस्मादोषधीर्यूयमोषधयस्तत्तस्माद्वो युष्मानुपब्रुवे प्रार्थये । ओषो दाहः फलपाको धीयते स्थाप्यते यासु ता ओषधयः । अतो युष्मान्प्रति प्रार्थनमुचितमित्यर्थः । कथं प्रार्थनमिति तदुच्यते—रपांसि विघ्नतीः पापानि विनाशयन्त्यो रपश्चातयमानाः पापफलं दुःखमपि विनाशयन्त्य इत प्राप्नुत ॥

अथ पञ्चमीमाह—

अश्वत्थे वो निषदनं पर्णे वो वसतिः कृता ।
गोभाज इत्किलासथ यत्सनवथ पूरुषम् ।,इति ।

हे ओषधिदेवता वो युष्माकमश्वत्थे निषदनं पर्णे पलाशवृक्षे वो युष्माकं वसतिः कृता निवासकारणं गृहं कृतम् । देवताधिष्ठितत्वादेव लोकेऽश्वत्थवृक्षः प्रदक्षिणनमस्कारादिभिः पूज्यते । पलाशवृक्षश्चेध्मादिरूपेण कर्मसाधनं संपन्नः। ईदृश्योऽपि यूयं गोभाज इन्द्रवदीयस्थावररूपेण भूमिभाज एव भूत्वाऽसथ किल स्थिता इत्येतल्लोके प्रसिद्धम् । तत्किमर्थमिति तदुच्यते—यद्यस्मा-

---

१ ख. च. 'सिद्धानु' । २ च. 'क्षिणान' ।

ठितानां मन्त्राणां वैयर्थ्यप्रसङ्गात् । तस्मात्प्रकरणेन क्रमं बाधित्वा निजेच्छयैव प्रथममन्यं वोपक्रम्य विहितसंख्या पूरणीया ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे द्वितीयप्रपाठके षष्ठोऽनुवाकः ॥ ६ ॥

(अथ चतुर्थाष्टके द्वितीयप्रपाठके सप्तमोऽनुवाकः ।)

मा नो॑ हिꣳसीज्जनि॒ता यः पृ॑थि॒व्या यो वा॒ दिवꣳ स॒त्यध॑र्मा ज॒जान॑ । यश्चा॒पश्च॑न्द्रा बृ॒हतीर्ज॑जा॒न कस्मै॑ दे॒वाय॑ ह॒विषा॑ विधेम । अ॒भ्या॒व॒र्त॒स्व पृ॑थिवि य॒ज्ञेन॑ पयसा स॒ह । व॒पां ते॑ अ॒ग्निरि॑षि॒तोऽव॑ सर्पतु । अग्ने॒ यत्ते॒ शुक्रं यच्च॒न्द्रं यत्पू॒तं यद्या॒ज्ञिय॑म् । तद्दे॒वेभ्यो॑ भरा-मसि । इष॒मूर्ज॑महमि॒त आ (१) द॑द ऋत॒स्य धाम्ना॑ अ॒मृत॑स्य यो॒नेः॑ । आ नो॒ गोषु॑ विश॒त्वोष॑धीषु॒ जहा॑मि से॒दिमनि॑राममी॒वाम् । अग्ने॒ तव॒ श्रवो॒ वयो॒ महि॑ भ्राजन्त्यर्चयो॑ विभावसो । बृ॒हद्भा॑नो॒ शव॑सा वाज॒मुक्थ्यं॑ दधा॑सि दा॒शुषे॑ कवे । इर॒ज्यन्न॑ग्ने प्रथयस्व जन्तु॒भिर॒स्मे रायो॑ अमर्त्य । स दर्श॑तस्य॒ वपु॑षो वि रा॑जसि पृ॒णक्षि॑ सान॒सिꣳ र॒यिम् । ऊर्जो॑ नपाज्जातवेदः सुशस्ति॒भिर्म॑न्दस्व (२) धी-

१ ख. °मतो मध्यमतोऽन्ततो वो° ।

ति॒भि॑र्हि॒तः । त्वे इ॒षः सं दं॑धुर्भू॒रिरे॑तसश्चित्रो॒-तयो॑ वा॒मजा॑ताः । पा॒वक॑वर्चाः शु॒क्रव॑र्चा अनू॒-नव॑र्चा उदि॒यर्षि॑ भा॒नुना॑ । पु॒त्रः पि॒तरा॑ वि॒च-र॒न्नुपा॑वस्यु॒भे पृ॒णक्षि॒ रोद॑सी । ऋ॒ताव॑ानं महि॒षं वि॒श्वच॑र्षणि॒मग्निꣳ सु॒म्नाय॑ दधिरे पु॒रो जना॑ः । श्रु॒त्क॒र्ण॒ꣳ स॒प्र॒थ॒स्तमं त्वा॒ गिरा॑ दै॒व्यं मानु॑षा युगा । नि॒ष्कृ॒तार॑मध्व॒रस्य॑ प्रचे॒तस॑ं क्षय॑न्तꣳ राधसे महे । रा॒तिं भृ॒गू॒णामु॑शि॒जं क॒विक्र॑तुं पृ॒णक्षि॑ सान॒सिम् (३) र॒यिम् । चित॑ः स्थ परि॒चित॑ ऊ॒र्ध्वचि॑तः श्रयध्वं तया॑ दे॒वत॑याऽङ्गिरस्वद्ध्रुवाः सी॑दत । आ प्या॑यस्व समे॑तु ते॒ वि॒श्वत॑ः सोम वृ॒ष्ण्यं॑म् । भवा॒ वाज॑स्य संग॒थे । सं ते॒ पया॑ꣳसि॒ समु॑ यन्तु वा॒जाः सं वृ॒ष्ण्या॑न्यभिमाति॒षाह॑ः । आ॒प्या॒य॑मानो॒ अमृ॑ताय सोम दि॒वि श्रवा॑ꣳस्युत्त॒मानि॑ धिष्व (४) ॥

(आ मन्द॑स्व सान॒सिमेकान्नचत्वारिꣳशच्च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके द्वितीयप्रपाठके सप्तमोऽनुवाकः ॥ ७ ॥

(अथ चतुर्थाष्टके द्वितीयप्रपाठके सप्तमोऽनुवाकः ।)

मा । नः । हिꣳसीत् । जनिता । यः । पृथि-

व्याः । यः । वा । दिवम् । सत्यधर्मेति सत्य—धर्मा । जजान । यः । च । अपः । चन्द्राः । बृहतीः । जजान । कस्मै । देवाय । हविषा । विधेम । अभ्यावर्तस्वेत्यभि—आवर्तस्व । पृथिवि । यज्ञेन । पयसा । सह । वपाम् । ते । अग्निः । इषितः । अवेति । सर्पतु । अग्ने । यत् । ते । शुक्रम् । यत् । चन्द्रम् । यत् । पूतम् । यत् । यज्ञियम् । तत् । देवेभ्यः । भरामसि । इषम् । ऊर्जम् । अहम् । इतः । एति (१) । ददे । ऋतस्य । धाम्नः । अमृतस्य । योनेः । एति । नः । गोषु । विशतु । एति । ओषधीषु । जहामि । सेदिम् । अनिराम् । अमीवाम् । अग्ने । तव । श्रवः । वयः । महि । भ्राजन्ति । अर्चयः । विभावसो इति विभा—वसो । बृहद्भानो इति बृहत्—भानो । शवसा । वाजम् । उक्थ्यम् । दधासि । दाशुषे । कवे । इरज्यन् । अग्ने । प्रथयस्व । जन्तुभिरिति जन्तु—भिः । अस्मे इति । रायः । अमर्त्य । सः । दर्शतस्य । वपुषः । वीति । राजसि । पृणक्षि । सानसिम् । रयिम् । ऊर्जः । नपात् । जातवेद इति जात—वेदः । सुशस्तिभिरिति सुशस्ति—भिः । मन्दस्व (२) ।

धीतिभिरिति धीति—भिः । हितः । त्वे इति । इषः । समिति । दधुः । भूरिरेतस इति भूरि—रेतसः । चित्रोतय इति चित्र—ऊतयः । वामजाता इति वाम—जाताः । पावकवर्चा इति पावक—वर्चाः । शुक्रवर्चा इति शुक्र—वर्चाः । अनूनवर्चा इत्यनून—वर्चाः । उदिति । इयर्षि । भानुना । पुत्रः । पितरा । विचरन्निति वि—चरन् । उपेति । अवासि । उभे इति । पृणक्षि । रोदसी इति । ऋतावानमित्यृत—वानम् । महिषम् । विश्वचर्षणिमिति विश्व—चर्षणिम् । अग्निम् । सुम्नाय । दधिरे । पुरः । जनाः । श्रुत्कर्णमिति श्रुत्—कर्णम् । सप्रथस्तममिति सप्रथः—तमम् । त्वा । गिरा । दैव्यम् । मानुषा । युगा । निष्कर्तारमिति निः—कर्तारम् । अध्वरस्य । प्रचेतसमिति प्र—चेतसम् । क्षयन्तम् । राधसे । महे । रातिम् । भृगूणाम् । उशिजम् । कविक्रतुमिति कवि—क्रतुम् । पृणक्षि । सानसिम् (३) । रयिम् । चितः । स्थ । परिचित इति परि—चितः । ऊर्ध्वचित इत्यूर्ध्व—चितः । श्रयध्वम् । तया । देवतया । अङ्गिरस्वत् । ध्रुवाः । सीदत । एति । प्यायस्व । समिति । एतु ।

ते । विश्वतः । सोम । वृष्ण्यम् । भव । वाजस्य । संगथ इति सं—गथे । समिति । ते । पयांसि । समिति । उ । यन्तु । वाजाः । समिति । वृष्ण्यानि । अभिमातिषाह इत्यभिमाति—साहः । आप्यायमान इत्या—प्यायमानः । अमृताय । सोम । दिवि । श्रवांसि । उत्तमानीत्युत्—तमानि । धिष्व (४) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके द्वितीयप्रपाठके सप्तमोऽनुवाकः ॥ ७ ॥

(अथ चतुर्थकाण्डे द्वितीयप्रपाठके सप्तमोऽनुवाकः ।)

षष्ठेऽनुवाक ओषधिवापोऽभिहितः । अथ सप्तमे लोष्टक्षेपादिकमभिधीयते । कल्पः—" मा नो हिꣳसीज्जनिता यः पृथिव्या इति चतसृभिर्दिग्भ्यो लोष्टान्त्समस्यति येऽन्तर्विधाद्बहिर्विधमापन्ना भवन्ति " इति ।

कर्षणे ये लोष्टाः परिमितक्षेत्राद्बहिः पतन्ति तान्पुनरन्तः पातयेदित्यर्थः ॥

तत्र प्रथमामाह—

मा नो हिꣳसीज्जनिता यः पृथिव्या यो वा दिवꣳ सत्यधर्मा जजान । यश्चापश्चन्द्रा बृहतीर्जजान कस्मै देवाय हविषा विधेम ।, इति ।

यः प्रजापतिः पृथिव्या जनितोत्पादको यो वा प्रजापतिः सत्यधर्माऽवितथधारणशक्तिः सन्दिवं जजानोत्पादयामास । पुनरपि यः प्रजापतिश्चन्द्रा आह्लादकारिणीर्बृहतीर्बहुला अपो जजानोत्पादयामास, तादृशः प्रजापतिर्नोऽस्मान्मा हिंसीत् । तादृशाय कस्मै प्रजापतये हविषा विधेम परिचरेम ॥

अथ द्वितीयामाह—

अभ्यावर्तस्व पृथिवि यज्ञेन पयसा सह । वपां ते अग्निरिषितोऽव सर्पतु ।, इति ।

हे पृथिवि यज्ञेनानुष्ठातव्येन पयसा च तत्फलभूतेन सहाभ्यावर्तस्वास्मदाभिमुख्येनाऽऽगच्छ । इषित इच्छावानग्निस्ते वपां त्वदीयवपासदृशमिमं प्रदेशमवसर्पतु प्राप्नोतु ॥

अथ तृतीयामाह—

अग्ने यत्ते शुक्रं यच्चन्द्रं यत्पूतं यद्यज्ञियम् । तद्देवेभ्यो भरामसि ।, इति ।

हेऽग्ने ते त्वदीयं यदङ्गं शुक्रं दीप्तिमत्, यच्चान्यदङ्गं चन्द्रमाह्लादकरं, यदप्यन्यदङ्गं पूतं शुद्धं, यदप्यन्यदङ्गं यज्ञियं यज्ञार्हं, तत्सर्वं लोष्टरूपं देवेभ्यो देवानामर्थे भरामसि संपादयामः ॥

अथ चतुर्थीमाह—

इषमूर्जमहमित आ दद ऋतस्य धाम्नो अमृतस्य योनेः । आ नो गोषु विशत्वोषधीषु जहामि सेदिमनिराममीवाम् ।, इति ।

ऋतस्य यज्ञस्य धाम्नः स्थानभूतादमृतस्य योनेः कारणभूतादितो देशादिषमन्नरूपमूर्जं रसरूपं लोष्टमाददे स्वीकरोमि । स लोष्टो नोऽस्मदीयेषु गोष्वाविशत्वागत्य प्रविशतु । तथौषधीष्वाविशतु । सीदन्त्यत्रेति सेदिर्भूमि[स्ता]मनिरामन्नरहितामममीवां रोगयुक्तां जहामि परित्यजामि ॥

एतैर्मन्त्रैः साध्यं लोष्टानां क्षेत्रमध्ये स्थापनं विधत्ते—

" दिग्भ्यो लोष्टान्त्समस्यति दिशामेव वीर्यमवरुध्य दिशां वीर्येऽग्निं चिनुते " [सं० का० ५ प्र० २ अ० ५] इति ।

कर्षणावसरे ये लोष्टा वेणुना विमितादग्निक्षेत्राद्बहिर्दिक्षु पतितास्ताभ्यो दिग्भ्यस्ताँल्लोष्टानानीय क्षेत्रे संयोजयेत् । तथा सति दिशां सामर्थ्यमस्मिन्क्षेत्रेऽवरुध्य तस्मिन्सामर्थ्येऽग्निं चितवान्भवति ॥

चतुर्थमन्त्रे कंचिद्विशेषं विधत्ते—

" यं द्विष्याद्यत्र स स्यात्तस्यै दिशो लोष्टमा हरेदिषमूर्जमहमित आ दद

१ ख. च. 'निरां सस्यर' ।

स्यामृतत्वाय देवताभावाय दिवि द्युलोके श्रवांसि श्रोतुं प्रियाण्युत्तमानि विचित्राण्यन्नानि धिष्व धारय संपादयेत्यर्थः ॥

तदेतद्द्वयं सामान्याकारेण विनियुङ्क्ते—

" सौम्या व्यूहति सोमो वै रेतोधा रेत एव तद्दधाति " [सं० का० ५ प्र० २ अ० ६] इति ।

सोमो देवता यस्यामृचि प्रतीयते सेयमृक्सौमी । विश्वतः सोमेत्याद्यायामृच्यसौ प्रतीयते । अमृताय सोमेत्युत्तरस्यामृचि प्रतीयते । तया सौम्या पूर्वं न्युप्ताः सिकता विविधं प्रसारयेत् । तथा सति सोमस्य रेतोधारकत्वात्तन्मन्त्रनिष्पाद्यव्यूहनेन यजमानो रेतो धारयति ॥

मन्त्रद्वयस्य पुरुषभेदेन व्यवस्थां विधत्ते—

" गायत्रिया ब्राह्मणस्य गायत्रो हि ब्राह्मणस्त्रिष्टुभा राजन्यस्य त्रैष्टुभो हि राजन्यः " [सं० का० ५ प्र० २ अ० ६] इति ।

आ प्यायस्वेति गायत्री । सं त इति त्रिष्टुप् ॥

अत्र विनियोगसंग्रहः—

माचतुर्भिः क्षिपेल्लोष्टानग्नेषट्केन वालुकाः ।
चित आहवनीयस्य परिक्षिपति शर्कराः ॥ १ ॥
आ प्या विप्रस्य सिकता व्यूहेत्सं ते पयांस्यथ ।
क्षत्रियस्य भवेद्व्यूह इति मन्त्राख्ययोदश ॥ २ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे द्वितीयप्रपाठके सप्तमोऽनुवाकः ॥ ७ ॥

(अथ चतुर्थाष्टके द्वितीयप्रपाठकेऽष्टमोऽनुवाकः ।)

अभ्यंस्थाद्विश्वाः पृतना अरातीस्तदग्निरांह तदु सोमं आह । बृहस्पतिः सविता तन्म आह पूषा मांऽधात्सुकृतस्य लोके । यदक्रन्दः प्रथमं जायमान उद्यन्त्समुद्रादुत वा

१ ख. च. दर्शयति । २ ख. च. °रिश्रयति ।

पुरीषात् । श्येनस्य पक्षा हरिणस्य बाहू उपस्तुतं जनिम तत्ते अर्वन् । अपां पृष्ठमसि योनिरग्नेः समुद्रमभितः पिन्वमानम् । वर्धमानं महः (१) आ च पुष्करं दिवो मात्रया वरिणा प्रथस्व । ब्रह्म जज्ञानं प्रथमं पुरस्ताद्वि सीमतः सुरुचो वेन आवः । स बुध्निया उपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवः । हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् । स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम । द्रप्सश्चस्कन्द पृथिवीमनु (२) द्यामिमं च योनिमनु यश्च पूर्वः । तृतीयं योनिमनु संचरन्तं द्रप्सं जुहोम्यनु सप्त होत्राः । नमो अस्तु सर्पेभ्यो ये के च पृथिवीमनु । ये अन्तरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः । येऽदो रोचने दिवो ये वा सूर्यस्य रश्मिषु । येषामप्सु सदः कृतं तेभ्यः सर्पेभ्यो नमः । या इषवो यातुधानानां ये वा वनस्पतीरनु । ये वाऽवटेषु शेरते तेभ्यः सर्पेभ्यो नमः (३) ॥

(महोऽनु यातुधानानामेकादश च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके द्वितीयप्रपाठकेऽष्टमोऽनुवाकः ॥ ८ ॥

(अथ चतुर्थाष्टके द्वितीयप्रपाठकेऽष्टमोऽनुवाकः ।)

अभीति । अस्थात् । विश्वाः । पृतनाः । अरा-तीः । तत् । अग्निः । आह । तत् । उ । सोमः । आह । बृहस्पतिः । सविता । तत् । मे । आह । पूषा । मा । अधात् । सुकृतस्येति सु—कृतस्य । लोके । यत् । अक्रन्दः । प्रथमम् । जायमानः । उद्यन्नित्युत्—यन् । समुद्रात् । उत । वा । पुरीषात् । श्येनस्य । पक्षा । हरिणस्य । बाहू इति । उपस्तुतमित्युप—स्तुतम् । जनिम । तत् । ते । अर्वन् । अपाम् । पृष्ठम् । असि । योनिः । अग्नेः । समुद्रम् । अभितः । पिन्वमानम् । वर्धमानम् । महः (१) । एति । च । पुष्करम् । दिवः । मात्रया । वरिणा । प्रथस्व । ब्रह्म । जज्ञानम् । प्रथमम् । पुरस्तात् । वीति । सीमतः । सुरुच इति सु—रुचः । वेनः । आवः । सः । बुध्नियाः । उपमा इत्युप—माः । अस्य । विष्ठा इति वि—स्थाः । सतः । च । योनिम् ।

असतः । च । विवः । हिरण्यगर्भ इति हिरण्य—गर्भः । समिति । अवर्तत । अग्रे । भूतस्य । जातः । पतिः । एकः । आसीत् । सः । दाधार । पृथिवीम् । द्याम् । उत । इमाम् । कस्मै । देवाय । हविषा । विधेम । द्रप्सः । चस्कन्द । पृथिवीम् । अन्विति (२) । द्याम् । इमम् । च । योनिम् । अन्विति । यः । च । पूर्वः । तृतीयम् । योनिम् । अन्विति । संचरन्तमिति सं—चरन्तम् । द्रप्सम् । जुहोमि । अन्विति । सप्त । होत्राः । नमः । अस्तु । सर्पेभ्यः । ये । के । च । पृथिवीम् । अनु । ये । अन्तरिक्षे । ये । दिवि । तेभ्यः । सर्पेभ्यः । नमः । ये । अदः । रोचने । दिवः । ये । वा । सूर्यस्य । रश्मिषु । येषाम् । अप्स्वित्यप्—सु । सदः । कृतम् । तेभ्यः । सर्पेभ्यः । नमः । याः । इषवः । यातुधानानामिति यातु—धानानाम् । ये । वा । वनस्पतीन् । अनु । ये । वा । अवटेषु । शेरते । तेभ्यः । सर्पेभ्यः । नमः (३) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके द्वितीयप्रपाठकेऽष्टमोऽनुवाकः ॥ ८ ॥

(अथ चतुर्थकाण्डे द्वितीयप्रपाठकेऽष्टमोऽनुवाकः ।)

सप्तमे लोष्टसमसनादिकमुक्तम् । अथाष्टमे रुक्माद्युपधानं वक्तव्यम् । तत्राऽऽदौ तावदश्वाक्रमणमुच्यते ।

हिर स्वर्णमयं दध्याद्रप्सस्तस्याभिमर्शनम् ।
नमस्त्रिभिर्मन्त्रयेत मन्त्रा अत्र नवेरिताः ॥ २ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे द्वितीयप्रपाठकेऽ-
ष्टमोऽनुवाकः ॥ ८ ॥

(अथ चतुर्थाष्टके द्वितीयप्रपाठके नवमोऽनुवाकः ।)

ध्रुवाऽसि धरुणाऽस्तृता विश्वकर्मणा सुकृ-
ता । मा त्वा समुद्र उद्वधीन्मा सुपर्णो व्यथ-
माना पृथिवीं दृꣳह । प्रजापतिस्त्वा सादयतु
पृथिव्याः पृष्ठे व्यचस्वतीं प्रथस्वतीं प्रथोऽसि
पृथिव्यसि भूरसि भूमिरस्यदितिरसि विश्वधाया
विश्वस्य भुवनस्य धर्त्री पृथिवीं यच्छ पृथिवीं
दृꣳह पृथिवीं मा हिꣳसीर्विश्वस्मै प्राणायापानाय
व्यानायोदानाय प्रतिष्ठायै (१) चरित्राया-
ग्निस्त्वाऽभि पातु मह्या स्वस्त्या छर्दिषा शंत-
मेन तया देवतयाऽङ्गिरस्वद्ध्रुवा सीद । काण्डा-
त्काण्डात्प्ररोहन्ती परुषःपरुषः परि । एवा
नो दूर्वे प्र तनु सहस्रेण शतेन च । या शतेन
प्रतनोषि सहस्रेण विरोहसि । तस्यास्ते देवी-
ष्टके विधेम हविषा वयम् । अषाढाऽसि सहꣳ-
माना सहस्वारातीः सहस्वारातीयतः सहस्व

पृतनाः सहस्व पृतन्यतः । सहस्रवीर्या (२) असि
सा मा जिन्व । मधु वाता ऋतायते मधु क्षरन्ति
सिन्धवः । माध्वीर्नः सन्त्वोषधीः । मधु
नक्तमुतोषसि मधुमत्पार्थिवꣳ रजः । मधु
द्यौरस्तु नः पिता । मधुमान्नो वनस्पतिर्मधुमाꣳ
अस्तु सूर्यः । माध्वीर्गावो भवन्तु नः । मही
द्यौः पृथिवी च न इमं यज्ञं मिमिक्षताम् ।
पिपृतां नो भरीमभिः । तद्विष्णोः परमम् (३)
पदꣳ सदा पश्यन्ति सूरयः । दिवीव चक्षुरात-
तम् । ध्रुवाऽसि पृथिवि सहस्व पृतन्यतः ।
स्यूता देवेभिरमृतेनाऽगाः । यास्ते अग्ने सूर्ये
रुचं उद्यतो दिवमातन्वन्ति रश्मिभिः । ताभिः
सर्वाभी रुचे जनाय नस्कृधि । या वो देवाः
सूर्ये रुचो गोष्वश्वेषु या रुचः । इन्द्राग्नी ताभिः
सर्वाभी रुचं नो धत्त बृहस्पते । विराट् (४)
ज्योतिरधारयत्सम्राड्ज्योतिरधारयत्स्वराड्ज्यो-
तिरधारयत् । अग्ने युक्ष्वा हि ये तवाश्वासो
देव साधवः । अरं वहन्त्याशवः । युक्ष्वा हि
देवहूतमाꣳ अश्वाꣳ अग्ने रथीरिव । नि होता
पूर्व्यः सदः । द्रप्सश्चस्कन्द पृथिवीमनु द्यामिमं

च योनिमनु यश्च पूर्वः । तृतीयं योनिमनु संचरन्तं द्रप्सं जुहोम्यनु सप्त (५) होत्राः । अभूदिदं विश्वस्य भुवनस्य वाजिनमग्नेर्वैश्वानरस्य च । अग्निर्ज्योतिषा ज्योतिष्मान्रुक्मो वर्चसा वर्चस्वान् । रुचे त्वा रुचे त्वा समित्स्रवन्ति सरितो न धेनाः । अन्तर्हृदा मनसा पूयमानाः । घृतस्य धारा अभि चाकशीमि । हिरण्ययो वेतसो मध्य आसाम् । तस्मिन्त्सुपर्णो मधुकृत्कुलायी भजन्नास्ते मधु देवताभ्यः । तस्याऽऽसते हरयः सप्त तीरे स्वधां दुहाना अमृतस्य धाराम् ॥ ६ ॥

(प्रतिष्ठायै सहस्रवीर्या परमं विराट्सप्त तीरे चत्वारिं च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके द्वितीयप्रपाठके नवमोऽनुवाकः ॥ ९ ॥

(अथ चतुर्थाष्टके द्वितीयप्रपाठके नवमोऽनुवाकः ।)

ध्रुवा । असि । धरुणा । अस्तृता । विश्वकर्मणेति विश्व—कर्मणा । सुकृतेति सु—कृता । मा । त्वा । समुद्रः । उदिति । वधीत् । मा । सुपर्ण इति सु—पर्णः । अव्यथमाना । पृथिवीम् । दृꣳह ।

प्रजापतिरिति प्रजा—पतिः । त्वा । सादयतु । पृथिव्याः । पृष्ठे । व्यचस्वतीम् । प्रथस्वतीम् । प्रथः । असि । पृथिवी । असि । भूः । असि । भूमिः । असि । अदितिः । असि । विश्वधाया इति विश्व—धायाः । विश्वस्य । भुवनस्य । धर्त्री । पृथिवीम् । यच्छ । पृथिवीम् । दृꣳह । पृथिवीम् । मा । हिꣳसीः । विश्वस्मै । प्राणायेति प्र—अनाय । अपानायेत्यप—अनाय । व्यानायेति वि—अनाय । उदानायेत्युत्—अनाय । प्रतिष्ठाया इति प्रति—स्थायै (१) । चरित्राय । अग्निः । त्वा । अभीति । पातु । मह्या । स्वस्त्या । छर्दिषा । शंतमेनेति शं—तमेन । तया । देवतया । अङ्गिरस्वत् । ध्रुवा । सीद । काण्डात्काण्डादिति काण्डात्—काण्डात् । प्ररोहन्तीति प्र—रोहन्ती । परुषःपरुष इति परुषः—परुषः । परि । एवा । नः । दूर्वे । प्रेति । तनु । सहस्रेण । शतेन । च । या । शतेन । प्रतनोषीति प्र—तनोषि । सहस्रेण । विरोहसीति वि—रोहसि । तस्याः । ते । देवि । इष्टके । विधेम । हविषा । वयम् । अषाढा । असि । सहमाना । सहस्व । अरातीः । सहस्व । अरातीयतः । सहस्व । पृतनाः ।

सहंस्व । पृतन्यतः । सहस्रंवीर्येति सहस्र—वीर्या(२)।
असि । सा । मा । जिन्व । मधुं । वातांः । ऋता-
यत इत्यृत—यते । मधुं । क्षरन्ति । सिन्धवः ।
माध्वीः । नः । सन्तु । ओषधीः । मधुं । नक्तम् ।
उत । उषसिं । मधुमदिति मधुं—मत् । पार्थिवम् ।
रजंः । मधुं । द्यौः । अस्तु । नः । पिता । मधुमा-
निति मधुं—मान् । नः । वनस्पतिंः । मधुमानिति
मधुं—मान् । अस्तु । सूर्यंः । माध्वीः । गावंः ।
भवन्तु । नः । मही । द्यौः । पृथिवी । च । नः ।
इमम् । यज्ञम् । मिमिक्षताम् । पिपृताम् । नः ।
भरींमभिरिति भरींम—भिः । तत् । विष्णोंः । पर-
मम् (३) । पदम् । सदा । पश्यन्ति । सूरयंः ।
दिवि । इव । चक्षुंः । आततंमित्या—ततम् । ध्रुवा ।
असि । पृथिवि । सहंस्व । पृतन्यतः । स्यूता । देवे-
भिंः । अमृतेंन । एतं । अगाः । याः । ते । अग्ने ।
सूर्यें । रुचंः । उद्यत इत्युंत्—यतः । दिवंम् । आत-
न्वन्तीत्या—तन्वन्तिं । रश्मिभिरितिं रश्मि—भिः ।
ताभिंः । सर्वाभिः । रुचे । जनाय । नः । कृधि ।
याः । वः । देवाः । सूर्यें । रुचंः । गोषु । अश्वेषु ।
याः । रुचंः । इन्द्राग्नी इतीन्द्र—अग्नी । ताभिंः ।

सर्वाभिः । रुचंम् । नः । धत्त । बृहस्पते । विरा-
डितिं वि—राट् (४)। ज्योतिंः । अधारयत् ।
सम्राडितिं सम्—राट् । ज्योतिंः । अधारयत् । स्व-
राडितिं स्व—राट् । ज्योतिंः । अधारयत् । अग्ने ।
युक्ष्व । हि । ये । तवं । अश्वांसः । देव । साधवंः ।
अरंम् । वहंन्ति । आशवंः । युक्ष्व । हि । देवहूत-
मानितिं देव—हूतमान् । अश्वान् । अग्ने । रथीः ।
इव । नीतिं । होता । पूर्व्यः । सदः । द्रप्सः ।
चस्कन्द । पृथिवीम् । अन्वितिं । द्याम् । इमम् ।
च । योनिंम् । अन्वितिं । यः । च । पूर्वंः । तृतीयंम् ।
योनिंम् । अन्वितिं । संचरंन्तमितिं सं—चरंन्तम् ।
द्रप्सम् । जुहोमि । अन्वितिं । सप्त (५) । होत्राः ।
अभूत् । इदम् । विश्वंस्य । भुवंनस्य । वाजिनम् ।
अग्नेः । वैश्वानरस्यं । च । अग्निः । ज्योतिंषा ।
ज्योतिंष्मान् । रुक्मः । वर्चंसा । वर्चंस्वान् । ऋचे ।
त्वा । रुचे । त्वा । समितिं । इत् । स्रवन्ति ।
सरितंः । न । धेनाः । अन्तः । हृदा । मनंसा ।
पूयमांनाः । घृतस्यं । धारांः । अभीतिं । चाक-
शीमि । हिरण्ययंः । वेतसः । मध्यें ।
आसाम् । तस्मिंन् । सुपर्ण इतिं सु—पर्णः । मधु-

कृदितिं मधु—कृत् । कुलायी । भर्जन् । आस्ते ।
मधु । देवताभ्यः । तस्यं । आसते । हरयः । सप्त ।
तीरे । स्वधामितिं स्व—धाम् । दुहानाः । अमृतस्य ।
धारांम् (६) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके
द्वितीयप्रपाठके नवमोऽनुवाकः ॥ ९ ॥

(अथ चतुर्थकाण्डे द्वितीयप्रपाठके नवमोऽनुवाकः ।)

अष्टमेऽनुवाके पुष्करपर्णाद्यमृन्मयेष्टकोपधानमुक्तम् । अथ नवमे स्व[illegible]तृण्णादीष्टकोपधानमुच्यते ।

कल्पः—" ध्रुवाऽसि धरुणाऽस्तृतेति स्वयमातृण्णामभि[illegible]पघ्राप्य च प्रजापतिस्त्वा सादयतु पृथिव्याः पृष्ठ इत्यविदुषा ब्राह्मणेन सह मध्येऽग्नेरुपदधाति " इति ।

तत्राभिमर्शनमन्त्रपाठस्तु—

ध्रुवाऽसि धरुणाऽस्तृता विश्वकर्मणा
सुकृता । मा त्वा समुद्र उदधीन्मा
सुपर्णो व्यथमाना पृथिवीं दृꣳह ।, इति ।

हे स्वयमातृण्णे त्वं ध्रुवा स्थिराऽसि । कीदृशी, धरुणा भूमिरूपेण विश्वस्य धारयित्री, अत एवास्तृता केनाप्यहिंसिता, विश्वकर्मणा जगत्कर्त्रा सुकृता सुष्ठु निर्मिता । समुद्रस्त्वां मोदधीत्स्वोदरमध्ये निमज्जनलक्षणं वधं मा कार्षीत् । सुपर्णः पक्षिराजोऽपि सर्पोद्धरणवेलायां त्वामादाय मोदधीद्दूरे परित्यागलक्षणं वधं मा कार्षीत् । एवं सत्यव्यथमाना भयरहिता त्वं पृथिवीमिमां दृंह दृढी कुरु ॥

उपधानमन्त्रपाठस्तु—

प्रजापतिस्त्वा सादयतु पृथिव्याः पृष्ठे व्यच-
स्वतीं प्रथस्वतीं प्रथोऽसि पृथिव्यसि भूरसि

भूमिरस्यदितिरसि विश्वधाया विश्वस्य भुव-
नस्य धर्त्री पृथिवीं यच्छ पृथिवीं दृꣳह पृथिवीं
मा हिꣳसीर्विश्वस्मै प्राणायापानाय व्यानायो-
दानाय प्रतिष्ठायै चरित्रायाग्निस्त्वाऽभि पातु
मह्या स्वस्त्या छर्दिषा शंतमेन तया
देवतयाऽङ्गिरस्वद्ध्रुवा सीद । , इति ।

हे स्वयमातृण्णे प्रजापतिस्त्वामस्मिन्प्रदेशे पृथिव्या उपरि सादयतु । कीदृशीं त्वां, व्यचस्वतीं विस्तारयुक्तां प्रथस्वतीं पृथुलाम् । किं च प्रथोऽसि अस्याश्रितेः प्रथनं विस्तारूपमसि । त्वया हि चितिविस्तारो भवति । पृथिव्यामुत्पन्नत्वात्पृथिव्यसि, भूरसि सुखानां भावयित्र्यसि, भूमिरसि मृन्मयपृथिव्यभिमानिभूमिदेवताऽसि, अदितिरसि अखण्डनीयाऽसि । विश्वधाया विश्वस्य पोषयित्र्यसि । तथा विश्वस्य भुवनस्य सर्वस्य लोकस्य धर्त्री धारयित्र्यसि । तादृशी त्वं पृथिवीं यच्छ नियतां कुरु । पृथिवीं दृंह दृढी कुरु । पृथिवीं मा हिंसीः पृथिव्या हिंसां मा कुरु । विश्वस्मै सर्वस्मै प्राणापानव्यानोदानाख्यवायुवृत्तिलाभाय, प्रतिष्ठायै स्वगृहस्थितिलाभाय, चरित्राय शास्त्रीयाचरणलाभाय । प्राणिनामेतस्य सर्वस्य सिद्ध्यर्थमयमग्निस्त्वामभितः पातु । केन रक्षणमिति तदुच्यते—मह्या स्वस्त्या महत्या योगक्षेमसंपत्त्या शंतमेन च्छर्दिषाऽत्यन्तसुखकारिणा दीप्तिविशेषेण । तव स्वामिभूता या देवता तयाऽनुगृहीता त्वं ध्रुवा स्थिरा सती सीदेहोपविश । अङ्गिरस्वत्, अङ्गिरसां चयनानुष्ठाने यथा त्वं ध्रुवा स्थिरा तद्वत् ॥

एतन्मन्त्रसाध्यमुपधानं विधत्ते—

" स्वयमातृण्णामुप दधातीयं वै स्वयमातृण्णेमामेवोप धत्ते " [सं० का० ५ प्र० २ अ० ८] इति ।

शर्कराख्यानां (णां) क्षुद्रपाषाणानां मध्ये पुरुषप्रयत्नमन्तरेण या स्वत एव च्छिद्रयुक्ता सेयं शर्करा स्वयमातृण्णा, तामत्रोपदध्यात् । सा च स्वयमातृण्णा पृथिवीजन्यत्वात्पृथिव्येव । अतः पृथिवीमेवोपधत्ते ॥

तस्याः स्वयमातृण्णाया अश्वोपघ्रापणं विधत्ते—

---

१ ख. च. चितेर्विस्तां ।

तदिदं दधिमधुद्वयं प्रशंसति—

" ग्राम्यं वा एतदन्नं यद्दध्यारण्यं मधु यद्दध्ना मधुमिश्रेण पूरयत्युभयस्यावरुद्ध्यै " [सं० का० ५ प्र० २ अ० ९] इति ॥

कल्पः—" तस्मिन्त्सुपर्णो मधुकृत्कुलायीति पुरुषशिर आदाय " इति ।

पाठस्तु—

तस्मिन्त्सुपर्णो मधुकृत्कुलायी भजन्नास्ते मधु देवताभ्यः । तस्याऽऽसते हरयः सप्त तीरे स्वधां दुहाना अमृतस्य धाराम् ॥ , इति ॥

तस्मिन्वेतसस्थानीये पुरुषशिरसि मधुकृत्कश्चिन्मधुकर आस्ते । कीदृशः, सुपर्णः शोभनपक्षोपेतः कुलायी कुलायो मधुकराणां निवासस्थानं सोऽस्यास्तीति कुलायी । किं कुर्वन्, देवताभ्यो देवतार्थं मधु भजन्संपादयन् । तस्य पुरुषशिरसस्तीरे समीपे हरयो मधुहरणशीलाः सप्तच्छिद्रवर्तित्वेन सप्तसंख्याका मधुकरा आसते । किं कुर्वन्तः, स्वधां स्वधाकारोपलक्षितभोग्यवस्तुरूपाममृतस्य मधुनो धारां दुहानाः स्रावयन्तस्ते । पुरुषशिरसि प्राणसमृद्धिसंपादनाय हिरण्यशकलप्रक्षेपः पूर्वमभिहितः । प्राणेषु समृद्धेषु सत्सु चेतनं जीवात्मानमासाद्य मधुकररूपत्वं संपाद्य तेन पुरुषशिरः प्रशस्यते । यथा लोके मधुकरः कस्मिंश्चिद्वृक्षे स्वनिवासाय कुलायं कृत्वा मधु संपादयति, तत्र मध्वर्थं यदपा(प)रं कुलायं कृतं तस्य च्छिद्ररूपासु नाडीषु क्षुद्रा मधुकराः स्वस्वशक्त्यनुसारेण मधु संपादयन्तो वर्तन्ते तद्वत् । तदेतत्सर्वमत्र रूपकैकल्पनया संपादितम् । इत्थं प्रशस्तमिदं पुरुषशिरोऽनेन मन्त्रेण स्वी कुर्यात् । यत्पूर्वं विहितं पुरुषशीर्षमुपदधातीति तदेतदुपधानं कर्तुमिदं पुरुषशीर्षादानं द्रष्टव्यम् ॥

अत्र विनियोगसंग्रहः—

ध्रुवेति स्वयमातृण्णां स्पृशेत्प्रेति दधाति ताम् ।
काण्डाद्दूर्वेष्टकां द्वाभ्यामषाढां मधुं वा त्रिभिः ॥ १ ॥
अनक्ति मधुमिश्रेण दध्ना कूर्मं महीत्यतः ।
कूर्मं दधाति तद्विष्णोर्मुसलं हि ध्रुवेत्युखाम् ॥ २ ॥

१ ख. °दपूर्वं कु° । घ. ङ. °दपूर्वं त° । २ घ. ङ. रूपं कल्प° । ३ ख. च. °कल्प° । ४ ख. च. °धुमाभिः । ५ ख. च. °हीति च । कू° ।

यास्ते वामभृतं द्वाभ्यां विराड्रेतःसिचस्त्रिभिः ।
अग्ने द्वाभ्यामुखाहोमो द्रप्सः पुरुषशीर्षके ॥ ३ ॥
आस्ये स्वर्णं क्षिपेत्तत्र मन्त्रोऽभूदिति वा भवेत् ।
ऋचे रुचेद्वयादक्ष्णोः[1] सुवर्णशकले क्षिपेत् ॥ ४ ॥
समिद्धा च मधुना पूरयेन्नरशीर्षकम् ।
तस्मिंस्तच्छिर आदत्ते पञ्चविंशतिरीरिताः ॥ ५ ॥

अथ मीमांसा ।

तृतीयाध्यायस्याष्टमे पादे द्वितीयाधिकरणे चिन्तितम्—

इष्टकावरदानं किं स्वामिनः स्यादुतर्त्विजः ।
स्वामिनः पूर्ववन्नैवमध्वर्योर्वचनादिदम् ॥

" य एतामिष्टकामुपदध्यात्स त्रीन्वरान्दद्यात् " इत्यत्राध्वर्योर्गौत्रयदानं वाचनिकम् । नह्यस्ति वचनस्यातिभारः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे द्वितीयप्रपाठके
नवमोऽनुवाकः ॥ ९ ॥

(अथ चतुर्थाष्टके द्वितीयप्रपाठके दशमोऽनुवाकः ।)

आदित्यं गर्भं पयसा समङ्ग्धन्त्सहस्रस्य प्रतिमां विश्वरूपम् । परिवृङ्ग्धि हरसा माऽभि मृक्षः शतायुषं कृणुहि चीयमानः । इमं मा हिꣳसीर्द्विपादं पशूनाꣳ सहस्राक्ष मेधा चीयमानः । मयुमारण्यमनु ते दिशामि तेन चिन्वानस्तनुवो नि षीद । वातस्य ध्राजिं वरुणस्य नाभिमश्वं जज्ञानꣳ सरिरस्य मध्ये । शिशुं नदीनाꣳ हरिमद्रिबुध्नमग्ने मा हिꣳसीः

१ ख. च. द्वयोरक्ष्णोः ।

(१) परमे व्योमन् । इमं मा हिंꣳसीरेकशफं पशूनां कनिक्रदं वाजिनं वाजिनेषु । गौरमारण्यमनु ते दिशामि तेन चिन्वानस्तनुवो नि षीद । अजस्रमिन्दुमरुषं भुरण्युमग्निमीडे पूर्वचित्तौ नमोभिः । स पर्वभिर्ऋतुशः कल्पमानो गां मा हिंꣳसीरदितिं विराजम् । इमꣳ समुद्रꣳ शतधारमुत्सं व्यच्यमानं भुवनस्य मध्ये । घृतं दुहानामदितिं जनायाग्ने मा (२) हिꣳसीः परमे व्योमन् । गवयमारण्यमनु ते दिशामि तेन चिन्वानस्तनुवो नि षीद । वरूत्रिं त्वष्टुर्वरुणस्य नाभिमविं जज्ञानाꣳ रजसः परस्मात् । महीꣳ सांहस्रीमसुरस्य मायामग्ने मा हिंꣳसीः परमे व्योमन् । इमामूर्णायुं वरुणस्य मायां त्वचं पशूनां द्विपदां चतुष्पदाम् । त्वष्टुः प्रजानां प्रथमं जनित्रमग्ने मा हिंꣳसीः परमे व्योमन् । उष्ट्रमारण्यमनु (३) ते दिशामि तेन चिन्वानस्तनुवो नि षीद । यो अग्निरग्नेस्तपसोऽधि जातः शोचात्पृथिव्या उत वा दिवस्परि । येन प्रजा विश्वकर्मा व्यानट्तमग्ने हेडः परि ते वृणक्तु ।

अजा ह्यग्नेरजनिष्ट गर्भात्सा वा अपश्यज्जनितारमग्रे । तया रोहमायन्नुप मेध्यासस्तयां देवा देवतामग्र आयन् । शरभमारण्यमनु ते दिशामि तेन चिन्वानस्तनुवो नि षीद (४) ॥

(अग्ने मा हिंꣳसीरग्ने मोष्ट्रमारण्यमनु शरभं नव च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके द्वितीयप्रपाठके दशमोऽनुवाकः ॥ १० ॥

(अथ चतुर्थाष्टके द्वितीयप्रपाठके दशमोऽनुवाकः ।)

आदित्यम् । गर्भम् । पयसा । समञ्जन्नितिं सम्—अञ्जन् । सहस्रस्य । प्रतिमामितिं प्रति—माम् । विश्वरूपमितिं विश्व—रूपम् । परीतिं । वृङ्ग्धि । हरसा । मा । अभीतिं । मृक्षः । शतायुषमितिं शत—आयुषम् । कृणुहि । चीयमानः । इमम् । मा । हिंꣳसीः । द्विपादमितिं द्वि—पादम् । पशूनाम् । सहस्राक्षेति सहस्र—अक्ष । मेधे । एतिं । चीयमानः । मयुम् । आरण्यम् । अन्वितिं । ते । दिशामि । तेन । चिन्वानः । तनुवः । नीतिं । सीद । वातस्य । ध्राजिम् । वरुणस्य । नाभिम् । अश्वम् । जज्ञानम् । सरिरस्य । मध्ये । शिशुम् । नदीनाम् । हरिम् । अद्रिबुध्नमित्यद्रि—बुध्नम् । अग्ने । मा । हिंꣳसीः(१) ।

परमे । व्योमन्निति वि—ओमन् । इमम् । मा । हिꣳसीः । एकशफमित्येक—शफम् । पशूनाम् । कनिक्रदम् । वाजिनम् । वाजिनेषु । गौरम् । आरण्यम् । अन्वितिं । ते । दिशामि । तेन । चिन्वानः । तनुवः । नीतिं । सीद । अजस्रम् । इन्दुम् । अरुषम् । भुरण्युम् । अग्निम् । ईडे । पूर्वचित्तावितिं पूर्व—चित्तौ । नमोभिरिति नमः—भिः । सः । पर्वभिरिति पर्व—भिः । ऋतुश इत्यृतु—शः । कल्पमानः । गाम् । मा । हिꣳसीः । अदितिम् । विराजमिति वि—राजम् । इमम् । समुद्रम् । शतधारमिति शत—धारम् । उत्सम् । व्यच्यमानमिति वि—अच्यमानम् । भुवनस्य । मध्ये । घृतम् । दुहानाम् । अदितिम् । जनाय । अग्ने । मा (२) । हिꣳसीः । परमे । व्योमन्निति वि—ओमन् । गवयम् । आरण्यम् । अन्वितिं । ते । दिशामि । तेन । चिन्वानः । तनुवः । नीतिं । सीद । वरूत्रिम् । त्वष्टुः । वरुणस्य । नाभिम् । अविम् । जज्ञानाम् । रजसः । परस्मात् । महीम् । साहस्रीम् । असुरस्य । मायाम् । अग्ने । मा । हिꣳसीः । परमे । व्योमन्निति वि—ओमन् । इमाम् । ऊर्णायुम् । वरुणस्य ।



मायाम् । त्वचम् । पशूनाम् । द्विपदामितिं द्वि—पदाम् । चतुष्पदामिति चतुः—पदाम् । त्वष्टुः । प्रजानामितिं प्र—जानाम् । प्रथमम् । जनित्रम् । अग्ने । मा । हिꣳसीः । परमे । व्योमन्निति वि—ओमन् । उष्ट्रम् । आरण्यम् । अन्वितिं (३) । ते । दिशामि । तेन । चिन्वानः । तनुवः । नीतिं । सीद । यः । अग्निः । अग्नेः । तपसः । अधीतिं । जातः । शोचात् । पृथिव्याः । उत । वा । दिवः । परिं । येन । प्रजा इतिं प्र—जाः । विश्वकर्मेतिं विश्व—कर्मा । व्यानडितिं वि—आनट् । तम् । अग्ने । हेडः । परीतिं । ते । वृणक्तु । अजा । हि । अग्नेः । अजनिष्ट । गर्भात् । सा । वै । अपश्यत् । जनितारम् । अग्ने । तया । रोहम् । आयन् । उपेतिं । मेध्यासः । तया । देवाः । देवताम् । अग्ने । आयन् । शरभम् । आरण्यम् । अन्वितिं । ते । दिशामि । तेन । चिन्वानः । तनुवः । नीतिं । सीद (४) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके द्वितीयप्रपाठके दशमोऽनुवाकः ॥ १० ॥

———

(पशुशीर्षोपधानाभिधानम्)

यदुक्तं सूत्रकारेण—" नमो अस्तु सर्पेभ्य इति दक्षिणेऽसे सर्पशिर उप दध्याद्विषूचीनं पशुशीर्षैरपि वा यजुरेव वदेन्नोपदध्यात् " इति, तत्रोपधानं विधत्ते—

" सर्पशीर्षमुप दधाति यैव सर्पे त्विषिस्तामेवाव रुन्धे "[सं० का० ५ प्र० २ अ० ९] इति ।

त्विषिर्दीप्तिः ॥

मन्त्रपाठमात्रं विधत्ते—

"यत्समीचीनं पशुशीर्षैरुपदध्याद्ग्राम्यान्पशून्द[1]शुकाः स्युर्यद्विषूचीनमारण्यान्यजुरेव वदेदव तां त्विषि९ रुन्धे या सर्पे न ग्राम्यान्पशून्हिनस्ति नाऽऽरण्यान् " [सं० का०५ प्र० २ अ० ९] इति ।

सर्पशीर्षस्य संमुखत्वे विमुखत्वे च भावसद्भावात्मकारान्तरा[1]संभवाच्च तदुपधानं परित्यज्य मन्त्रमेव पठेत् । तदा मन्त्रपाठेन सर्पत्विषिरपि प्राप्यते । संमुखविमुखत्वयोरभावादोषद्वयमपि नास्ति ॥

तमिमं केवलमन्त्रपक्षमुपेक्ष्योपधानपक्षस्यैव प्राप्तिप्रतिप्रसवं विधत्ते—

" अथो खलूपधेयमेव यदुपदधाति तेन तां त्विषिमव रुन्धे या सर्पे यद्यजुर्वदति तेन शान्तम् " [सं० का० ५ प्र० २ अ० ९] इति ।

सर्पे या त्विषिस्तामुपधानेन लभते । मन्त्रपाठेन सर्पशिरसः शान्तत्वादंशनमपि न भवति ॥

अत्र विनियोगसंग्रहः—

आद्युखायां शिरो धत्त इममित्युपतिष्ठते ।
वाताश्वस्य शिरः प्राच्यां दध्यादिमं जपेत्तथा ॥ १ ॥
अजर्षभशिरः पश्चादिममित्यनुमन्त्रणम् ।
वरू दक्षिणतो वृष्णिशिरस्तन्मन्त्रणं त्विमाम् ॥ २ ॥
य उदीच्यां बस्तशिरस्तन्मन्त्रणमजेत्यतः ।
दशमे त्वनुवाकेऽस्मिन्दश मन्त्रा उदीरिताः ॥ ३ ॥

अथ मीमांसा ।

प्रथमाध्यायस्य चतुर्थपादे षोडशाधिकरणे चिन्तितम्—

पशवोऽन्ये गवाश्वेभ्योऽपशवो वा इति श्रुतम् ।
अजादिष्वपशुत्वं यद्गुणवादोऽथ वा स्तुतिः ॥
स्तुत्यभावाद्गुणस्तेषु पशुकार्यनिषेधनम् ।
अशक्यत्वान्निषेधस्य घटाद्यर्थाभिधायिना ॥

१ ख. च. 'न्तरसं'। २ ख. च. 'त्यभिम'।

(याज्यानुवाक्याभिधानम्)

पशवोऽपशुशब्देन प्राशस्त्याभावसाम्यतः ।
लक्ष्यास्तत्र निमित्तं तु प्रशंसैव गवाश्वयोः ॥

इदमाम्नायते—" अपशवो वा अन्ये गोअश्वेभ्यः पशवः " इति । तत्राजादिषु श्रूयमाणं यदपशुत्वं तस्यार्थवादत्वं न संभवति । पशुत्वमात्रनिषेधेन स्तुतेरप्रतिभानात् । ततः पशुकार्यनिषेधरूपो गुणोऽभिधीयत इति चेत् । मैवम् । अजादिपशुविधिवैयर्थ्यप्रसङ्गेन निषेद्धुमशक्यत्वात् । अपशुशब्दः पशुव्यतिरिक्तं घटादिपदार्थमभिदधाति । तस्मिन्घटादौ गवाश्ववत्प्राशस्त्यं नास्ति । सोऽयं प्राशस्त्याभावोऽजादिषु पशुष्वस्तीत्यनेनाभिप्रायेण पशव एव सन्तोऽप्यजादयो घटादिसाम्यादपशुशब्देन लक्ष्यन्ते । पूर्वत्र यजमानकार्यसिद्धिराग्नेये मुखजत्वमादित्यवत्तेजस्वित्वं च यजमानादिशब्दानां प्रस्तराद्यर्थेषु प्रवृत्तिनिमित्तम् । तत्प्रवृत्तिफलं प्रस्तरादिप्रशंसा । इह त्वपशुशब्दस्याजादिषु प्रवृत्तौ गवाश्वयोः प्रशंसैव निमित्तं फलं च । द्विप्रकारा हि प्रशंसा—वस्तुनि विद्यमानगुणोत्कर्ष एकः प्रकारः, स्तावकेन शब्देन संपादितो गुणोत्कर्षोऽपरः प्रकारः । गवाश्वयोरजादिभ्य उत्कर्षो लोकसिद्धो यः सोऽत्र निमित्तम् । अजादयः स्वभावतः पशवोऽपि सन्तो गवाश्वौ प्रत्यपशवः संपन्नाः । ईदृशो गवाश्वयोर्महिमेति स्तुतिः फलम् । तस्मात् " अपशवो वा अन्ये " इत्ययमर्थवादः । अयमेव न्याय उदाहरणान्तरे योजनीयः । " अयज्ञो वा एष योऽसामा " इत्येकमुदाहरणम् । " असत्रं वा एतद्यदच्छन्दोमम् " इत्यपरमुदाहरणम् । अग्निहोत्रदर्शपूर्णमासादिर्यज्ञोऽपि सामहीनत्वादयज्ञो भवति । ईदृशः साम्नो महिमा । छन्दोमशब्देन चतुर्विंशश्चतुश्चत्वारिंशोऽष्टाचत्वारिंश इत्येते त्रयः स्तोमा उच्यन्ते । अक्षरसंख्यासाम्येन गायत्रीत्रिष्टुब्जगतीछन्दोभिर्मीयमानत्वात् । तेषां च विष्टुतिः सामब्राह्मणे द्रष्टव्या । अतः सत्रमपि चतुर्दशरात्रादिकं छन्दोमरहितत्वादसत्रं भवति । ईदृशश्छन्दोमानां महिमेत्येवं स्तावकत्वादर्थवादत्वम् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे द्वितीयप्रपाठके
दशमोऽनुवाकः ॥ १० ॥

(अथ चतुर्थाष्टके द्वितीयप्रपाठक एकादशोऽनुवाकः ।)

इन्द्राग्नी रोचना दिवः परि वाजेषु भूषथः ।

१ ख. घ. ङ. च. स्वतः ।

तद्वां चेति प्र वीर्यम् । श्रथद्वृत्रमुत संनोति वाजमिन्द्रा यो अग्नी सहुरी सपर्यात् । इरज्यन्ता वसव्यस्य भूरेः सहस्तमा सहसा वाजयन्ता । प्र चर्षणिभ्यः पृतना हवेषु प्र पृथिव्या रिरिचाथे दिवश्च । प्र सिन्धुभ्यः प्र गिरिभ्यो महित्वा प्रेन्द्राग्नी विश्वा भुवनात्यन्या । मरुतो यस्य हि (१) क्षये पाथा दिवो विमहसः । स सुगोपातमो जनः । यज्ञैर्वा यज्ञवाहसो विप्रस्य वा मतीनाम् । मरुतः शृणुता हवम् । श्रियसे कं भानुभिः सं मिमिक्षिरे ते रश्मिभिस्त ऋक्वभिः सुखादयः । ते वाशीमन्त इष्मिणो अभीरवो विद्रे प्रियस्य मारुतस्य धाम्नः । अव ते हेड उदुत्तमम् । कया नश्चित्र आ भुवदूती सदावृधः सखा । कया शचिष्ठया वृता (२) । को अद्य युङ्क्ते धुरि गा ऋतस्य शिमीवतो भामिनो दुर्हणायून् । आसन्निषून्हृत्स्वसो मयोभून्य एषां भृत्यामृणधत्स जीवात् । अग्ने नयाऽऽ देवानाꣳ शं नो भवन्तु वाजेवाजे । अप्स्वग्ने सधिष्टव सौषधीरनु रुध्यसे । गर्भे सञ्जायसे

पुनः । वृषा सोम द्युमाꣳ असि वृषा देव वृषव्रतः । वृषा धर्माणि दधिषे । इमं मे वरुण तत्त्वा यामि त्वं नो अग्ने स त्वं नो अग्ने (३) ॥

(हि वृता म एकादश च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके द्वितीयप्रपाठक एकादशोऽनुवाकः ॥ ११ ॥

विष्णोर्दिवस्पर्यन्नपतेऽपेत सर्मितं या जाता मा नोऽभ्यस्थाद्ध्रुवाऽसि धरुणाऽऽदित्यं गर्भमिन्द्राग्नी रोचनैकादश ॥ ११ ॥

विष्णोरस्मिन्हव्येति त्वाऽहं धीतिभिर्होत्रा अष्टाचत्वारिꣳशत् ॥ ४८ ॥

हरिः ॐ ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके द्वितीयः प्रपाठकः ॥ २ ॥

(अथ चतुर्थाष्टके द्वितीयप्रपाठक एकादशोऽनुवाकः ।)

इन्द्राग्नी इतीन्द्र—अग्नी । रोचना । दिवः । परीतिं । वाजेषु । भूषथः । तव् । वाम् । चेति । प्रेतिं । वीर्यम् । श्रथत् । वृत्रम् । उत । सनोति । वाजम् । इन्द्रा । यः । अग्नी इतिं । सहुरी इति स—हुरी । सपर्यात् । इरज्यन्ता । वसव्यस्य । भूरेः । सहस्तमेति सहः—तमा । सहसा । वाजयन्तेतिं वाज—यन्ता । प्रेतिं । चर्षणिभ्य इतिं चर्ष-

णि—भ्यः । पृतना । हवेषु । प्रेति । पृथिव्याः । रिरिचाथे इति । दिवः । च । प्रेति । सिन्धुभ्य इति सिन्धु—भ्यः । प्रेति । गिरिभ्य इति गिरि—भ्यः । महित्वेति महि—त्वा । प्रेति । इन्द्राग्नी इतीन्द्र—अग्नी । विश्वा । भुवना । अतीति । अन्या । मरुतः । यस्य । हि (१) । क्षयेति । पाथ । दिवः । विमहस इति वि—महसः । सः । सुगोपातम इति सुगोप—तमः । जनः । यज्ञैः । वा । यज्ञवाहस इति यज्ञ—वाहसः । विप्रस्य । वा । मतीनाम् । मरुतः । शृणुत । हवम् । श्रियसे । कम् । भानुभिरिति भानु—भिः । समिति । मिमिक्षिरे । ते । रश्मिभिरिति रश्मि—भिः । ते । ऋक्वभिरित्यृक्व—भिः । सुखादय इति सु—खादयः । ते । वाशीमन्त इति वाशी—मन्तः । इष्मिणः । अभीरवः । विद्रे । प्रियस्य । मारुतस्य । धाम्नः । अवेति । ते । हेडः । उदिति । उत्तममित्युत्—तमम् । कया । नः । चित्रः । एति । भुवत् । ऊती । सदावृधेति सदा—वृधः । सखा । कया । शचिष्ठया । वृता (२) । कः । अद्य । युङ्क्ते । धुरि । गाः । ऋतस्य । शिमीवतः । भामिनः । दुर्हृणायूनिति दुः—हृणायून् । आसन्निषूनित्यासन्—

इषून् । हृत्स्वसु इति हृत्सु—असः । मयोभूनिति मयः—भून् । यः । एषाम् । भृत्याम् । ऋणधत् । सः । जीवात् । अग्ने । नयं । एति । देवानाम् । शम् । नः । भवन्तु । वाजेवाज इति वाजे—वाजे । अप्स्वित्यप्—सु । अग्ने । सधिः । तव । सः । ओषधीः । अन्विति । रुध्यसे । गर्भे । सन् । जायसे । पुनः । वृषा । सोम । द्युमानिति द्यु—मान् । असि । वृषा । देव । वृषव्रत इति वृष—व्रतः । वृषा । धर्माणि । दधिषे । इमम् । मे । वरुण । तत् । त्वा । यामि । त्वम् । नः । अग्ने । सः । त्वम् । नः । अग्ने (३) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके द्वितीयप्रपाठक एकादशोऽनुवाकः ॥ ११ ॥

हरिः ॐ ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके द्वितीयः प्रपाठकः ॥ २ ॥

(अथ चतुर्थकाण्डे द्वितीयप्रपाठक एकादशोऽनुवाकः ।)

दशमेऽनुवाके पशुशिरसामुपधानमुक्तम् । अथैकादशे याज्यानुवाक्या उच्यन्ते ।

चातुर्मास्येषु वरुणप्रघासाख्यं यद्द्वितीयं पर्व; तस्मिन्हवींषि चत्वार्याज्याता-

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥ १ ॥

इति श्रीमद्विद्यातीर्थमहेश्वरापरावतारस्य श्रीमद्राजाधिराजपरमेश्वरस्य श्रीवीरबुक्कमहाराजस्याऽऽज्ञापरिपालकेन माधवाचार्येण विरचिते वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे द्वितीयः प्रपाठकः ॥ २ ॥

(अथ चतुर्थाष्टके तृतीयः प्रपाठकः ।)

(तत्र प्रथमोऽनुवाकः ।)

हरिः ॐ ।

अपां त्वेमन्त्सादयाम्यपां त्वोद्मन्त्सादयाम्यपां त्वा भस्मन्त्सादयाम्यपां त्वा ज्योतिंषि सादयाम्यपां त्वाऽयने सादयाम्यर्णवे सदने सीद समुद्रे सदने सीद सलिले सदने सीदापां क्षये सीदापाꣳ सधिंषि सीदापां त्वा सदने सादयाम्यपां त्वा सधस्थे सादयाम्यपां त्वा पुरीषे सादयाम्यपां त्वा योनौ सादयाम्यपां त्वा पार्थसि सादयामि गायत्री छन्दस्त्रिष्टुप्छन्दो जगती छन्दोऽनुष्टुप्छन्दः पङ्क्तिश्छन्दः (१) ॥

(योनौ पञ्चदश च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके तृतीयप्रपाठके प्रथमोऽनुवाकः ॥ १ ॥

(अथ चतुर्थाष्टके तृतीयः प्रपाठकः ।)

(तत्र प्रथमोऽनुवाकः ।)

हरिः ॐ ।

अपाम् । त्वा । एमन् । सादयामि । अपाम् । त्वा । ओद्मन् । सादयामि । अपाम् । त्वा । भस्मन् । सादयामि । अपाम् । त्वा । ज्योतिंषि । सादयामि । अपाम् । त्वा । अयने । सादयामि । अर्णवे । सदने । सीद । समुद्रे । सदने । सीद । सलिले । सदने । सीद । अपाम् । क्षये । सीद । अपाम् । सधिंषि । सीद । अपाम् । त्वा । सदने । सादयामि । अपाम् । त्वा । सधस्थ इति सध—स्थे । सादयामि । अपाम् । त्वा । पुरीषे । सादयामि । अपाम् । त्वा । योनौ । सादयामि । अपाम् । त्वा । पार्थसि । सादयामि । गायत्री । छन्दः । त्रिष्टुप् । छन्दः । जगती । छन्दः । अनुष्टुबित्यनु—स्तुप् । छन्दः । पङ्क्तिः । छन्दः (१) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके तृतीयप्रपाठके प्रथमोऽनुवाकः ॥ १ ॥

" पञ्च पश्चात्प्राचीरुप दधाति पश्चाद्वै प्राचीनꣳ रेतो धीयते पश्चादेवास्मै प्राचीनꣳ रेतो दधाति " [सं० का० ५ प्र० २ अ० १०] इति ।

प्राचीः प्राङ्मुखाः । लोके हि पश्चिमायां दिश्यवस्थितेन प्राङ्मुखेन पुरुषेण रेतः प्राचीनं संमुखमेव गर्भाशये स्थाप्यते । अतो यजमानार्थमपि तथा कृतं भवति ॥

पूर्वपश्चिमयोरिष्टकाः सह प्रशंसति—

" पञ्च पुरस्तात्प्रतीचीरुप दधाति पञ्च पश्चात्प्राचीस्तस्मात्प्राचीनꣳ रेतो धीयते प्रतीचीः प्रजा जायन्ते " [सं० का० ५ प्र० २ अ० १०] इति ।

प्रतीचीः प्रत्यगपवर्गाः । प्राच्यां प्रथमामाधाय ततः पश्चिमायां द्वितीयां ततोऽपि पश्चिमायां तृतीयेत्येषा रीतिः । प्राचीरित्यत्र तद्विपरीता रीतिः । लोकेऽपि पुरो योन्यभिमुखत्वेन रेतःस्थापनं, तद्विपर्ययेण प्रजननम् ॥

चतुर्थपञ्चकस्य देशं विधत्ते—

" पञ्चोत्तरतश्छन्दस्याः पशवो वै छन्दस्याः पशूनेव प्रजातान्त्स्वमायतनमभि पर्यूहते " [सं० का० ५ प्र० २ अ० १०] इति ।

पूर्वोपधानेन प्रजातान्पशूननेनोपधानेन स्वस्थानं प्रापयति ॥

देशविशेषान्विधाय समुदायाकारेण प्रशंसति—

" इयं वा अग्नेरतिदाहादबिभेत्सैता अपस्या अपश्यत्ता उपाधत्त ततो वा इमां नात्यदहद्यदपस्या उपदधात्यस्या अनतिदाहाय " [सं० का० ५ प्र० २ अ० १०] इति ।

अपां शान्तत्वादपस्याभिरतिदाहस्य परिहारः ॥

पुनः प्रकारान्तरेण प्रशंसति—

" उवाच हेयमददित्स ब्रह्मणाऽन्नं यस्यैता उपधीयान्तै य उ चैना एवं वेद " [सं० का० ५ प्र० २ अ० १०] इति ।

यस्य यजमानस्यैता अपस्या उपधीयन्ते, योऽपि विद्वानेता (ना) अपस्या उक्तप्रकारेण जानाति, स यजमानः स च वेदिता ब्रह्मणा मुख्यया वृत्त्याऽन्नमददिदन्नमत्त्येवमिदं वाक्यमियं पृथिव्युवाच ह । तस्मादपस्याः प्रशस्ता इति तात्पर्यार्थः ॥

अत्र विनियोगसंग्रहः—

अपामपस्या दिक्ष्वेता उपधेयास्तु विंशतिः ॥ १ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे तृतीयप्रपाठके
प्रथमोऽनुवाकः ॥ १ ॥

(अथ चतुर्थाष्टके तृतीयप्रपाठके द्वितीयोऽनुवाकः ।)

अयं पुरो भुवस्तस्य प्राणो मौवायनो वसन्तः प्राणायनो गायत्री वासन्ती गायत्रियै गायत्रं गायत्रादुपाꣳशुरुपाꣳशोस्त्रिवृत्त्रिवृतो रथंतरꣳ रथंतराद्वसिष्ठ ऋषिः प्रजापतिगृहीतया त्वया प्राणं गृह्णामि प्रजाभ्योऽयं दक्षिणा विश्वकर्मा तस्य मनो वैश्वकर्मणं ग्रीष्मो मानसस्त्रिष्टुग्ग्रैष्मी त्रिष्टुभ ऐडमैडादन्तर्यामोऽन्तर्यामात्पञ्चदशः पञ्चदशाद्बृहद्बृहतो भरद्वाज ऋषिः प्रजापतिगृहीतया त्वया मनः (१) गृह्णामि प्रजाभ्योऽयं पश्चाद्विश्वव्यचास्तस्य चक्षुर्वैश्वव्यचसं वर्षाणि चाक्षुषाणि जगती वार्षी जगत्या ऋक्षममृक्षमाच्छुक्रः शुक्रात्सप्तदशः सप्तदशाद्वैरूपं वैरूपाद्विश्वामित्र ऋषिः प्रजापतिगृहीतया त्वया चक्षुर्गृह्णामि प्रजाभ्य इदमुत्तरात्सुवस्तस्य श्रोत्रꣳ सौवꣳ शरच्छौद्र्यनुष्टुप्छारद्यनुष्टुभः स्वारꣳ स्वारान्मन्थी मन्थिनं एकविꣳश एकविꣳशाद्वैराजं वैराजाज्जमदग्निर्ऋषिः प्रजापतिगृहीतया (२) त्वया श्रोत्रं गृह्णामि प्रजाभ्य इयमुपरि मति-

स्तस्यै वाङ्मातौ हैमन्तो वाच्यायनः पङ्क्ति-
हैमन्तौ पङ्क्त्यै निधनवन्निधनवत आग्रयण
आग्रयणात्रिणवत्रयस्त्रिꣳशौ त्रिणवत्रयस्त्रिꣳशा-
भ्याꣳ शाक्ररैवते शाक्ररैवताभ्यां विश्वक-
र्मर्षिः प्रजापतिगृहीतया त्वया वाचं गृह्णामि
प्रजाभ्यः (३) ॥

(त्वया मनो जमदग्निर्ऋषिः प्रजापतिगृहीतया त्रिꣳशच्चं ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके
तृतीयप्रपाठके द्वितीयोऽनुवाकः ॥ २ ॥

(अथ चतुर्थाष्टके तृतीयप्रपाठके द्वितीयोऽनुवाकः ।)

अयम् । पुरः । भुवः । तस्यै । प्राण इति प्र—
अनः । भौवायनः । वसन्तः । प्राणायनः । गायत्री ।
वासन्ती । गायत्रियै । गायत्रम् । गायत्रात् । उपाꣳ-
शुरित्युप—अꣳशुः । उपाꣳशोरित्युप—अꣳशोः ।
त्रिवृदिति त्रि—वृत् । त्रिवृत इति त्रि—वृतः । रथं-
तरमिति रथं—तरम् । रथंतरादिति रथं—तरात् ।
वसिष्ठः । ऋषिः । प्रजापतिगृहीतयेति प्रजापति—
गृहीतया । त्वया । प्राणमिति प्र—अनम् । गृह्णामि ।
प्रजाभ्य इति प्र—जाभ्यः । अयम् । दक्षिणा ।
विश्वकर्मेति विश्व—कर्मा । तस्यै । मनः । वैश्वकर्म-

णमिति वैश्व—कर्मणम् । ग्रीष्मः । मानसः । त्रिष्टुक् ।
ग्रैष्मी । त्रिष्टुभः । ऐडम् । ऐडात् । अन्तर्याम इत्यं-
न्तः—यामः । अन्तर्यामादित्यन्तः—यामात् । पञ्च-
दश इति पञ्च—दशः । पञ्चदशादिति पञ्च—दशात् ।
बृहत् । बृहतः । भरद्वाजः । ऋषिः । प्रजापतिगृही-
तयेति प्रजापति—गृहीतया । त्वया । मनः (१) ।
गृह्णामि । प्रजाभ्य इति प्र—जाभ्यः । अयम् ।
पश्चात् । विश्वव्यचा इति विश्व—व्यचाः । तस्यै ।
चक्षुः । वैश्वव्यचसमिति वैश्व—व्यचसम् । वर्षाणि ।
चाक्षुषाणि । जगती । वार्षी । जगत्याः । ऋक्षम् ।
ऋक्षमात् । शुक्रः । शुक्रात् । सप्तदश इति सप्त—
दशः । सप्तदशादिति सप्त—दशात् । वैरूपम् । वैरू-
पात् । विश्वामित्र इति विश्व—मित्रः । ऋषिः ।
प्रजापतिगृहीतयेति प्रजापति—गृहीतया । त्वया ।
चक्षुः । गृह्णामि । प्रजाभ्य इति प्र—जाभ्यः । इदम् ।
उत्तरादित्युत्—तरात् । सुवः । तस्यै । श्रोत्रम् ।
सौवम् । शरत् । श्रौत्री । अनुष्टुबित्यनु—स्तुप् ।
शारदी । अनुष्टुभ इत्यनु-स्तुभः । स्वारम् । स्वारात् ।
मन्थी । मन्थिनः । एकविꣳश इत्येक—विꣳशः ।
एकविꣳशादित्येक—विꣳशात् । वैराजम् । वैराजात् ।

जमदग्निः । ऋषिः । प्रजापतिगृहीतयेति प्रजापति—गृहीतया (२)। त्वया । श्रोत्रम् । गृह्णामि । प्रजाभ्य इति प्र—जाभ्यः । इयम् । उपरि । मतिः । तस्यै । वाक् । मती । हेमन्तः । वाच्यायनः । पङ्क्तिः । हैमन्ती । पङ्क्त्यै । निधनवदिति निधन—वद् । निधनवत इति निधन—वतः । आग्रयणः । आग्रयणात् । त्रिणवत्रयस्त्रिꣳशाविति त्रिणव—त्रयस्त्रिꣳशौ । त्रिणवत्रयस्त्रिꣳशाभ्यामिति त्रिणव—त्रयस्त्रिꣳशाभ्याम् । शाक्करैवते इति शाक्कर—रैवते । शाक्करैवताभ्यामिति शाक्कर—रैवताभ्याम् । विश्वकर्मेति विश्व—कर्मा । ऋषिः । प्रजापतिगृहीतयेति प्रजापति—गृहीतया । त्वया । वाचम् । गृह्णामि । प्रजाभ्य इति प्र—जाभ्यः (३) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके तृतीयप्रपाठके द्वितीयोऽनुवाकः ॥ २ ॥

(अथ चतुर्थकाण्डे तृतीयप्रपाठके द्वितीयोऽनुवाकः ।)

प्रथमेऽनुवाकेऽपस्या उक्ताः । अथ द्वितीये प्राणभृत उच्यन्ते ।

कल्पः—" अयं पुरो भुव इति पञ्चाशतं प्राणभृतो दशदश प्रतिदिशमक्ष्णया दश मध्येऽन्तरा [मन्तरा] मुपधाय " इति ।

तत्र पूर्वस्यां दिश्युपधेयानां दशेष्टकानां मन्त्रमाह—

अयं पुरो भुवस्तस्य प्राणो भौवायनो वसन्तः



प्राणायनो गायत्री वासन्ती गायत्रियै गायत्रं गायत्रादुपाꣳशुरुपाꣳशोस्त्रिवृत्त्रिवृतो रथंतरꣳ रथंतराद्वसिष्ठ ऋषिः प्रजापतिगृहीतया त्वया प्राणं गृह्णामि प्रजाभ्यः , इति ।

भवत्यस्माज्जगदिति भुवः । भुवःशब्दः प्रजापतिमाचष्टे । पुरः पूर्वस्यां दिशि अयं भुवो वर्तत इति शेषः । हे इष्टके तद्रूपाऽसीत्यभिप्रायः । एवमुत्तरेष्वपि वाक्येषु योज्यम् । तस्य भुवःशब्दाभिधेयस्य प्रजापतेः संबन्धी प्राणः । अत एवापत्यत्वमुपचर्य भौवायन इत्युच्यते । तस्य च प्राणस्य श्वासवृत्तिरूपस्यापत्यत्वेनोपचरितः प्राणायनो वसन्त ऋतुः । तस्य च वसन्तस्य संबन्धिनी वासन्ती गायत्री । तस्याश्छन्दोरूपाया गायत्र्याः संबन्धि गायत्रं साम । तस्माच्च गायत्रसाम्न उत्पन्न इवोपांशुग्रहः । तस्माच्चोपांशुग्रहादुत्पन्न इव त्रिवृत्स्तोमः । तस्माच्च त्रिवृत्स्तोमादुत्पन्नमिव रथंतरं साम । तस्माद्रथंतरसाम्न उत्पन्न इव वसिष्ठाख्य ऋषिः । हे इष्टके यथोक्तप्रकारेण प्रजापतिप्राणवसन्तादिरूपोपचारेण प्रजापतिगृहीतया त्वया प्रजाभ्यः सर्वासां प्रजानां प्राणं गृह्णामि प्रजानां प्राणसिद्धये त्वामुपदधामीत्यर्थः । यद्यप्ययमेकवाक्यत्वादेक एव मन्त्रस्तथाऽपि प्रतीष्टकमावृत्त्या दश मन्त्राः संपद्यन्ते ॥

अथ दक्षिणस्यां दिश्युपधेयानामिष्टकानां मन्त्रमाह—

अयं दक्षिणा विश्वकर्मा तस्य मनो वैश्वकर्मणं ग्रीष्मो मानसस्त्रिष्टुग्ग्रैष्मी त्रिष्टुभ ऐडमैडादन्तर्यामोऽन्तर्यामात्पञ्चदशः पञ्चदशाद्बृहद्बृहतो भरद्वाज ऋषिः प्रजापतिगृहीतया त्वया मनो गृह्णामि प्रजाभ्यः , इति ।

विश्वानि कर्माणि जगद्व्यापाररूपाणि यस्यासौ विश्वकर्मा प्रजापतिः । दक्षिणा दक्षिणस्यां दिशि योऽयं विश्वकर्मा हे इष्टके तद्रूपा त्वमसि । प्राणवसन्तादिपरम्परेव मनोग्रीष्मादिपरम्परा व्याख्येया । ऐडमिति सामविशेषः ॥

अथ पश्चिमायां दिश्युपधेयानामिष्टकानां मन्त्रमाह—

अयं पश्चाद्विश्वव्यचास्तस्य चक्षुर्वैश्वव्यचसं वर्षाणि चाक्षुषाणि जगती वार्षी जगत्या

एतद्वेदनं प्रशंसति—

" य एवमेतासामृद्धिं वेदग्नौत्येव य आसामेवं बन्धुतां वेद बन्धुमान्भवति य आसामेवं कृप्तिं वेद कल्पतेऽस्मै य आसामेवमायतनं वेदाऽऽयतनवान्भवति य आसामेवं प्रतिष्ठां वेद प्रत्येव तिष्ठति " [सं० का० ५ प्र० २ अ० १०] इति ।

ऋद्धिः समृद्धिहेतुत्वं, बन्धूनां समूहो बन्धुता दशानां समूहाकार इत्यर्थः । कृप्तिर्वक्र[त्व]कल्पना । आयतनं प्रागादिदेशविशेषः । प्रतिष्ठा तत्र स्थापनम् ॥

अत्र विनियोगसंग्रहः—

अयं प्राणभृतो दध्यात्पञ्चाशत्पञ्चमन्त्रकैः (तं तु पञ्चभिः) ॥ १ ॥

अथ मीमांसा ।

प्रथमाध्यायस्य चतुर्थपादेऽष्टादशाधिकरणे चिन्तितम्—

सृष्टिवत्प्राणभृत्तत्र सादृश्यं लिङ्गभूमतः ।
अत्रैकमन्त्रगोलिङ्गसमवायो विशिष्यते ॥

" प्राणभृत उपदधाति " इत्यत्रापि सृष्टिन्यायेन मन्त्रविधिरिति पूर्वः पक्षः । लिङ्गप्रकरणप्राप्तमन्त्रानुवादेनेष्टकोपधाने विधिः । " रेतस्येव प्राणान्दधाति " इत्यस्य वक्ष्यमाणार्थवादस्योपपत्तये प्राणभृच्छब्देन मन्त्रानुवादः । पूर्वत्र द्वितीयादिमन्त्रेषु सृष्टिलिङ्गानां बाहुल्यम् । इह तु प्रथममन्त्र एव प्राणभृल्लिङ्गमाम्नायते—" अयं पुरो. भुवस्तस्य प्राणो भौवायनः " इति । एकस्यैव मन्त्रस्य प्राणभृत्त्वेऽपि च्छत्रिणो गच्छन्तीतिवत्तत्सहचरिताः सर्वे मन्त्राः प्राणभृच्छब्देन लक्ष्यन्ते ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे तृतीयप्रपाठके
द्वितीयोऽनुवाकः ॥ २ ॥

(अथ चतुर्थाष्टके तृतीयप्रपाठके तृतीयोऽनुवाकः ।)

प्राचीं दिशां वसन्त ऋतूनामग्निर्देवता ब्रह्म द्रविणं त्रिवृत्स्तोमः स उं पञ्चदशवर्तनिरुषविर्वयः कृतमयानां पुरोवातो वातः सानंग

१ क. घ. ङ. शत्समम् ।

ऋषिर्दक्षिणा दिशां ग्रीष्म ऋतूनामिन्द्रो देवता क्षत्रं द्रविणं पञ्चदशः स्तोमः स उं सप्तदशवर्तनिर्दित्यवाड्वयस्त्रैताऽयानां दक्षिणाद्वातो वातः सनातन ऋषिः प्रतीचीं दिशां वर्षा ऋतूनां विश्वे देवा देवता विट् (१) द्रविणꣳ सप्तदशः स्तोमः स उंवेकविꣳशवर्तनिस्त्रिवत्सो वयो द्वापरोऽयानां पश्चाद्वातो वातोऽहभून ऋषिरुदीची दिशाꣳ शरदृतूनां मित्रावरुणौ देवता पुष्टं द्रविणमेकविꣳशः स्तोमः स उं त्रिणवर्वर्तनिस्तुर्यवाड्वयं आस्कन्दोऽयानामुत्तराद्वातो वातः प्रत्न ऋषिरूर्ध्वा दिशाꣳ हेमन्तशिशिरावृतूनां बृहस्पतिर्देवता वर्चो द्रविणं त्रिणवः स्तोमः स उं त्रयस्त्रिꣳशवर्तनिः पष्ठवाड्वयोऽभिभूरयानां विष्वग्वातो वातः सुपर्ण ऋषिः पितरः पितामहाः परेऽवरे ते नः पान्तु ते नोऽवन्त्वस्मिन्ब्रह्मन्नस्मिन्क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मन्नस्यां देवहूत्याम् (२) ॥

(विट्पष्ठवाड्वयोऽष्टाविꣳशतिश्च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके
तृतीयप्रपाठके तृतीयोऽनुवाकः ॥ ३ ॥

(अथ चतुर्थाष्टके तृतीयप्रपाठके तृतीयोऽनुवाकः ।)

प्राचीं । दिशाम् । वसन्तः । ऋतूनाम् । अग्निः । देवता । ब्रह्म । द्रविणम् । त्रिवृदिति त्रि—वृत् । स्तोमः । सः । उ । पञ्चदशवर्तनिरिति पञ्चदश—वर्तनिः । त्र्यविरिति त्रि—अविः । वयः । कृतम् । अयानाम् । पुरोवात इति पुरः—वातः । वातः । सानगः । ऋषिः । दक्षिणा । दिशाम् । ग्रीष्मः । ऋतूनाम् । इन्द्रः । देवता । क्षत्रम् । द्रविणम् । पञ्चदश इति पञ्च—दशः । स्तोमः । सः । उ । सप्तदशवर्तनिरिति सप्तदश—वर्तनिः । दित्यवाडिति दित्य—वाट् । वयः । त्रेता । अयानाम् । दक्षिणाद्वात इति दक्षिणात्—वातः । वातः । सनातन इति सना—तनः । ऋषिः । प्रतीचीं । दिशाम् । वर्षाः । ऋतूनाम् । विश्वे । देवाः । देवता । विट् (१) । द्रविणम् । सप्तदश इति सप्त—दशः । स्तोमः । सः । उ । एकविंशवर्तनिरित्येकविंश—वर्तनिः । त्रिवत्स इति त्रि—वत्सः । वयः । द्वापरः । अयानाम् । पश्चाद्वात इति पश्चात्—वातः । वातः । अहभूनः । ऋषिः । उदीची । दिशाम् । शरत् । ऋतूनाम् । मित्रावरुणाविति मित्रा—वरुणौ । देवता । पुष्टम् ।

द्रविणम् । एकविंश इत्येक—विंशः । स्तोमः । सः । उ । त्रिणवर्वर्तनिरिति त्रिणव—वर्तनिः । तुर्यवाडिति तुर्य—वाट् । वयः । आस्कन्द इत्या—स्कन्दः । अयानाम् । उत्तराद्वात इत्युत्तरात्—वातः । वातः । प्रत्नः । ऋषिः । ऊर्ध्वा । दिशाम् । हेमन्तशिशिराविति हेमन्त—शिशिरौ । ऋतूनाम् । बृहस्पतिः । देवता । वर्चः । द्रविणम् । त्रिणव इति त्रि—नवः । स्तोमः । सः । उ । त्रयस्त्रिंशवर्तनिरिति त्रयस्त्रिंश—वर्तनिः । पष्ठवादिति पष्ठ—वाट् । वयः । अभिभूरित्यभि—भूः । अयानाम् । विष्वग्वात इति विष्वक्—वातः । वातः । सुपर्ण इति सु—पर्णः । ऋषिः । पितरः । पितामहाः । परे । अवरे । ते । नः । पान्तु । ते । नः । अवन्तु । अस्मिन् । ब्रह्मन् । अस्मिन् । क्षत्रे । अस्याम् । आशिषीत्या—शिषि । अस्याम् । पुरोधायामिति पुरः—धायाम् । अस्मिन् । कर्मन् । अस्याम् । देवहूत्यामिति देव—हूत्याम् (२) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके तृतीयप्रपाठके तृतीयोऽनुवाकः ॥ ३ ॥

प्राचीत्यपानभृत्संयदितिनामद्वयान्विताः ।
पञ्चाशत्पूर्ववद्दिक्षु मध्ये चोपदधाति ताः ॥ १ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे तृतीयप्रपाठके तृतीयोऽनुवाकः ॥ ३ ॥

(अथ चतुर्थाष्टके तृतीयप्रपाठके चतुर्थोऽनुवाकः ।)

ध्रुवक्षितिर्ध्रुवयोनिर्ध्रुवाऽसि ध्रुवां योनिमा सीद साध्या । उरुर्यस्य केतुं प्रथमं पुरस्ताद्-श्विनाऽध्वर्यू सादयतामिह त्वा । स्वे दक्षे दक्ष-पितेह सीद देवत्रा पृथिवी बृहती रराणा । स्वासस्था तनुवा सं विशस्व पितेवैधि सूनव आ सुशेवाऽश्विनाऽध्वर्यू सादयतामिह त्वा । कुलायिनी वसुमती वयोधा रयिं नो धेहि बहुलꣳ सुवीरम् (१) । अपामतिं दुर्मतिं बाधमाना रायस्पोषे यज्ञपतिमाभजन्ती सुवर्धेहि यजमानाय पोषमश्विनाऽध्वर्यू सादयतामिह त्वा । अग्नेः पुरीषमसि देवयानी तां त्वा विश्वे अभि गृणन्तु देवाः । स्तोमपृष्ठा घृतवतीह सीद प्रजावदस्मे द्रविणाऽऽ यजस्वाश्विनाऽध्वर्यू सादयतामिह त्वा । दिवो मूर्धाऽसि पृथिव्या नाभिर्विष्टम्भनी दिशामधिपत्नी भुव-

नानाम् (२) । ऊर्मिर्द्रप्सो अपामसि विश्वकर्मा त ऋषिरश्विनाऽध्वर्यू सादयतामिह त्वा । सजूर्ऋतुभिः सजूर्विधाभिः सजूर्वसुभिः सजू रुद्रैः सजूरादित्यैः सजूर्विश्वेदेवैः सजूदेवैः सजू-र्देववैर्यवाधैरग्नये त्वा वैश्वानरायाश्विनाऽध्वर्यू सादयतामिह त्वा । प्राणं मे पाह्यपानं मे पाहि व्यानं मे पाहि चक्षुर्म उर्व्या वि भाहि श्रोत्रं मे श्लोकयापस्पिन्वौषधीर्जिन्व द्विपात्पाहि चतुष्पादव दिवो वृष्टिमेरय (३) ॥

(सुवीरं भुवनानामुर्व्या सप्तदश च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके तृतीयप्रपाठके चतुर्थोऽनुवाकः ॥ ४ ॥

(अथ चतुर्थाष्टके तृतीयप्रपाठके चतुर्थोऽनुवाकः ।)

ध्रुवक्षितिरितिं ध्रुव—क्षितिः । ध्रुवयोनिरितिं ध्रुव—योनिः । ध्रुवा । असि । ध्रुवाम् । योनिम् । एतिं । सीद । साध्या । उरुर्यस्य । केतुम् । प्रथमम् । पुरस्तात् । अश्विना । अध्वर्यू इतिं । सादयताम् । इह । त्वा । स्वे । दक्षे । दक्षपितेति दक्ष—पिता । इह । सीद । देवत्रेतिं देव—त्रा । पृथिवी । बृहती । रराणा । स्वासस्थेतिं सु—आसस्था । तनुवा । समितिं ।

विशस्व । पिता । इव । एधि । सूनवे । एतं । सुशेवेतिं सु—शेवा । अश्विना । अध्वर्यू इतिं । सादयताम् । इह । त्वा । कुलायिनीं । वसुमतीति वसु—मती । वयोधा इतिं वयः—धाः । रयिम् । नः । वर्ध । बहुलम् । सुवीरमितिं सु—वीरम् (१) । अपेतं । अमतिम् । दुर्मतिमितिं दुः—मतिम् । बाधमाना । रायः । पोषे । यज्ञपतिमितिं यज्ञ—पतिम् । आभजन्तीत्या—भजन्ती । सुवः । धेहि । यजमानाय । पोषम् । अश्विना । अध्वर्यू इतिं । सादयताम् । इह । त्वा । अग्नेः । पुरीषम् । असि । देवयानीतिं देव—यानी । ताम् । त्वा । विश्वे । अभीतिं । गृणन्तु । देवाः । स्तोमपृष्ठेति स्तोम—पृष्ठा । घृतवतीतिं घृत—वती । इह । सीद । प्रजावदितिं प्रजा—वत् । अस्मे इतिं । द्रविणा । एतं । यजस्व । अश्विना । अध्वर्यू इतिं । सादयताम् । इह । त्वा । दिवः । मूर्धा । असि । पृथिव्याः । नाभिः । विष्टम्भनीतिं वि—स्तम्भनी । दिशाम् । अधिपत्नीत्यधि—पत्नी । भुवनानाम् (२) । ऊर्मिः । द्रप्सः । अपाम् । असि । विश्वकर्मेतिं विश्व—कर्मा । ते । ऋषिः । अश्विना । अध्वर्यू इतिं । सादय-



ताम् । इह । त्वा । सजूरितिं स—जूः । ऋतुभिरित्यृतु—भिः । सजूरितिं स—जूः । विधाभिरितिं वि—धाभिः । सजूरितिं स—जूः । वसुभिरिति वसु—भिः । सजूरितिं स—जूः । रुद्रैः । सजूरितिं स—जूः । आदित्यैः । सजूरितिं स—जूः । विश्वैः । देवैः । सजूरितिं स—जूः । देवैः । सजूरितिं स—जूः । देवैः । वयोनाधैरितिं वयः—नाधैः । अग्नये । त्वा । वैश्वानराय । अश्विना । अध्वर्यू इतिं । सादयताम् । इह । त्वा । प्राणमितिं प्र—अनम् । मे । पाहि । अपानमित्यप—अनम् । मे । पाहि । व्यानमितिं वि—अनम् । मे । पाहि । चक्षुः । मे । उर्व्या । वीतिं । भाहि । श्रोत्रम् । मे । श्लोकय । अपः । पिन्व । ओषधीः । जिन्व । द्विपादितिं द्वि—पात् । पाहि । चतुष्पादिति चतुः—पात् । अव । दिवः । वृष्टिम् । एतं । ईरय (३) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके तृतीयप्रपाठके चतुर्थोऽनुवाकः ॥ ४ ॥

(अथ चतुर्थकाण्डे तृतीयप्रपाठके चतुर्थोऽनुवाकः ।)

तृतीयेऽनुवाकेऽपानभृदाख्या इष्टका उक्ताः । तावता प्रथमा चितिः समाप्ता। अथ चतुर्थानुवाके द्वितीयस्यां चितावाश्विन्याख्या इष्टका अभिधीयन्ते।

(द्वितीयचितावाश्विन्याख्येष्टकाभिधानम्)

व्यानं मे पाहि चक्षुर्म उर्व्या
वि भाहि श्रोत्रं मे श्लोकय , इति ।

हे इष्टके मे मदीयं प्राणं पाहि पालय । एवमुत्तरत्रापि । उर्व्या विशालया दृष्ट्या विभाहि विशेषेण प्रकाशय दर्शनसमर्थं कुर्वित्यर्थः । श्लोकय शब्दसंघाते शक्तं कुरु बहुविधवेदशास्त्रश्रवणसमर्थं कुर्वित्यर्थः ॥

एतैर्मन्त्रैः साध्यमुपधानं विधत्ते—

" प्राणभृत उप दधात्यृतुष्वेव प्राणान्दधाति तस्मात्समानाः सन्त ऋतवो न जीर्यन्त्यथो प्र जनयत्येवैनान् " [सं० का० ५ प्र० ३ अ० १] इति ।

ऋतव्योपधानादूर्ध्वं प्राणभृत उपधाने सत्यृतुष्वेव प्राणान्स्थापयति । यस्मादेषु स्थापिताः प्राणास्तस्मात्पुनः पुनरावृत्तावप्यृतवः समाना एव दृश्यन्ते न तु जीर्णा भवन्ति । अपि च प्राणस्थापनादेता(ना)नृतून्पुनः पुनरुत्पादयत्येव ॥

ऋतव्याभ्य उत्तरभाविनीः प्राणभृतः प्रकारान्तरेण प्रशंसति—

" एष वै वायुर्यत्प्राणो यदृतव्या उपधाय प्राणभृत उपदधाति तस्मात्सर्वानृतूननु वायुरा वरीवर्ति [सं० का० ५ प्र० ३ अ० १] इति ।

योऽयं प्राणः स एष वायुरेव । तथा सत्यृतव्यानामूर्ध्वं प्राणभृतामुपधानेन सर्वानप्यृतूननुसृत्य वायुः पुनः पुनरावर्तते ॥

कल्पः—" अपस्पिन्वेति पञ्चापस्या अनुपरिहारम् " इति ।

पाठस्तु—

अपस्पिन्वौषधीर्जिन्व द्विपात्पाहि चतुष्पादव दिवो वृष्टिमेरय ॥[1], इति ॥

हे इष्टके त्वमपो जलानि पिन्व प्रीणय । ओषधीश्च जिन्व प्रीणय । द्विपान्मनुष्यशरीरं पाहि पालय । चतुष्पात्पशुशरीरमव रक्ष । दिवः सकाशाद्वृष्टिमेरयाऽऽ समन्तात्प्रवर्तय ॥

एतैर्मन्त्रैः साध्यमुपधानं विधत्ते—

" वृष्टिसनीरुप दधाति वृष्टिमेवाव रुन्धे " [सं० का० ५ प्र० ३ अ० १] इति ।

वृष्टिसनीर्वृष्टिप्रदानेनैतन्नामिका इष्टकाः ॥

तत्र प्रकारविशेषं विधत्ते—

१ ख. च. °धीरपि जि° ।

(वयस्याख्येष्टकाभिधानम्)

" यदेकधोपदध्यादेकमृतुं वर्षेदनुपरिहारꣳ सादयति तस्मात्सर्वानृतून्वर्षति " [सं० का० ५ प्र० ३ अ० १] इति ।

पञ्चानामेकप्रयत्नोपधाने सत्येकस्मिन्नेवर्तौ वृष्टिर्भवेन्नेतरेष्वप्यृतुषु । अतस्तत्परिहारायानुक्रमेण परितो हृत्वा स्थापयेत् । प्राचीमुपधाय प्रदक्षिणमिष्टकामावर्त्य दक्षिणामुपदध्यात् ।

पुनरपीष्टकाहस्तः प्रदक्षिणीकृत्य पश्चिमामुपदध्यादित्येवं योजनीयम् । तथा सति सर्वानप्यृतून्प्रति वृष्टिर्भवति ॥

प्राणभृतां वृष्टिसनीनां च पूर्वोत्तरभावं प्रशंसति—

" यत्प्राणभृत उपधाय वृष्टिसनीरुपदधाति तस्माद्वायुप्रच्युता दिवो वृष्टिरीर्ते " [सं० का० ५ प्र० ३ अ० १] इति ।

यस्मात्प्राणभृतः पूर्वभाविन्यो वृष्टिसनयः पश्चाद्भाविन्यस्तस्माल्लोकेऽपि दिवः सकाशात्पूर्वं वायुना प्रेरिता वृष्टिः पश्चात्प्रवर्तते ॥

अत्र विनियोगसंग्रहः—

द्वितीयस्यां चितौ पञ्च ध्रुवेत्याद्याश्विनीस्तथा ।
पञ्चर्तव्याः सजूर्मन्त्रैराद्यन्तावनुषङ्गकौ ॥ १ ॥
वसुरुद्रादित्यविश्वैर्देवैर्मन्त्राभिदा भवेत् ।
प्राणं प्राणभृतः पञ्च ह्यपोऽपस्याश्च पञ्च हि ॥
ता एव वृष्टिसन्याख्याः प्रोक्ता मन्त्रास्तु विंशतिः ॥ २ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे तृतीयप्रपाठके चतुर्थोऽनुवाकः ॥ ४ ॥

(अथ चतुर्थाष्टके तृतीयप्रपाठके पञ्चमोऽनुवाकः ।)

त्र्यविर्वयस्त्रिष्टुप्छन्दो दित्यवाड्वयो विराट्छन्दः पञ्चाविर्वयो गायत्री छन्दस्त्रिवत्सो वयः उष्णिहा छन्दस्तुर्यवाड्वयोऽनुष्टुप्छन्दः पष्ठवाड्वयो बृहती छन्द उक्षा वयः सतोबृहती छन्द ऋषभो वयः ककुच्छन्दो धेनुर्वयो जगती

छन्दोऽनड्वान्वयः पङ्क्तिश्छन्दो बस्तो वयो विवलं छन्दो वृष्णिर्वयो विशालं छन्दः पुरुषो वयस्तन्द्रं छन्दो व्याघ्रो वयोऽनाधृष्टं छन्दः सिꣳहो वयश्छदिश्छन्दो विष्टम्भो वयोऽधिपतिश्छन्दः क्षत्रं वयो मयन्दं छन्दो विश्वकर्मा वयः परमेष्ठी छन्दो मूर्धा वयः प्रजापतिश्छन्दः (१) ॥

(पुरुषो वयः षड्विꣳशतिश्च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहिताया चतुर्थाष्टके तृतीयप्रपाठके पञ्चमोऽनुवाकः ॥ ५ ॥

(अथ चतुर्थाष्टके तृतीयप्रपाठके पञ्चमोऽनुवाकः ।)

त्र्यविरिति त्रि—अविः । वयः । त्रिष्टुप् । छन्दः । दित्यवाडिति दित्य—वाट् । वयः । विराडिति वि—राट् । छन्दः । पञ्चाविरिति पञ्च—अविः । वयः । गायत्री । छन्दः । त्रिवत्स इति त्रि—वत्सः । वयः । उष्णिहा । छन्दः । तुर्यवाडिति तुर्य—वाट् । वयः । अनुष्टुबित्यनु—स्तुप् । छन्दः । पष्ठवादिति पष्ठ—वाट् । वयः । बृहती । छन्दः । उक्षा । वयः । सतोबृहतीति सतः—बृहती । छन्दः । ऋषभः । वयः । ककुत् । छन्दः । धेनुः । वयः । जगती । छन्दः ।

अनड्वान् । वयः । पङ्क्तिः । छन्दः । बस्तः । वयः । विवलमिति वि—वलम् । छन्दः । वृष्णिः । वयः । विशालमिति वि—शालम् । छन्दः । पुरुषः । वयः । तन्द्रम् । छन्दः । व्याघ्रः । वयः । अनाधृष्टमित्यना—धृष्टम् । छन्दः । सिꣳहः । वयः । छदिः । छन्दः । विष्टम्भ इति वि—स्तम्भः । वयः । अधिपतिरित्यधि—पतिः । छन्दः । क्षत्रम् । वयः । मयन्दम् । छन्दः । विश्वकर्मेति विश्व—कर्मा । वयः । परमेष्ठी । छन्दः । मूर्धा । वयः । प्रजापतिरिति प्रजा—पतिः । छन्दः (१) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके तृतीयप्रपाठके पञ्चमोऽनुवाकः ॥ ५ ॥

(अथ चतुर्थकाण्डे तृतीयप्रपाठके पञ्चमोऽनुवाकः ।)

चतुर्थानुवाक आश्विन्यादीष्टका उक्ताः । अथ पञ्चमे वयस्याख्या इष्टका उच्यन्ते ।

कल्पः—" त्र्यविर्वय इति पञ्च दक्षिणस्यां श्रोण्यां पष्ठवाद्वय इति पञ्चोत्तरस्यां बस्तो वय इति दक्षिणेंऽसे वृष्णिर्वय इत्युत्तरे व्याघ्रो वय इति दक्षिणे पक्षे सिꣳहो वय इत्युत्तर एतद्वा विपरीतं पुरुषो वय इति मध्ये विष्टम्भो वय इति चतस्रो वयस्याः पुरस्तात्प्रतीचीः " इति ।

पाठस्तु—

त्र्यविर्वयस्त्रिष्टुप्छन्दो दित्यवाड्वयो विराट्छन्दः पञ्चाविर्वयो गायत्री छन्दस्त्रिवत्सो वय उष्णिहा छन्दस्तुर्यवाड्वयोऽनुष्टुप्छन्दः पष्ठ-

मूर्धञ्शब्दोपेतमंत्रसाध्यास्तस्मात्पक्ष्याकारेण चीयमानस्याग्नेरपि मूर्धा पूर्वस्यां दिशि भवति ॥

त्र्यविर्वय इत्यादिमन्त्रपञ्चकेन पष्ठवाद्वय इत्यादिमन्त्रपञ्चकेन चोपधेयानामिष्टकानां देशविशेषं विधत्ते—

" पञ्च दक्षिणायाꣳ श्रोण्यामुप दधाति पञ्चोत्तरस्यां तस्मात्पश्चाद्वर्षीयान्पुरस्तात्प्रवणः पशुः " [सं० का० ५ प्र० ३ अ० १] इति ।

यस्मादत्र श्रोण्योर्बहव इष्टकास्तस्मात्पशोरपि श्रोणितः पूर्वभागो निम्नः ॥

अथ मन्त्रद्वयेनोपधेययोर्विशेषौ विधत्ते—

" बस्तो वय इति दक्षिणेऽꣳस उप दधाति वृष्णिर्वय इत्युत्तरेऽꣳसावेव प्रति दधाति " [सं० का० ५ प्र० ३ अ० १] इति ।

उत्तरे, अंस उपदधातीत्यनुवर्तते । तेनोपधानद्वयेनाग्नेरंसावेव संपादयति ॥

अन्येन मन्त्रद्वयेनोपधेययोर्देशविशेषौ विधत्ते—

" व्याघ्रो वय इति दक्षिणे पक्ष उप दधाति सिꣳहो वय इत्युत्तरे पक्षयोरेव वीर्यं दधाति " [सं० का० ५ प्र० ३ अ० १] इति ।

उत्तरे, पक्ष उपदधातीत्यनुवर्तते । व्याघ्रसिंहयोरधिकवीर्योपेतत्वादनेनोपधानद्वयेन पक्षयोर्वीर्यं स्थापयत्येव ॥

अन्येन मन्त्रेणोपधेयाया इष्टकायाः स्थानं विधत्ते—

" पुरुषो वय इति मध्ये तस्मात्पुरुषः पशूनामधिपतिः " [सं० का० ५ प्र० ३ अ० १] इति ।

यस्मान्मध्यदेश उपधानमन्त्रे पुरुषशब्दोऽस्ति तस्माल्लोके पुरुषः पशूनां स्वामी भवति । इतरास्तु वयस्याः पशव इत्युक्तम् ॥

अत्र विनियोगसंग्रहः—

त्रियविस्तु (त्र्यविर्वयो) वयस्याख्या दध्यादेकोनविंशतिः ॥ १ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे तृतीयप्रपाठके
पञ्चमोऽनुवाकः ॥ ५ ॥

---

१ घ. ङ. °मन्त्रार्थसा° । २ ख. च. °स्मात्प्रकृत्याका° ।

(अथ चतुर्थाष्टके तृतीयप्रपाठके षष्ठोऽनुवाकः ।)

इन्द्राग्नी अव्यथमानामिष्टकां दꣳहतं युवम् । पृष्ठेन द्यावापृथिवी अन्तरिक्षं च वि बाधताम् । विश्वकर्मा त्वा सादयत्वन्तरिक्षस्य पृष्ठे व्यचस्वतीं प्रथस्वतीं भास्वतीꣳ सूरिमतीमा या द्यां भास्या पृथिवीमोर्वन्तरिक्षमन्तरिक्षं यच्छान्तरिक्षं दꣳहान्तरिक्षं मा हिꣳसीर्विश्वस्मै प्राणायापानाय व्यानायोदानाय प्रतिष्ठायै चरित्राय वायुस्त्वाऽभि पातु मह्या स्वस्त्या छर्दिषा (१) शंतमेन तया देवतयाऽङ्गिरस्वद्ध्रुवा सीद । राज्ञ्यसि प्राची दिग्विराडसि दक्षिणा दिक्सम्राडसि प्रतीची दिक्स्वराडस्युदीची दिगधिपत्न्यसि बृहती दिगायुर्मे पाहि प्राणं मे पाह्यपानं मे पाहि व्यानं मे पाहि चक्षुर्मे पाहि श्रोत्रं मे पाहि मनो मे जिन्व वाचं मे पिन्वाऽऽत्मानं मे पाहि ज्योतिर्मे यच्छ (२)॥

(छर्दिषा पिन्व षट्चं ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके
तृतीयप्रपाठके षष्ठोऽनुवाकः ॥ ६ ॥

(अथ चतुर्थाष्टके तृतीयप्रपाठके षष्ठोऽनुवाकः ।)

इन्द्राग्नी इतीन्द्र्—अग्नी । अव्यथमानाम् । इष्ट-
काम् । दृꣳहतम् । युवम् । पृष्ठेन । द्यावापृथिवी
इति द्यावा—पृथिवी । अन्तरिक्षम् । च । वीति ।
बाधताम् । विश्वकर्मेति विश्व—कर्मा । त्वा । सादयतु ।
अन्तरिक्षस्य । पृष्ठे । व्यचस्वतीम् । प्रथस्वतीम् ।
भास्वतीम् । सूरिमतीमिति सूरि—मतीम् । एति ।
या । द्याम् । भासि । एति । पृथिवीम् ।
एति । उरु । अन्तरिक्षम् । अन्तरिक्षम् । यच्छ ।
अन्तरिक्षम् । दृꣳह । अन्तरिक्षम् । मा । हिꣳसीः ।
विश्वस्मै । प्राणायेति प्र—अनाय । अपानायेत्यप—
अनाय । व्यानायेति वि—अनाय । उदानाये-
त्युत्—अनाय । प्रतिष्ठाया इति प्रति—स्थायै ।
चरित्राय । वायुः । त्वा । अभीति ।
पातु । मह्या । स्वस्त्या । छर्दिषा (१) । शंतमे-
नेति शं—तमेन । तया । देवतया । अङ्गिरस्वत् ।
ध्रुवा । सीद । राज्ञी । असि । प्राची । दिक् । विरा-
डिति वि—राट् । असि । दक्षिणा । दिक् । सम्रा-
डिति सम्—राट् । असि । प्रतीची । दिक् । स्वरा-
डिति स्व—राट् । असि । उदीची । दिक् । अधि-

पत्नीत्यधि—पत्नी । असि । बृहती । दिक् । आयुः ।
मे । पाहि । प्राणमिति प्र—अनम् । मे । पाहि ।
अपानमित्यप—अनम् । मे । पाहि । व्यानमिति
वि—अनम् । मे । पाहि । चक्षुः । मे । पाहि ।
श्रोत्रम् । मे । पाहि । मनः । मे । जिन्व । वाचम् ।
मे । पिन्व । आत्मानम् । मे । पाहि । ज्योतिः । मे ।
यच्छ (२) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके
तृतीयप्रपाठके षष्ठोऽनुवाकः ॥ ६ ॥

(अथ चतुर्थकाण्डे तृतीयप्रपाठके षष्ठोऽनुवाकः ।)

पञ्चमेऽनुवाके वयस्याख्या इष्टका उक्ताः । तावता द्वितीयचितिः समाप्ता । अथ षष्ठे तृतीयस्यां चितौ स्वयमातृण्णाद्या उच्यन्ते ।

कल्पः—श्वोभूते पौर्वाह्णिकीभ्यां प्रचर्य तृतीयां चितिं चिनोतीन्द्राग्नी अव्यथमानामिति स्वयमातृण्णामभिमृश्याश्वेनोपघ्राप्य " इति ।

पाठस्तु—

इन्द्राग्नी अव्यथमानामिष्टकां दृꣳहतं
युवम् । पृष्ठेन द्यावापृथिवी अन्त-
रिक्षं च वि बाधताम् । , इति ।

हे इन्द्राग्नी युवं युवामव्यथमानां भङ्गरहितां स्वयमातृण्णाख्यामिष्टकां दृꣳहतं दृढीं कुरुतम् । इयं चेष्टका स्वकीयेनोपरिभागेन(ण) लोकत्रयं विबाधतां बाधमानेव व्याप्नोत्वित्यर्थः ॥

कल्पः—" विश्वकर्मा त्वा सादयत्वन्तरिक्षस्य पृष्ठ इत्यविदुषा ब्राह्मणेन सह मध्येऽग्नेरुपदधाति " इति ।

पाठस्तु—

" देवानां वै सुवर्गं लोकं यतां दिशः समव्लीयन्त त एता दिश्या अपश्यन्ता उपादधत ताभिर्वै ते दिशोऽदृंहन्यद्दिश्या उपदधाति दिशां विधृत्यै " [सं० का० ५ प्र० ३ अ० २] इति ।

देवाः पुरा भूमौ स्थिताः कदाचित्स्वर्गं लोकं गताः । तत्र गच्छतां देवानां संबन्धिन्यो या भूमिष्ठा दिशस्ताः समव्लीयन्त रक्षकाभावात्सम्यग्विशीर्णाः । दिग्वर्तिनां प्राणिनामस्वास्थ्यमेव दिशां विशरणम् । ते देवा विचार्य दिशां धारणसमर्था एता दिश्या नामेष्टका अपश्यन् । दिक्शब्दोपेतैर्मन्त्रैरुपधेया इष्टका दिश्याः । तदुपधानादेवानामिव यजमानस्यापि दिशो दृढा भवन्ति ॥

कल्पः—" आयुर्मे पाहीति दश प्राणभृतः पुरस्तादुपधाय " इति ।

पाठस्तु—

आयुर्मे पाहि प्राणं मे पाह्यपानं मे पाहि व्यानं मे पाहि चक्षुर्मे पाहि श्रोत्रं मे पाहि मनो मे जिन्व वाचं मे पिन्वाऽऽत्मानं मे पाहि ज्योतिर्मे यच्छ ॥, इति ॥

हे इष्टके मे मदीयमायुः पाहि रक्ष । एवमुत्तरत्रापि योज्यम् । जिन्व प्रीणय । आत्मानं जीवस्वरूपम् । ज्योतिर्यच्छ देहि ॥

एतैर्मन्त्रैः साध्यमुपधानं विधत्ते—

" दश प्राणभृतः पुरस्तादुप दधाति नव वै पुरुषे प्राणा नाभिर्दशमी प्राणानेव पुरस्ताद्धत्ते तस्मात्पुरस्तात्प्राणाः " [सं० का० ५ प्र० ३ अ० २] इति ।

प्राणशब्दोपेतान्मन्त्रानुपधानकाले बिभ्रतीति प्राणभृतः । शिरसि सप्त च्छिद्राणि अधस्तादुभे तेषु च्छिद्रेषु संचरन्तः प्राणा नवसंख्याकाः । नाभिर्दशमी छिद्ररूपा । अतस्तत्रत्यप्राणेन सह दश प्राणान्पूर्वस्यां दिश्युपधत्ते । यस्मादेते पूर्वस्यां दिश्युपहितास्तस्माल्लोकेऽपि प्राङ्मुखस्य पुरुषस्य श्वासदृष्टिप्रसारादयः पूर्वस्यामेव दिशि भवन्ति ॥

चरममन्त्रे ज्योतिःशब्दं प्रशंसति—

" ज्योतिष्मतीमुत्तमामुप दधाति तस्मात्प्राणानां वाग्ज्योतिरुत्तमा " [सं० का० ५ प्र० ३ अ० २] इति ।

ज्योतिःशब्दयुक्तेन मन्त्रेणोपधातव्येष्टका ज्योतिष्मती । यस्मात्सा चरमा तस्माल्लोकेऽपि स्वार्थप्रकाशकत्वेन ज्योतीरूपा वाक्सर्वेषामिन्द्रियाणामुत्तमा भवति ॥

संख्यां प्रशंसति—

"दशोप दधाति दशाक्षरा विराड्विराट्छन्दसां ज्योतिर्ज्योतिरेव पुरस्ताद्धत्ते तस्मात्पुरस्ताज्ज्योतिरुपास्महे " [सं० का० ५ प्र० ३ अ० २] इति ।

दीप्तिवाचिना राजतिधातुजन्येन निर्दिश्यमानत्वादियं विराट्छन्दसां मध्ये ज्योतिः । तथा सति तादृग्दशानां पूर्वदिश्युपधानेन ज्योतिरेव तत्र धारितं भवति । यस्मात्पूर्वस्यां दिशि ज्योतिर्धृतं तस्माद्वयं प्रातःसंध्याकाले पूर्वस्यां दिशि ज्योतिर्मण्डलमुपास्महे ॥

अत्र विनियोगसंग्रहः—

तृतीयस्यां चिताविन्द्रा स्वयमातृण्णकां स्पृशेत् ।
विश्वेत्युपदधात्येनां राज्ञी दिश्यास्तु पञ्चभिः ॥
आयुर्दश प्राणभृतो मन्त्राः सप्तदशेरिताः ॥ १ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे तृतीयप्रपाठके षष्ठोऽनुवाकः ॥ ६ ॥

(अथ चतुर्थाष्टके तृतीयप्रपाठके सप्तमोऽनुवाकः ।)

मा छन्दः प्रमा छन्दः प्रतिमा छन्दोऽस्रीविश्छन्दः पङ्क्तिश्छन्द उष्णिहा छन्दो बृहती छन्दोऽनुष्टुप्छन्दो विराट्छन्दो गायत्री छन्दस्त्रिष्टुप्छन्दो जगती छन्दः पृथिवी छन्दोऽन्तरिक्षं छन्दो द्यौश्छन्दः समाश्छन्दो नक्षत्राणि छन्दो मनश्छन्दो वाक्छन्दः कृषिश्छन्दो हिरण्यं छन्दो गौश्छन्दोऽजा छन्दोऽश्वश्छन्दः । अग्निर्देवता (१) वातो देवता सूर्यो देवता चन्द्रमा देवता वसवो देवता रुद्रा देवताऽऽदित्या देवता

१ घ. ङ. °ति दशा° ।

विश्वे देवा देवता मरुतो देवता बृहस्पतिर्देव-
तेन्द्रो देवता वरुणो देवता मूर्धाऽसि राड्ध्रु-
वाऽसि धरुणा यन्त्र्यसि यमित्रीषे त्वोर्जे त्वा
कृष्यै त्वा क्षेमाय त्वा यन्त्री राड्ध्रुवाऽसि
धरणी धर्त्र्यसि धरित्र्यायुषे त्वा वर्चसे त्वौजसे
त्वा बलाय त्वा (२) ॥

(देवताऽऽयुषे त्वा षट्चं ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके
तृतीयप्रपाठके सप्तमोऽनुवाकः ॥ ७ ॥

(अथ चतुर्थाष्टके तृतीयप्रपाठके सप्तमोऽनुवाकः ।)

मा । छन्दः । प्रमेति प्र—मा । छन्दः । प्रति-
मेति प्रति—मा । छन्दः । अस्त्रीविः । छन्दः ।
पङ्क्तिः । छन्दः । उष्णिहा । छन्दः । बृहती ।
छन्दः । अनुष्टुबित्यनु—स्तुप् । छन्दः । विराडिति
वि—राट् । छन्दः । गायत्री । छन्दः । त्रिष्टुप् ।
छन्दः । जगती । छन्दः । पृथिवी । छन्दः । अन्त-
रिक्षम् । छन्दः । द्यौः । छन्दः । समाः । छन्दः ।
नक्षत्राणि । छन्दः । मनः । छन्दः । वाक् । छन्दः ।
कृषिः । छन्दः । हिरण्यम् । छन्दः । गौः । छन्दः ।
अजा । छन्दः । अश्वः । छन्दः । अग्निः । देवता

(१) । वातः । देवता । सूर्यः । देवता । चन्द्रमाः ।
देवता । वसवः । देवता । रुद्राः । देवता । आदित्याः ।
देवता । विश्वे । देवाः । देवता । मरुतः । देवता ।
बृहस्पतिः । देवता । इन्द्रः । देवता । वरुणः ।
देवता । मूर्धा । असि । राट् । ध्रुवा । असि ।
धरुणा । यन्त्री । असि । यमित्री । इषे । त्वा ।
ऊर्जे । त्वा । कृष्यै । त्वा । क्षेमाय । त्वा । यन्त्री ।
राट् । ध्रुवा । असि । धरणी । धर्त्री । असि ।
धरित्री । आयुषे । त्वा । वर्चसे । त्वा । ओजसे ।
त्वा । बलाय । त्वा (२) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके
तृतीयप्रपाठके सप्तमोऽनुवाकः ॥ ७ ॥

(अथ चतुर्थकाण्डे तृतीयप्रपाठके सप्तमोऽनुवाकः ।)

षष्ठेऽनुवाके स्वयमातृण्णाद्या इष्टका उक्ताः । अथ सप्तमे बृहत्याख्या इष्टका उच्यन्ते ।

कल्पः—" षट्त्रिंशतं बृहतीर्मा छन्द इति द्वादश दक्षिणतः पृथिवी छन्द इति द्वादश पश्चादग्निर्देवतेति द्वादशोत्तरतः " इति ।

पाठस्तु—

मा छन्दः प्रमा छन्दः प्रतिमा छन्दोऽस्त्रीवि-
श्छन्दः पङ्क्तिश्छन्द उष्णिहा छन्दो बृहती
छन्दोऽनुष्टुप्छन्दो विराट्छन्दो गायत्री छन्द-
स्त्रिष्टुप्छन्दो जगती छन्दः पृथिवी छन्दोऽ-

इष्टकागतया सप्तसंख्यया शीर्षण्यच्छिद्रसाम्यं, पुरस्तादेकं सप्तकं पश्चादेकं सप्तकमिति सप्तकयोर्द्वित्वादधोदेशवर्तिच्छिद्रद्वयसाम्यम् । अतः सर्वेषां प्राणानां सवीर्यत्वायेदमुपधानम् ॥

सप्तकद्वये मन्त्रविभागं विधत्ते—

" मूर्धाऽसि राडिति पुरस्तादुप दधाति यत्री राडिति पश्चात्प्राणानेवास्मै समीचो दधाति " [सं० का० ५ प्र० ३ अ० २] इति ।

सप्तकद्वयस्य परस्पराभिमुख्येन प्राणानां सम्यक्त्वं संपद्यते । सम्यक्त्वं नाम स्वस्वव्यापारक्षमत्वम् ॥

अत्र विनियोगसंग्रहः—

मा दक्षिणस्यां बृहतीः पृथि पश्चादथोत्तरे ।
अग्निरित्यादिकाः सर्वा द्वादश द्वादशोदिताः ॥ १ ॥
मूर्धा यत्री वालखिल्याः पुरः पश्चाच्च सप्तभिः ।
सप्तमे त्वनुवाकेऽस्मिन्मन्त्राः पञ्चाशदीरिताः ॥ २ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे तृतीयप्रपाठके सप्तमोऽनुवाकः ॥ ७ ॥

(अथ चतुर्थाष्टके तृतीयप्रपाठकेऽष्टमोऽनुवाकः ।)

आशुस्त्रिवृद्भान्तः पञ्चदशो व्योम सप्तदशः प्रतूर्तिरष्टादशस्तपो नवदशोऽभिवर्तः सविंशो धरुणं एकविंशो वर्चो द्राविंशः संभरणस्त्रयोविंशो योनिश्चतुर्विंशो गर्भाः पञ्चविंश ओजस्त्रिणवः क्रतुरेकत्रिंशः प्रतिष्ठा त्रयस्त्रिंशो ब्रध्नस्य विष्टपं चतुस्त्रिंशो नाकः षट्त्रिंशो विवर्तोऽष्टाचत्वारिंशो धर्त्रश्चतुष्टोमः (१) ॥

(आशुः सप्तत्रिंशत् ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहिताया चतुर्थाष्टके तृतीयप्रपाठकेऽष्टमोऽनुवाकः ॥ ८ ॥

(अथ चतुर्थाष्टके तृतीयप्रपाठकेऽष्टमोऽनुवाकः ।)

आशुः । त्रिवृदिति त्रि—वृत् । भान्तः । पञ्चदश इति पञ्च—दशः । व्योमेति वि—ओम् । सप्तदश इति सप्त—दशः । प्रतूर्तिरिति प्र—तूर्तिः । अष्टादश इत्यष्टा—दशः । तपः । नवदश इति नव—दशः । अभिवर्त इत्यभि—वर्तः । सविंश इति स—विंशः । धरुणः । एकविंश इत्येक—विंशः । वर्चः । द्राविंशः । संभरण इति सं—भरणः । त्रयोविंश इति त्रयः—विंशः । योनिः । चतुर्विंश इति चतुः—विंशः । गर्भाः । पञ्चविंश इति पञ्च—विंशः । ओजः । त्रिणव इति त्रि—नवः । क्रतुः । एकत्रिंश इत्येक—त्रिंशः । प्रतिष्ठेति प्रति—स्था । त्रयस्त्रिंश इति त्रयः—त्रिंशः । ब्रध्नस्य । विष्टपम् । चतुस्त्रिंश इति चतुः—त्रिंशः । नाकः । षट्त्रिंश इति षट्—त्रिंशः । विवर्त इति वि—वर्तः । अष्टाच-

त्वारिꣳश इत्येष्टा—चत्वारिꣳशः । धर्त्रः । चतुष्टोम इति चतुः—स्तोमः (१) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके तृतीयप्रपाठकेऽष्टमोऽनुवाकः ॥ ८ ॥

(अथ चतुर्थकाण्डे तृतीयप्रपाठकेऽष्टमोऽनुवाकः ।)

सप्तमेऽनुवाके बृहत्याद्या इष्टका अभिहिताः । तावता तृतीया चितिः समाप्ता । अथाष्टमे चतुर्थ्यां चितावक्ष्णयास्तोमीयाख्यास्विष्टकासु काश्चिदुच्यन्ते ।

कल्पः—" श्वोभूते पौर्वाह्णिकीभ्यां प्रचर्य चतुर्थीं चितिं चिनोत्याशुस्त्रिवृदग्नेर्भागोऽसीत्येताभ्यामनुवाकाभ्यां यथाब्राह्मणमुपधाय " इति ।

तत्राऽऽद्यानुवाकपाठस्तु—

आशुस्त्रिवृद्भ्रान्तः पञ्चदशो व्योम सप्तदशः प्रतूर्तिरष्टादशस्तपो नवदशोऽभिविवर्तः सविꣳशो धरुण एकविꣳशो वर्चो द्वाविꣳशः संभरणस्त्रयोविꣳशो योनिश्चतुर्विꣳशो गर्भाः पञ्चविꣳश ओजस्त्रिणवः क्रतुरेकत्रिꣳशः प्रतिष्ठा त्रयस्त्रिꣳशो ब्रध्नस्य विष्टपं चतुस्त्रिꣳशो नाकः षट्त्रिꣳशो विवर्तोऽष्टाचत्वारिꣳशो धर्त्रश्चतुष्टोमः ॥, इति ॥

अत्र त्रिवृत्पञ्चदशसप्तदशाष्टादशनवदशादिशब्दाः स्तोमविशेषवाचिनः । स्तोमाश्च तृचनिष्ठस्य साम्न आवृत्तिभेदान्निष्पद्यन्ते । आवृत्तिप्रकारस्तु त्रिवृत्पञ्चदशसप्तदशानां समिधमा तिष्ठेत्यस्मिन्ननुवाके सामब्राह्मणोदाहरणेनास्माभिर्व्याख्यातः । एकविंशत्रिणवत्रयस्त्रिंशाख्या अपि स्तोमाः सामब्राह्मणे निरूपिताः । अष्टादशनवदशादयस्तु न्यायेनोन्नेया उपस्तोमाः । ते तु ब्राह्मण आम्नाताः । तदुन्नयनार्थस्त्वावृत्तिप्रकारः सामसूत्रादवगन्तव्यः । अत्र त्रिवृदादयश्चतुष्टोमान्ता अष्टादशसंख्याकाः स्तोमविशेषा आम्नाताः । आशुर्भान्त इत्यादीनि स्तोमविशेषणानि । तत्र कानिचिद्गुणवाचीनि कानिचिद्द्रव्यवाचीनि । तथा सति गुणसंबन्धं द्रव्यतादात्म्यं वा स्तोमेषूपचर्य तत्तत्स्तोमरूपत्वं तत्तदिष्टकायाः प्रशंसार्थमुपन्यस्यते । तत्रैवमक्षरयोजना—आशुः शैघ्र्यगुणोपेतो यस्त्रिवृत्स्तोमो हे इष्टके तद्रूपा त्वमसि । एवमुत्तरत्रापि योज्यम् । भान्तो भासमानः । व्योम प्रसिद्धं द्रव्यम् । प्रकृष्टा तूर्तिस्त्वरा यस्यासौ प्रतूर्तिः शीघ्रकारिणीत्यर्थः । तपः प्रसिद्धम् । अभिवर्तः सामविशेषः । सह विंशत्या संख्यया वर्तत इति सविंशः स्तोमविशेषः । धरुणो धारकः । वर्चो बलहेतुः । संभरणः सम्यक्पोषकः । योनिः प्रजोत्पादकः । गर्भाः प्रसिद्धाः । ओजोऽष्टमधातुः । क्रतुर्ज्योतिष्टोमादिः । प्रतिष्ठा स्थितिहेतुः । ब्रध्नस्याऽऽदित्यस्य विष्टपं निवासस्थानम् । ' असौ वा आदित्यो ब्रध्नः ' इतिश्रुत्यन्तरात् । नाकः स्वर्गाख्यभोगभूमिः । विपरीतत्वेन वर्तनं यस्यासौ विवर्तः । त्रिवृत्पञ्चदशसप्तदशैकविंशत्रिणवत्रयस्त्रिंशा अनेनैवाऽऽम्नातक्रमेण क्वचिदनुष्ठीयन्ते, क्वचित्तु विपरीतक्रमेण । अत एव सूत्रकारेण क्वचिदुक्तम्—" त्रयस्त्रिंशारम्भणास्त्रिवृदुत्तमाः " इति । धर्त्रो धारकः । चतुष्टोमस्त्रिवृत्पञ्चदशसप्तदशैकविंशानां समूहः । एतैः स्तोमवाचिभिरष्टादशभिर्मन्त्रैः स्तोमरूपत्वमापादिता अष्टादशेष्टका उपदध्यात् ॥

एतैर्मन्त्रैः साध्यमुपधानं विधत्ते—

" देवा वै यज्ञेऽकुर्वत तदसुरा अकुर्वत ते देवा एता अक्ष्णयास्तोमीया अपश्यन्ता अन्यथाऽनूच्यान्यथोपादधत तदसुरा नान्वयन्ततो देवा अभवन्पराऽसुरा यदक्ष्णयास्तोमीया अन्यथाऽनूच्यान्यथोपदधाति भ्रातृव्याभिभूत्यै भवत्यात्मना पराऽस्य भ्रातृव्यो भवति" [सं० का० ५ प्र० ३ अ० ३] इति ।

पुरा कदाचिद्देवसाम्यं प्राप्तुमसुरा देवसमीपे गूढचारिणं पुरुषमवस्थाप्य तन्मुखेनावगत्य देवा यज्ञे यद्यदङ्गमकुर्वंस्तत्सर्वं स्वयमपि तथैवानुष्ठितवन्तः । ततस्तान्वञ्चयितुं देवा अक्ष्णयास्तोमीयाख्या एता इष्टका अपश्यन् । स्तोमवाचिशब्दोपेतैर्मन्त्रैरुपधेयत्वात्स्तोमीयाः । तत्रापि मन्त्रपाठक्रममुल्लङ्घ्य वक्रत्वेनानुष्ठेयत्वादक्ष्णयास्तोमीयाः । कथं वक्रत्वमिति तदुच्यते—अन्यथा मन्त्रानुवचनमन्यथेष्टकोपधानमिति वक्रत्वम् । भान्तः पञ्चदश इत्ययमनुवचने द्वितीयो मन्त्रः, उपधाने तुरीयः । व्योम सप्तदश इत्यनुवचने तृतीयो मन्त्रः, उपधाने तु द्वितीयः । एवं सर्वत्र वक्रत्वं द्रष्टव्यम् । तदानीं गूढचारी विभ्रान्तः । तन्मुखादनवगतशब्दा असुरा देवाननुगन्तुं नाशक्नुवन् । ततोऽसुराणां पराभवो देवानां जयश्चाऽऽसीत् । तस्माद्यजमानोऽपि तथैवोपदध्यात् । तदुपधानं भ्रातृव्याभिभूत्यै स्वस्य जयाय च संपद्यते ॥

(चतुर्थचितावक्ष्णयास्तोमीयाख्येष्टकासु कासांचिदभिधानम्)

अथ नवमं मन्त्रं विनियुङ्क्ते—

" संभरणस्त्रयोविꣳश इत्युत्तरतस्तस्मात्सव्यो हस्तयोः संभार्यतरः " [सं० का० ५ प्र० ३ अ० ३] इति ।

सम्यग्भरणीयं भिक्षापात्रादिकं येन वामहस्तेन सोऽयं संभार्यतरः[1] । यतः सोऽतिशयेन हस्तयोरुभयोर्मध्ये धार्यं धारयति ॥

अथ त्रयोदशं मन्त्रं विनियुङ्क्ते—

" क्रतुरेकत्रिꣳश इति पुरस्तादुप दधाति वाग्वै क्रतुर्यज्ञमुखं वाग्यज्ञमुखमेव पुरस्ताद्वि यातयति " [सं० का० ५ प्र० ३ अ० ३] इति ।

मन्त्रनिष्पाद्यत्वात्क्रतोर्वाङ्मूपत्वम् । सा च वाग्यज्ञस्य मुखं, प्रथमं मन्त्रमुच्चार्य पश्चादनुष्ठेयत्वात् ॥

अथ पञ्चदशं मन्त्रं विनियुङ्क्ते—

" ब्रध्नस्य विष्टपं चतुस्त्रिꣳश इति दक्षिणतोऽसौ वा आदित्यो ब्रध्नस्य विष्टपं ब्रह्मवर्चसमेव दक्षिणतो धत्ते तस्माद्दक्षिणोऽर्धो ब्रह्मवर्चसितरः " [सं० का० ५ प्र० ३ अ० ३] इति ।

यद्यप्यादित्य एव ब्रध्नो विष्टपं तु तस्य निवासस्थानं तथाऽप्यत्राभेद उपचर्यते । दक्षिणस्यां दिश्यादित्यसंबन्धिमन्त्रेणोपधानाद्दक्षिणहस्तो ब्रह्मवर्चसाधिकः[3] । दक्षिणहस्ते ब्रह्मवर्चसशब्दाभिधेयं यद्वैदिकहोमपूजादिकं धारयति तस्माद्दक्षिणभाग एवातिशयेन ब्रह्मवर्चसयुक्तः[4] । अत एवाऽऽशीर्वादादौ स एवं[5] हस्तः प्रसरति ॥

अथ चतुर्दशं मन्त्रं विनियुङ्क्ते—

" प्रतिष्ठा त्रयस्त्रिꣳश इति पश्चात्प्रतिष्ठित्यै " [सं० का० ५ प्र० ३ अ० ३ इति ।

मन्त्रगतेनैव प्रतिष्ठाशब्देन प्रतिष्ठा सूचिता ॥

अथ षोडशं मन्त्रं विनियुङ्क्ते—

" नाकः षट्त्रिꣳश इत्युत्तरतः सुवर्गो वै लोको नाकः सुवर्गस्य लोकस्य समष्ट्यै " [सं० का० ५ प्र० ३ अ० ३] इति ।

नाकशब्दार्थः प्रसिद्ध एव ॥

अत्र विनियोगसंग्रहः—

१ घ. ङ. °भार्यः । स चार्ति° । २ ख. च. °रः । स चार्ति° । ३ ख. च. °कः । यद्वै° । ४ घ. ङ. °क्तः । आशी° । ५ ख. च. °व प्रसक्तः । अ° ।

(अवशिष्टाक्ष्णयास्तोमीयाख्येष्टकाभिधानम्)

" आशुरष्टादशाऽऽदध्यादक्ष्णयास्तोमसंयुताः ॥१॥" इति ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे तृतीयप्रपाठकेऽष्टमोऽनुवाकः ॥ ८ ॥

(अथ चतुर्थाष्टके तृतीयप्रपाठके नवमोऽनुवाकः ।)

अग्नेर्भागोऽसि दीक्षाया आधिपत्यं ब्रह्म स्पृतं त्रिवृत्स्तोम इन्द्रस्य भागोऽसि विष्णोराधिपत्यं क्षत्रꣳ स्पृतं पञ्चदशः स्तोमो नृचक्षसां भागोऽसि धातुराधिपत्यं जनित्रꣳ स्पृतꣳ सप्तदशः स्तोमो मित्रस्य भागोऽसि वरुणस्याऽऽधिपत्यं दिवो वृष्टिर्वाताः स्पृता एकविꣳशः स्तोमोऽदित्यै भागोऽसि पूष्ण आधिपत्यमोजः स्पृतं त्रिणवः स्तोमो वसूनां भागोऽसि (१) रुद्राणामाधिपत्यं चतुष्पात्स्पृतं चतुर्विꣳशः स्तोमः आदित्यानां भागोऽसि मरुतामाधिपत्यं गर्भाः स्पृताः पञ्चविꣳशः स्तोमो देवस्य सवितुर्भागोऽसि बृहस्पतेराधिपत्यꣳ समीचीर्दिशः स्पृताश्चतुष्टोमः स्तोमो यावानां भागोऽस्ययावानामाधिपत्यं प्रजाः स्पृताश्चतुश्चत्वारिꣳशः स्तोमः ऋभूणां भागोऽसि विश्वेषां देवाना-

माधिपत्यं भूतं निशान्तꣳ स्तृतं त्रयस्त्रिꣳशः स्तोमः (२) ॥

(वसूनां भागोऽसि षट्चत्वारिꣳशच्च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके तृतीयप्रपाठके नवमोऽनुवाकः ॥ ९ ॥

(अथ चतुर्थाष्टके तृतीयप्रपाठके नवमोऽनुवाकः ।)

अग्नेः । भागः । असि । दीक्षायाः । आधिपत्यमित्याधि—पत्यम् । ब्रह्म । स्तृतम् । त्रिवृदिति त्रि—वृत् । स्तोमः । इन्द्रस्य । भागः । असि । विष्णोः । आधिपत्यमित्याधि—पत्यम् । क्षत्रम् । स्तृतम् । पञ्चदश इति पञ्च—दशः । स्तोमः । नृचक्षसामिति नृ—चक्षसाम् । भागः । असि । धातुः । आधिपत्यमित्याधि—पत्यम् । जनित्रम् । स्तृतम् । सप्तदश इति सप्त—दशः । स्तोमः । मित्रस्य । भागः । असि । वरुणस्य । आधिपत्यमित्याधि—पत्यम् । दिवः । वृष्टिः । वाताः । स्तृताः । एकविꣳश इत्येक—विꣳशः । स्तोमः । अदित्यै । भागः । असि । पूष्णः । आधिपत्यमित्याधि—पत्यम् । ओजः । स्तृतम् । त्रिणव इति त्रि—नवः । स्तोमः । वसूनाम् । भागः । असि (१) । रुद्राणाम् । आधिपत्यमित्याधि—पत्यम् । चतुष्पादिति चतुः—पात् । स्तृतम् । चतुर्विꣳश इति चतुः—विꣳशः । स्तोमः । आदित्यानाम् । भागः । असि । मरुताम् । आधिपत्यमित्याधि—पत्यम् । गर्भाः । स्तृताः । पञ्चविꣳश इति पञ्च—विꣳशः । स्तोमः । देवस्य । सवितुः । भागः । असि । बृहस्पतेः । आधिपत्यमित्याधि—पत्यम् । समीचीः । दिशः । स्तृताः । चतुष्टोम इति चतुः—स्तोमः । स्तोमः । यावानाम् । भागः । असि । अयावानाम् । आधिपत्यमित्याधि—पत्यम् । प्रजा इति प्र—जाः । स्तृताः । चतुश्चत्वारिꣳश इति चतुः—चत्वारिꣳशः । स्तोमः । ऋभूणाम् । भागः । असि । विश्वेषाम् । देवानाम् । आधिपत्यमित्याधि—पत्यम् । भूतम् । निशान्तमिति नि—शान्तम् । स्तृतम् । त्रयस्त्रिꣳश इति त्रयः—त्रिꣳशः । स्तोमः (२) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके तृतीयप्रपाठके नवमोऽनुवाकः ॥ ९ ॥

(अथ चतुर्थकाण्डे तृतीयप्रपाठके नवमोऽनुवाकः ।)

अष्टमेऽनुवाके काश्चिदक्ष्णयास्तोमीयाख्या इष्टका उक्ताः । अथ नवमेऽवशिष्टास्ता उच्यन्ते ।

(अथ चतुर्थाष्टके तृतीयप्रपाठके दशमोऽनुवाकः ।)

एकयाऽस्तुवत प्रजा अधीयन्त प्रजापतिरधिपतिरासीत्तिसृभिरस्तुवत ब्रह्मासृज्यत ब्रह्मणस्पतिरधिपतिरासीत्पञ्चभिरस्तुवत भूतान्यसृज्यन्त भूतानां पतिरधिपतिरासीत्सप्तभिरस्तुवत सप्तर्षयोऽसृज्यन्त धाताऽधिपतिरासीन्नवभिरस्तुवत पितरोऽसृज्यन्तादितिरधिपत्न्यासीदेकादशभिरस्तुवतर्तवोऽसृज्यन्ताऽर्तवोऽधिपतिरासीत्त्रयोदशभिरस्तुवत मासा असृज्यन्त संवत्सरोऽधिपतिः (१) आसीत्पञ्चदशभिरस्तुवत क्षत्रमसृज्यतेन्द्रोऽधिपतिरासीत्सप्तदशभिरस्तुवत पशवोऽसृज्यन्त बृहस्पतिरधिपतिरासीन्नवदशभिरस्तुवत शूद्रार्यावसृज्येतामहोरात्रे अधिपत्नी आस्तामेकविंशत्याऽस्तुवतैकशफाः पशवोऽसृज्यन्त वरुणोऽधिपतिरासीत्त्रयोविंशत्याऽस्तुवत क्षुद्राः पशवोऽसृज्यन्त पूषाऽधिपतिरासीत्पञ्चविंशत्याऽस्तुवताऽऽरण्याः पशवोऽसृज्यन्त वायुरधिपतिरासीत्सप्तविंशत्याऽस्तुवत द्यावापृथिवी वि (२) ऐतां वसवो रुद्रा आदित्या अनु व्यायन्तेषामाधिपत्यमासीन्नवविंशत्याऽस्तुवत वनस्पतयोऽसृज्यन्त सोमोऽधिपतिरासीदेकत्रिंशताऽस्तुवत प्रजा असृज्यन्त यावानां चायावानां चाऽऽधिपत्यमासीत्त्रयस्त्रिंशताऽस्तुवत भूतान्यशाम्यन्प्रजापतिः परमेष्ठ्यधिपतिरासीद् (३) ॥

(संवत्सरोऽधिपतिर्वि पञ्चत्रिंशत् ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके तृतीयप्रपाठके दशमोऽनुवाकः ॥ १० ॥

(अथ चतुर्थाष्टके तृतीयप्रपाठके दशमोऽनुवाकः ।)

एकया । अस्तुवत । प्रजा इति प्र—जाः । अधीयन्त । प्रजापतिरिति प्रजा—पतिः । अधिपतिरित्यधि—पतिः । आसीत् । तिसृभिरिति तिसृ—भिः । अस्तुवत । ब्रह्म । असृज्यत । ब्रह्मणः । पतिः । अधिपतिरित्यधि—पतिः । आसीत् । पञ्चभिरिति पञ्च—भिः । अस्तुवत । भूतानि । असृज्यन्त । भूतानाम् । पतिः । अधिपतिरित्यधि—पतिः । आसीत् । सप्तभिरिति सप्त—भिः । अस्तुवत । सप्तर्षय इति सप्त—ऋषयः । असृज्यन्त । धाता । अधिपतिरित्यधि—पतिः । आसीत् । नवभिरिति नव—भिः । अस्तुवत । पितरः । असृज्यन्त । अदितिः । अधिप-

त्नीत्यधिं—पत्नी । आसीत् । एकादशभिरित्येकादश—भिः । अस्तुवत । ऋतवः । असृज्यन्त । आर्तवः । अधिंपतिरित्यधिं—पतिः । आसीत् । त्रयोदशभिरितिं त्रयोदश—भिः । अस्तुवत । मासाः । असृज्यन्त । संवत्सर इतिं सं—वत्सरः । अधिंपतिरित्यधिं—पतिः (१) । आसीत् । पञ्चदशभिरितिं पञ्चदश—भिः । अस्तुवत । क्षत्रम् । असृज्यत । इन्द्रः । अधिंपतिरित्यधिं—पतिः । आसीत् । सप्तदशभिरितिं सप्तदश—भिः । अस्तुवत । पशवः । असृज्यन्त । बृहस्पतिः । अधिंपतिरित्यधिं—पतिः । आसीत् । नवदशभिरितिं नवदश—भिः । अस्तुवत । शूद्रार्याविंतिं शूद्र—अर्यौ । असृज्येताम् । अहोरात्रे इत्यहः—रात्रे । अधिंपत्नी इत्यधिं—पत्नी । आस्ताम् । एकंविंशत्येत्येकं—विंशत्या । अस्तुवत । एकंशफा इत्येकं—शफाः । पशवः । असृज्यन्त । वरुणः । अधिंपतिरित्यधिं—पतिः । आसीत् । त्रयोंविंशत्येतिं त्रयः—विंशत्या । अस्तुवत । क्षुद्राः । पशवः । असृज्यन्त । पूषा । अधिंपतिरित्यधिं—पतिः । आसीत् । पञ्चंविंशत्येतिं पञ्चं—विंशत्या । अस्तुवत । आरण्याः । पशवः । असृज्यन्त । वायुः ।

अधिंपतिरित्यधिं—पतिः । आसीत् । सप्तविंशत्येतिं सप्त—विंशत्या । अस्तुवत । द्यावापृथिवी इतिं द्यावा—पृथिवी । वीतिं (२) । एताम् । वसवः । रुद्राः । आदित्याः । अनुं । वीतिं । आयन् । तेषाम् । आधिंपत्यमित्याधिं—पत्यम् । आसीत् । नवंविंशत्येतिं नवं—विंशत्या । अस्तुवत । वनस्पतयः । असृज्यन्त । सोमः । अधिंपतिरित्यधिं—पतिः । आसीत् । एकंत्रिंशतेत्येकं—त्रिंशता । अस्तुवत । प्रजा इतिं प्र—जाः । असृज्यन्त । यावानाम् । च । अयावानाम् । च । आधिंपत्यमित्याधिं—पत्यम् । आसीत् । त्रयस्त्रिंशतेतिं त्रयः—त्रिंशता । अस्तुवत । भूतानिं । अशाम्यन् । प्रजापतिरितिं प्रजा—पतिः । परमेष्ठी । अधिंपतिरित्यधिं—पतिः । आसीत् (३) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके तृतीयप्रपाठके दशमोऽनुवाकः ॥ १० ॥

(अथ चतुर्थकाण्डे तृतीयप्रपाठके दशमोऽनुवाकः ।)

नवमेऽनुवाकेऽवशिष्टा अक्ष्णयास्तोमीया उक्ताः । अथ दशमे सृष्टिशब्दाभिधेया इष्टका उच्यन्ते ।

कल्पः—" एकयाऽस्तुवतेति सप्तदश सृष्टीः " इति ।

पाठस्तु—

एकयाऽस्तुवतेत्यादौ मन्त्रसंघे क्वचिन्नहि ।
सृष्टिशब्दस्तथाऽप्युक्तिः सृष्टिशब्देन भूमतः ॥

अग्निचयने श्रूयते—"सृष्टीरुपदधाति" इति । सृष्टिशब्दोपेता मन्त्रा यासामिष्टकानामुपधाने विद्यन्ते ता इष्टकाः सृष्ट्य इत्युच्यन्ते । सृष्टिमानासामुपधानो मन्त्र इति विगृह्य " तद्वानासामुपधानः " इत्यादिव्याकरणसूत्रसिद्धप्रक्रियया तन्निष्पादनात् । सृष्टिशब्दोपेताश्चोपधानमन्त्रा एकयाऽस्तुवतेत्यस्मिन्ननुवाके समाम्नाताः । ब्रह्मासृज्यत भूतान्यसृज्यन्तेत्यादिना सृजतिधातोस्तेषु मन्त्रेषु प्रयुक्तत्वात् । ते च मन्त्रा अत्र सृष्टिशब्देनोपधाने गुणत्वेन विधीयन्ते । कुतः । उपदधातीत्यनेनाऽऽख्यातेनाभिसंबन्धात् । न चार्थवादत्वमस्य संभवति, विध्यन्तरेण सहैकवाक्यत्वाभावादिति प्राप्ते ब्रूमः—अग्निचयनप्रकरणे पठितत्वात्तेषां मन्त्राणां सामान्यतश्चयनसंबन्धोऽवगम्यते । विशेषसंबन्धस्तु सृजतिलिङ्गादवगन्तव्यः । तथा सति प्राप्तत्वान्न ते मन्त्रा अत्र विधीयन्ते, किंतु तान्मन्त्राननूद्येष्टकोपधानं विधीयते । सृष्टिशब्देनानुवादस्तु वक्ष्यमाणार्थवादोपपत्त्यर्थः । " यथासृष्टमेवावरुन्धे " इति हि वक्ष्यमाणोऽर्थवादः । यदि विधिवाक्ये मन्त्राणामनुवादकः सृष्टिशब्दो न स्यात्, तदानीमर्थवादे सृष्टिशब्दप्रयोगाद्विध्यर्थवादयोर्वैयधिकरण्यभ्रमः स्यात् । तस्मान्मन्त्रानुवादी सृष्टिशब्दो न गुणविधायकः किंत्वर्थवादः । ननु प्रथममन्त्रे सृजतिधातुर्न प्रयुक्तः, " एकयाऽस्तुवत प्रजा अधीयन्त " इति पाठात् । बाढं, तथाऽपि द्वितीयतृतीयादिषु बहुषु मन्त्रेषु सृजतिधातुप्रयोगाद्भूमरूपं सादृश्यमस्ति । यत्र सर्वाणि वाक्यानि सृष्टिशब्दोपेतानि तत्र यथा सृष्टिभूमा तथाऽत्रापि भूमगुणयोगेन सृष्ट्यसृष्टिसंघे सृष्टिशब्दप्रयोगः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे तृतीयप्रपाठके
दशमोऽनुवाकः ॥ १० ॥

(अथ चतुर्थाष्टके तृतीयप्रपाठक एकादशोऽनुवाकः ।)

इयमेव सा या प्रथमा व्यौच्छदन्तरस्यां चरति प्रविष्टा । वधूर्जजान नवगज्जनित्री त्रय एनां महिमानः सचन्ते । छन्दस्वती उषसा

पेपिशाने समानं योनिमनु संचरन्ती । सूर्यपत्नी वि चरतः प्रजानती केतुं कृण्वाने अजरे भूरिरेतसा । ऋतस्य पन्थामनु तिस्र आऽगुस्त्रयो घर्मासो अनु ज्योतिषाऽगुः । प्रजामेका रक्षत्यूर्जमेका (१) व्रतमेका रक्षति देवयूनाम् । चतुष्टोमो अभवद्वा तुरीयो यज्ञस्य पक्षावृषयो भवन्ती । गायत्रीं त्रिष्टुभं जगतीमनुष्टुभं बृहदर्कं युञ्जानाः सुवराऽभरन्निदम् । पञ्चभिर्धाता वि दधाविदं यत्तासाꣳ स्वमूरजनयत्पञ्चपञ्च । तासामु यन्ति प्रयवेण पञ्च नानारूपाणि क्रतवो वसानाः । त्रिꣳशत्स्वसार उप यन्ति निष्कृतꣳ समानं केतुं प्रतिमुञ्चमानाः (२) । ऋतूꣳस्तन्वते कवयः प्रजानतीर्मध्ये छन्दसः परि यन्ति भास्वतीः । ज्योतिष्मती प्रति मुञ्चते नभो रात्री देवी सूर्यस्य व्रतानि । वि पश्यन्ति पशवो जायमाना नानारूपा मातुरस्या उपस्थे । एकाष्टका तपसा तप्यमाना जजान गर्भं महिमानमिन्द्रम् । तेन दस्यून्व्यसहन्त देवा हन्ताऽसुराणामभवच्छचीभिः । अनानुजामनुजां मामकर्त सत्यं वद-

न्त्यन्विच्छ एतत् । भूयासम् (३) अस्य सुमतौ यथा यूयमन्या वो अन्यामति मा प्र युक्त । अमून्मम सुमतौ विश्ववेदा आष्ट प्रतिष्ठामविंदद्धि गाधम् । भूयासमस्य सुमतौ यथा यूयमन्या वो अन्यामति मा प्र युक्त । पञ्च व्युष्टीरनु पञ्च दोहा गां पञ्चनाम्नीमृतवोऽनु पञ्च । पञ्च दिशः पञ्चदशेन क्लृप्ताः समानमूर्ध्नीरभि लोकमेकम् (४) । ऋतस्य गर्भः प्रथमा व्यूषुष्यपामेकां महिमानं बिभर्ति । सूर्यस्यैका चरति निष्कृतेषु घर्मस्यैका सवितैकां नि यच्छति । या प्रथमा व्यौच्छत्सा धेनुरभवद्यमे । सा नः पयस्वती दुक्ष्वोत्तरामुत्तराꣳ समाम् । शुक्रर्षभा नभसा ज्योतिषाऽगाद्विश्वरूपा शबलीरग्निकेतुः । समानमर्थꣳ स्वपस्यमाना बिभ्रती जरामजर उष आऽगाः । ऋतूनां पत्नी प्रथमेयमाऽगादह्नां नेत्री जनित्री प्रजानाम् । एका सती बहुधोषो व्युच्छस्यजीर्णा त्वं जरयसि सर्वमन्यत् (५) ॥

(ऊर्जमेका प्रतिमुञ्चमाना भूयासमेकं पत्न्येकान्नविꣳशतिश्च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके तृतीयप्रपाठक एकादशोऽनुवाकः ॥ ११ ॥

(अथ चतुर्थाष्टके तृतीयप्रपाठक एकादशोऽनुवाकः ।)

इयम् । एव । सा । या । प्रथमा । व्यौच्छदिति वि—औच्छत् । अन्तः । अस्याम् । चरति । प्रविष्टेति प्र—विष्टा । वधूः । जजान । नवगदिति नव—गत् । जनित्री । त्रयः । एनाम् । महिमानः । सचन्ते । छन्दस्वती इति । उषसा । पेपिशाने इति । समानम् । योनिम् । अन्विति । संचरन्ती इति सं—चरन्ती । सूर्यपत्नी इति सूर्य—पत्नी । वीति । चरतः । प्रजानती इति प्र—जानती । केतुम् । कृण्वाने इति । अजरे इति । भूरिरेतसेति भूरि—रेतसा । ऋतस्य । पन्थाम् । अन्विति । तिस्रः । एति । अगुः । त्रयः । घर्मासः । अन्विति । ज्योतिषा । एति । अगुः । प्रजामिति प्र—जाम् । एका । रक्षति । ऊर्जम् । एका (१) । व्रतम् । एका । रक्षति । देवयूनामिति देव—यूनाम् । चतुष्टोम इति चतुः—स्तोमः । अभवत् । या । तुरीया । यज्ञस्य । पक्षौ । ऋषयः । भवन्ती । गायत्रीम् । त्रिष्टुभम् । जगतीम् । अनुष्टुभमित्यनु—स्तुभम् । बृहत् । अर्कम् । युञ्जानाः । सुवः । एति । अभरन् । इदम् । पञ्चभिरिति पञ्च—भिः । धाता । वीति ।

द्यौ । इदम् । यत् । तासाम् । स्वमृः । अजनयत् । पञ्चपञ्चेति पञ्च—पञ्च । तासाम् । उ । यन्ति । प्रयवेणेति प्र—यवेन । पञ्च । नानां । रूपाणि । क्रतवः । वसानाः । त्रिंशत् । स्वसारः । उपेति । यन्ति । निष्कृतमिति निः—कृतम् । समानम् । केतुम् । प्रतिमुञ्चमाना इति प्रति—मुञ्चमानाः (२) । ऋतून् । तन्वते । कवयः । प्रजानतीरिति प्र—जानतीः । मध्येछन्दस इति मध्ये—छन्दसः । परीति । यन्ति । भास्वतीः । ज्योतिष्मती । प्रतीति । मुञ्चते । नभः । रात्री । देवी । सूर्यस्य । व्रतानि । वीति । पश्यन्ति । पशवः । जायमानाः । नानारूपा इति नाना—रूपाः । मातुः । अस्याः । उपस्थ इत्युप—स्थे । एकाष्टकेत्येक—अष्टका । तपसा । तप्यमाना । जजान । गर्भम् । महिमानम् । इन्द्रम् । तेन । दस्यून् । वीति । असहन्त । देवाः । हन्ता । असुराणाम् । अभवत् । शचीभिरिति शचि—भिः । अनानुजामित्यनानु—जाम् । अनुजामित्यनु—जाम् । माम् । अकर्त । सत्यम् । वदन्ती । अन्विति । इच्छे । एतत् । भूयासम् (३) । अस्य । सुमताविति सु—मतौ । यथा । यूयम् । अन्या । वः । अन्याम् ।

अतीति । मा । प्रेति । युक्त । अभूत् । मम । सुमताविति सु—मतौ । विश्ववेदा इति विश्व—वेदाः । आष्ट । प्रतिष्ठामिति प्रति—स्थाम् । अविंदत् । हि । गाधम् । भूयासम् । अस्य । सुमताविति सु—मतौ । यथा । यूयम् । अन्या । वः । अन्याम् । अतीति । मा । प्रेति । युक्त । पञ्च । व्युष्टीरिति वि—उष्टीः । अन्विति । पञ्च । दोहाः । गाम् । पञ्चनाम्नीमिति पञ्च—नाम्नीम् । ऋतवः । अन्विति । पञ्च । पञ्च । दिशः । पञ्चदशेनेति पञ्च—दशेन । कृष्णाः । समानमूर्ध्नीरिति समान—मूर्ध्नीः । अभीति । लोकम् । एकम् । (४) । ऋतस्य । गर्भः । प्रथमा । व्यूषुषीति वि—ऊषुषी । अपाम् । एका । महिमानम् । बिभर्ति । सूर्यस्य । एका । चरति । निष्कृतेष्विति निः—कृतेषु । घर्मस्य । एका । सविता । एकाम् । नीति । यच्छति । या । प्रथमा । व्यौच्छदिति वि—औच्छत् । सा । धेनुः । अभवत् । यमे । सा । नः । पयस्वती । दुहृव । उत्तरामुत्तरामित्युत्तराम्—उत्तराम् । समाम् । शुक्रर्षभेति शुक्र—ऋषभा । नभसा । ज्योतिषा । एति । अगात् । विश्वरूपेति विश्व—रूपा । शबलीः । अग्निकेतुरित्यग्नि—केतुः । समानम् ।

अर्धम् । स्वपस्यमानेति सु—अपस्यमाना । बिभ्र-
ती । जराम् । अजरे । उषः । एति । अगाः । ऋतू-
नाम् । पत्नी । प्रथमा । इयम् । एति । अगात् ।
अह्नाम् । नेत्री । जनित्री । प्रजानामिति प्र—
जानाम् । एका । सती । बहुधेति बहु—धा ।
उषः । वीति । उच्छसि । अजीर्णा । त्वम् । जरयसि ।
सर्वम् । अन्यत् (५) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके
तृतीयप्रपाठक एकादशोऽनुवाकः ॥ ११ ॥

(अथ चतुर्थकाण्डे तृतीयप्रपाठक एकादशोऽनुवाकः ।)

दशमेऽनुवाके सृष्टिनामिका इष्टका उक्ताः । अथैकादशे व्युष्टिनामिका उच्यन्ते ।

कल्पः—" इयमेव सा या प्रथमा व्यौच्छदिति षोडश व्युष्टीः " इति ।

तत्र प्रथमामाह—

इयमेव सा या प्रथमा व्यौच्छदन्तरस्यां
चरति प्रविष्टा । वधूर्जजान नवगज्ज-
नित्री त्रय एनां महिमानः सचन्ते । , इति ।

अत्रोपधीयमाना येष्टकाऽस्ति, इयमेव सा तथाविधव्युष्टिरूपा, तच्छब्देन परामृश्यमाना पुनर्विविच्यते । सेयं व्युष्टिरूपा कालानां प्रथमभूता सती व्यौच्छद्विशेषेण प्रकाशरूपाऽभूत् । आदिसृष्टिकाले प्रथमो यः प्रभातकालस्तद्रूपेयमिष्टकेत्यर्थः । सा सृष्टिकालीना प्रथमा व्युष्टिरादित्येनानुप्रविष्टा सती, अस्यां पृथिव्यां दैनंदिनप्रभातरूपेण चरति । तत्र दृष्टान्तः—वधूर्जजान नवगज्जनित्री, नवं वरं गच्छतीति नवगच्छूतनविवाहवती वधूर्जनित्री, उत्तरोत्तरप्रजोत्पादिका यथा जजान जाता तद्वदियमपि व्युष्टिरुत्तरोत्तरप्रभातनिष्पादिकेत्यर्थः ।

त्रयस्त्रिंसंख्याका महिमानो महिमोपेता अग्निसूर्यचन्द्ररूपा देवा एनां व्युष्टिं सचन्ते समवयन्ति । देवतात्रयप्रकाशकानुग्रहादस्याः प्रभातरूपत्वमित्यर्थः । एवंविधव्युष्टिरूपामिष्टकामुपदधामीत्यभिप्रायः ॥

अथ द्वितीयामाह—

छन्दस्वती उषसा पेपिशाने समानं योनिमनु
संचरन्ती । सूर्यपत्नी वि चरतः प्रजानती
केतुं कृण्वाने अजरे भूरिरेतसा । , इति ।

द्वे ह्युषसावेका सृष्टिकालीना प्रथमेति पूर्वमन्त्रोक्ता । अपरा प्रतिदिनसंचारिणी । साऽप्यस्यां चरति प्रविष्टेति पूर्वमन्त्रोक्ता । एवं सत्युषसा विचरतो द्वे अप्युषसौ विविधं चरतः । रात्राविव प्रलयकाले तिरोहितजगत आविर्भावलक्षणसृष्टिरूपा सती दिवससादृश्यमापादयति । तदिदमेकस्या व्युष्ट्याश्चरणं, शार्वरतमोनिवर्तकत्वमपरस्याश्चरणम् । कीदृश्यावुषसौ, छन्दस्वती छन्दोयुक्तैर्मन्त्रैः स्तूयमानतया छन्दस्वत्यौ, पेपिशाने भृशं प्रकाशयन्त्यौ, समानं योनिमनु संचरन्ती, उभयोः कालविशेषत्वात्कालसामान्यमेव तयोर्योनिर्हेतुः । स चोभयोः समानः, महाप्रभातं सृष्टिरूपमल्पप्रभातं दैनंदिनं चेत्युभौ कालविशेषौ, तौ च स्वकीयं कालसामान्यमनुसृत्य वर्तेते इत्यनुसंचरन्त्यावुषसौ । ते च सूर्यपत्नी सूर्यस्य जाये, प्रजानती स्वयं देवतारूपत्वेन प्रज्ञानवत्यौ, केतुं कृण्वाने ज्ञानं कुर्वत्यौ प्रकाशप्रदानेन हि प्राणिनां रूपज्ञानं जनयन्त्यौ, अजरे कदाचिदपि जरारहिते, भूरिरेतसा प्रभूतरेतस्के बहुव्यापारकारणभूते इत्यर्थः ॥

अथ तृतीयामाह—

ऋतस्य पन्थामनु तिस्र आऽगुस्त्रयो घर्मासो
अनु ज्योतिषाऽगुः । प्रजामेका रक्षत्यू-
र्जमेका व्रतमेका रक्षति देवयूनाम् । , इति ।

तिस्र उषस ऋतस्य यज्ञस्य पन्थां मार्गमन्वागुरनुप्राप्ता यज्ञरक्षकत्वेन व्यक्ता व्यवस्थिता इत्यर्थः । त्रयो घर्मासो दीप्तिरूपा अग्निचन्द्रादित्या ज्योतिषा प्रकाशप्रदानेन यज्ञमार्गमन्वागुरनुप्राप्ताः । तिसृणामुषसां देवीनां मध्ये यजमानस्य प्रजामेका रक्षति । यजमानस्योर्जं बलमेका रक्षति । देवयूनां देवानात्मन इच्छतां यजमानानां व्रतं कर्मानुष्ठानमेका रक्षति ॥

अथ चतुर्थीमाह—

(व्युष्टिनामकेष्टकाभिधानम्)

या प्रथमा व्यौच्छत्सा धेनुरभवद्यमे । सा
नः पयस्वती दुक्ष्वोत्तरामुत्तराꣳ समाम्।, इति ।

मुख्यासु पञ्चसूषःसु या प्रथमोषा व्यौच्छत्तमो व्यवासयत्प्रकाशोत्पादनेन तमो निराकरोदित्यर्थः । सा तादृगुषा यमे धेनुरभवद्यमस्वामिके लोके प्रकाशप्रदानेन धेनुवत्प्रीतिहेतुरभवत् । तथाविधे हे उषः सा त्वं पयस्वती वृष्टयुदकयुक्ता सती नोऽस्मदर्थमुत्तरामुत्तरां समामुत्तरोत्तरेषु सर्वेष्वपि संवत्सरेषु निरन्तरं दुक्ष्व दोहनं कुरु । यथा धेनुः क्षीरं प्रयच्छति तथा त्वं व्युष्टिं प्रकाशं च प्रयच्छेत्यर्थः ॥

अथ चतुर्दशीमाह—

शुक्रर्षभा नभसा ज्योतिषाऽगाद्विश्वरूपा
शबलीरग्निकेतुः । समानमर्थꣳ स्वपस्यमाना
बिभ्रती जरामजर उष आऽगाः ।, इति ।

येयमुषाः शुक्रर्षभा शुक्रेषु प्रकाशरूपेषु नक्षत्रादिषु मध्ये श्रेष्ठा सेयमुषा नभसा ज्योतिषाऽऽकाशवर्तिप्रकाशेन युक्ता सत्यागादिह समागता । कीदृशी, विश्वरूपा सर्वाणि रूपाणि प्रकाश्यानि यस्याः सा विश्वरूपा, शबलीः सूर्योदयात्पूर्वमन्धकारलेशानुवृत्तेर्मिश्रवर्णा, अग्निकेतुरग्निहोत्रिभिरुषःकाले विहृत्य प्रज्वालिता येऽग्नयस्त एव केतवो ध्वजस्थानीया यस्याः साऽग्निकेतुः, समानमर्थं बिभ्रती सूर्यस्य यत्प्रयोजनमन्धकारनिवारणरूपं तदेवोषसोऽपि प्रयोजनमतः सूर्येण सह समानप्रयोजना,स्वपस्यमाना शोभनान्यपांसि कर्माणि तान्यात्मन इच्छतीति स्वपस्यमाना । हेऽजर उषस्त्वं जरामागा वलीपलितादिरूपजरारहिताऽपि सृष्ट्यादिमारभ्य प्रवृत्तत्वाच्चिरकालावस्थानलक्षणां जरां प्राप्ताऽसि । तादृगुषारूपेयमिष्टकेत्यर्थः ॥

अथ पञ्चदशीमाह—

ऋतूनां पत्नी प्रथमेयमाऽगादह्नां नेत्री
जनित्री प्रजानाम् । एका सती बहुधोषो
व्युच्छस्यजीर्णा त्वं जरयासि सर्वमन्यत्॥, इति॥

इयं प्रथमोषा आगादिह कर्मण्यायाता । कीदृशी, ऋतूनां वसन्तादीनां पत्नी पालयित्री, उषःकालस्यासकृदावृत्त्या ह्यृतवः संपद्यन्ते । अह्नां नेत्री

१ ख. 'ती व्युष्टयु' ।

(पञ्चम्यां चितावसपत्नादीष्टकाभिधानम्)

नयनस्य हेतुः प्रकाशप्रदानेन निष्पादिकेत्यर्थः । प्रजानां जनित्र्युत्पादयित्री । उषःकालावृत्त्या नवमासगर्भधारणादिना प्रजोत्पद्यते । हे उषस्त्वं स्वरूपेणैका सती बहुधा दिनभेदेन बहुप्रकारा भूत्वा व्युच्छासि तमो विवासयसि निष्कासयसीत्यर्थः । ईदृशी त्वमजीर्णा वलीपलितादिजरारहिता सर्वमन्यन्मनुष्यशरीरादिकं जरयसि जीर्णं करोषि । इत्थं पञ्चदशाऽऽम्नाताः । षोडशी त्वन्यत्र द्रष्टव्या ॥

एतैर्मन्त्रैः साध्यमुपधानं विधत्ते—

"न वा इदं दिवा न नक्तमासीदव्यावृत्तं ते देवा एता व्युष्टीरपश्यन्ता उपादधत ततो वा इदं व्यौच्छद्यस्यैता उपधीयन्ते व्येवास्मा उच्छत्यथो तम एवापहते " [सं० का० ५ प्र० ३ अ० ४] इति ।

इदं कालस्वरूपं दिवारात्र्योर्व्यावर्तिकयोषसा रहितत्वादव्यावृत्तमासीत् । तथा सति दिवाऽपि नाऽऽसीन्नक्तमपि नाऽऽसीत् । व्यावृत्तस्वरूपस्य निश्चेतुमशक्यत्वात् । तदानीं देवा व्यावृत्तिकारिणीर्व्युष्टिसंज्ञका एता इष्टका अपश्यन् । विशेषेणोच्छति तमो विनाशयतीति व्युष्टिरुषःकालस्तद्वाचकशब्देनोपेतैर्मन्त्रैरुपधेया इष्टका व्युष्टयः । ता दृष्ट्वोपादधत । तत ऊर्ध्वमिदं कालस्वरूपं व्यौच्छद्यावर्तिकया व्युष्ट्या दिवानक्तभेदेन व्यावृत्तमासीत् । तस्माद्व्युष्टीरुपदध्यात् । तदुपधाने हि यजमानार्थं व्युच्छत्येव परलोकापरलोकप्रकाशं करोत्येव । अपि च बुद्धिगतभ्रान्तिरूपं तमो विनाशयति ॥

अत्र विनियोगसंग्रहः—

इयं व्युष्टीरुपादध्यान्मन्त्राः पञ्चदशेरिताः ॥ १ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे तृतीयप्रपाठक
एकादशोऽनुवाकः ॥ ११ ॥

(अथ चतुर्थाष्टके तृतीयप्रपाठके द्वादशोऽनुवाकः ।)

अग्ने जातान्प्र णुदा नः सपत्नान्प्रत्यजातां-
ञ्जातवेदो नुदस्व । अस्मे दीदिहि सुमना
अहेडन्तवं स्याꣳ शर्मन्त्रिवरूथ उद्भित् । सहसा

१ क. ख. च. कीदृशी ।

जातान्प्र णुंदा नः सपत्नान्प्रत्यजांताञ्जातवेदो नुदस्व । अधि नो ब्रूहि सुमनस्यमांनो वयꣳ स्यांम प्र णुंदा नः सपत्नान् । चतुश्चत्वारिꣳशः स्तोमो वर्चो द्रविंणꣳ षोडशः स्तोम ओजो द्रविंणं पृथिव्याः पुरीषमसि (१) अप्सो नामं । एवश्छन्दो वरिंवश्छन्दः शम्भूश्छन्दः परिभूश्छन्द आच्छच्छन्दो मनश्छन्दो व्यच-श्छन्दः सिन्धुश्छन्दः समुद्रं छन्दः सलिलं छन्दः संयच्छन्दो वियच्छन्दो बृहच्छन्दो रथंतरं छन्दो निकायश्छन्दो विवधश्छन्दो गिरश्छन्दो भ्रजश्छन्दः सष्टुप्छन्दोऽनुष्टुप्छन्दः ककुच्छन्द-स्त्रिककुच्छन्दः काव्यं छन्दोऽङ्कुपं छन्दः (२) पदपंङ्क्तिश्छन्दोऽक्षरपङ्क्तिश्छन्दो विष्टारपंङ्क्तिश्छन्दः क्षुरो भृज्वान्छन्दः प्रच्छच्छन्दः पक्ष-श्छन्द एवश्छन्दो वरिंवश्छन्दो वयश्छन्दो वय-स्कृच्छन्दो विशालं छन्दो विष्पर्धाश्छन्दश्छ-दिश्छन्दो दूरोहणं छन्दस्तन्द्रं छन्दोऽङ्काङ्कं छन्दः (३) ॥

(अस्यङ्कुपं छन्दस्त्रयस्त्रिꣳशच्च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके तृतीयप्रपाठके द्वादशोऽनुवाकः ॥ १२ ॥

(अथ चतुर्थाष्टके तृतीयप्रपाठके द्वादशोऽनुवाकः ।)

अग्ने । जातान् । प्रेतिं । नुद । नः । सपत्नान् । प्रतीतिं । अजांतान् । जातवेद इतिं जात—वेदः । नुदस्व । अस्मे इतिं । दीदिहि । सुमना इतिं सु—मनाः । अहेडन् । तव । स्याम् । शर्मन् । त्रिव-रूथ इतिं त्रि—वरूथः । उद्भिदित्युत्—भित् । सहसा । जातान् । प्रेतिं । नुद । नः । सपत्नान् । प्रतीतिं । अजांतान् । जातवेद इतिं जात—वेदः । नुदस्व । अधीतिं । नः । ब्रूहि । सुमनस्यमान इतिं सु—मनस्यमानः । वयम् । स्याम । प्रेतिं । नुद । नः । सपत्नान् । चतुश्चत्वारिꣳश इतिं चतुः—चत्वा-रिꣳशः । स्तोमः । वर्चः । द्रविंणम् । षोडशः । स्तोमः । ओजः । द्रविंणम् । पृथिव्याः । पुरीषम् । असि (१) । अप्सः । नामं । एवः । छन्दः । वरिंवः । छन्दः । शंभूरितिं शं—भूः । छन्दः । परि-भूरितिं परि—भूः । छन्दः । आच्छत् । छन्दः । मनः । छन्दः । व्यचः । छन्दः । सिन्धुः । छन्दः । समुद्रम् । छन्दः । सलिलम् । छन्दः । संयदितिं सं—यत् । छन्दः । वियदितिं वि—यत् । छन्दः । बृहत् । छन्दः । रथंतरमितिं रथं—तरम् । छन्दः ।

निकाय इति नि—कायः । छन्दः । विवध इति वि—वधः । छन्दः । गिरः । छन्दः । भ्रजः । छन्दः । सष्टुबिति स—स्तुप् । छन्दः । अनुष्टुबित्यनु—स्तुप् । छन्दः । ककुत् । छन्दः । त्रिककुदिति त्रि—ककुत् । छन्दः । काव्यम् । छन्दः । अङ्कुपम् । छन्दः (२) । पदपंङ्क्तिरिति पद—पङ्क्तिः । छन्दः । अक्षरपङ्क्तिरित्यक्षर—पङ्क्तिः । छन्दः । विष्टारपंङ्क्तिरिति विष्टार—पङ्क्तिः । छन्दः । क्षुरः । भृज्वान् । छन्दः । प्रच्छत् । छन्दः । पक्षः । छन्दः । एवः । छन्दः । वरिवः । छन्दः । वयः । छन्दः । वयस्कृदिति वयः—कृत् । छन्दः । विशालमिति वि—शालम् । छन्दः । विष्पर्धा इति वि—स्पर्धाः । छन्दः । छदिः । छन्दः । दूरोहणमिति दुः—रोहणम् । छन्दः । तन्द्रम् । छन्दः । अङ्काङ्कम् । छन्दः (३) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके तृतीयप्रपाठके द्वादशोऽनुवाकः ॥ १२ ॥

(अथ चतुर्थकाण्डे तृतीयप्रपाठके द्वादशोऽनुवाकः ।)

एकादशेऽनुवाके व्युष्ट्याख्या इष्टका उक्ताः । तावता चतुर्थचितिः समाप्ता । अथ द्वादशे पञ्चम्यां चितावसपत्नाद्या इष्टका उच्यन्ते ॥

कल्पः—" श्वोभूते पौर्वाह्णिकीभ्यां प्रचर्य पञ्चमीं चितिं चिनोत्यग्ने जातान्प्र णुदा नः सपत्नानिति पुरस्तादुपदधाति " इति ।

पाठस्तु—

अग्ने जातान्प्र णुदा नः सपत्नान्प्रत्यजातान्जातवेदो नुदस्व । अस्मे दीदिहि सुमना अहेडन्तव स्याꣳ शर्मन्त्रिवरूथ उद्भित् । , इति ।

हेऽग्ने नोऽस्माकं जातान्सपत्नान्ये पूर्वमुत्पन्नाः शत्रवस्तान्प्रणुद प्रकर्षेण नाशय । हे जातवेदो ये पूर्वमनुत्पन्ना इतः परमुत्पत्तिप्रसक्तियुक्तास्तानजातान्छत्रून्प्रति नुदस्वोत्पत्तिप्रतिबन्धेन निराकुरु । सुमनाः सानुग्रहचित्तस्त्वमहेडन्नकुध्यंस्त्रिवरूथः प्राग्वंशसदोहविर्धानरूपगृहत्रयोपेत उद्भिदनुष्ठेयकर्मोत्पादकः सन्नस्मे दीदिहि अस्मान्प्रकाशय । तव प्रसादाच्छर्मन्स्यां सुखवान्भवेयम् ॥

एतन्मन्त्रसाध्यमुपधानं विधत्ते—

"अग्ने जातान्प्र णुदा नः सपत्नानिति पुरस्तादुप दधाति जातानेव भ्रातृव्यान्प्र णुदते " [सं० का० ५ प्र० ३ अ० ५] इति ॥

कल्पः—" सहसा जातानिति पश्चात् " इति ।

पाठस्तु—

सहसा जातान्प्र णुदा नः सपत्नान्प्रत्यजातान्जातवेदो नुदस्व । अधि नो ब्रूहि सुमनस्यमानो वयꣳ स्याम प्र णुदा नः सपत्नान् ।,इति ।

सहसा बलेन जातानिति पूर्ववत् । सुमनस्यमानः सौमनस्यं प्राप्तः सन्नोऽस्मानधिब्रूहि । वयमपि त्वदनुग्रहादधिकाः स्याम । नोऽस्मदीयान्सपत्नाञ्छत्रून्प्रणुद ॥

एतन्मन्त्रसाध्यमुपधानं विधत्ते—

" सहसा जातानिति पश्चाज्जनिष्यमाणानेव प्रति नुदते " [सं० का० ५ प्र० ३ अ० ५] इति ।

पश्चादुपदधातीत्यनुवर्तते । पूर्वमन्त्र उत्पन्नविनाशनप्राधान्यमिह तूत्पत्स्यमानप्रतिबन्धप्राधान्यम् । अनेनाभिप्रायेणोभयत्रैवकारप्रयोगः ॥

कल्पः—" चतुश्चत्वारिꣳशः स्तोम इति दक्षिणतः " इति ।

पाठस्तु—

चतुश्चत्वारिꣳशः स्तोमो वर्चो द्रविणम् , इति ।

योऽयं स्तोमश्चतुश्चत्वारिंशदावृत्त्या संपन्नो यच्च वर्चो बलरूपं धनं हे इष्टके तदुभयरूपा त्वमसि ॥

एतन्मन्त्रसाध्यमुपधानं विधत्ते—

" पशुर्वा एष यदग्निर्विराज उत्तमायां चित्यामुप दधाति विराजमेवोत्तमां पशुषु दधाति तस्मात्पशुमानुत्तमां वाचं वदति " [सं० का० ५ प्र० ३ अ० ५] इति ।

पशुप्राप्तिहेतुत्वादग्नेः पशुत्वम् । अतः पशुषूत्तमां विराजं क्षीरदध्यादिरूपमन्नं स्थापयितुमस्मिन्पशुरूपेऽग्नावुत्तमायां पञ्चम्यां चितौ विराडाख्या इष्टका उपदध्यात् । विराडूपत्वं तु वक्ष्यमाणदशसंख्यया संपद्यते । यस्मात्पशुरूपेऽग्नावन्नरूपं विराजमुपदधाति तस्माल्लोकेऽपि बहुपशुयुक्तः पुरुषः समागतानतिथीन्प्रत्युत्तमां वाचं वदति—श्रान्ता यूयं मद्गृहे समागच्छत भुज्यतामिति । सेयमुत्तमा वाक् ॥

एकैकस्यां दिशीष्टकासंख्यां विधत्ते—

" दशदशोप दधाति सवीर्यत्वाय " [सं०का०५प्र०३ अ० ५] इति । सवीर्यत्वं दार्ढ्योपेतत्वं, तच्च बहुभिरिष्टकाभिः संपद्यते ॥

सम्यक्पङ्क्तिरूपत्वं वारयितुं वक्रत्वं विधत्ते—

" अक्ष्णयोप दधाति तस्मादक्ष्णया पशवोऽङ्गानि प्र हरन्ति प्रतिष्ठित्यै " [सं० का० ५ प्र० ३ अ० ५] इति ॥

उक्ता विराजः प्रशंसति—

" यानि वै छन्दाꣳसि सुवर्ग्याण्यासन्तैर्देवाः सुवर्गं लोकमायन्तेनर्षयोऽश्राम्यन्ते तपोऽतप्यन्त तानि तपसाऽपश्यन्तेभ्य एता इष्टका निरमिमतेवश्छन्दो वरिवश्छन्द इति ता उपादधत ताभिर्वै ते सुवर्गं लोकमायन्यदेता इष्टका उपदधाति यान्येव छन्दाꣳसि सुवर्ग्याणि तैरेव यजमानः सुवर्गं लोकमेति " [सं० का० ५ प्र० ३ अ० ५] इति ।

स्वर्गमर्हन्तीति सुवर्ग्याणि । तादृशानि यान्याम्नातानि च्छन्दांसि स्वर्गलोके स्थितानि तैश्छन्दोभिर्देवाः स्वर्गं प्राप्ताः । तत्पाठस्तेषां स्वर्गप्राप्तिसाधनम् । ऋषयश्च तेन स्वर्गप्राप्तिनिमित्तेनाश्राम्यन्नुपायमन्विष्यालभमानाः खिन्ना आसन् । ते पुनर्विचार्य स्वर्गप्राप्त्यर्थं तपः कृतवन्तः । ततोऽनुष्ठितेन तपसा तानि च्छन्दांसि स्वर्गसाधनान्यपश्यन् । तेभ्यश्छन्दोभ्य एता विराडाख्या इष्टका निर्मितवन्तः । निर्माय चैवश्छन्दो वरिवश्छन्द इति मन्त्रैस्ता विराज उपादधत । ततस्ताभिरिष्टकाभिस्त ऋषयः स्वर्गं प्राप्ताः । अतो यजमानोऽपि तदुपधानेन सुवर्ग्यैस्तैश्छन्दोभिः स्वर्गं प्राप्नोत्येव ॥

अत्र विनियोगसंग्रहः—

" पञ्चम्यां तु चितावग्ने ह्यसपत्नास्तु पञ्च च ।
एवश्चत्वारिंशदुक्ता विराजो दिक्षु वक्रगाः ॥ १ ॥ " इति ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे तृतीयप्रपाठके द्वादशोऽनुवाकः ॥ १२ ॥

(अथ चतुर्थाष्टके तृतीयप्रपाठके त्रयोदशोऽनुवाकः ।)

अग्निर्वृत्राणि जङ्घनद्द्रविणस्युर्विपन्यया ।
समिद्धः शुक्र आहुतः । त्वꣳ सोमासि सत्पतिस्त्वꣳ राजोत वृत्रहा । त्वं भद्रो असि क्रतुः । भद्रा ते अग्ने स्वनीक संदृग्घोरस्य सतो विषुणस्य चारुः । न यत्ते शोचिस्तमसा वरन्त न ध्वस्मानस्तनुवि रेप आ धुः । भद्रं ते अग्ने सहसिन्ननीकमुपाक आ रोचते सूर्यस्य (१) । रुशद्दृशे ददृशे नक्तया चिदरूक्षितं दृश आ रूपे अन्नम् । सैनाऽनीकेन सुविदत्रो अस्मे यष्टा देवाꣳ आयजिष्ठः स्वस्ति । अदब्धो गोपा उत नः परस्पा अग्ने द्युमदुत रेवदिदीहि । स्वस्ति नो दिवो अग्ने पृथिव्या विश्वायुर्धेहि यजथाय देव । यत्सीमहि दिविजात

---

१ क. घ. ङ. °क्षु ताः स्थिताः ' इ° ।

प्रशस्तं तदस्मासु द्रविणं धेहि चित्रम् । यथा होतर्मनुषः (२) देवताता यज्ञेभिः सूनो सहसो यजासि । एवा नो अद्य समना समानानुशन्नग्न उशतो यक्षि देवान् । अग्निमीडे पुरोहितं यज्ञस्य देवमृत्विजम् । होतारꣳ रत्नधातमम् । वृषा सोम द्युमाꣳ असि वृषा देव वृषव्रतः । वृषा धर्माणि दधिषे । सांतपना इदꣳ हविर्मरुतस्तज्जुजुष्टन । युष्माकोती रिशादसः । यो नो मर्तो वसवो दुर्हणायुस्तिरः सत्यानि मरुतः (३) जिघांसात् । दुहः पाशं प्रति स मुचीष्ट तपिष्ठेन तपसा हन्तना तम् । संवत्सरीणां मरुतः स्वर्का उरुक्षयाः सगणा मानुषेषु । तेऽस्मत्पाशान्प्र मुञ्चन्त्वꣳहसः सांतपना मादयिष्णवः । पिप्रीहि देवाꣳ उशतो यविष्ठ विद्वाꣳ ऋतूꣳरृतुपते यजेह । ये दैव्या ऋत्विजस्तेभिरग्ने त्वꣳ होतॄणामस्यायजिष्ठः । अग्ने यदद्य विशो अध्वरस्य होतः पावक (४) शोचे वेष्टꣳ हि यज्वा । ऋता यजासि महिना वि यदभूर्हव्या वह यविष्ठ या ते अद्य । अग्निना

रयिमश्नवत्पोषमेव दिवेदिवे । यशसं वीरवत्तमम् । गयस्फानो अमीवहा वसुवित्पुष्टिवर्धनः । सुमित्रः सोम नो भव । गृहमेधास आ गत मरुतो माऽप भूतन । प्रमुञ्चन्तो नो अꣳहसः । पूर्वीभिर्हि ददाशिम शरद्भिर्मरुतो वयम् । महोभिः (५) चर्षणीनाम् । प्र बुध्रिया ईरते वो महाꣳसि प्र णामानि प्रयज्यवस्तिरध्वम् । सहस्रियं दम्यं भागमेतं गृहमेधीयं मरुतो जुषध्वम् । उप यमेति युवतिः सुदक्षं दोषा वस्तोर्हविष्मती घृताची । उप स्वैनमरमतिर्वसूयुः । इमो अग्ने वीततमानि हव्याऽजस्रो वक्षि देवतातिमच्छ । प्रति न ईꣳ सुरभीणि वियन्तु । क्रीडं वः शर्धो मारुतमनर्वाणꣳ रथेशुभम् (६) । कण्वा अभि प्र गायत । अत्यासो न ये मरुतः स्वञ्चो यक्षदृशो न शुभयन्त मर्याः । ते हर्म्येष्ठाः शिशवो न शुभ्रा वत्सासो न प्रक्रीडिनः पयोधाः । प्रैषामज्मेषु विथुरेव रेजते भूमिर्यामेषु यद्ध युञ्जते शुभे । ते क्रीडयो धुनयो भ्राजदृष्टयः स्वयं महित्वं पनयन्त

धूतयः । उपह्वरेषु यदचिध्वं यायिं वयं इव मरुतः केन (७) चित्पथा । श्वोतन्ति कोशा उप वो रथेष्वा घृतमुक्षता मधुवर्ण-मर्चते । अग्निमग्निꣳ हवीमभिः सदा हवन्त विश्पतिम् । हव्यवाहं पुरुप्रियम् । तꣳ हि शश्वन्त ईडते स्रुचा देवं घृतश्चुता । अग्निꣳ हव्याय वोळ्हवे । इन्द्राग्नी रोचना दिवः श्रथ-द्वृत्रमिन्द्रं वो विश्वतस्परीन्द्रं नरो विश्वक-र्मन्हविषा वावृधानो विश्वकर्मन्हविषा वर्ध-नेन (८) ॥

(सूर्यस्य मनुषो मरुतः पावक महोभी रथेशुभं केन षट्चत्वारिꣳशच्च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके तृतीयप्रपाठके त्रयोदशोऽनुवाकः ॥ १३ ॥

अपां त्वेमन्नयं पुरः प्राचीर्धुवक्षितिरुषाविरिन्द्राग्नी मा छन्द आशुश्चिद्वदग्ने-र्भागोऽस्येकयेयमेव सा याऽग्नेऽ जातानग्निर्वृत्राणि जङ्घनत्रयोदश ॥ १३ ॥

अपां त्वेन्द्राग्नी इयमेव सा देवतांता षट्त्रिꣳशत् ॥ ३६ ॥

हरिः ॐ ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके तृतीयः प्रपाठकः ॥ ३ ॥

(अथ चतुर्थाष्टके तृतीयप्रपाठके त्रयोदशोऽनुवाकः ।)

अग्निः । वृत्राणि । जङ्घनत् । द्रविणस्युः । विपन्ययेति वि—पन्ययां । समिद्ध इति सम्—इद्धः । शुक्रः । आहुत इत्या—हुतः । त्वम् । सोम । असि । सत्पतिरिति सत्—पतिः । त्वम् । राजा । उत । वृत्रहेति वृत्र—हा । त्वम् । भद्रः । असि । क्रतुः । भद्रा । ते । अग्ने । स्वनीकेति सु—अनीक । संदृगिति सं—दृक् । घोरस्य । सतः । विषुणस्य । चारुः । न । यत् । ते । शोचिः । तमसा । वरन्त । न । ध्व-स्मानः । तनुवि । रेपः । एति । धुः । भद्रम् । ते । अग्ने । सहसिन् । अनीकम् । उपाके । एति । रोचते । सूर्यस्य (१) । रुशत् । दृशे । ददृशे । नक्तया । चित् । अरूक्षितम् । दृशे । एति । रूपे । अन्नम् । सः । एना । अनीकेन । सुविदत्र इति सु—विदत्रः । अस्मे इति । यष्टा । देवान् । आयं-जिष्ठ इत्या—यजिष्ठः । स्वस्ति । अदब्धः । गोपा इति गो—पाः । उत । नः । परस्पा इति परः—पाः । अग्ने । द्युमदिति द्यु—मत् । उत । रेवत् । दिदीहि । स्वस्ति । नः । दिवः । अग्ने । पृथिव्याः । विश्वायुरिति विश्व—आयुः । धेहि । यजथाय । देव ।

यत् । सीमहि । दिविजातेतिं दिवि—जात । प्रशस्तमिति प्र—शस्तम् । तत् । अस्मासुं । द्रविणम् । धेहि । चित्रम् । यथा । होतः । मनुषः(२)। देवतातेतिं देव—ताता । यज्ञेभिः । सूनो इतिं । सहसः । यजासि । एवा । नः । अद्य । समना । समानान् । उशन् । अग्ने । उशतः । यक्षि । देवान् । अग्निम् । ईडे । पुरोहितमितिं पुरः—हितम् । यज्ञस्य । देवम् । ऋत्विजम् । होतारम् । रत्नधातममितिं रत्न—धातमम् । वृषा । सोम । द्युमानितिं द्यु—मान् । असि । वृषा । देव । वृषव्रत इति वृष—व्रतः । वृषा । धर्माणि । दधिषे । सांतपना इति सां—तपनाः । इदम् । हविः । मरुतः । तत् । जुजुष्टन । युष्माकं । ऊतीं । रिशादस इतिं रिश—अदसः । यः । नः । मर्तः । वसवः । दुर्हृणायुरितिं दुः—हृणायुः । तिरः । सत्यानिं । मरुतः (३) । जिघांसात् । द्रुहः । पाशम् । प्रतीतिं । सः । मुचीष्ट । तपिष्ठेन । तपसा । हन्तन । तम् । संवत्सरीणा इतिं सं—वत्सरीणाः । मरुतः । स्वर्का इतिं सु—अर्काः । उरुक्षया इत्युरु—क्षयाः । सगंणा इति स—गणाः । मानुषेषु । ते । अस्मत् । पाशान् । प्रेतिं । मुञ्चन्तु । अꣳहसः । सांतपना इतिं सां—

तपनाः । मदिराः । मादयिष्णवः । पिप्रीहि । देवान् । उशतः।यविष्ठ । विद्वान् । ऋतून् । ऋतुपत इत्यृतु—पते। यज । इह । ये । दैव्याः । ऋत्विजः । तेभिः । अग्ने । त्वम् । होतॄणाम् । असि । आर्यजिष्ठ इत्या—यजिष्ठः। अग्ने । यत् । अद्य । विशः । अध्वरस्य । होतः । पावक (४) । शोचे । वेः । त्वम् । हि । यज्वा । ऋता । यजासि । महिना । वीतिं । यत् । भूः । हव्या । वह । यविष्ठ । या । ते । अद्य । अग्निना । रयिम् । अश्नवत् । पोषम् । एव । दिवेदिव इतिं दिवे—दिवे । यशसम् । वीरवत्तममितिं वीरवत्—तमम् । गयस्फान इतिं गय—स्फानः । अमीवहेत्यमीव—हा । वसुविदितिं वसु—वित् । पुष्टिवर्धन इतिं पुष्टि—वर्धनः । सुमित्र इतिं सु—मित्रः । सोम । नः । भव । गृहमेधास इति गृह—मेधासः । एतिं । गत । मरुतः । मा । अपेतिं । भूतन । प्रमुञ्चन्त इतिं प्र—मुञ्चन्तः । नः । अꣳहसः । पूर्वीभिः । हि । ददाशिम । शरद्भिरितिं शरत्—भिः । मरुतः । वयम् । महोभिरिति महः—भिः (५) । चर्षणीनाम् । प्रेतिं । बुध्रियाः । ईरते । वः । महाꣳसि । प्रेतिं । नामानि । प्रयज्यव इतिं प्र—यज्यवः । तिरध्वम् ।

सहस्रियम् । दम्यम् । भागम् । एतम् । गृहमेधीय-
मिति गृह—मेधीयम् । मरुतः । जुषध्वम् । उपेति ।
यम् । एति । युवतिः । सुदक्षमिति सु—दक्षम् ।
दोषा । वस्तोः । हविष्मती । घृताची । उपेति ।
स्वा । एनम् । अरमतिः । वसूयुरिति वसु—युः ।
इमो इति । अग्ने । वीततमानीति वीत—तमानि ।
हव्या । अजस्रः । वक्षि । देवतातिमिति देव—ता-
तिम् । अच्छ । प्रतीति । नः । ईम् । सुरभीणि ।
वियन्तु । क्रीडम् । वः । शर्धः । मारुतम् । अनर्वा-
णम् । रथेशुभमिति रथे—शुभम् (६) । कण्वाः ।
अभि । प्रेति । गायत । अत्यासः । न । ये । मरुतः ।
स्वञ्चः । यक्षदृश इति यक्ष—दृशः । न । शुभयन्त ।
मयीः । ते । हर्म्येष्ठा इति हर्म्ये—स्थाः । शिशवः ।
न । शुभ्राः । वत्सासः । न । प्रक्रीडिन इति प्र—
क्रीडिनः । पयोधा इति पयः—धाः । प्रेति । एषाम् ।
अज्मेषु । विथुरा । इव । रेजते । भूमिः । यामेषु ।
यत् । ह । युञ्जते । शुभे । ते । क्रीडयः । धुनयः ।
भ्राजदृष्टय इति भ्राजत्—ऋष्टयः । स्वयम् । महित्व-
मिति महि—त्वम् । पनयन्त । धूतयः । उपह्वरेष्वि-
त्युप—ह्वरेषु । यत् । अचिध्वम् । यायिम् । वयः ।

इव । मरुतः । केन (७) । चित् । पथा । श्रोतन्ति ।
कोशाः । उपेति । वः । रथेषु । एति । घृतम् ।
उक्षत । मधुवर्णमिति मधु—वर्णम् । अर्चते ।
अग्निमग्निमित्यग्निम्—अग्निम् । हवीमभिरिति हवी-
म—भिः । सदा । हवन्त । विश्पतिम् । हव्यवाह-
मिति हव्य—वाहम् । पुरुप्रियमिति पुरु—प्रियम् ।
तम् । हि । शश्वन्तः । ईडते । सुचा । देवम् । घृत-
श्चुतेति घृत—श्रुता । अग्निम् । हव्याय । वोढवे ।
इन्द्राग्नी इतीन्द्र—अग्नी । रोचना । दिवः । श्रथत् ।
वृत्रम् । इन्द्रम् । वः । विश्वतः । परीति । इन्द्रम् ।
नरः । विश्वकर्मन्निति विश्व—कर्मन् । हविषा । वावृ-
धानः । विश्वकर्मन्निति विश्व—कर्मन् । हविषा ।
वर्धनेन (८) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके
तृतीयप्रपाठके त्रयोदशोऽनुवाकः ॥ १३ ॥

हरिः ॐ ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके
तृतीयः प्रपाठकः ॥ ३ ॥

(अथ चतुर्थकाण्डे तृतीयप्रपाठके त्रयोदशोऽनुवाकः ।)

द्वादशेऽनुवाकेऽसपत्ना विराजश्चोक्ताः । अथ त्रयोदशस्यान्त्यानुवाकत्वा-
त्तत्र याज्यानुवाक्या उच्यन्ते ।

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥ १ ॥

इति श्रीमद्विद्यातीर्थमहेश्वरापरावतारस्य श्रीमद्राजाधिराजपरमेश्वरस्य श्रीवीरबुक्कमहाराजस्याऽऽज्ञापरिपालकेन माधवाचार्येण विरचिते वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे तृतीयः प्रपाठकः ॥ ३ ॥

(अथ चतुर्थाष्टके चतुर्थः प्रपाठकः।)

(तत्र प्रथमोऽनुवाकः।)

हरिः ॐ।

रश्मिरसि क्षयाय त्वा क्षयं जिन्व प्रेतिरसि धर्माय त्वा धर्मं जिन्वान्विंतिरसि दिवे त्वा दिवं जिन्व संधिरस्यन्तरिक्षाय त्वाऽन्तरिक्षं जिन्व प्रतिधिरसि पृथिव्यै त्वा पृथिवीं जिन्व विष्टम्भोऽसि वृष्ट्यै त्वा वृष्टिं जिन्व प्रवाऽस्यह्ने त्वाऽहर्जिन्वानुवाऽसि रात्र्यै त्वा रात्रिं जिन्वोशिगसि (१) वसुभ्यस्त्वा वसूञ्जिन्व प्रकेतोऽसि रुद्रेभ्यस्त्वा रुद्राञ्जिन्व सुदीतिरस्यादित्येभ्यस्त्वाऽऽदित्याञ्जिन्वौजोऽसि पितृभ्यस्त्वा पितॄञ्जिन्व तन्तुरसि प्रजाभ्यस्त्वा प्रजा जिन्व पृतनाषाडसि पशुभ्यस्त्वा पशूञ्जिन्व रेवदस्योषधीभ्यस्त्वौषधीर्जिन्वाभिजिदसि युक्तग्रावेन्द्राय त्वेन्द्रं जिन्वाधिपतिरसि प्राणाय (२) त्वा प्राणं जिन्व यन्ताऽस्यपानाय त्वाऽपानं जिन्व संसर्पोऽसि चक्षुषे त्वा चक्षुर्जिन्व वयोधा असि श्रोत्राय त्वा श्रोत्रं

जिन्व त्रिवृदसि प्रवृदसि संवृदसि विवृदसि सꣳ-
रोहोऽसि नीरोहोऽसि प्ररोहोऽस्यनुरोहोऽसि
वसुकोऽसि वेषश्रिरसि वस्यष्टिरसि (३) ॥

(उशिगसि प्राणाय त्रिचत्वारिꣳ शच्च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके
चतुर्थप्रपाठके प्रथमोऽनुवाकः ॥ १ ॥

(अथ चतुर्थाष्टके चतुर्थः प्रपाठकः ।)

(तत्र प्रथमोऽनुवाकः ।)

हरिः ॐ ।

रश्मिः । असि । क्षयाय । त्वा । क्षयम् । जिन्व ।
प्रेतिरिति प्र—इतिः । असि । धर्माय । त्वा । धर्म-
म् । जिन्व । अन्विंतिरित्यनु—इतिः । असि । दिवे ।
त्वा । दिवम् । जिन्व । संधिरिति सं—धिः । असि ।
अन्तरिक्षाय । त्वा । अन्तरिक्षम् । जिन्व । प्रतिधि-
रिति प्रति—धिः । असि । पृथिव्यै । त्वा । पृथि-
वीम् । जिन्व । विष्टम्भ इति वि—स्तम्भः । असि ।
वृष्ट्यै । त्वा । वृष्टिम् । जिन्व । प्रवेति प्र—वा ।
असि । अह्ने । त्वा । अहः । जिन्व । अनुवेत्यनु—
वा । असि । रात्र्यै । त्वा । रात्रिम् । जिन्व ।
उशिक् । असि (१) । वसुभ्य इति वसु—

भ्यः । त्वा । वसून् । जिन्व । प्रकेत इति
प्र—केतः । असि । रुद्रेभ्यः । त्वा । रुद्रान् ।
जिन्व । सुदीतिरिति सु—दीतिः । असि ।
आदित्येभ्यः । त्वा । आदित्यान् । जिन्व ।
ओजः । असि । पितृभ्य इति पितृ—भ्यः ।
त्वा । पितॄन् । जिन्व । तन्तुः । असि । प्रजाभ्य
इति प्र—जाभ्यः । त्वा । प्रजा इति प्र—जाः । जिन्व ।
पृतनाषाट् । असि । पशुभ्य इति पशु—भ्यः ।
त्वा । पशून् । जिन्व । रेवत् । असि । ओषधीभ्य
इत्योषधि—भ्यः । त्वा । ओषधीः । जिन्व । अभि-
जिदित्यभि—जित् । असि । युक्तग्रावेति युक्त—ग्रावा ।
इन्द्राय । त्वा । इन्द्रम् । जिन्व । अधिपतिरित्य-
धि—पतिः । असि । प्राणायेति प्र—अनाय (२) ।
त्वा । प्राणमिति प्र—अनम् । जिन्व । यन्ता ।
असि । अपानायेत्यप—अनाय । त्वा । अपानमि-
त्यप—अनम् । जिन्व । सꣳसर्प इति सं—सर्पः ।
असि । चक्षुषे । त्वा । चक्षुः । जिन्व । वयोधा इति
वयः—धाः । असि । श्रोत्राय । त्वा । श्रोत्रम् ।
जिन्व । त्रिवृदिति त्रि—वृत् । असि । प्रवृदिति प्र—
वृत् । असि । संवृदिति सं—वृत् । असि । विवृदिति

वि—वृत् । असि । सꣳरोह इति सं—रोहः । असि । नीरोह इति निः—रोहः । असि । प्ररोह इति प्र—रोहः । असि । अनुरोह इत्यनु—रोहः । असि । वसुकः । असि । वर्षश्रिरिति वर्ष—श्रिः । असि । वर्स्यष्टिः । असि (३) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके चतुर्थप्रपाठके प्रथमोऽनुवाकः ॥ १ ॥

(अथ चतुर्थकाण्डे चतुर्थः प्रपाठकः ।)

(तत्र प्रथमोऽनुवाकः ।)

यस्य निश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥ १ ॥
प्रपाठके तृतीयेऽस्मिंश्चितयः पञ्च वर्णिताः ।
चतुर्थे पञ्चमचितेः शेषः सर्वो विधीयते ॥ २ ॥

तत्र प्रथमानुवाके स्तोमभागा उच्यन्ते ।

कल्पः—" रश्मिरसि क्षयाय त्वा क्षयं जिन्वेति स्तोमभागाः सप्त सप्त प्रतिदिशमवशिष्टा मध्ये " इति ।

तत्र पूर्वस्यां दिश्युपधेयानामिष्टकानां सप्त मन्त्रानाह—

रश्मिरसि क्षयाय त्वा क्षयं जिन्व प्रेतिरसि धर्माय त्वा धर्मं जिन्वान्वितिरसि दिवे त्वा दिवं जिन्व संधिरस्यन्तरिक्षाय त्वाऽन्तरिक्षं जिन्व प्रतिधिरसि पृथिव्यै त्वा पृथिवीं जिन्व विष्ट-

---

१ च. 'तीये हि चित' ।

म्भोऽसि वृष्ट्यै त्वा वृष्टिं जिन्व प्रवाऽस्यह्ने त्वाऽहर्जिन्व , इति ।

हे इष्टके त्वमादित्यरश्मिरूपाऽस्यतः क्षयाय निवाससिद्ध्यर्थं त्वामुपदधामि । त्वं चास्माकं क्षयं निवासं जिन्व प्रीणय संपादयेत्यर्थः । एवं सर्वं योजनीयम् । प्रकृष्टा गतिर्यस्याः सा प्रेतिः । धर्मो विहितकर्मानुष्ठानम् । अनुकूला गतिर्यस्याः साऽन्वितिः । द्यौः स्वर्गः । द्यावापृथिव्योर्मध्यवर्ती देशः संधिः । अन्तरिक्षं गन्धर्वादिलोकभागोऽन्तरिक्षम् । प्रतिधिशब्देन भूलोकभाग उपलक्ष्यते । विशेषेण स्तभ्यते जलमत्र धार्यत इति विष्टम्भो मेघः । प्रथमं वाति गच्छति प्रवर्तत इति प्रवोषःकालः । उषा हि सूर्योदयात्पूर्वं प्रवर्तते । अतोऽहःसिद्ध्यर्थं त्वामुपदधामि ॥

अथ दक्षिणस्यां दिश्युपधेयानामिष्टकानां सप्त मन्त्रानाह—

अनुवाऽसि रात्रियै त्वा रात्रिं जिन्वोशिगसि वसुभ्यस्त्वा वसूञ्जिन्व प्रकेतोऽसि रुद्रेभ्यस्त्वा रुद्राञ्जिन्व सुदीतिरस्यादित्येभ्यस्त्वाऽऽदित्याञ्जिन्वौजोऽसि पितृभ्यस्त्वा पितॄञ्जिन्व तन्तुरसि प्रजाभ्यस्त्वा प्रजा जिन्व पृतनाषाडसि पशुभ्यस्त्वा पशूञ्जिन्व , इति ।

अनु सूर्यास्तमयात्पश्चाद्वाति चरति प्रयातीत्यनुवा सायंसंध्या । उशिग्वसुभिः काम्यमानाऽसि अतो वसुभ्यो वसूनां प्रीत्यर्थं त्वामुपदधामि । त्वं च वसूञ्जिन्व प्रीणय । एवमुत्तरत्र योज्यम् । प्रकृष्टः केतो यैः [स] प्रकेतः । रुद्राणां यः प्रकेतस्तद्रूपा त्वमसि । शोभना दीतिर्दीप्तिः सुदीतिः सा त्वमसि । ओजो बलं पितॄणां यद्बलमनुग्रहसमर्थं तद्रूपा त्वमसि । तन्तुः पुत्रपौत्रादिसांतत्यम् । स्वकीयान्गवादिपशूनपहर्तुमागता या परकीयसेना सा पृतना तां सहतेऽभिभवतीति पृतनाषाट् ॥

अथ पश्चिमायां दिश्युपधेयानामिष्टकानां सप्त मन्त्रानाह—

रेवदस्योषधीभ्यस्त्वौषधीर्जिन्वाभिजिदसि यु-

---

१ ख. च. सर्वत्र । २ ख. च. °क्षꣳ' । ३ ख. घ. ङ. च. इत्युषः' । ४ घ. ङ. °शिगसि का' । ५ क. °सि वसुभिर्वसु' । घ. ङ. 'सि व' । ६ घ. °कृष्टो यः के' । ७ क. यस्य ।

(पञ्चमचितिशेषस्तोमभागाभिधानम्)

प्रजापतिः स्तोमभागैरेवासृजतेति सामान्यत उक्तं, तेषु कैः स्तोमभागैः किमसृजतेत्येकैकमिष्टकामन्त्रं विभजते—

"रश्मिरित्येवाऽऽदित्यमसृजत प्रेतिरिति धर्ममन्वितिरिति दिवꣳ संधिरित्यन्तरिक्षं प्रतिधिरिति पृथिवीं विष्टम्भ इति दृष्टिं प्रवेत्यहरनुवेति रात्रिमुशिगिति वसून्प्रकेत इति रुद्रान्त्सुदीतिरित्यादित्यानोज इति पितॄꣳस्तन्तुरिति प्रजाः पृतनाषाडिति पशूत्रेवदित्योषधीः" [सं० का० ५ प्र० ३ अ० ६] इति ।

तत्र रश्मिरित्यादयो मन्त्रास्तत्तत्सृज्यपदार्थसंबन्धित्वेन पूर्वं व्याख्याताः । अतस्तेन तेन मन्त्रेण तत्तत्पदार्थमसृजतेत्युपपन्नम् ॥

एवं पञ्चदशभिर्मन्त्रैः सृष्टिरभिहिता । अथ सृष्टस्य जगतो रक्षाहेतुभूतं षोडशं मन्त्रं दर्शयति—

"अभिजिदसि युक्तग्रावेन्द्राय त्वेन्द्रं जिन्वेत्येव दक्षिणतो वज्रं पर्यूहदभिजित्यै " [सं० का० ५ प्र० ३ अ० ६] इति ।

अस्मिन्मन्त्रे वज्र एव संबोध्यते । हे वज्र त्वमभिजिज्जयहेतुर्युक्तग्रावा स्थापितपाषाण इव दृढश्चास्यत इन्द्रप्रीत्यर्थं त्वां पर्यूहामि तेनेन्द्रं प्रीणयेति मन्त्रार्थः । प्रजापतिरेतं मन्त्रमुच्चारयन्दक्षिणहस्तेन सृष्टस्य जगतो रक्षणाय वज्रं प्रेरितवांस्तेन बाधकविनाशे सति सृष्ट्या अभिजयोऽभूत् ॥

याः सृष्टाः प्रजा वज्रेण रक्षितास्तासु शरीररूपासु प्रजासु मन्त्रचतुष्टयेनेन्द्रियस्थापनं दर्शयति—

" ताः प्रजा अपप्राणा असृजत तास्वधिपतिरसीत्येव प्राणमदधाद्यन्तेत्यपानꣳ सꣳ सर्प इति चक्षुर्वयोधा इति श्रोत्रम् " [सं० का० ५ प्र० ३ अ० ६] इति ॥

एवमिन्द्रिययुक्तैः शरीरैर्व्यवहरन्तीषु प्रजासु मन्त्रचतुष्टयेन मिथुनीभावसंपत्तिं दर्शयति—

"ताः प्रजाः प्राणतीरपानतीः पश्यन्तीः शृण्वतीर्न मिथुनी अभवन्तासु त्रिवृदसीत्येव मिथुनमदधात् " [सं० का० ५ प्र० ३ अ० ६] इति ॥

मिथुनीभूतासु प्रजासु मन्त्रचतुष्टयेन प्रजोत्पादनसामर्थ्यं दर्शयति—

"ताः प्रजा मिथुनी भवन्तीर्न प्राजायन्त ताः सꣳ रोहोऽसि नीरोहोऽसीत्येव प्राजनयत् " [सं० का० ५ प्र० ३ अ० ६] इति ॥

१ ख. च. 'रेव प्रजा असृ' । २ ख. च. तच्च । ३ ख. च. अत्र । ४ क. घ. ङ. 'ते । वं' । ५ घ. ङ. 'श्चासीत । ६ ख. घ. ङ. 'रेतन्मन्त्र' । च. 'रेनं म' । ७ ख. च. 'ञ्जेणाभिर' ।

(नाकसदाख्येष्टकाभिधानम्)

अपत्योपेतानां प्रजानां मन्त्रत्रयेण प्रतिष्ठा भवतीत्येतद्दर्शयति—

" ताः प्रजाः प्रजाता न प्रत्यतिष्ठन्ता वसुकोऽसि वेषश्चिरसि वस्यष्टिरसीत्येवैषु लोकेषु प्रत्यस्थापयद्यदाह वसुकोऽसि वेषश्चिरसि वस्यष्टिरसीति प्रजा एव प्रजाता एषु लोकेषु प्रति ष्ठापयति " [सं० का० ५ प्र० ३ अ० ६] इति ॥

एतद्वेदनं प्रशंसति—

" सात्माऽन्तरिक्षꣳ रोहति सप्राणोऽमुष्मिँल्लोके प्रति तिष्ठत्यव्यर्धुकः प्राणापानाभ्यां भवति य एवं वेद " [सं० का० ५ प्र० ३ अ० ६] इति । सात्मा सशरीरोऽन्तरिक्षं गत्वा यक्षगन्धर्वादिलोकेषु भोगान्भुङ्क्ते, स्वर्गलोकेऽपि प्राणशरीरयुक्त एव प्रतितिष्ठति, प्राणापानाभ्यां कदाचिदपि न वियुक्तो भवति ॥

अत्र विनियोगसंग्रहः—

" इष्टका रश्मिरित्येकत्रिंशत्तु स्तोमभागकाः ॥ १ ॥ " इति ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे चतुर्थप्रपाठके प्रथमोऽनुवाकः ॥ १ ॥

(अथ चतुर्थाष्टके चतुर्थप्रपाठके द्वितीयोऽनुवाकः ।)

राज्ञ्यसि प्राची दिग्वसवस्ते देवा अधिपतयोऽग्निर्हेतीनां प्रतिधर्ता त्रिवृत्त्वा स्तोमः पृथिव्याꣳ श्रयत्वाज्यमुक्थमव्यथयत्स्तभ्नातु रथंतरꣳ साम प्रतिष्ठित्यै विराडसि दक्षिणा दिग्रुद्रास्ते देवा अधिपतय इन्द्रो हेतीनां प्रतिधर्ता पञ्चदशस्त्वा स्तोमः पृथिव्याꣳ श्रयतु प्रउगमुक्थमव्यथयत्स्तभ्नातु बृहत्साम प्रतिष्ठित्यै

१ ख. घ. ङ. च. 'नां प्र' ।

ष्ठित्यै सम्राडंसि प्रतीची दिक् (१) आदित्या-
स्ते देवा अधिपतयः सोमो हेतीनां प्रतिधर्ता
सप्तदशस्त्वा स्तोमः पृथिव्याꣳ श्रयतु मरुत्वतीय-
मुक्थमव्यथयत्स्तभ्नातु वैरूपꣳ साम प्रतिष्ठित्यै
स्वराडस्युदीची दिग्विश्वे ते देवा अधिपतयो
वरुणो हेतीनां प्रतिधर्तैकविꣳशस्त्वा स्तोमः
पृथिव्याꣳ श्रयतु निष्केवल्यमुक्थमव्यथयत्स्त-
भ्नातु वैराजꣳ साम प्रतिष्ठित्या अधिपत्न्यसि
बृहती दिङ्मरुतस्ते देवा अधिपतयः (२)
बृहस्पतिर्हेतीनां प्रतिधर्ता त्रिणवत्रयस्त्रिꣳशौ
त्वा स्तोमौ पृथिव्याꣳ श्रयतां वैश्वदेवाग्निमा-
रुते उक्थे अव्यथयन्ती स्तभ्नीताꣳ शाक्व-
ररैवते सामनी प्रतिष्ठित्या अन्तरिक्षायर्षयस्त्वा
प्रथमजा देवेषु दिवो मात्रया वरिणा प्रथन्तु
विधर्ता चायमधिपतिश्च ते त्वा सर्वे संविदाना
नाकस्य पृष्ठे सुवर्गे लोके यजमानं च
सादयन्तु (३) ॥

(प्रतीची दिङ्मरुतस्ते देवा अधिपतयश्चत्वारिꣳशच्च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके
चतुर्थप्रपाठके द्वितीयोऽनुवाकः ॥ २ ॥

(अथ चतुर्थाष्टके चतुर्थप्रपाठके द्वितीयोऽनुवाकः ।)

राज्ञी । असि । प्राची । दिक् । वसवः । ते ।
देवाः । अधिपतय इत्यधि—पतयः । अग्निः । हेती-
नाम् । प्रतिधर्तेति प्रति—धर्ता । त्रिवृदिति त्रि—
वृत् । त्वा । स्तोमः । पृथिव्याम् । श्रयतु । आज्यम् ।
उक्थम् । अव्यथयत् । स्तभ्नातु । रथंतरमिति रथं—
तरम् । साम । प्रतिष्ठित्या इति प्रति—स्थित्यै ।
विराडिति वि—राट् । असि । दक्षिणा । दिक् ।
रुद्राः । ते । देवाः । अधिपतय इत्यधि—पतयः ।
इन्द्रः । हेतीनाम् । प्रतिधर्तेति प्रति—धर्ता । पञ्च-
दश इति पञ्च—दशः । त्वा । स्तोमः । पृथिव्याम् ।
श्रयतु । प्रउगम् । उक्थम् । अव्यथयत् । स्तभ्नातु ।
बृहत् । साम । प्रतिष्ठित्या इति प्रति—स्थित्यै ।
सम्राडिति सम्—राट् । असि । प्रतीची । दिक् ।
(१) । आदित्याः । ते । देवाः । अधिपतय इत्य-
धि—पतयः । सोमः । हेतीनाम् । प्रतिधर्तेति प्रति—
धर्ता । सप्तदश इति सप्त—दशः । त्वा । स्तोमः ।
पृथिव्याम् । श्रयतु । मरुत्वतीयम् । उक्थम् । अ-
व्यथयत् । स्तभ्नातु । वैरूपम् । साम । प्रतिष्ठित्या
इति प्रति—स्थित्यै । स्वराडिति स्व—राट् । असि ।

उदीची । दिक् । विश्वे । ते । देवाः । अधिपतय इत्यधि—पतयः । वरुणः । हेतीनाम् । प्रतिधर्तेति प्रति—धर्ता । एकविꣳश इत्येक—विꣳशः । त्वा । स्तोमः । पृथिव्याम् । श्रयतु । निष्केवल्यम् । उक्थम् । अव्यथयत् । स्तभ्नातु । वैराजम् । साम । प्रतिष्ठित्या इति प्रति—स्थित्यै । अधिपत्नीत्यधि—पत्नी । असि । बृहती । दिक् । मरुतः । ते । देवाः । अधिपतय इत्यधि—पतयः (२) । बृहस्पतिः । हेतीनाम् । प्रतिधर्तेति प्रति—धर्ता । त्रिणवत्रयस्त्रिꣳशाविति त्रिणव—त्रयस्त्रिꣳशौ । त्वा । स्तोमौ । पृथिव्याम् । श्रयताम् । वैश्वदेवाग्निमारुते इति वैश्वदेव—आग्निमारुते । उक्थे इति । अव्यथयन्ती इति । स्तभ्नीताम् । शाक्कररैवते इति शाक्कर—रैवते । साम नी इति । प्रतिष्ठित्या इति प्रति—स्थित्यै । अन्तरिक्षाय । ऋषयः । त्वा । प्रथमजा इति प्रथम—जाः । देवेषु । दिवः । मात्रया । वरिणा । प्रथन्तु । विधर्तेति वि—धर्ता । च । अयम् । अधिपतिरित्यधि—पतिः । च । ते । त्वा । सर्वे । संविदाना इति सं—विदानाः । नाकस्य । पृष्ठे । सुवर्ग इति

सुवः—गे । लोके । यजमानम् । च । सादयन्तु (३) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके चतुर्थप्रपाठके द्वितीयोऽनुवाकः ॥ २ ॥

(अथ चतुर्थकाण्डे चतुर्थप्रपाठके द्वितीयोऽनुवाकः ।)

प्रथमेऽनुवाके स्तोमभागाख्या इष्टका उक्ताः । अथ द्वितीये नाकसदाख्या इष्टका अभिधीयन्ते ।

कल्पः—" राज्ञ्यसि प्राची दिगिति पञ्च नाकसदः प्रतिदिशमेकां मध्ये " इति ।

तत्र प्रथमामाह—

राज्ञ्यसि प्राची दिग्वसवस्ते देवा अधिपतयोऽग्निर्हेतीनां प्रतिधर्ता त्रिवृत्त्वा स्तोमः पृथिव्याꣳ श्रयत्वाज्यमुक्थमव्यथयꣳस्तभ्नातु रथंतरꣳ साम प्रतिष्ठित्यै , इति ।

हे इष्टके त्वं राज्ञी राजमाना प्राची दिक्तद्रूपाऽसि । ते तव वसवोऽष्टसंख्याका अधिपतयोऽधिकं पालयितारः । अग्निस्तवोपद्रवकराणां हेतीनां परकीयायुधानां प्रतिधर्ता निराकर्ता । योऽयं त्रिवृदाख्यः स्तोमः स त्वां पृथिव्यां स्थापयतु । यदाज्यमुक्थमाज्यनामकं प्र वो देवायाग्नय इत्यादिकं शस्त्रमवस्थितं [तत्] त्वामव्यथयद्व्यथारहितां कुर्वत्स्तभ्नातु दृढीं करोतु । यद्रथंतरं साम तत्प्रतिष्ठित्यै तव चिरावस्थानाय भवतु । एवमुत्तरेष्वपि मन्त्रेषु योज्यम् ॥

अथ द्वितीयं मन्त्रमाह—

विराडसि दक्षिणा दिग्युद्रास्ते देवा अधिपतय इन्द्रो हेतीनां प्रतिधर्ता पञ्चदशस्त्वा स्तोमः पृथिव्याꣳ श्रयतु प्रउगमुक्थमव्यथयꣳस्तभ्नातु बृहत्साम प्रतिष्ठित्यै , इति ।

१ ख. च. °ति पाठस्तु तै° । २ क. घ. ङ. °तीयम' ।

" नाकस्य पृष्ठे सुवर्गे लोके यजमानं च सादयन्तु " इति । एतैर्मन्त्रैरुपधेया इष्टका अपि नाकसदः । यस्मात्ताभिर्देवाः स्वर्गं गतास्तस्मान्नाकसदिति नाम संपन्नम् । तदुपधानेन यजमानः स्वर्गं लोकं प्राप्नोति ॥

दुःखनिवारकत्वेन तदुपधानं प्रशंसति—

" सुवर्गो वै लोको नाको यस्यैता उपधीयन्ते नास्मा अकं भवति " [सं० का० ५ प्र० ३ अ० ७] इति ।

कं सुखमकं दुःखं न विद्यते दुःखं यत्र सोऽयं नाकः, स्वर्गश्च तादृशः । ततो नाकसदुपधानेन यजमानस्य दुःखं न भवति ॥

पुनरपि स्थानसंपादकत्वेन प्रशंसति—

" यजमानायतनं वै नाकसदो यन्नाकसद उपदधात्यायतनमेव तद्यजमानः कुरुते " [सं० का० ५ प्र० ३ अ० ७] इति ॥

पृष्ठस्तोत्रसंबन्धितेजोरूपत्वेन पुनः प्रशंसति—

" पृष्ठानां वा एतत्तेजः संभृतं यन्नाकसदो यन्नाकसद उपदधाति पृष्ठानामेव तेजोऽव रुन्धे " [सं० का० ५ प्र० ३ अ० ७] इति ॥

अत्र विनियोगसंग्रहः—

राज्ञी नाकसदः पञ्च सर्वशेषोऽन्तरित्ययम् ॥ १ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे चतुर्थप्रपाठके द्वितीयोऽनुवाकः ॥ २ ॥

(अथ चतुर्थाष्टके चतुर्थप्रपाठके तृतीयोऽनुवाकः ।)

अयं पुरो हरिकेशः सूर्यरश्मिस्तस्य रथगृत्सश्च रथौजाश्च सेनानिग्रामण्यौ पुञ्जिकस्थला च कृतस्थला चाप्सरसौ यातुधाना हेती रक्षांसि प्रहेतिरयं दक्षिणा विश्वकर्मा तस्य रथस्वनश्च रथौचित्रश्च सेनानिग्रामण्यौ

१ क. घ. ङ. 'र्गस्ताद' । २ ख. च. 'सदामुप' । ३ क. घ. ङ. 'स्य न दुःखं भ' । ४ क. 'ति । पुनरपि पृ' । घ. ङ. 'ति पु' ।

मेनका च सहजन्या चाप्सरसौ दृढ्क्षणवः पशवो हेतिः पौरुषेयो वधः प्रहेतिरयं पश्वाद्विश्वव्यचास्तस्य रथप्रोतश्वासमरथश्च सेनानिग्रामण्यौ प्रम्लोचन्ती च (१) अनुम्लोचन्ती चाप्सरसौ सर्पा हेतिर्व्याघ्राः प्रहेतिरयमुत्तरात्संयद्वसुस्तस्य सेनजिच्च सुषेणश्च सेनानिग्रामण्यौ विश्वाची च घृताची चाप्सरसावापो हेतिर्वातः प्रहेतिरयमुपर्यर्वाग्वसुस्तस्य तार्क्ष्यश्चारिष्टनेमिश्च सेनानिग्रामण्यावुर्वशी च पूर्वचित्तिश्चाप्सरसौ विद्युद्धेतिरवस्फूर्जन्प्रहेतिस्तेभ्यो नमस्ते नो मृडयन्तु ते यम् (२) द्विष्मो यश्च नो द्वेष्टि तं वो जम्भे दधाम्यायोस्त्वा सदने सादयाम्यवतश्छायायां नमः समुद्राय नमः समुद्रस्य चक्षसे परमेष्ठी त्वा सादयतु दिवः पृष्ठे व्यचस्वतीं प्रथस्वतीं विभूमतीं प्रभूमतीं परिभूमतीं दिवं यच्छ दिवं दृꣳह दिवं मा हिꣳसीर्विश्वस्मै प्राणायापानाय व्यानायोदानाय प्रतिष्ठायै चरित्राय सूर्यस्त्वाऽभि पातु मह्या स्वस्त्या छर्दिषा शंतमेन तया देवतयाऽङ्गिरस्वद्ध्रुवा सीद ।

प्रोथदश्वो न यवसे अविष्यन्यदा महः संवरणाद्व्यस्थात् । आदस्य वातो अनु वाति शोचिरध स्म ते व्रजनं कृष्णमस्ति (३) ॥

(प्रम्लोचन्ती च यश्च स्वस्त्याऽष्टाविंशतिश्च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके चतुर्थप्रपाठके तृतीयोऽनुवाकः ॥ ३ ॥

(अथ चतुर्थाष्टके चतुर्थप्रपाठके तृतीयोऽनुवाकः ।)

अयम् । पुरः । हरिकेश इति हरि—केशः । सूर्यरश्मिरिति सूर्य—रश्मिः । तस्य । रथगृत्स इति रथ—गृत्सः । च । रथौजा इति रथ—ओजाः । च । सेनानिग्रामण्यावितिं सेनानि—ग्रामण्यौ । पुञ्जिकस्थलेतिं पुञ्जिक—स्थला । च । कृतस्थलेतिं कृत—स्थला । च । अप्सरसौ । यातुधाना इतिं यातु—धानाः । हेतिः । रक्षाꣳसि । प्रहेतिरिति प्र—हेतिः । अयम् । दक्षिणा । विश्वकर्मेतिं विश्व—कर्मा । तस्य । रथस्वन इतिं रथ-स्वनः । च । रथचित्र इति रथ-चित्रः । च । सेनानिग्रामण्यावितिं सेनानि—ग्रामण्यौ । मेनका । च । सहजन्येतिं सह—जन्या । च । अप्सरसौ । दुर्ऽक्षणवः । पशवः । हेतिः । पौरुषेयः । वधः । प्रहेतिरिति प्र—हेतिः । अयम् । पश्चात् । विश्व-

व्यचा इतिं विश्व—व्यचाः । तस्य । रथप्रोत इति रथ—प्रोतः । च । असमरथ इत्यसम—रथः । च । सेनानिग्रामण्यावितिं सेनानि—ग्रामण्यौ । प्रम्लोचन्तीतिं प्र—म्लोचन्ती । च (१) । अनुम्लोचन्तीत्यनु—म्लोचन्ती । च । अप्सरसौ । सर्पाः । हेतिः । व्याघ्राः । प्रहेतिरिति प्र—हेतिः । अयम् । उत्तरादित्युत्—तरात् । संयद्वसुरितिं संयत्—वसुः । तस्य । सेनजिदितिं सेन—जित् । च । सुषेण इतिं सु—सेनः । च । सेनानिग्रामण्यावितिं सेनानि—ग्रामण्यौ । विश्वाची । च । घृताची । च । अप्सरसौ । आपः । हेतिः । वातः । प्रहेतिरिति प्र—हेतिः । अयम् । उपरि । अर्वाग्वसुरित्यर्वाक्—वसुः । तस्य । तार्क्ष्यः । च । अरिष्टनेमिरित्यरिष्ट—नेमिः । च । सेनानिग्रामण्यावितिं सेनानि—ग्रामण्यौ । उर्वशी । च । पूर्वचित्तिरितिं पूर्व—चित्तिः । च । अप्सरसौ । विद्युदितिं वि—द्युत् । हेतिः । अवस्फूर्जन्नित्यव—स्फूर्जन् । प्रहेतिरिति प्र—हेतिः । तेभ्यः । नमः । ते । नः । मृडयन्तु । ते । यम् (२) । द्विष्मः । यः । च । नः । द्वेष्टि । तम् । वः । जम्भे । दधामि । आयोः । त्वा । सदने । सादयामि ।

अवंतः । छायायांम् । नमंः । समुद्रायं । नमंः । समुद्रस्यं । चक्षंसे । परमेष्ठी । त्वा । सादयतु । दिवः । पृष्ठे । व्यचंस्वतीम् । प्रथंस्वतीम् । विभूमंतीमितिं वि—भूमंतीम् । प्रभूमंतीमितिं प्र—भूमंतीम् । परि-भूमंतीमितिं परि—भूमंतीम् । दिवंम् । यच्छ । दिवंम् । दृंह । दिवंम् । मा । हिंसीः । विश्वंस्मै । प्राणायेतिं प्र—अनायं । अपानायेत्यंप—अनायं । व्यानायेतिं वि—अनायं । उदानायेत्युंत्—अनायं । प्रतिष्ठाया इतिं प्रति—स्थायैं । चरित्रायं । सूर्यः । त्वा । अभीतिं । पातु । मह्या । स्वस्त्या । छर्दिषा । शंतमेनेति शं—तमेन । तया । देवतंया । अङ्गिर-स्वत् । ध्रुवा । सीद । प्रोथंत् । अश्वंः । न । यवंसे । अविष्यन् । यदा । महः । संवरंणादितिं सं—वरं-णात् । व्यस्थादितिं वि—अस्थांत् । आत् । अस्य । वातंः । अन्वितिं । वाति । शोचिः । अधं । स्म । ते । व्रजंनम् । कृष्णम् । अस्ति (३) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके चतुर्थप्रपाठके तृतीयोऽनुवाकः ॥ ३ ॥

(अथ चतुर्थकाण्डे चतुर्थप्रपाठके तृतीयोऽनुवाकः ।)

द्वितीयेऽनुवाके नाकसदाख्या इष्टका उक्ताः । अथ तृतीये चोडाख्या इष्टका उच्यन्ते ।

कल्पः—" तासु पुरीषमध्यू(ध्यु)ह्यायं पुंरो हरिकेश इति पञ्च चोडा अभ्युपदधाति द्वेष्यं मनसा ध्यायन्पश्चात्प्राचीमुत्तमाम् " इति ।

तत्र प्रथमं मन्त्रमाह—

अयं पुरो हरिकेशः सूर्यरश्मिस्तस्य रथ-
गृत्सश्च रथौजाश्च सेनानिग्रामण्यौ पुञ्जि-
कस्थला च कृतस्थला चाप्सरसौ
यातुधाना हेती रक्षाꣳसि प्रहेतिः, इति ।

अयमग्निः पुरः पूर्वस्यां दिशि हरिकेशो हिरण्यवर्णकेशसमाना ज्वाला यस्यासौ हरिकेशः सूर्यसमानरश्मिस्तस्य तादृशस्याग्नेः परिचारकौ द्वौ सेनानिग्रामण्यौ । एकः सेनां परराज्येषु नयत्यपरः स्वराज्ये ग्रामं नयति । तत्र रथगृत्स इति सेनान्यो नामधेयम् । गृत्सो गर्धनवान् । यस्य रथे महती तृष्णा सोऽयं रथगृत्सः । रथौजा इति ग्रामण्यो नामधेयम् । ओजो बलम् । यस्य रथारोहणे बलाधिक्यं स रथौजाः । यथैतौ मुख्यौ परिचारकौ तथा द्वे अप्सरसौ परिचारिके । तत्र पुञ्जिकस्थलेत्येकस्या नामधेयं, कृतस्थलेत्यपरस्या नामधेयम् । यातुधाना रक्षांसि चेत्यवान्तरजातिभेदोऽवगन्तव्यः । हेतिप्रहेती अप्यायुधविशेषौ । तत्र यातुधानाः क्रूरास्तीक्ष्णहेतिस्वरूपाः । रक्षांस्यतिक्रूराणि अतितीक्ष्णप्रहेतिरूपाणि । यस्याग्नेरिदं सर्वं हे इष्टके तदग्निस्वरूपाऽसीत्यभिप्रायः । एवं सर्वत्र योज्यम् ॥

अथ द्वितीयमन्त्रमाह—

अयं दक्षिणा विश्वकर्मा तस्य रथस्वनश्च
रथेचित्रश्च सेनानिग्रामण्यौ मेनका च
सहजन्या चाप्सरसौ दङ्क्षणवः पशवो
हेतिः पौरुषेयो वधः प्रहेतिः, इति ।

विश्वानि कर्माण्यग्निहोत्रादीनि यस्याग्नेः सोऽयं विश्वकर्मा दक्षिणस्यां दिशि स्थितः । तस्य रथस्वनः सेनानी रथेचित्रो ग्रामणीः । मेनकेति सहजन्येति चाप्सरसोर्नामधेयम् । दङ्क्षणवो दंशनशीला व्याघ्रादयो हेतिः । सङ्ग्रामे पुरुषसंबन्धी यो वधः स प्रहेतिः ॥

१ ख. च. पुर इं । २ क. घ. ङ. °थमामां । ३ क. घ. ङ. 'वर्णा के° । ४ ख. च. °र्धवां । ५ च. °णि तीं । ६ क. ख. च. °तिस्वरूं । ७ ख. च. °तीयं मं ।

" स्वयमातृण्णा भवति प्राणानामुत्सृष्ट्या अथो सुवर्गस्य लोकस्यानुख्यात्यै" [सं० का० ५ प्र० ३ अ० ७] इति ॥

विकर्णीं प्रशंसति—

" एषा वै देवानां विक्रान्तिर्यद्विकर्णी यद्विकर्णीमुपदधाति देवानामेव विक्रान्तिमनु वि क्रमते " [सं० का० ५ प्र० ३ अ० ७] इति ।

विकर्ण्या एव पराक्रमरूपत्वात्तदुपधानेन यजमानोऽपि देववत्पराक्रमवान्भवति ॥

उत्तरांसरूपं देशं विधत्ते—

" उत्तरत उप दधाति तस्मादुत्तरतउपचारोऽग्निः " [सं० का० ५ प्र० ३ अ० ७] इति ।

येषूपचारेषु देशविशेषो न विहितस्ते सर्वेऽपि वह्नेरुत्तरतः स्थित्वा कर्तव्याः । तद्यथा ब्रह्मवरणान्वाधानजपादयः ॥

अथैतस्या उपधान आदस्य वातो अनु वाति शोचिरिति वायुवाचिशब्दयुक्तामृचं विनियुङ्क्ते—

" वायुमती भवति समिध्यै " [सं० का० ५ प्र० ३ अ० ७] इति ॥

सति हि वायावग्निः समिध्यते ॥

अत्र विनियोगसंग्रहः—

अयं पुरः पञ्चचोडास्तेभ्य इत्यनुषज्यते ।
आ स्पृशेत्स्वयमातृण्णां परमेष्ठीति सादयेत् ॥
प्रोथद्विकर्णीमादध्यान्मन्त्रा अष्टाविहेरिताः ॥ १ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे चतुर्थप्रपाठके तृतीयोऽनुवाकः ॥ ३ ॥

(अथ चतुर्थाष्टके चतुर्थप्रपाठके चतुर्थोऽनुवाकः ।)

अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम् । अपाꣳ रेताꣳसि जिन्वति । त्वामग्ने पुष्करादध्यथर्वा निरमन्थत । मूर्ध्नो विश्वस्य वाघतः । अयमग्निः सहस्रिणो वाजस्य शति-

नस्पतिः । मूर्धा कवी रयीणाम् । भुवो यज्ञस्य रजसश्च नेता यत्रा नियुद्भिः सचसे शिवाभिः । दिवि मूर्धानं दधिषे सुवर्षां जिह्वामग्ने चकृषे हव्यवाहम् । असोध्यग्निः समिधा जनानाम् (१) प्रति धेनुमिवाऽऽयतीमुषासम् । यह्वा इव प्र वयामुज्जिहानाः प्र भानवः सिस्रते नाकमच्छ । अवोचाम कवये मेध्याय वचो वन्दारु वृषभाय वृष्णे । गविष्ठिरो नमसा स्तोममग्नौ दिवीव रुक्ममुर्व्यञ्चमश्रेत् । जनस्य गोपा अजनिष्ट जागृविरग्निः सुदक्षः सुविताय नव्यसे । घृतप्रतीको बृहता दिविस्पृशा द्युमद्वि भाति भरतेभ्यः शुचिः । त्वामग्ने अङ्गिरसः (२) गुहा हितमन्वविन्दच्छिश्रियाणं वनेवने । स जायसे मथ्यमानः सहो महत्त्वामाहुः सहसस्पुत्रमङ्गिरः । यज्ञस्य केतुं प्रथमं पुरोहितमग्निं नरस्त्रिषधस्थे समिन्धते । इन्द्रेण देवैः सरथꣳ स बर्हिषि सीदन्नि होता यजथाय सुक्रतुः । त्वां चित्रश्रवस्तम हवन्ते विक्षु जन्तवः । शोचिष्केशं पुरुप्रियाग्ने हव्याय वोढवे । सखायः सं वः सम्यञ्चमिषम् । (३)

स्तोमं चाग्नये । वर्षिष्ठाय क्षितीनामूर्जो नप्त्रे सहस्वते । सꣳ समिद्युवसे वृषन्नग्ने विश्वान्यर्य आ । इडस्पदे समिध्यसे स नो वसून्या भर । एना वो अग्निं नमसोर्जो नपातमा हुवे । प्रियं चेतिष्ठमरतिꣳ स्वध्वरं विश्वस्य दूतममृतम् । स योजते अरुषो विश्वभोजसा स दुद्रवत्स्वाहुतः । सुब्रह्मा यज्ञः सुशमी (४) वसूनां देवꣳ राधो जनानाम् । उदस्य शोचिरस्थादाजुह्वानस्य मीळुषः । उद्धूमासो अरुषासो दिविस्पृशः समग्निमिन्धते नरः । अग्ने वाजस्य गोमत ईशानः सहसो यहो । अस्मे धेहि जातवेदो महि श्रवः । स ईधानो वसुष्कविरग्निरीड्यो गिरा । रेवदस्मभ्यं पुर्वणीक दीदिहि । क्षपो राजन्नुत त्मनाऽग्ने वस्तोरुतोषसः । स तिग्मजम्भ (५) रक्षसो दह प्रति । आ ते अग्न इधीमहि द्युमन्तं देवाजरम् । यद्ध स्या ते पनीयसी समिद्दीदयति द्यवीषꣳ स्तोतृभ्य आ भर । आ ते अग्न ऋचा हविः शुक्रस्य ज्योतिषस्पते । सुश्वन्द्र दस्म विश्पते हव्यवाट्तुभ्यꣳ हूयत इषꣳ

स्तोतृभ्य आ भर । उभे सुश्चन्द्र सर्पिषो दर्वी श्रीणीष आसनि । उतो न उत्पुपूर्याः (६) उक्थेषु शवसस्पत इषꣳ स्तोतृभ्य आ भर । अग्ने तमद्याश्वं न स्तोमैः क्रतुं न भद्रꣳ हृदिस्पृशम् । ऋध्यामा त ओहैः । अधा ह्यग्ने क्रतोर्भद्रस्य दक्षस्य साधोः । रथीऋतस्य बृहतो बभूथ । आभिष्टे अद्य गीर्भिर्गृणन्तोऽग्ने दाशेम । प्र ते दिवो न स्तनयन्ति शुष्माः । एभिर्नो अर्कैर्भवा नो अर्वाङ् (७) सुवर्ण ज्योतिः । अग्ने विश्वेभिः सुमना अनीकैः । अग्निꣳ होतारं मन्ये दास्वन्तं वसोः सूनुꣳ सहसो जातवेदसम् । विप्रं न जातवेदसम् । य ऊर्ध्वया स्वध्वरो देवो देवाच्या कृपा । घृतस्य विभ्राष्टिमनु शुक्रशोचिष आजुह्वानस्य सर्पिषः । अग्ने त्वं नो अन्तमः । उत त्राता शिवो भव वरूथ्यः । तं त्वा शोचिष्ठ दीदिवः । सुम्नायं नूनमीमहे सखिभ्यः । वसुरग्निर्वसुश्रवाः । अच्छा नक्षि द्युमत्तमो रयिं दाः (८) ॥

[जनानामङ्गिरस इषꣳ सुशमी तिग्मजम्भ पुपूर्या अर्वाङ्वसुश्रवाः पञ्च च ।]

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके चतुर्थप्रपाठके चतुर्थोऽनुवाकः ॥ ४ ॥

(अथ चतुर्थाष्टके चतुर्थप्रपाठके चतुर्थोऽनुवाकः ।)

अग्निः । मूर्धा । दिवः । ककुत् । पतिः । पृथिव्याः । अयम् । अपाम् । रेतांसि । जिन्वति । त्वाम् । अग्ने । पुष्करात् । अधीतिं । अथर्वा । निरितिं । अमन्थत । मूर्ध्नः । विश्वस्य । वाघतः । अयम् । अग्निः । सहस्रिणः । वाजस्य । शतिनः । पतिः । मूर्धा । कविः । रयीणाम् । भुवः । यज्ञस्य । रजसः । च । नेता । यत्र । नियुद्भिरितिं नियुत्—भिः । सचसे । शिवाभिः । दिवि । मूर्धानम् । दधिषे । सुवर्षामितिं सुवः—साम् । जिह्वाम् । अग्ने । चकृषे । हव्यवाहमितिं हव्य—वाहम् । अबोधि । अग्निः । समिधेतिं सम्—इधा । जनानाम् (१) । प्रतीतिं । धेनुम् । इव । आयतीमित्या—यतीम् । उषासम् । यह्वाः । इव । प्रेतिं । वयाम् । उज्जिहानाइत्युत्—जिहानाः । प्रेतिं । भानवः । सिस्रते । नाकम् । अच्छ । अवोचाम । कवये । मेध्याय । वचः । वन्दारु । वृषभाय । वृष्णे । गविष्ठिरः । नमसा । स्तोमम् । अग्नौ । दिवि । इव । रुक्मम् । उर्व्यञ्चम् । अश्रेत् । जनस्य । गोपा इतिं गो—पाः । अजनिष्ट । जागृविः । अग्निः । सुदक्ष इतिं सु—

दक्षः । सुवितायं । नव्यसे । घृतप्रतीकं इतिं घृत—प्रतीकः । बृहता । दिविस्पृशेतिं दिवि—स्पृशा । द्युमदितिं द्यु—मत् । वीतिं । भाति । भरतेभ्यः । शुचिः । त्वाम् । अग्ने । अङ्गिरसः (२) । गुहा । हितम् । अन्वितिं । अविन्दन् । शिश्रियाणम् । वनेवन इति वने—वने । सः । जायसे । मथ्यमानः । सहः । महत् । त्वाम् । आहुः । सहसः । पुत्रम् । अङ्गिरः । यज्ञस्य । केतुम् । प्रथमम् । पुरोहितमितिं पुरः—हितम् । अग्निम् । नरः । त्रिषधस्थ इतिं त्रि—सधस्थे । समितिं । इन्धते । इन्द्रेण । देवैः । सरथमितिं स—रथम् । सः । बर्हिषि । सीदत् । नीतिं । होता । यजथाय । सुक्रतुरितिं सु—क्रतुः । त्वाम् । चित्रश्रवस्तमेतिं चित्रश्रवः—तम । हवन्ते । विक्षु । जन्तवः । शोचिष्केशमितिं शोचिः—केशम् । पुरुप्रियेतिं पुरु—प्रिय । अग्ने । हव्याय । वोढवे । सखायः । समितिं । वः । सम्यञ्चम् । इषम् (३) । स्तोमम् । च । अग्नये । वसिष्ठाय । क्षितीनाम् । ऊर्जः । नप्त्रे । सहस्वते । सꣳसमिति सं—सम् । इत् । युवसे । वृषन् । अग्ने । विश्वानि । अर्यः । आ । इडः । पदे । समितिं । इध्यसे । सः । नः ।

वसूंनि । एतिं । भर । एना । वः । अग्निम् ।
नमंसा । ऊर्जः । नपांतम् । एतिं । हुवे । प्रियम् ।
चेतिंष्ठम् । अरतिम् । स्वध्वरमितिं सु—अध्वरम् ।
विश्वंस्य । दूतम् । अमृतंम् । सः । योजते । अरुषः ।
विश्वभोजसेतिं विश्व—भोजसा । सः । दुद्रवत् ।
स्वांहुत इति सु—आहुतः । सुब्रह्मेतिं सु—ब्रह्मा ।
यज्ञः । सुशमीतिं सु—शमी (४) । वसूंनाम् ।
देवम् । राधंः । जनांनाम् । उदितिं । अस्य ।
शोचिः । अस्थात् । आजुह्वांनस्येत्या—जुह्वांनस्य ।
मीढुषः । उदितिं । धूमासंः । अरुषासंः । दिविस्पृशं
इतिं दिवि—स्पृशंः । समितिं । अग्निम् । इन्धते ।
नरंः । अग्नें । वाजंस्य । गोमंत इति गो—मतः ।
ईशांनः । सहसः । यहो इतिं । अस्मे इतिं । धेहि ।
जातवेद इतिं जात—वेदः । महिं । श्रवंः । सः ।
इधानः । वसुंः । कविः । अग्निः । ईडेन्यंः । गिरा ।
रेवत् । अस्मभ्यमित्यस्म—भ्यम् । पुर्वणीकेतिं पुरु—
अनीक । दीदिहि । क्षपः । राजन् । उत । त्मनां ।
अग्नें । वस्तोः । उत । उषसंः । सः । तिग्मजम्भेतिं
तिग्म—जम्भ (५) । रक्षसंः । दह । प्रतिं । एतिं ।
ते । अग्ने । इधीमहि । द्युमन्तमितिं द्यु—मन्तम् ।

देव । अजरंम् । यत् । ह । स्याः । ते । पनीयसी ।
समिदितिं सम्—इत् । दीदयंति । द्यविं । इषंम् ।
स्तोतृभ्य इतिं स्तोतृ—भ्यः । एतिं । भर । एतिं ।
ते । अग्ने । ऋचा । हविः । शुक्रस्यं । ज्योतिषः ।
पते । सुश्चन्द्रेति सु—चन्द्र । दस्मं । विश्पते । हव्य-
वाडिति हव्यं—वाट् । तुभ्यंम् । हूयते । इषंम् ।
स्तोतृभ्य इतिं स्तोतृ—भ्यः । एतिं । भर । उभे
इतिं । सुश्चन्द्रेतिं सु—चन्द्र । सर्पिषः । दर्वी इतिं ।
श्रीणीषे । आसनिं । उतो इतिं । नः । उदितिं ।
पुपूर्याः (६) । उक्थेषुं । शवसः । पते । इषंम् ।
स्तोतृभ्य इतिं स्तोतृ—भ्यः । एतिं । भर । अग्नें ।
तम् । अद्य । अश्वंम् । न । स्तोमैंः । क्रतुंम् । न ।
भद्रम् । हृदिस्पृशमितिं हृदि—स्पृशंम् । ऋध्यामं ।
ते । ओहैंः । अधं । हि । अग्ने । क्रतोंः । भद्रस्यं ।
दक्षंस्य । साधोः । रथीः । ऋतस्यं । बृहतः । बभूथं ।
आभिः । ते । अद्य । गीर्भिः । गृणन्तंः । अग्ने ।
दाशेंम । प्रेतिं । ते । दिवः । न । स्तनयन्ति ।
शुष्माः । एभिः । नः । अर्कैः । भवं । नः । अर्वाङ्
(७) । सुवंः । न । ज्योतिंः । अग्ने । विश्वेंभिः ।
सुमना इतिं सु—मनाः । अनीकैंः । अग्निम् । होता-

रम् । मन्ये । दास्वन्तम् । वसोः । सूनुम् । सहसः ।
जातवेदसमिति जात—वेदसम् । विप्रम् । न । जात-
वेदसमिति जात—वेदसम् । यः । ऊर्ध्वया । स्वध्वर
इति सु—अध्वरः । देवः । देवाच्या । कृपा ।
घृतस्य । विभ्राष्टिमिति वि—भ्राष्टिम् । अन्विति ।
शुक्रशोचिष इति शुक्र—शोचिषः । आजुह्वानस्ये-
त्या—जुह्वानस्य । सर्पिषः । अग्ने । त्वम् । नः । अन्तमः ।
उत । त्राता । शिवः । भव । वरूथ्यः । तम् । त्वा ।
शोचिष्ठ । दीदिवः । सुम्नाय । नूनम् । ईमहे ।
सखिभ्य इति सखि—भ्यः । वसुः । अग्निः । वसु-
श्रवा इति वसु—श्रवाः । अच्छ । नक्षि । द्युमत्तम
इति द्युमत्—तमः । रयिम् । दाः (८) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके
चतुर्थप्रपाठके चतुर्थोऽनुवाकः ॥ ४ ॥

(अथ चतुर्थकाण्डे चतुर्थप्रपाठके चतुर्थोऽनुवाकः ।)

तृतीयेऽनुवाके पञ्चचोडादय इष्टका उक्ताः । अथ चतुर्थेऽनुवाके छन्दोभिधा इष्टका उच्यन्ते ।

कल्पः—" अग्निर्मूर्धेति तिस्रो गायत्रीः पुरस्तादुपदधात्येवमुत्तराणि त्रीणि त्रीणि त्रिष्टुभो दक्षिणतो जगतीः पश्चादनुष्टुभ उत्तरतो बृहतीरुष्णिहाः पङ्क्तीरक्षरपङ्क्तीरिति विषुरूपाणि छन्दाꣳसि यथावकाशमतिच्छन्दसं मध्ये द्विपदा अन्ततः " इति ।

तत्र तिसृषु गायत्रीषु प्रथमां गायत्रीमाह—

अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम् ।
अपाꣳ रेताꣳसि जिन्वति । , इति ।

अयमग्निरादित्यरूपेण दिवो द्युलोकस्य ककुदुच्छ्रितो मूर्धा शिरस्थानीयः, पृथिव्याः पतिर्दाहपाकादिकारित्वेन पालकोऽप्ययम् । किंच । अपां रेतांस्युदककार्याणि स्थावरजङ्गमशरीराणि जाठराग्निरूपेण जिन्वति प्रीणयति ॥

अथ द्वितीयामाह—

त्वामग्ने पुष्करादध्यथर्वा निरम-
न्थत । मूर्ध्नो विश्वस्य वाघतः।, इति ।

हेऽग्नेऽथर्वाख्य ऋषिः पुष्करपर्णादधि पद्मपत्रस्योपरि त्वां निरमन्थत निःशेषेण मथितवान् । अत एव पञ्चमकाण्डे ब्राह्मणमाम्नातम्—" पुष्करपर्णे ह्येनमुपश्रितमविन्दत् " इति । कीदृशात्पुष्करपर्णात्, मूर्ध्न उत्तमाङ्गवत्प्रशस्तात्, विश्वस्य वाघतः सर्वस्य जगतो वाहकात् । इदं हि पुष्करपर्णमग्निमन्थनयज्ञनिष्पादनादिद्वारा सर्वं जगन्निर्वहति ॥

अथ तृतीयामाह—

अयमग्निः सहस्रिणो वाजस्य शतिन-
स्पतिः । मूर्धा कवी रयीणाम् । , इति ।

अयं समिध्यमानोऽग्निः सहस्रसंख्यावतः शतसंख्यावतश्चान्नस्य पतिः । अत एव मूर्धा शिरोवदुत्तमः, कविर्विद्वान्, तादृशो रयीणां धनानां दाता भवतु ॥

अथ तिसृषु त्रिष्टुप्सु प्रथमां त्रिष्टुभमाह—

भुवो यज्ञस्य रजसश्च नेता यत्रा नियुद्भिः
सचसे शिवाभिः । दिवि मूर्धानं दधिषे
सुवर्षां जिह्वामग्ने चकृषे हव्यवाहम् । , इति ।

अयमग्निर्भूलोकस्य तत्रानुष्ठेयस्य यज्ञस्य तस्मिन्यज्ञे प्रवर्तकस्य रजसो गुणस्य च नेता निर्वाहकः । तादृश हेऽग्ने यत्र यस्यां दिवि सूर्यरूपो भूत्वा नियुद्भी रथे नितरां योज्यमानाभिः शिवाभिरुत्तमाभिरश्वजातिभिः सचसे समवैषि तस्यां दिवि मूर्धानं शिरोवदुन्नतस्थितिं दधिषे धारयासि । कीदृशं मूर्धानं, सुवर्षां सुवः स्वर्गे स्याति सर्वदा तिष्ठतीति सुवर्षास्तम् । सोमपाशब्द-

मन्त्रेषु मूर्धशब्दस्य तात्पर्यमाह—

" मूर्धन्वतीर्भवन्ति मूर्धानमेवैनꣳ समानानां करोति " [सं० का० ५ प्र० ३ अ० ८] इति ।

मूर्धशब्दयुक्तैर्मन्त्रैरुपधेया इष्टका मूर्धन्वत्यः । समानानां मध्ये यजमानस्य मूर्धत्वं शिरोवदुत्कृष्टत्वम् ॥

भुवो यज्ञस्येत्यादिभिस्त्रिष्टुप्छन्दोयुक्तैर्मन्त्रैरुपधेया इष्टका विधत्ते—

" त्रिष्टुभ उप दधातीन्द्रियं वै त्रिष्टुगिन्द्रियमेव मध्यतो धत्ते " [सं० का० ५ प्र० ३ अ० ८] इति ॥

जनस्य गोपा इत्यादिभिर्जगतीछन्दोभिर्मन्त्रैरुपधेया इष्टका विधत्ते—

" जगतीरुप दधाति जागता वै पशवः पशूनेवाव रुन्धे " [सं० का० ५ प्र० ३ अ० ८] इति ॥

त्वां चित्रश्रवस्तम हवन्त इत्यादिभिरनुष्टुप्छन्दोयुक्तैर्मन्त्रैरुपधेया इष्टका विधत्ते—

" अनुष्टुभ उप दधाति प्राणा वा अनुष्टुप्प्राणानामुत्सृष्ट्यै " [सं० का० ५ प्र० ३ अ० ८] इति ॥

एना वो अग्निमित्यादिभिरग्ने वाजस्येत्यादिभिरा ते अग्न इधीमहीत्यादिभिरग्ने तमद्येत्यादिभिश्चोपधेया विधत्ते—

" बृहतीरुष्णिहाः पङ्क्तीरक्षरपङ्क्तीरिति विषुरूपाणि छन्दाꣳस्युप दधाति विषुरूपा वै पशवः पशवश्छन्दाꣳसि विषुरूपानेव पशूनव रुन्धे " [सं० का० ५ प्र० ३ अ० ८] इति ।

पूर्वोक्तेषु च्छन्दःसु समानाक्षराः सर्वे पादाः । बृहत्यादिषु विषमाक्षराः । अतो विषुरूपत्वम् । पशवोऽपि गोमहिषादयः परस्परविलक्षणत्वाद्विषुरूपाः । छन्दसां च पशुहेतुत्वात्पशुत्वम् । तथा सत्येतदुपधानेन बहुविधान्पशूनामोति ॥

अथोपधानं वेदनं च प्रशंसति—

" विषुरूपमस्य गृहे दृश्यते यस्यैता उपधीयन्ते य उ चैना एवं वेद"[सं० का० ५ प्र० ३ अ० ८] इति ॥

विषुरूपं बहुविधं धनम् ॥

अग्निꣳ होतारमिति मन्त्रेणोपधेयां विधत्ते—

" अतिच्छन्दसमुप दधात्यतिच्छन्दा वै सर्वाणि छन्दाꣳसि सर्वैभिरेवैनं छन्दोभिश्चिनुते वर्ष्म वा एषा छन्दसां यदतिच्छन्दा यदतिच्छन्दसमुपदधाति वर्ष्मैवैनꣳ समानानां करोति " [सं० का० ५ प्र० ३ अ० ८] इति ।

गायत्र्यादीनां सर्वच्छन्दसां येयमक्षरसंख्या तस्या अतिच्छन्दस्त्वाभा- (स्यन्तर्भा) वात्सर्वच्छन्दोरूपत्वम् । किंच सर्वेषामन्तर्भावादेवैतदीयेष्टकाऽतिच्छन्दोभिधानादन्यासां छन्दोभिधानानामिष्टकानां शरीरम् । अत एतदुपधानेन यजमानं समानानां पुरुषाणां शरीरस्थानं करोति, सर्वेऽप्येनमनु जीवन्तीत्यर्थः ॥

अग्ने त्वं न इत्यादिभिरुपधेया इष्टका विधत्ते—

" द्विपदा उप दधाति द्विपाद्यजमानः प्रतिष्ठित्यै " [सं० का० ५ प्र० ३ अ० ८] इति ॥

अत्र विनियोगसंग्रहः—

अग्निस्तिस्रस्तु गायत्र्यो भुवस्तु त्रिष्टुभां त्रयम् ।
जनतिस्रो जगत्यः स्युस्त्वां चित्रानुष्टुभां त्रयम् ॥ १ ॥
एनातिस्रो बृहत्यः स्युरग्न इत्युष्णिहां त्रयम् ।
आ ते पङ्क्तित्रयं ह्यग्नेऽक्षरपङ्क्तिचतुष्टयम् ॥ २ ॥
अग्निमेका ह्यतिच्छन्दा अग्ने त्वं द्विपदात्रयम् ।
एकोनत्रिंशदेतानि च्छन्दांस्युपदधाति हि ॥ ३ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे चतुर्थप्रपाठके चतुर्थोऽनुवाकः ॥ ४ ॥

(अथ चतुर्थाष्टके चतुर्थप्रपाठके पञ्चमोऽनुवाकः ।)

इन्द्राग्निभ्यां त्वा सयुजा युजा युनज्म्याधाराभ्यां तेजसा वर्चसोक्थेभिः स्तोमेभिश्छन्दोभी रय्यै पोषाय सजातानां मध्यमस्थेयाय मया त्वा सयुजा युजा युनज्म्यम्बा दुला नितत्निरभ्रयन्ती मेघयन्ती वर्षयन्ती चुपुणीका नामासि प्रजापतिना त्वा विश्वाभिर्धीभिरुप दधामि पृथिव्युदपुरमन्नेन विष्टा मनु-

---

१ ख. च. 'नमुपजी' ।

ष्यास्ते गोप्तारोऽग्निर्वियत्तोऽस्यां तामहं प्र पद्ये सा (१) मे शर्म च वर्म चास्त्वधिद्यौरन्तरिक्षं ब्रह्मणा विष्टा मरुतस्ते गोप्तारो वायुर्वियत्तोऽस्यां तामहं प्र पद्ये सा मे शर्म च वर्म चास्तु द्यौरपराजिताऽमृतेन विष्टाऽऽदित्यास्ते गोप्तारः सूर्यो वियत्तोऽस्यां तामहं प्र पद्ये सा मे शर्म च वर्म चास्तु (२)।

(साऽष्टाचत्वारिꣳशच्च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके चतुर्थप्रपाठके पञ्चमोऽनुवाकः ॥ ५ ॥

(अथ चतुर्थाष्टके चतुर्थप्रपाठके पञ्चमोऽनुवाकः ।)

इन्द्राग्निभ्यामितीन्द्राग्नि—भ्याम् । त्वा । सयुजेति स—युजा । युजा । युनज्मि । आघाराभ्यामित्या—घाराभ्याम् । तेजसा । वर्चसा । उक्थेभिः । स्तोमेभिः । छन्दोभिरिति छन्दः—भिः । रय्यै । पोषाय । सजातानामिति स—जातानाम् । मध्यमस्थेयायेति मध्यम—स्थेयाय । मया । त्वा । सयुजेति स—युजा । युजा । युनज्मि । अम्बा । दुला । नितत्निरिति नि—तत्निः । अभ्रयन्ती । मेघयन्ती । वर्षयन्ती । चुपुणीका । नाम । असि । प्रजापतिनेति प्रजा—पतिना । त्वा । विश्वाभिः । धीभिः । उपेति । दधामि । पृथिवी । उदुपुरमित्युद्—पुरम् । अन्नेन । विष्टा । मनुष्याः । ते । गोप्तारः । अग्निः । वियत्त इति वि—यत्तः । अस्याम् । ताम् । अहम् । प्रेति । पद्ये । सा (१) । मे । शर्म । च । वर्म । च । अस्तु । अधिद्यौरित्यधि—द्यौः । अन्तरिक्षम् । ब्रह्मणा । विष्टा । मरुतः । ते । गोप्तारः । वायुः । वियत्त इति वि—यत्तः । अस्याम् । ताम् । अहम् । प्रेति । पद्ये । सा । मे । शर्म । च । वर्म । च । अस्तु । द्यौः । अपराजितेत्यपरा—जिता । अमृतेन । विष्टा । आदित्याः । ते । गोप्तारः । सूर्यः । वियत्त इति वि—यत्तः । अस्याम् । ताम् । अहम् । प्रेति । पद्ये । सा । मे । शर्म । च । वर्म । च । अस्तु (२) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके चतुर्थप्रपाठके पञ्चमोऽनुवाकः ॥ ५ ॥

(अथ चतुर्थकाण्डे चतुर्थप्रपाठके पञ्चमोऽनुवाकः ।)

चतुर्थेऽनुवाके छन्दोभिधा इष्टका उक्ताः । अथ पञ्चमे सयुजादय इष्टका उच्यन्ते ।

कल्पः—" इन्द्राग्निभ्यां त्वा सयुजा युजा युनज्मीत्यष्टौ सयुजः " इति ॥

---

१ क. °युगाद° ।

गोप्तारो वायुर्वियत्तोऽस्यां तामहं प्र
पद्ये सा मे शर्म च वर्म चास्तु , इति ।

ब्रह्मणा विष्टा प्रौढेन जनेन विष्टा युक्ताऽधिद्यौर्दिवोऽप्यधिका या पूः साऽन्तरिक्षमन्तरिक्षनामकं हे इष्टके तव पुरम् । मरुतो वायवस्तेष्वेको मुख्यो वायुः । शेषं पूर्ववत् ॥

कल्पः—" द्यौरपराजितेति मण्डलेष्टकाम् " इति ॥

पाठस्तु—

द्यौरपराजिताऽमृतेन विष्टाऽऽदित्यास्ते
गोप्तारः सूर्यो वियत्तोऽस्यां तामहं प्र
पद्ये सा मे शर्म च वर्म चास्तु॥, इति॥

अमृतेन विष्टा पीयूषेण पूर्णा द्यौर्द्युलोकाख्या हे इष्टके तवं[1] पूः केनाप्यपराजिता । आदित्या द्वादशसंख्याकास्तेष्वेको मुख्यः सूर्यः । शेषं पूर्ववत् ॥

एतैर्मन्त्रैः साध्यमुपधानं विधत्ते—

" मण्डलेष्टका उप दधातीमे वै लोका मण्डलेष्टका इमे खलु वै लोका देवपुरा देवपुरा एव प्र विशति नाऽऽर्तिमार्छत्यग्निं चिक्यानः " [सं० का० ५ प्र० ३ अ० ९] इति ।

मण्डलाख्या इष्टकास्तिस्रः प्रथममध्यमोत्तमचितिषूपदध्यात् । तासां चेष्टकानां लोकत्रयरूपत्वाल्लोकत्रयस्य देवपुरत्वाद्देवपुरा एवाग्निचित्प्रविशति । अग्निं चिन्वानो न नाशं प्राप्नोति ॥

अत्र विनियोगसंग्रहः—

इन्द्रेति सयुजस्त्वष्टा आघारादिपदेष्वपि ।
अनुषङ्गस्त्वेति तथा रय्या इत्यष्टमो मतः ॥ १ ॥
अम्बेति कृत्तिकाः सप्त नामासीत्यनुषज्यते ।
पृथित्रिभिर्मण्डलाख्या मन्त्रा अष्टादशेरिताः ॥ २ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे चतुर्थप्रपाठके
पञ्चमोऽनुवाकः ॥ ५ ॥

---

१ ख. घ. ङ. च. 'व पूस्तेना'।

(अथ चतुर्थाष्टके चतुर्थप्रपाठके षष्ठोऽनुवाकः ।)

बृहस्पतिस्त्वा सादयतु पृथिव्याः पृष्ठे ज्योतिष्मतीं विश्वस्मै प्राणायापानाय विश्वं ज्योतिर्यच्छाग्निस्तेऽधिपतिर्विश्वकर्मा त्वा सादयत्वन्तरिक्षस्य पृष्ठे ज्योतिष्मतीं विश्वस्मै प्राणायापानाय विश्वं ज्योतिर्यच्छ वायुस्तेऽधिपतिः प्रजापतिस्त्वा सादयतु दिवः पृष्ठे ज्योतिष्मतीं विश्वस्मै प्राणायापानाय विश्वं ज्योतिर्यच्छ परमेष्ठी तेऽधिपतिः पुरोवातसनिरस्यभ्रसनिरसि विद्युत्सनिः (१) असि स्तनयित्नुसनिरसि वृष्टिसनिरस्यग्नेर्यान्यसि देवानामग्नेयान्यसि वायोर्यान्यसि देवानां वायोयान्यस्यन्तरिक्षस्य यान्यसि देवानामन्तरिक्षयान्यस्यन्तरिक्षमस्यन्तरिक्षाय त्वा सलिलाय त्वा सर्णीकाय त्वा सतीकाय त्वा केताय त्वा प्रचेतसे त्वा विवस्वते त्वा दिवस्त्वा ज्योतिष आदित्येभ्यस्त्वर्चे त्वा रुचे त्वा द्युते त्वा भासे त्वा ज्योतिषे त्वा यशोदां त्वा यशसे तेजोदां त्वा तेजसे पयोदां त्वा पयसे वर्चोदां त्वा वर्चसे द्रवि-

णोदां त्वा द्रविणे सादयामि तेनर्षिणा तेन ब्रह्मणा तया देवतयाऽङ्गिरस्वद्ध्रुवा सीद (२)॥

(विद्युत्सनिर्ऋते त्वैकान्नत्रिंशच्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके चतुर्थप्रपाठके षष्ठोऽनुवाकः ॥ ६ ॥

(अथ चतुर्थाष्टके चतुर्थप्रपाठके षष्ठोऽनुवाकः ।)

बृहस्पतिः । त्वा । सादयतु । पृथिव्याः । पृष्ठे । ज्योतिष्मतीम् । विश्वस्मै । प्राणायेति प्र—अनाय । अपानायेत्यप—अनाय । विश्वम् । ज्योतिः । यच्छ । अग्निः । ते । अधिपतिरित्यधि—पतिः । विश्वकर्मेति विश्व—कर्मा । त्वा । सादयतु । अन्तरिक्षस्य । पृष्ठे । ज्योतिष्मतीम् । विश्वस्मै । प्राणायेति प्र—अनाय । अपानायेत्यप—अनाय । विश्वम् । ज्योतिः । यच्छ । वायुः । ते । अधिपतिरित्यधि—पतिः । प्रजापतिरिति प्रजा—पतिः । त्वा । सादयतु । दिवः । पृष्ठे । ज्योतिष्मतीम् । विश्वस्मै । प्राणायेति प्र—अनाय । अपानायेत्यप—अनाय । विश्वम् । ज्योतिः । यच्छ । परमेष्ठी । ते । अधिपतिरित्यधि—पतिः । पुरोवातसनिरिति पुरोवात—सनिः । असि । अभ्रसनिरित्यभ्र—सनिः । असि । विद्युत्स-

निरिति विद्युत्—सनिः (१) । असि । स्तनयित्नुसनिरिति स्तनयित्नु—सनिः । असि । वृष्टिसनिरिति वृष्टि—सनिः । असि । अग्नेः । यानी । असि । देवानाम् । अग्नेयानीत्यग्ने—यानी । असि । वायोः । यानी । असि । देवानाम् । वायोयानीति वायो—यानी । असि । अन्तरिक्षस्य । यानी । असि । देवानाम् । अन्तरिक्षयानीत्यन्तरिक्ष—यानी । असि । अन्तरिक्षम् । असि । अन्तरिक्षाय । त्वा । सलिलाय । त्वा । सर्णीकाय । त्वा । सतीकायेति स—तीकाय । त्वा । केताय । त्वा । प्रचेतस इति प्र—चेतसे । त्वा । विवस्वते । त्वा । दिवः । त्वा । ज्योतिषे । आदित्येभ्यः । त्वा । ऋचे । त्वा । रुचे । त्वा । द्युते । त्वा । भासे । त्वा । ज्योतिषे । त्वा । यशोदामिति यशः—दाम् । त्वा । यशांसि । तेजोदामिति तेजः—दाम् । त्वा । तेजांसि । पयोदामिति पयः—दाम् । त्वा । पयांसि । वर्चोदामिति वर्चः—दाम् । त्वा । वर्चांसि । द्रविणोदामिति द्रविणः—दाम् । त्वा । द्रविणे । सादयामि । तेन । ऋषिणा । तेन । ब्रह्मणा । तया । देवतया । अङ्गिरस्वत् । ध्रुवा । सीद (२) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके चतुर्थप्रपाठके षष्ठोऽनुवाकः ॥ ६ ॥

" अग्निचित्कपिला सत्री राजा भिक्षुर्महोदधिः ।
दृष्टमात्राः पुनन्त्येते तस्मात्पश्येत नित्यशः " ॥
इत्यादिस्मृतिविषयत्वेनैनं मनुष्या गणयन्ति ।
कल्पः—" ऋचे त्वा रुचे त्वेति पञ्च घृतेष्टकाः " इति ॥
पाठस्तु—

ऋचे त्वा रुचे त्वा द्युते त्वा
भासे त्वा ज्योतिषे त्वा , इति ।

हे इष्टके पादबद्धमन्त्रसाध्यस्तुत्यर्थं त्वामुपदधामि । एवमुत्तरत्रापि योज्यम्। प्रकाशवाचिनो रुग्द्युद्भाज्योतिःशब्दा आदित्यचन्द्राग्निनक्षत्रदीप्तिविषयतया क्रमेण व्याख्येयाः ॥

एतन्मन्त्रसाध्यमुपधानं विधत्ते—

"घृतेष्टका उप दधात्येतद्वा अग्नेः प्रियं धाम यद्घृतं प्रियेणैवैनं धाम्ना समर्धयत्यथो तेजसा " [सं० का० ५ प्र० ३ अ० १०] इति ।

घृतपिण्डा एव घृतेष्टकाः । अमृन्मयीष्विष्टकासु सूत्रकारेण परिगणितत्वात् । घृतस्याग्निप्रियद्रव्यत्वात्तेनाग्निः समृद्धो भवति । किं च तेजसाऽपि युक्तो भवति ॥

तत्रापि पूर्ववदेकैकस्या इष्टकायाः प्रदक्षिणावृत्तिपूर्वकत्वं विधत्ते—

" अनुपरिहारꣳ सादयत्यपरिवर्गमेवास्मिन्तेजो दधाति " [सं० का० ५ प्र० ३ अ० १०] इति ।

परितः क्वापि वर्जनमकृत्वा सर्वतो यजमाने तेजः स्थापयति ।

कल्पः—" यशोदां त्वेति पञ्च यशोदाः " इति ॥

पाठस्तु—

यशोदां त्वा यशसि तेजोदां त्वा तेजसि
पयोदां त्वा पयसि वर्चोदां त्वा वर्चसि द्रविणोदां त्वा द्रविणे सादयामि तेनर्षिणा तेन ब्रह्मणा तया देवतयाऽङ्गिरस्वद्ध्रुवा सीद , इति ।

यशः कीर्तिः । तेजः कान्तिः । पयः क्षीरम् । वर्चो बलम् । द्रविणं धनम् । हे इष्टके यशःप्रदां त्वां यशोनिमित्तं सादयामि । केन केन सह, यस्त्वदभिज्ञ ऋषिः, यच्च ब्रह्म त्वत्प्रतिपादकं मन्त्रवाक्यं, या च त्वदभिमानिनी देवता,

तैः सर्वैः सह त्वा महं सादयामि । यथाऽङ्गिरसः सादयन्ति तद्वत् । एवं तेजोदां त्वेत्यादिषु चतुर्षु मन्त्रेषु सादयामीत्यादिकं सर्वमनुषज्य व्याख्येयम् ॥

एतैर्मन्त्रैः साध्यमुपधानं विधत्ते—

" प्रजापतिरग्निमचिनुत स यशसा व्यार्धत स एता यशोदा अपश्यत्ता उपाधत्त ताभिर्वै स यश आत्मन्नधत्त यद्यशोदा उपदधाति यश एव ताभिर्यजमान आत्मन्धत्ते " [सं० का० ५ प्र० ३ अ० १०] इति ।

अग्निं चित्वाऽप्येतासामनुपधानात्प्रजापतिर्यशसा वियुक्त आसीत् । तत एता दृष्ट्वा ता उपधाय यशो लब्धवान् । एवं यजमानोऽपि तदुपधानेन यशो लभते ॥

इष्टकासंख्यां विधत्ते—

" पञ्चोप दधाति पाङ्क्तः पुरुषो यावानेव पुरुषस्तस्मिन्यशो दधाति " [सं० का० ५ प्र० ३ अ० १०] इति ।

हस्तपादशिरोभिः पञ्चभिरवयवैः पुरुषस्य पाङ्क्तत्वम् ॥

अत्र विनियोगसंग्रहः—

बृहद्विश्वप्रजेत्येता विश्वज्योतिष ईरिताः ।
पुरो वृष्टिसनीः पञ्च ह्यग्नेः संयानिकाष्टकम् ॥ १ ॥
सल्यादित्येष्टका अष्टावृचे पञ्च घृतेष्टकाः ।
यशः पञ्च यशोदाः स्युः सादयाम्यनुषज्यते ॥
षष्ठानुवाके संप्रोक्ताश्चतुस्त्रिंशत्तु मन्त्रकाः ॥ २ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे चतुर्थप्रपाठके षष्ठोऽनुवाकः ॥ ६ ॥

(अथ चतुर्थाष्टके चतुर्थप्रपाठके सप्तमोऽनुवाकः ।)

भूयस्कृदसि वरिवस्कृदसि प्राच्यस्यूर्ध्वाऽस्यन्तरिक्षसदस्यन्तरिक्षे सीदाप्सुषदसि श्येनसदसि गृध्रसदसि सुपर्णसदसि नाकसदसि पृथिव्यास्त्वा द्रविणे सादयाम्यन्तरिक्षस्य त्वा

द्रविणे सादयामि दिवस्त्वा द्रविणे सादयामि दिशां त्वा द्रविणे सादयामि द्रविणोदां त्वा द्रविणे सादयामि प्राणं मे पाह्यपानं मे पाहि व्यानं मे (१) पाह्यायुर्मे पाहि विश्वायुर्मे पाहि सर्वायुर्मे पाह्यग्ने यत्ते परꣳ हृन्नाम तावेहि सꣳरभावहै पाञ्चजन्येष्वप्येध्यग्ने यावा अयावा एवा ऊमाः सब्दः सगरः सुमेकः (२) ॥

(व्यानं मे द्वात्रिꣳशच्च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके चतुर्थप्रपाठके सप्तमोऽनुवाकः ॥ ७ ॥

(अथ चतुर्थाष्टके चतुर्थप्रपाठके सप्तमोऽनुवाकः ।)

भूयस्कृदितिं भूयः—कृत् । असि । वरिवस्कृदितिं वरिवः—कृत् । असि । प्राचीं । असि । ऊर्ध्वा । असि । अन्तरिक्षसदित्यंन्तरिक्ष—सत् । असि । अन्तरिक्षे । सीद । अप्सुषदित्यंप्सु—सत् । असि । श्येनसदितिं श्येन—सत् । असि । गृध्रसदितिं गृध्र—सत् । असि । सुपर्णसदितिं सुपर्ण—सत् । असि । नाकसदितिं नाक—सत् । असि । पृथिव्याः । त्वा । द्रविणे । सादयामि । अन्तरिक्षस्य । त्वा । द्रविणे । सादयामि । दिवः । त्वा ।

द्रविणे । सादयामि । दिशाम् । त्वा । द्रविणे । सादयामि । द्रविणोदामितिं द्रविणः—दाम् । त्वा । द्रविणे । सादयामि । प्राणमितिं प्र—अनम् । मे । पाहि । अपानमित्यंप—अनम् । मे । पाहि । व्यानमितिं वि—अनम् । मे (१) । पाहि । आयुः । मे । पाहि । विश्वायुरितिं विश्व—आयुः । मे । पाहि । सर्वायुरितिं सर्व—आयुः । मे । पाहि । अग्ने । यत् । ते । परम् । हृत् । नाम । तौ । एतिं । इहि । समितिं । रभावहै । पाञ्चजन्येष्विति पाञ्च—जन्येषु । अपीतिं । एधि । अग्ने । यावाः । अयावाः । एवाः । ऊमाः । सब्दः । सगरः । सुमेक इतिं सु—मेकः (२) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके चतुर्थप्रपाठके सप्तमोऽनुवाकः ॥ ७ ॥

(अथ चतुर्थकाण्डे चतुर्थप्रपाठके सप्तमोऽनुवाकः ।)

षष्ठेऽनुवाके विश्वज्योतिरादय इष्टका उक्ताः । अथ सप्तमे भूयस्कृदादय इष्टका उच्यन्ते ।

कल्पः—" भूयस्कृदसीति पञ्च भूयस्कृतः " इति ॥

पाठस्तु—

भूयस्कृदसि वरिवस्कृदसि प्राच्यस्यूर्ध्वाऽस्यन्तरिक्षसदस्यन्तरिक्षे सीद, इति ।

हे इष्टके त्वं भूयो बाहुल्यं करोतीति भूयस्कृत् । तथाविधाऽसि । एवमुत्तरत्रापि योज्यम् । वरिवो भूमेः पूज्यत्वं करोतीति वरिवस्कृत् । स्पष्टमन्यत् ॥

हृच्छब्दवाच्यं पापहारि स्वरूपं यत्तदेवाग्नेः प्रियं स्थानम् ॥

मध्यभागे सꣳ रभावहा इत्यस्य तात्पर्यं दर्शयति—

" तावेहि सꣳ रभावहा इत्याह व्येवैनेन परि धत्ते " [सं० का० ५ प्र० ३ अ० ११] इति ।

सहानुष्ठानप्रार्थने सत्य(त्ये)नेनाग्निना स्वस्य परिधानं प्रावरणं विशेषेण कृतं भवति ॥

तृतीयभागे पाञ्चजन्यशब्दार्थं दर्शयति—

" पाञ्चजन्येष्वप्येध्यग्न इत्याहैष वा अग्निः पाञ्चजन्यो यः पञ्चचितीकस्तस्मादेवमाह " [सं० का० ५ प्र० ३ अ० ११] इति ।

कल्पः—" यावा अयावा इति सप्तर्तव्याः " इति ॥

पाठस्तु—

यावा अयावा एवा ऊमाः
सब्दः सगरः सुमेकः॥, इति ॥

यावाद्याः षट्शब्दा वसन्ताद्यृतुवाचिनः । सुमेकशब्दः संवत्सरवाची । हे इष्टके त्वं तद्रूपाऽसीति योज्यम् ॥

एतन्मन्त्रसाध्यमुपधानं विधत्ते—

" ऋतव्या उप दधात्येतद्वा ऋतूनां प्रियं धाम यदृतव्या ऋतूनामेव प्रियं धामाव रुन्धे सुमेक इत्याह संवत्सरो वै सुमेकः संवत्सरस्यैव प्रियं धामोपाऽऽप्नोति " [सं० का० ५ प्र० ३ अ० ११] इति ।

एतद्यावादिशब्दानामृतुसंबन्धित्वात्तैरुपधेया इष्टका अप्यृतव्या इत्युच्यन्ते ॥

अत्र विनियोगसंग्रहः—

भूयो भूयस्कृतः पञ्च पञ्चाप्स्वित्यग्निरूपकाः ।
पृथि पञ्च द्रविणोदाः प्राणमायुष्यकास्तु षट् ॥ १ ॥
अग्नेऽग्नेर्हृदयं प्रोक्तं यावाः सप्त ऋतव्यकाः ।
अनुवाके सप्तमेऽस्मिन्नेकोनत्रिंशदीरिताः ॥ २ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे चतुर्थप्रपाठके
सप्तमोऽनुवाकः ॥ ७ ॥

(अथ चतुर्थाष्टके चतुर्थप्रपाठकेऽष्टमोऽनुवाकः ।)

अग्निना विश्वाषाट्सूर्येण स्वराट्क्रत्वा शचीपतिर्ऋषभेण त्वष्टा यज्ञेन मघवान्दक्षिणया सुवर्गो मन्युना वृत्रहा सौहार्द्येन तनूधा अन्नेन गयः पृथिव्याऽसनोदृग्भिरन्नादो वषट्कारेणर्धः साम्ना तनूपा विराजा ज्योतिष्मान् ब्रह्मणा सोमपा गोभिर्यज्ञं दाधार क्षत्त्रेण मनुष्यानश्वेन च रथेन च वज्रर्तुभिः प्रभुः संवत्सरेण परिभूस्तपसाऽनाधृष्टः सूर्यः सन्तनूभिः (१) ॥

(अग्निनैकान्नपञ्चाशत् ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके
चतुर्थप्रपाठकेऽष्टमोऽनुवाकः ॥ ८ ॥

(अथ चतुर्थाष्टके चतुर्थप्रपाठकेऽष्टमोऽनुवाकः ।)

अग्निना । विश्वाषाट् । सूर्येण । स्वराडिति स्व—राट् । क्रत्वा । शचीपतिः । ऋषभेण । त्वष्टा । यज्ञेन । मघवानिति मघ—वान् । दक्षिणया । सुवर्ग इति सुवः—गः । मन्युना । वृत्रहेति वृत्र—हा । सौहार्द्येन । तनूधा इति तनू—धाः । अन्नेन । गयः । पृथिव्या । असनोत् । ऋग्भिरित्यृक्—भिः ।

अन्नाद इत्यन्न—अदः । वषट्कारेणेति वषट्—कारेणं । ऋद्धः । साम्ना । तनूपा इति तनू—पाः । विराजेति वि—राजा । ज्योतिष्मान् । ब्रह्मणा । सोमपा इति सोम—पाः । गोभिः । यज्ञम् । दाधार । क्षत्रेण । मनुष्यान् । अश्वेन । च । रथेन । च । वज्री । ऋतुभिरित्यृतु—भिः । प्रभुरिति प्र—भुः । संवत्सरेणेति सं—वत्सरेण । परिभूरिति परि—भूः । तपसा । अनाधृष्ट इत्यना—धृष्टः । सूर्यः । सन् । तनूभिः (१) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके चतुर्थप्रपाठकेऽष्टमोऽनुवाकः ॥ ८ ॥

(अथ चतुर्थकाण्डे चतुर्थप्रपाठकेऽष्टमोऽनुवाकः ।)

सप्तमेऽनुवाके भूयस्कृदाद्या इष्टका उक्ताः । अथाष्टम इन्द्रतन्वाख्या इष्टका उच्यन्ते ।

कल्पः—" अग्निना विश्वाषाडिति द्वाविंशतिमिन्द्रतनूः " इति ॥

पाठस्तु—

अग्निना विश्वाषाट्सूर्येण स्वराट्क्रत्वा शचीपतिर्ऋषभेण त्वष्टा यज्ञेन मघवान्दक्षिणया सुवर्गो मन्युना वृत्रहा सौहार्देन तनूधा अन्नेन गयः पृथिव्याऽसनोद्गिरन्नादो वषट्कारेणर्धः साम्ना तनूपा विराजा ज्योतिष्मान्ब्रह्मणा सोमपा गोभिर्यज्ञं दाधार क्षत्रेण मनुष्यान-

श्येन च रथेन च वज्र्यृतुभिः प्रभुः संवत्सरेण परिभूस्तपसाऽनाधृष्टः सूर्यः सन्तनूभिः ।,इति ॥

विश्वं सहते तत्पालनमयासमङ्गी करोतीति विश्वाषाट् । अग्निना सह विश्वाषाड्य इन्द्रो हे इष्टके तद्रूपा त्वमसि । एवं सर्वत्र योज्यम् । सूर्येण सह स्वतो राजत इति स्वराडिन्द्रः । क्रत्वा ज्योतिष्टोमादिसौढकर्मणा सहितः शच्या देव्याः पतिरिन्द्रः । ऋषभेण वर्षित्रा धर्मेण सह त्वष्टा रूपकृदिन्द्रः । यज्ञेनाल्पेन पाकयज्ञेन सहितो मघवानन्नवानिन्द्रः । दक्षिणया गवादिरूपया सुवर्गः स्वर्गलोकात्मक इन्द्रः । मन्युना क्रोधेन सह वृत्रहा शत्रुघातीन्द्रः । सुहृदो भावः सौहार्द्यं स्नेहातिशयस्तेन सहितस्तनूधाः शरीरधारीन्द्रः । अन्नेन सहितो गयो गृहविशेषरूप इन्द्रः । पृथिव्या सहासनोद्वय्यादिदानं कृतवानिन्द्रः । ऋग्भिर्मन्त्रविशेषैः सहितोऽन्नादो हविर्लक्षणस्यान्नस्य भोक्तेन्द्रः । वषट्कारेण हविष्प्रदानेन हेतुना सह ऋद्धः समृद्ध इन्द्रः । साम्ना गीयमानेन मन्त्रेण सह तनूपाः शरीरपालक इन्द्रः । विराजा दशाक्षरच्छन्दसा सह ज्योतिष्मान्प्रकाशवानिन्द्रः । ब्रह्मणा मुख्येन ऋत्विजा मन्त्रेण वा सह सोमपाः सोमपानस्य कर्तेन्द्रः । गोभिर्दक्षिणारूपाभिः सह यज्ञं दाधार यज्ञधारक इन्द्रः । क्षत्रेण राज्ञा सह मनुष्यान्दाधारेत्यनुवर्तते । तथा च मनुष्यधारक इन्द्रः । योऽयमश्वो यश्च रथस्ताभ्यामुभाभ्यां सह वज्री वज्रयुक्त इन्द्रः । ऋतुभिर्वसन्तादिभिः सह प्रभुः फलदानसमर्थ इन्द्रः । संवत्सरेण कालरूपेण सह परिभूः परितो व्याप्तवानिन्द्रः । तपसाऽशनवर्जनधनदानादिरूपेणानाधृष्टः केनाप्यतिरस्कृत इन्द्रः । तनूभिर्द्वादशमूर्तिभिः सह सूर्यः सन्सूर्यरूपो भूत्वेन्द्रो वर्तते । हे इष्टके तद्रूपा त्वमसि ॥

एतैर्मन्त्रैः साध्यमुपधानं विधत्ते—

"देवासुराः संयत्ता आसन्ते न व्यजयन्त स एता इन्द्रस्तनूरपश्यत्ता उपाधत्त ताभिर्वै स तनुवमिन्द्रियं वीर्यमात्मन्नधत्त ततो देवा अभवन्पराऽसुरा यदिन्द्रतनूरुपदधाति तनुवमेव ताभिरिन्द्रियं वीर्यं यजमान आत्मन्धत्तेऽथो सेन्द्रमेवाग्निꣳ सतनुं चिनुते भवत्यात्मना पराऽस्य भ्रातृव्यो भवति " [सं० का० ५ प्र० ४ अ० १] इति ।

देवानामसुराणां च सङ्ग्रामे प्राप्ते दुर्बला देवा विजयं न प्राप्ताः । तदानीं विजयाय स इन्द्र एतास्तनूनामिका इष्टका दृष्ट्वा तदुपधानेन शरीरपुष्टिमि-

---

१ च. °था मं° ।

न्द्रियपाटवं शौर्यपाटवं च धृतवान्। ततो देवानां जयोऽसुराणां पराभवश्चाऽऽसीत्। ततो यजमानोऽपीन्द्रतनूनामुपधानेन तथाविधो भवति। विश्वाषाडित्यादिशब्दा इन्द्रतनूविशेषवाचकाः। तद्युक्तैर्मन्त्रैरुपधेया इष्टका इन्द्रतनवः॥

अत्र विनियोगसंग्रहः—

अग्नीन्द्रतनुनामानो द्वाविंशतिरितीरिताः॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे चतुर्थप्रपाठकेऽष्टमोऽनुवाकः॥ ८॥

(अथ चतुर्थाष्टके चतुर्थप्रपाठके नवमोऽनुवाकः।)

प्रजापतिर्मनसाऽन्धोऽच्छेतो धाता दीक्षायाꣳ सविता भृत्यां पूषा सोमक्रयण्यां वरुण उपनद्धोऽसुरः क्रीयमाणो मित्रः क्रीतः शिपिविष्ट आसादितो नरंधिषः प्रोह्यमाणोऽधिपतिरागतः प्रजापतिः प्रणीयमानोऽग्निराग्नीध्रे बृहस्पतिराग्नीध्रात्प्रणीयमान इन्द्रो हविर्धानेऽदितिरासादितो विष्णुरुपावह्रियमाणोऽथर्वोपोत्तो यमोऽभिषुतोऽपूतपा आधूयमानो वायुः पूयमानो मित्रः क्षीरश्रीर्मन्थी संकुश्रीर्वैश्वदेव उन्नीतो रुद्र आहुतो वायुरावृत्तो नृचक्षाः प्रतिख्यातो भक्ष आगतः पितॄणां नाराशꣳसोऽसुरात्तः सिन्धुरवभृथमवप्रयन्त्समुद्रोऽवगतः सलिलः प्रप्लुतः सुवरुदचं गतः (१)॥

---

१ च. 'नो मन्त्रा द्वाविंशती'।

(रुद्र एकविꣳशतिश्च।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके चतुर्थप्रपाठके नवमोऽनुवाकः॥ ९॥

(अथ चतुर्थाष्टके चतुर्थप्रपाठके नवमोऽनुवाकः।)

प्रजापतिरिति प्रजा—पतिः। मनसा। अन्धः। अच्छेत इत्यच्छ—इतः। धाता। दीक्षायाम्। सविता। भृत्याम्। पूषा। सोमक्रयण्यामिति सोम—क्रयण्याम्। वरुणः। उपनद्ध इत्युप—नद्धः। असुरः। क्रीयमाणः। मित्रः। क्रीतः। शिपिविष्ट इति शिपि—विष्टः। आसादित इत्या—सादितः। नरंधिषः। प्रोह्यमाण इति प्र—उह्यमानः। अधिपतिरित्यधि—पतिः। आगत इत्या—गतः। प्रजापतिरिति प्रजा—पतिः। प्रणीयमान इति प्र—नीयमानः। अग्निः। आग्नीध्र इत्याग्नि—इध्रे। बृहस्पतिः। आग्नीध्रादित्याग्नि—इध्रात्। प्रणीयमान इति प्र—नीयमानः। इन्द्रः। हविर्धान इति हविः—धाने। अदितिः। आसादित इत्या—सादितः। विष्णुः। उपावह्रियमाण इत्युप—अवह्रियमाणः। अथर्वा। उपोत्त इत्युप—उत्तः। यमः। अभिषुत इत्यभि—सुतः। अपूतपा इत्यपूत—पाः। आधू-

यमान् इत्या—धूयमानः । वायुः । पूयमानः । मित्रः । क्षीरश्रीरिति क्षीर—श्रीः । मन्थी । सक्तुश्रीरिति सक्तु—श्रीः । वैश्वदेव इति वैश्व—देवः । उन्नीत इत्युत्—नीतः । रुद्रः । आहुत इत्या—हुतः । वायुः । आवृत्त इत्या—वृत्तः । नृचक्षा इति नृ—चक्षाः । प्रतिख्यात इति प्रति—ख्यातः । भक्षः । आगत इत्या—गतः । पितृणाम् । नाराशꣳसः । असुः । आत्तः । सिन्धुः । अवभृथमित्यव—भृथम् । अवप्रयन्नित्यव—प्रयन् । समुद्रः । अवगत इत्यव—गतः । सलिलः । प्रप्लुत इति प्र—प्लुतः । सुवः । उदृचमित्युत्—ऋचम् । गतः (१) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके चतुर्थप्रपाठके नवमोऽनुवाकः ॥ ९ ॥

(अथ चतुर्थकाण्डे चतुर्थप्रपाठके नवमोऽनुवाकः ।)

अष्टमेऽनुवाक इन्द्रतन्वाख्या इष्टका उक्ताः । अथ नवमे यज्ञतन्वाख्या इष्टका उच्यन्ते ।

कल्पः—" प्रजापतिर्मनसाऽन्धोऽच्छेत इति त्रयस्त्रिंशतं यज्ञतनूः " इति ॥

पाठस्तु—

प्रजापतिर्मनसाऽन्धोऽच्छेतो धाता दीक्षायाꣳ सविता भृत्यां पूषा सोमक्रयण्यां वरुण उपनद्धोऽसुरः क्रीयमाणो मित्रः क्रीतः शिपिविष्ट

आसादितो नरंधिषः प्रोह्यमाणोऽधिपतिरागतः प्रजापतिः प्रणीयमानोऽग्निराग्नीध्रे बृहस्पतिराग्नीध्रात्प्रणीयमान इन्द्रो हविर्धानेऽदितिरासादितो विष्णुरुपावह्रियमाणोऽथर्वोपोत्तो यमोऽभिषुतोऽपूतपा आधूयमानो वायुः पूयमानो मित्रः क्षीरश्रीर्मन्थी सक्तुश्रीर्वैश्वदेव उन्नीतो रुद्र आहुतो वायुरावृत्तो नृचक्षाः प्रतिख्यातो भक्ष आगतः पितृणां नाराशꣳसोऽसुरात्तः सिन्धुरवभृथमवप्रयन्त्समुद्रोऽवगतः सलिलः प्रप्लुतः सुवरुदृचं गतः ।, इति ।

अत्र संकल्पमारभ्य समाप्तिपर्यन्तं ये सोमयागास्ते यज्ञपुरुषस्य तनुविशेषाः । तद्रूपत्वमिष्टकानामुच्यते । यो यजमानोऽस्त्यसौ मनसाऽन्धोऽन्नं तेन तद्भेतुर्यज्ञ उपलक्ष्यते, यज्ञमच्छेतः प्राप्तुं गतः, मनसा यज्ञं करिष्यामीति संकल्पितवानित्यर्थः । सोऽयं संकल्पदशामापन्नो यज्ञस्य विग्रहः प्रजापतिनामकः । हे इष्टके तद्रूपा त्वमसि । दीक्षायां यो विग्रहो यज्ञसंबन्धी स धाता धातृसदृशमूर्तिः । हे इष्टके तद्रूपा त्वमसि । एवं सर्वत्र योज्यम् । भृतिर्यज्ञभिक्षा तस्यां सवितृसमानमूर्तिर्यज्ञतनुः । सोमक्रयण्येकहायनी गौस्तस्यां पूषसमानो यज्ञविग्रहः । उपनद्धो वस्त्रेण बद्धो यः सोमः स वरुणसमानशरीरो यज्ञपुरुषः । क्रीयमाणो यः सोमः सोऽयमसुर इन्द्रसमानविग्रहः, शत्रूनस्यति क्षिपतीत्यसुरः, असून्प्राणात्राति ददातीति वाऽसुरः । यः क्रीतः सोमः सोऽयं मित्रसमानविग्रहो यज्ञः । आसादितो यजमानस्योरौ यः स्थापितः सोमः सोऽयं शिपिविष्टो विष्णुसमानविग्रहो यज्ञः । प्रोह्यमाणः शकटेन प्राग्वंशं प्रति नीयमानो यः सोमः सोऽयं नरंधिषोऽग्निसमानविग्रहो यज्ञः, नरैर्यजमानैर्धीयत आधीयत इति नरंधिषोऽग्निः । आगतः प्राग्वंश आसन्दीं प्रति समागतो यः सोमः सोऽयमधिपतिरधिकं पालको य आहवनीयस्तत्समानविग्रहः । प्रणीयमानः प्राग्वंशादाग्नीध्रं प्रति नीयमानो यः सोमः सोऽयं प्रजापतिसमानविग्रहः । आग्नीध्रेऽवस्थितो यः सोमः सोऽयमग्निसमानविग्रहः । आग्नीध्राद्धविर्धानं प्रति नीयमानो यः सोमः स बृहस्पतिसमानविग्रहः । हविर्धाने प्रविष्ट इन्द्रसमानविग्रहः । आसादित आसन्द्यां स्थापितः सोमोऽदितिसमानविग्रहः ।

उपावहियमाणः शकटादधिषवणफलकस्थग्रावस्त्ववरोप्यमाणः सोमो विष्णुसमानविग्रहः । उपोत्तो वसतीवरीभिरद्भिः क्लेदितः सोमोऽथर्वाऽथर्वक्रषिसमानविग्रहः । [अभिषुतश्चूर्णितः सोमो यमसमानविग्रहः ।] आधूयमानोऽदाभ्यग्रहे सोमांशुभिश्चाल्यमानोऽपूतं मूत्राद्युपहतं देशं पाति शोषयति विशेषेण शुद्धं करोतीत्यपूतपा आदित्यः । पूयमानो दशापवित्रेण शोध्यमानः सोमो वायुर्वायुसमानविग्रहः । क्षीरश्रीर्मैत्रावरुणग्रहे पयसा मिश्रितः सोमो मित्रसमानविग्रहः । सक्तुश्रीर्मन्थिग्रहे सक्तुभिर्मिश्रितः सोमो मन्थी मन्थिग्रहदेवतारूपेन्द्रसमानविग्रहः । उन्नीतश्चमसेषु पूरितः सोमो वैश्वदेवो विश्वैर्देवैः समानविग्रहः । आहुतो वह्नौ प्रक्षिप्तः सोमो रुद्रसमानविग्रहः । आहृत्तो भक्षार्थं सदस्थानेतुं प्रतिनिवृत्तः सोमो वायुसमानविग्रहः । प्रतिख्यातो भक्षार्थमेवेक्षितः सोमो नृचक्षा मनुष्यदृष्टिसमानविग्रहः । आगत आस्ये प्रवेशितः सोमो भक्षो वैश्वानरसमानविग्रहः । भक्षयतीति व्युत्पत्त्या भक्षशब्दस्तद्वाची । नाराशंसो भक्षितशेषः सन्पुनर्वसतीवरीभिराप्यायितः सोमः पितृसमानविग्रहः । आत्तोऽवभृथगमनार्थं स्वीकृतः सोमोऽसुः प्राणदेवतासमानविग्रहः । अवभृथमवप्रयन्नवभृथकर्मार्थं मार्गे गच्छन्सोमः सिन्धुर्नदीदेवतासमानविग्रहः । अवगतोऽवभृथप्रदेशं प्राप्तः सोमः समुद्रदेवतासमानविग्रहः । प्लुतोजले प्रक्षिप्तः सोमो जलदेवतासमानविग्रहः । उदचमुत्तमामृचं समाप्तिरूपं गतः सोमः स्वर्गनिवासिदेवतासमानविग्रहः ॥

एतैर्मन्त्रैः साध्यमुपधानं विधत्ते—

"यज्ञो देवेभ्योऽपाक्रामत्तमवरुधं नाशक्नुवन्त एता यज्ञतनूरपश्यन्ता उपादधत ताभिर्वै ते यज्ञमवारुन्धत यद्यज्ञतनूरुपदधाति यज्ञमेव ताभिर्यजमानोऽवरुन्धे" [सं० का० ५ प्र० ४ अ० १] इति ।

केनापि निमित्तेन देवेभ्योऽपरक्तो यज्ञोऽन्यत्रागच्छत् । तं यज्ञं देवा अवरोद्धुं नाशक्नुवन् । तदवरोधोपायत्वेन यज्ञतन्वाख्या इष्टका दृष्ट्वा ता उपधाय यज्ञमवारुन्धत । ततो यजमानोऽपि यज्ञतनूभिर्यज्ञं प्राप्नोति । यज्ञतनुप्रतिपादकशब्दयुक्तैर्मन्त्रैरुपधेया इष्टका यज्ञतनवः ॥

इष्टकासंख्यां विधत्ते—

" त्रयस्त्रिꣳशतमुप दधाति त्रयस्त्रिꣳशद्वै देवता देवता एवाव रुन्धेऽथो सात्मानमेवाग्निꣳ सतनुं चिनुते " [सं० का० ५ प्र० ४ अ० १] इति ।

हविर्भाजां देवतानामियं संख्या त्रिꣳशत्त्रयश्चेति मन्त्रे समाम्नाता । अतः

१ ख. च. 'र्वमहर्पिस' । २ ख. च. 'र्थमपेक्षि' । ङ. 'र्थमवे' ।

संख्यया तावतीर्देवताः प्राप्नोति । अपि च तनूपधानेन सशरीरमेवाग्निं चितवान्भवति ॥

एतद्वेदनं प्रशंसति—

" सात्माऽमुष्मिँल्लोके भवति य एवं वेद " [सं० का० ५ प्र० ४ अ० १] इति ॥

यदुक्तं सूत्रकारेण—" ज्योतिष्मतीं त्वा सादयामीति द्वादश ज्योतिष्मतीः " इति, तदिदं विधत्ते—

" ज्योतिष्मतीरुप दधाति ज्योतिरेवास्मिन्दधात्येताभिर्वा अग्निश्चितो ज्वलति ताभिरेवैनꣳ समिन्ध उभयोरस्मै लोकयोर्ज्योतिर्भवति " [सं० का० ५ प्र० ४ अ० १] इति ।

ज्योतिष्मतीशब्दयुक्तैर्मन्त्रैरुपधेया इष्टका ज्योतिष्मत्यः । ते च मन्त्रा अरण्यकाण्डे समाम्नाताः । तदुपधानेन ज्योतिः स्थापयति । किं चैताभिश्चितोऽग्निः प्रज्वलति । अतस्ताभिरेवैनमग्निं दीपितवान्भवति । ततोऽस्मै यजमानायोभयोर्लोकयोर्ज्योतिः संपद्यते ॥

अत्र विनियोगसंग्रहः—

प्रजेति यज्ञतनवस्त्रयस्त्रिꣳशत्समीरिताः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे चतुर्थप्रपाठके
नवमोऽनुवाकः ॥ ९ ॥

(अथ चतुर्थाष्टके चतुर्थप्रपाठके दशमोऽनुवाकः ।)

कृत्तिका नक्षत्रमग्निर्देवताऽग्ने रुचः स्थ प्रजापतेर्धातुः सोमस्यर्चे त्वा रुचे त्वा द्युते त्वा भासे त्वा ज्योतिषे त्वा रोहिणी नक्षत्रं प्रजापतिर्देवता मृगशीर्षं नक्षत्रꣳ सोमो देवताऽऽर्द्रा नक्षत्रꣳ रुद्रो देवता पुनर्वसू नक्षत्रमदितिर्देवता तिष्यो नक्षत्रं बृहस्पतिर्देवताऽऽ-

श्रेषा नक्षत्रꣳ सर्पा देवता मघा नक्षत्रं पितरो देवता फल्गुनी नक्षत्रम् (१) अर्यमा देवता फल्गुनी नक्षत्रं भगो देवता हस्तो नक्षत्रꣳ सविता देवता चित्रा नक्षत्रमिन्द्रो देवता स्वाती नक्षत्रं वायुर्देवता विशाखे नक्षत्रमिन्द्राग्नी देवताऽनूराधा नक्षत्रं मित्रो देवता रोहिणी नक्षत्रमिन्द्रो देवता विचृतौ नक्षत्रं पितरो देवताऽषाढा नक्षत्रमापो देवताऽषाढा नक्षत्रं विश्वे देवा देवता श्रोणा नक्षत्रं विष्णुर्देवता श्रविष्ठा नक्षत्रं वसवः (२) देवता शतभिषङ्नक्षत्रमिन्द्रो देवता प्रोष्ठपदा नक्षत्रमज एकपाद्देवता प्रोष्ठपदा नक्षत्रमहिर्बुध्न्यो देवता रेवती नक्षत्रं पूषा देवताऽश्वयुजौ नक्षत्रमश्विनौ देवताऽपभरणीर्नक्षत्रं यमो देवता पूर्णा पश्चाद्यत्ते देवा अदधुः (३)।

(फल्गुनी नक्षत्रं वसवस्त्रयस्त्रिꣳशच ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके चतुर्थप्रपाठके दशमोऽनुवाकः ॥ १० ॥

(अथ चतुर्थाष्टके चतुर्थप्रपाठके दशमोऽनुवाकः ।)

कृत्तिकाः । नक्षत्रम् । अग्निः । देवता । अग्नेः ।

रुचः । स्थ । प्रजापतेरिति प्रजा—पतेः । धातुः । सोमस्य । रुचे । त्वा । रुचे । त्वा । द्युते । त्वा । भासे । त्वा । ज्योतिषे । त्वा । रोहिणी । नक्षत्रम् । प्रजापतिरिति प्रजा—पतिः । देवता । मृगशीर्षमिति मृग—शीर्षम् । नक्षत्रम् । सोमः । देवता । आर्द्रा । नक्षत्रम् । रुद्रः । देवता । पुनर्वसू इति पुनः—वसू । नक्षत्रम् । अदितिः । देवता । तिष्यः । नक्षत्रम् । बृहस्पतिः । देवता । आश्रेषा इत्या—श्रेषाः । नक्षत्रम् । सर्पाः । देवता । मघाः । नक्षत्रम् । पितरः । देवता । फल्गुनी इति । नक्षत्रम् (१) । अर्यमा । देवता । फल्गुनी इति । नक्षत्रम् । भगः । देवता । हस्तः । नक्षत्रम् । सविता । देवता । चित्रा । नक्षत्रम् । इन्द्रः । देवता । स्वाती । नक्षत्रम् । वायुः । देवता । विशाखे इति वि—शाखे । नक्षत्रम् । इन्द्राग्नी इतीन्द्र—अग्नी । देवता । अनूराधा इत्यनु—राधाः । नक्षत्रम् । मित्रः । देवता । रोहिणी । नक्षत्रम् । इन्द्रः । देवता । विचृताविति वि—चृतौ । नक्षत्रम् । पितरः । देवता । अषाढाः । नक्षत्रम् । आपः । देवता । अषाढाः । नक्षत्रम् । विश्वे । देवाः । देवता ।

श्रोणा । नक्षत्रम् । विष्णुः । देवता । श्रविष्ठाः । नक्षत्रम् । वसवः (२) । देवता । शतभिषागिति शत—भिषक् । नक्षत्रम् । इन्द्रः । देवता । प्रोष्ठपदा इति प्रोष्ठ—पदाः । नक्षत्रम् । अजः । एकपादित्येकं—पात् । देवता । प्रोष्ठपदा इति प्रोष्ठ—पदाः । नक्षत्रम् । अहिः । बुध्निर्यः । देवता । रेवती । नक्षत्रम् । पूषा । देवता । अश्वयुजावित्यश्व—युजौ । नक्षत्रम् । अश्विनौ । देवता । अपभरणीरित्यप—भरणीः । नक्षत्रम् । यमः । देवता । पूर्णा । पश्चात् । यत् । ते । देवाः । अदधुः (३) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके चतुर्थप्रपाठके दशमोऽनुवाकः ॥ १० ॥

(अथ चतुर्थकाण्डे चतुर्थप्रपाठके दशमोऽनुवाकः ।)

नवमेऽनुवाके यज्ञतन्वाख्या इष्टका उक्ताः । अथ दशमे नक्षत्रेष्टका उच्यन्ते ।

कल्पः—" पूर्णा पश्चादिति पौर्णमासीं पुरस्तादुपधाय कृत्तिका नक्षत्रमिति नक्षत्रेष्टकाः पुरस्तात्प्रतीचीरसंस्पृष्टाः पूर्वां पूर्वामुपधायापरामपरामा विशाखाभ्यां दाक्षिणेन स्वयमातृण्णां रीतिं प्रतिपादयति, यत्ते देवा अदधुरित्यमावास्यां पश्चादुपधायावशिष्टानां पूर्वां पूर्वामाऽपभरणीभ्य उत्तरेण स्वयमातृण्णां रीतिं प्रतिपादयति, पौर्णमासीमन्तत ऋचे त्वा रुचे त्वेति सर्वासु नक्षत्रेष्टकास्वनुषजति " इति ।

येयं स्वयमातृण्णेष्टका तस्याः पूर्वस्यां (वीं) दिशमारभ्य प्रदक्षिणावृत्त्येष्टका उपदध्यात् । तत्र येष्टका पौर्णमास्याख्या पूर्वस्यां दिश्युपधेया तां सर्वासामन्तत उपदध्यात् ॥

तत्र प्रथममन्त्रपाठस्तु—

कृत्तिका नक्षत्रमग्निर्देवताऽग्ने रुचः स्थ प्रजापतेर्धातुः सोमस्यर्चे त्वा रुचे त्वा द्युते त्वा भासे त्वा ज्योतिषे त्वा , इति ।

अम्बा दुला नितत्निरित्यादिका ज्योतीरूपा या देवता दिव्या भासन्ते ताः कृत्तिकाः । तासां समुदायरूपमेकं नक्षत्रं, तस्य च नक्षत्रस्याग्निर्देवता स्वामित्वेन वर्तते । हे कृत्तिका यूयमग्नेः प्रजापतेर्धातुः सोमस्य च संबन्धिन्यो रुचो दीप्तयः स्थ । प्रजापतेर्धातुश्च पालकत्वोत्पादकत्वाकारेण भेदः । उक्तदेवतारूपे हे इष्टके, ऋचे स्तुतिरूपमन्त्रसिध्यर्थं त्वामुपदधामि । तथा रुचे शारीरकान्तिसिध्यर्थं त्वामुपदधामि । द्युद्भाज्योतिःशब्दा अग्निसूर्यचन्द्राणां दीप्तिवाचकाः । तत्तत्सिध्यर्थं त्वामुपदधामि । एवमुत्तरेष्वपि नक्षत्रमन्त्रेषु योजनीयम् ॥

द्वितीयनक्षत्रमन्त्रमारभ्य षड्विंशतिनक्षत्रमन्त्राणां पाठस्तु—

रोहिणी नक्षत्रं प्रजापतिर्देवता मृगशीर्षं नक्षत्रꣳ सोमो देवताऽऽर्द्रा नक्षत्रꣳ रुद्रो देवता पुनर्वसू नक्षत्रमदितिर्देवता तिष्यो नक्षत्रं बृहस्पतिर्देवताऽऽश्रेषा नक्षत्रꣳ सर्पा देवता मघा नक्षत्रं पितरो देवता फल्गुनी नक्षत्रमर्यमा देवता फल्गुनी नक्षत्रं भगो देवता हस्तो नक्षत्रꣳ सविता देवता चित्रा नक्षत्रमिन्द्रो देवता स्वाती नक्षत्रं वायुर्देवता विशाखे नक्षत्रमिन्द्राग्नी देवताऽनूराधा नक्षत्रं मित्रो देवता रोहिणी नक्षत्रमिन्द्रो देवता विचृतौ नक्षत्रं पितरो देवताऽषाढा नक्षत्रमापो देवताऽषाढा नक्षत्रं विश्वे देवा देवता श्रोणा नक्षत्रं विष्णु-

(नक्षत्रेष्टकाभिधानम्)

देवता श्रविष्ठा नक्षत्रं वसवो देवता शतभि-
षङ्नक्षत्रमिन्द्रो देवता प्रोष्ठपदा नक्षत्रमज
एकपादेवता प्रोष्ठपदा नक्षत्रमहिर्बुध्न्यो देवता
रेवती नक्षत्रं पूषा देवताऽश्वयुजौ नक्षत्रमश्विनौ
देवताऽपभरणीर्नक्षत्रं यमो देवता , इति ।

अत्र रोहिण्यादयो नक्षत्रविशेषा ज्योतिःशास्त्राभिज्ञेषु तदीयव्यवहाराभिज्ञेषुच प्रसिद्धाः । तिष्यः पुष्यः । द्वितीया रोहिणी ज्येष्ठा । विचृतश (च्छ)-ब्दो मूलवाची । ज्योतिर्मण्डलद्विरूपतायां द्विवचनम् । पितृशब्दोऽत्र निर्ऋतिवाची । आधानेन पालनात्पितृत्वम् । श्रोणाशब्दः श्रवणवाची । श्रविष्ठाशब्दो धनिष्ठावाची । शतभिषङ्नक्षत्रस्य वरुणो देवता । स च परमैश्वर्ययोगादिन्द्र इत्युच्यते । प्रोष्ठपदा भाद्रपदाः ॥

अथ पौर्णमास्यमावास्याभिधेययोरिष्टकयोर्यौ मन्त्रौ तयोः प्रतीके दर्शयति—

पूर्णा पश्चाद्यत्ते देवा अदधुः ॥, इति ॥

एतच्चोभयं तृतीयकाण्डस्य पञ्चमप्रपाठकादौ व्याख्यातम् ॥

एतैर्मन्त्रैः साध्यमुपधानं विधत्ते—

" नक्षत्रेष्टका उप दधात्येतानि वै दिवो ज्योतीꣳषि तान्येवाव रुन्धे " [सं० का० ५ प्र० ४ अ० १] इति ।

नक्षत्रशब्दोपेतैर्मन्त्रैरुपधेया इष्टका नक्षत्रेष्टकाः । यानि कृत्तिकादीनि द्युलोकसंबन्धीनि ज्योतींषि अतस्तदु (नेनो) पधानेन तान्येव प्राप्नोति ॥

प्रकारान्तरेण प्रशंसति—

" सुकृतां वा एतानि ज्योतीꣳषि यन्नक्षत्राणि तान्येवाऽऽप्नोत्यथो अनूकाशमेवैतानि ज्योतीꣳषि कुरुते सुवर्गस्य लोकस्यानुख्यात्यै " [सं० का० ५ प्र० ४ अ० १] इति ।

ये शोभनं शास्त्रविहितं पुण्यं कर्म कुर्वन्ति ते सुकृतिनः । तेषामेतानि दिवि दृश्यमानानि नक्षत्ररूपाणि ज्योतींषि । ते हि पुण्यकृतः स्वर्गे गत्वा भासमानविग्रहास्तान्यामुवन्ति । अत एव तदुपधानेन तदीयानि ज्योतींषि प्रामुवन्ति । अपि चैतानि नक्षत्रज्योतींष्यनु तेनोपधानेन किंचित्प्रकाशं करोति । स च प्रकाशः स्वर्गलोकाविर्भावाय संपद्यते ॥

अथोपधाने कंचिद्विशेषं विधत्ते—

१ ख. घ. ङ. च. °त उप°।

(ऋतव्याख्येष्टकाभिधानम्)

" यत्सꣳस्पृष्टा उप दध्याद्वृष्ट्यै लोकमपि दध्यादवर्षुकः पर्जन्यः स्यादसꣳस्पृष्टा उप दधाति वृष्ट्या एव लोकं करोति वर्षुकः पर्जन्यो भवति " [सं० का० ५ प्र० ४ अ० १] इति ।

इष्टकानां परस्परं स्पर्शे सति वृष्टेः स्थानस्याऽऽच्छादितत्वात्पर्जन्यो वृष्टिरहितो भवति । असंस्पर्शे तु तच्छिद्रस्य वृष्टिस्थानत्वान्मेघो वर्षणशीलो भवति॥

उपधाने विशेषान्तरं विधत्ते—

" पुरस्तादन्याः प्रतीचीरुप दधाति पश्चादन्याः प्राचीस्तस्मात्प्राचीनानि च प्रतीचीनानि च नक्षत्राण्या वर्तन्ते " [सं० का० ५ प्र०४अ० १] इति ।

स्वयमातृण्णाया दक्षिणभागे पूर्वां दिशमारभ्य प्रत्यगवसानाः कृत्तिकादिविशाखान्ता इष्टका उपदध्यात् । अनूराधाद्यपभरण्यन्ता इष्टकाः स्वयमातृण्णाया उत्तरभागे प्रतीचीं दिशमारभ्य प्रागवसाना उपदध्यात् । स्वयमातृण्णाया दक्षिणोत्तरभागस्थितयोः पङ्क्त्योर्मध्ये पश्चिमायां दिशि समरूपेणा-मावास्याख्यामिष्टकामुपदध्यात् । स्वयमातृण्णाया दक्षिणोत्तरभागस्थितयोः पङ्क्त्योर्मध्ये पूर्वस्यां दिशि समरूपेण पौर्णमास्याख्यामिष्टकामुपदध्यात् । यस्मादेवं तस्माल्लोकेऽपि नक्षत्राणि गोलकस्यापि दक्षिणे भागे पश्चिमाभिमुखानि, उत्तरभागे तु प्राङ्मुखानीत्येवमावर्तन्ते ॥

अत्र विनियोगसंग्रहः—

कृत्ति नक्षत्रेष्टकाः स्युः सप्तविंशतिरीरिताः ।
ऋचे त्वा सर्वशेषः स्यात्पूर्णा यत्त इति द्वयम् ॥ १ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे चतुर्थप्रपाठके
दशमोऽनुवाकः ॥ १० ॥

(अथ चतुर्थाष्टके चतुर्थप्रपाठक एकादशोऽनुवाकः ।)

मधुश्च माधवश्च वासन्तिकावृतू शुक्रश्च
शुचिश्च ग्रैष्मावृतू नभश्च नभस्यश्च वार्षिका-
वृतू इषश्चोर्जश्च शारदावृतू सहश्च सहस्यश्च

१ क. घ. ङ. °पेऽमा° । २ क. घ. ङ. °पे पौ° ।

हैमन्तिकावृतू तपश्च तपस्यश्च शैशिरावृतू अग्नेरन्तश्लेषोऽसि कल्पेतां द्यावापृथिवी कल्पन्तामाप ओषधीः कल्पन्तामग्नयः पृथङ्मम ज्यैष्ठ्याय सव्रताः (१) । येऽग्नयः समनसोऽन्तरा द्यावापृथिवी शैशिरावृतू अभि कल्पमाना इन्द्रमिव देवा अभि सं विशन्तु संयच्च प्रचेताश्चाग्नेः सोमस्य सूर्यस्योग्रा च भीमा च पितॄणां यमस्येन्द्रस्य ध्रुवा च पृथिवी च देवस्य सवितुर्मरुतां वरुणस्य धर्त्री च धरित्री च मित्रावरुणयोर्मित्रस्य धातुः प्राची च प्रतीची च वसूनाꣳ रुद्राणाम् (२) आदित्यानां ते तेऽधिपतयस्तेभ्यो नमस्ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तं वो जम्भे दधामि सहस्रस्य प्रमा असि सहस्रस्य प्रतिमा असि सहस्रस्य विमा असि सहस्रस्योन्मा असि साहस्रोऽसि सहस्राय त्वेमा मे अग्न इष्टका धेनवः सन्त्वेका च शतं च सहस्रं चायुतं च (३) नियुतं च प्रयुतं चार्बुदं च न्यर्बुदं च समुद्रश्च मध्यं चान्तश्च परार्धश्चेमा मे अग्न इष्टका धेनवः सन्तु षष्टिः

सहस्रमयुतमक्षीयमाणा ऋतस्थाः स्थर्तावृधो घृतश्चुतो मधुश्चुत ऊर्जस्वतीः स्वधाविनीस्ता मे अग्न इष्टका धेनवः सन्तु विराजो नाम कामदुघा अमुत्रामुष्मिँल्लोके (४) ॥

(सव्रता रुद्राणामयुतं च पञ्चचत्वारिꣳशच्च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके चतुर्थप्रपाठक एकादशोऽनुवाकः ॥ ११ ॥

(अथ चतुर्थाष्टके चतुर्थप्रपाठक एकादशोऽनुवाकः ।)

मधुः । च । माधवः । च । वासन्तिकौ । ऋतू इति । शुक्रः । च । शुचिः । च । ग्रैष्मौ । ऋतू इति । नभः । च । नभस्यः । च । वार्षिकौ । ऋतू इति । इषः । च । ऊर्जः । च । शारदौ । ऋतू इति । सहः । च । सहस्यः । च । हैमन्तिकौ । ऋतू इति । तपः । च । तपस्यः । च । शैशिरौ । ऋतू इति । अग्नेः । अन्तःश्लेष इत्यन्तः—श्लेषः । असि । कल्पेताम् । द्यावापृथिवी इति द्यावा—पृथिवी । कल्पन्ताम् । आपः । ओषधीः । कल्पन्ताम् । अग्नयः । पृथक् । मम । ज्यैष्ठ्याय । सव्रता इति स—व्रताः (१) । ये । अग्नयः । समनस इति स—मनसः । अन्तरा । द्यावापृथिवी इति द्यावा—पृथिवी ।

शैशिरौ । ऋतू इति । अभीति । कल्पमानाः ।
इन्द्रम् । इव । देवाः । अभि । समिति । विशन्तु ।
संयदिति सं—यत् । च । प्रचेता इति प्र—चेताः ।
च । अग्नेः । सोमस्य । सूर्यस्य । उग्रा । च । भीमा । च ।
पितॄणाम् । यमस्य । इन्द्रस्य । ध्रुवा । च । पृथिवी । च ।
देवस्य । सवितुः । मरुताम् । वरुणस्य । धर्त्री । च ।
धरित्री । च । मित्रावरुणयोरिति मित्रा—वरुणयोः ।
मित्रस्य । धातुः । प्राची । च । प्रतीची । च । वसूनाम् । रुद्राणाम् (२) । आदित्यानाम् । ते । ते ।
अधिपतय इत्यधि—पतयः । तेभ्यः । नमः । ते ।
नः । मृडयन्तु । ते । यम् । द्विष्मः । यः । च । नः
द्वेष्टि । तम् । वः । जम्भे । दधामि । सहस्रस्य ।
प्रमेति प्र—मा । असि । सहस्रस्य । प्रतिमेति प्रति—
मा । असि । सहस्रस्य । विमेति वि—मा । असि ।
सहस्रस्य । उन्मेत्युत्—मा । असि । साहस्रः । असि ।
सहस्राय । त्वा । इमाः । मे । अग्ने । इष्टकाः । धेनवः । सन्तु । एका । च । शतम् । च । सहस्रम् ।
च । अयुतम् । च (३) । नियुतमिति नि—युतम् । च । प्रयुतमिति प्र—युतम् । च । अर्बुदम् ।
च । न्यर्बुदमिति नि—अर्बुदम् । च । समुद्रः । च ।

मध्यम् । च । अन्तः । च । परार्ध इति पर—अर्धः ।
च । इमाः । मे । अग्ने । इष्टकाः । धेनवः । सन्तु ।
षष्टिः । सहस्रम् । अयुतम् । अक्षीयमाणाः । ऋतस्था इत्यृत—स्थाः । स्थ । ऋतावृध इत्यृत—वृधः ।
घृतश्चुत इति घृत—श्चुतः । मधुश्चुत इति मधु—श्चुतः । ऊर्जस्वतीः । स्वधाविनीरिति स्वधा—विनीः ।
ताः । मे । अग्ने । इष्टकाः । धेनवः । सन्तु । विराज इति वि—राजः । नाम । कामदुघा इति काम—दुघाः । अमुत्र । अमुष्मिन् । लोके (४) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके चतुर्थप्रपाठक एकादशोऽनुवाकः ॥ ११ ॥

(अथ चतुर्थकाण्डे चतुर्थप्रपाठक एकादशोऽनुवाकः ।)

दशमेऽनुवाके नक्षत्रेष्टका उक्ताः । अथैकादश ऋतव्याख्या इष्टका उच्यन्ते । कल्पः—" मधुश्च माधवश्चेति द्वे ऋतव्ये समानतयाँ द्वे देवते " इति ॥ पाठस्तु—

मधुश्च माधवश्च वासन्तिकावृतू , इति ।

मधुश्चैत्रो मासः । माधवो वैशाखो मासः । तावुभौ वसन्तसंबन्धिनावृत्ववयवौ । यद्यप्येतौ द्वौ मन्त्रौ तथाऽपि सहपठितत्वात्तया देवतयेति शेषं सकृदेवोच्चार्य द्वे इष्टके प्रथमचितावुपदध्यात् ।

कल्पः—" शुक्रश्च शुचिश्चेति द्वे ऋतव्ये समानतयाँ द्वे देवते " इति ॥ पाठस्तु—

शुक्रश्च शुचिश्च ग्रैष्मावृतू , इति ।

१ क. ख. च. 'या दे' । २ क. ख. च. 'या दे' ।

अथ मीमांसा ।

चतुर्थाध्यायस्य चतुर्थपादे चिन्तितम्—

नित्या षष्ठी चितिर्नो वा पञ्चापूर्व(पेक्ष) त्वतोऽग्रिमः ।
अपवृ+त्तावप्रतिष्ठां निमित्तीकृत्य नोऽग्रिमः ।

अग्नौ श्रूयते " योऽग्निं चित्वा न प्रतितिष्ठति पञ्च पूर्वाश्चितयो भवन्त्यथ षष्ठीं चितिं चिनुते " इति । लाङ्गलेन कृष्टे व्याममात्रे भूप्रदेशे नानाविधाभिरिष्टकाभिः पक्ष्याकारेण स्थण्डिलं निष्पाद्यते, सेयं चितिः । तादृश्यः पञ्च चितयः पूर्वाः क्रियन्ते । अथ षष्ठी चितिः । तत्र षण्णां पूरणी षष्ठीति व्युत्पत्तौ पूर्वाः पञ्च चितयोऽपेक्ष्यन्ते । अन्यथा षट्संख्यापूरकत्वासंभवात् । तस्मादेकप्रयोगनियमादितरचितिवन्नित्येति चेन्नैवम् । अग्निं चित्वेति पूर्वाभिरेव पञ्चभिश्चितिभिर्नित्यस्याग्निचयनस्य समाप्तौ सत्यां पश्चाद्यो न प्रतितिष्ठति असौ षष्ठीं चितिं चिनुत इति कर्तृसमानाधिकृतेन यच्छब्देनाप्रतिष्ठां निमित्तीकृत्य विधानात्षष्ठी नैमित्तिकी । ततः पञ्चचितीको नित्योऽग्निर्नैमित्तिकस्त्वेकचितीक इति न प्रयोगैक्यं, पूरणप्रत्ययस्तु अभिधानापेक्षयोपपद्यते । पूर्वाः पञ्च चितयोऽभिहिता अभिधास्यमानां षष्ठीं चितिं चिनुत इति वचनव्यक्तिः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे चतुर्थप्रपाठक
एकादशोऽनुवाकः ॥ ११ ॥

(अथ चतुर्थाष्टके चतुर्थप्रपाठके द्वादशोऽनुवाकः ।)

समिद्दिशामाशयां नः सुवर्विन्मधोरतो माधवः पात्वस्मान् । अग्निर्देवो दुष्टरीतुरदाभ्य इदं क्षत्रꣳ रक्षतु पात्वस्मान् । रथंतरꣳ सामभिः पात्वस्मान्गायत्री छन्दसां विश्वरूपा । त्रिवृन्नो विष्ठया स्तोमो अह्नाꣳ समुद्रो वात

+ न्यायमालाविस्तरे तु ' अपवृक्तावप्रतिष्ठानिमित्तीकृतितोऽन्तिमः ' इति पाठः ।

१ क. °ष्टे सप्तपुरुषमा° । २ घ. ङ. °ति प्र° ।

इदमोजः पिपर्तु । उग्रा दिशामभिभूतिर्वयोधाः शुचिः शुक्रे अह्न्योजसीनां । इन्द्राधिपतिः पिपृतादतो नो महि (१) क्षत्रं विश्वतो धारयेदम् । बृहत्साम क्षत्रभृद्वृद्धवृष्णियं त्रिष्टुभौजः शुभितमुग्रवीरम् । इन्द्र स्तोमेन पञ्चदशेन मध्यमिदं वातेन सगरेण रक्ष । प्राचीं दिशाꣳ सहयशा यशस्वती विश्वे देवाः प्रावृषाऽह्नाꣳ सुवर्वती । इदं क्षत्रं दुष्टरमस्त्वोजोऽनाधृष्टꣳ सहस्रियꣳ सहस्वत् । वैरूपे साम्नीह तच्छकेम जगत्यैनं विक्ष्वा वेशयामः । विश्वे देवाः सप्तदशेन (२) वर्च इदं क्षत्रꣳ संलिलवांतमुग्रम् । धर्त्री दिशां क्षत्रमिदं दाधारोपस्थाऽऽशानां मित्रावदस्त्वोजः । मित्रावरुणा शरदाऽह्नां चिकित्नू अस्मै राष्ट्राय महि शर्म यच्छतम् । वैराजे सामन्नधि मे मनीषाऽनुष्टुभा संभृतं वीर्यꣳ सहः । इदं क्षत्रं मित्रावदार्द्रदानु मित्रावरुणा रक्षतमाधिपत्यैः । सम्राड्दिशाꣳ सहसाम्नी सहस्वत्यृतुर्हेमन्तो विष्ठया नः पिपर्तु । अवस्युवाताः (३) बृहतीर्नु शक्वरीरिमं यज्ञमवन्तु नो घृताचीः । सुवर्वती

सुदुघा नः पयस्वती दिशां देव्यवतु नो घृताची । त्वं गोपाः पुरएतोत पश्चाद्बृहस्पते याम्यां युङ्ग्धि वाचम् । ऊर्ध्वा दिशाꣳ रन्तिराशौषधीनाꣳ संवत्सरेण सविता नो अह्नाम् । रेवत्सामातिच्छन्दा उ छन्दोऽजातशत्रुः स्योना नो अस्तु । स्तोमंत्रयस्त्रिꣳशे भुवनस्य पत्नि विवस्वद्धाते अभि नः (४) गृणाहि । घृतवती सवितराधिपत्यैः पयस्वती रन्तिराशा नो अस्तु । ध्रुवा दिशां विष्णुपत्न्यघोराऽस्येशाना सहसो या मनोता । बृहस्पतिर्मातरिश्वोत वायुः संधुवाना वातां अभि नो गृणन्तु । विष्टम्भो दिवो धरुणः पृथिव्या अस्येशाना जगतो विष्णुपत्नी । विश्वव्यचा इषयन्ती सुभूतिः शिवा नो अस्त्वदितिरुपस्थे । वैश्वानरो न ऊत्या पृष्टो दिव्यनु नोऽद्यानुमतिरन्विदनुमते त्वं कया नश्चित्र आ भुवत्को अद्य युङ्क्ते (५) ॥

(महिं सप्तदशेनावस्युवाता अभि नोऽनु नश्चतुर्दश च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके चतुर्थप्रपाठके द्वादशोऽनुवाकः ॥ १२ ॥

रश्मी राज्यस्ययं पुरो हरिकेशोऽग्निर्मूर्धेन्द्राग्निभ्यां बृहस्पतिर्भूयस्कृदस्यग्निना विश्वाषाड् प्रजापतिः कृत्तिका मधुः समिदिशां द्वादश ॥ १२ ॥

रश्मिरसि प्रतिधेनुरसि स्तनयित्नुसनिरस्यादित्यानाꣳ सप्तत्रिꣳशत् ॥३७॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके चतुर्थः प्रपाठकः ॥ ४ ॥

(अथ चतुर्थाष्टके चतुर्थप्रपाठके द्वादशोऽनुवाकः ।)

समिदिति सम्—इत् । दिशाम् । आशया । नः । सुवर्विदिति सुवः—वित् । मधोः । अतः । माधवः । पातु । अस्मान् । अग्निः । देवः । दुष्टरीतुः । अदाभ्यः । इदम् । क्षत्रम् । रक्षतु । पातु । अस्मान् । रथंतरमिति रथं—तरम् । सामभिरिति साम—भिः । पातु । अस्मान् । गायत्री । छन्दसाम् । विश्वरूपेति विश्व—रूपा । त्रिवृदिति त्रि—वृत् । नः । विष्ठयेति वि—स्थया । स्तोमः । अह्नाम् । समुद्रः । वातः । इदम् । ओजः । पिपर्तु । उग्रा । दिशाम् । अभिभूतिरित्यभि—भूतिः । वयोधा इति वयः—धाः । शुचिः । शुक्रे । अहनि । ओजसीना । इन्द्र । अधिपतिरित्यधि—पतिः । पितृतात् । अतः । नः । महि (१) । क्षत्रम् । विश्वतः । धारय । इदम् ।

बृहत् । सामं । क्षत्रभृदितिं क्षत्र—भृत् । वृद्धवृष्णियमितिं वृद्ध—वृष्णियम् । त्रिष्टुभा । ओजः । शुभितम् । उग्रवीरमित्युग्र—वीरम् । इन्द्रं । स्तोमेन । पञ्चदशेनेतिं पञ्च—दशेन । मध्यंम् । इदम् । वातेन । सगरेण । रक्ष । प्राचीं । दिशाम् । सहयशा इतिं सह—यशाः । यशस्वती । विश्वे । देवाः । प्रावृषा । अह्नाम् । सुवर्वतीति सुवः—वती । इदम् । क्षत्रम् । दुष्टरम् । अस्तु । ओजः । अनाधृष्टमित्यना—धृष्टम् । सहस्रियम् । सहस्वत् । वैरूपे । सामन् । इह । तत् । शकेम । जगत्या । एनम् । विक्षु । एतिं । वेशयामः । विश्वे । देवाः । सप्तदशेनेतिं सप्त—दशेन (२) । वर्चः । इदम् । क्षत्रम् । सलिलवातमितिं सलिल—वातम् । उग्रम् । धर्त्री । दिशाम् । क्षत्रम् । इदम् । दाधार । उपस्थेत्युप—स्था । आशानाम् । मित्रवदितिं मित्र—वत् । अस्तु । ओजः । मित्रावरुणेति मित्रा—वरुणा । शरदा । अह्नाम् । चिकित्नू इतिं । अस्मै । राष्ट्राय । महिं । शर्म । यच्छतम् । वैराजे । सामन् । अधीतिं । मे । मनीषा । अनुष्टुभेत्यनु—स्तुभा । संभृतमिति सं—भृतम् । वीर्यम् । सहः । इदम् । क्षत्रम् । मित्रवदितिं

मित्र—वत् । आर्द्रदान्वित्यार्द्र—दानु । मित्रावरुणेतिं मित्रा—वरुणा । रक्षतम् । आधिपत्यैरित्याधिं—पत्यैः । सम्राडितिं सम्—राट् । दिशाम् । सहसाम्नीतिं सह—साम्नी । सहस्वती । ऋतुः । हेमन्तः । विष्ठयेतिं वि—स्थया । नः । पिपर्तु । अवस्युवाता इत्यवस्यु—वाताः (३) । बृहतीः । नु । शक्वरीः । इमम् । यज्ञम् । अवन्तु । नः । घृताचीः । सुवर्वतीति सुवः—वती । सुदुघेतिं सु—दुघा । नः । पयस्वती । दिशाम् । देवी । अवतु । नः । घृताची । त्वम् । गोपा इतिं गो—पाः । पुरएतेतिं पुरः—एता । उत । पश्चात् । बृहस्पते । याम्याम् । युङ्ग्धि । वाचम् । ऊर्ध्वा । दिशाम् । रन्तिः । आशा । ओषधीनाम् । संवत्सरेणेतिं सं—वत्सरेण । सविता । नः । अह्नाम् । रेवत् । सामं । अतिच्छन्दा इत्यतिं—छन्दाः । उ । छन्दः । अजातशत्रुरित्यजात—शत्रुः । स्योना । नः । अस्तु । स्तोमत्रयस्त्रिंश इति स्तोम—त्रयस्त्रिंशे । भुवनस्य । पत्नि । विवस्वद्वात इति विवस्वत्—वाते । अभीतिं । नः (४) । गृणाहि । घृतवतीतिं घृत—वती । सवितः । आधिपत्यैरित्याधिं—पत्यैः । पयस्वती । रन्तिः । आशा । नः ।

अस्तु । ध्रुवा । दिशाम् । विष्णुंपत्नीति विष्णु—पत्नी । अघोरा । अस्य । ईशाना । सहसः । या । मनोता । बृहस्पतिः । मातरिश्वा । उत । वायुः । संधुवाना इति सं—धुवानाः । वाताः । अभीति । नः । गृणन्तु । विष्टम्भ इति वि—स्तम्भः । दिवः । धरुणः । पृथिव्याः । अस्य । ईशाना । जगतः । विष्णुंपत्नीति विष्णु—पत्नी । विश्वव्यचा इति विश्व—व्यचाः । इषयन्ती । सुभूतिरिति सु—भूतिः । शिवा । नः । अस्तु । अदितिः । उपस्थ इत्युप—स्थे । वैश्वानरः । नः । ऊत्या । पृष्टः । दिवि । अग्निति । नः । अद्य । अनुमतिरित्यनु—मतिः । अग्निति । इत् । अनुमत इत्यनु—मते । त्वम् । कया । नः । चित्रः । एति । भुवत् । कः । अद्य । युङ्क्ते (५) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके चतुर्थप्रपाठके द्वादशोऽनुवाकः ॥ १२ ॥

हरिः ॐ ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके चतुर्थः प्रपाठकः ॥ ४ ॥

(अथ चतुर्थकाण्डे चतुर्थप्रपाठके द्वादशोऽनुवाकः ।)

एकादशानुवाक ऋतव्याद्या इष्टका उक्ताः । तावता चितयः समाप्ताः । अथान्तिमे द्वादशे याज्यानुवाक्या उच्यन्ते ।

अश्वमेधप्रकरणे कल्पः पठ्यते—" अग्नये गायत्रायेति दशहविषं सर्वपृष्ठां निर्वपति समिदिशामिति यथालिङ्गं याज्यानुवाक्याः " इति ॥

तत्राग्नये गायत्राय त्रिष्टुते राथंतराय वासन्तायाष्टाकपाल इत्यस्य पुरोनुवाक्यामाह—

समिदिशामाशया नः सुवर्विन्मधोरतो
माधवः पात्वस्मान् । अग्निर्देवो दुष्टरीतु-
रदाभ्य इदं क्षत्रꣳ रक्षतु पात्वस्मान् ।, इति ।

दिशां मध्ये या दिक्समित्समिन्धनहेतुः । तदेव कथमिति तदुच्यते—सुवर्वित्स्वर्गस्थमादित्यं विन्दते लभत इति सुवर्वित्। आदित्योदयस्थानत्वात्प्राच्या दिशः समिन्धनहेतुत्वम् । तादृशी दिग्नोऽस्मानाशया पातु । अस्माकं धनादिविषया या काचिदाशा विद्यते तस्याः पूरणेनास्मान्त्रक्षत्वित्यर्थः । मधुश्चैत्रमासः । माधवो वैशाखः । तावुभावपि पूर्वदिग्वत्समिन्धनहेतू । तयोर्मासयोरादित्यस्यातितीक्ष्णप्रकाशत्वात् । तत्राप्यतोऽस्मान्मधोश्चैत्रमासादधिकप्रकाशो यो माधवो वैशाखमासः सोऽस्मान्संतापभयात्पातु । दुःखेन स्तरीताऽऽच्छादयिता दुष्टरीता यो वैरी प्रावरणवस्त्रेणेव दुःखेनाऽऽच्छादयति तस्यापि दुःखकारिणो वैरिणोऽदाभ्यो दम्भितुं धर्हिंसितुमशक्यो योऽग्निर्देवः सोऽयमिदं क्षत्रमस्मदीयमिदं बलमस्मांश्च रक्षतु ॥

तत्रैव याज्यामाह—

रथंतरꣳ सामभिः पात्वस्मान्गायत्री छन्द-
सां विश्वरूपा । त्रिवृन्नो विष्ठया स्तोमो
अह्नाꣳ समुद्रो वात इदमोजः पिपर्तु ।, इति ।

यद्रथंतरं साम तदन्यैः सामभिः सहास्मान्पातु । छन्दसां मध्ये गायत्री विश्वरूपा यवमध्यपिपीलिकामध्यादिभेदैर्बहुरूपा, सा नोऽस्मान्त्रक्षतु । त्रिवृदाख्यो यः स्तोमोऽह्नामेकाहादीनां संबधिन्या विष्ठया विविधया स्थित्या युक्तः, अहःसु विविधं प्रयुज्यत इत्यर्थः । तादृशोऽस्मान्पातु । समुद्राख्यो यो

---

१ ख. च. °विषां सं ।

(याज्यानुवाक्याभिधानम्)

अथादित्यै विष्णुपत्न्यै चरुरित्यस्य पुरोनुवाक्यामाह—

ध्रुवा दिशां विष्णुपत्न्यघोराऽस्येशाना सह-
सो या मनोता । बृहस्पतिर्मातरिश्वोत वायुः
संधुवाना वाता अभि नो गृणन्तु । , इति ।

दिशां मध्ये या ध्रुवा स्थिरा सूर्यगतिसापेक्षप्राच्यादिविभागरहिता समानरूपा दिग्यश्च बृहस्पतिर्योऽपि मातरिश्वाख्यो मुख्यवायुर्ये चान्ये संधुवानाः सम्यक्तत्र तत्र कम्पयन्तो वातास्ते सर्वेऽपि नोऽभिगृणन्त्वस्मान्प्रति हितमुपदिशन्तु । कीदृशी ध्रुवा, विष्णुपत्नी विष्णुः पतिः पालको यस्याः सा विष्णुपत्नी, अघोरा शान्तरूपा, अस्य सहसः सर्वस्य बलस्येशाना नियामिका, मनोता मनस्यूता पूजितेत्यर्थः ॥

तत्रैव याज्यामाह—

विष्टम्भो दिवो धरुणः पृथिव्या अस्येशाना
जगतो विष्णुपत्नी । विश्वव्यचा इषयन्ती
सुभूतिः शिवा नो अस्त्वदितिरुपस्थे।, इति ।

अदितिरखण्डनीया दिक्सामान्यरूपा देवतोपस्थे स्वोत्सङ्गे स्थिता[1]न्नोऽस्मान्प्रति शिवाऽस्तु शान्ता सुखकरी भवतु । कीदृश्यदितिः, दिवो विष्टम्भो द्युलोकस्याऽऽधारभूता पृथिव्या धरुणो भूमेर्धारयित्री, अस्य जगत ईशाना सर्वस्य जगतः स्वामिभूता, विष्णुः पतिः पालको यस्याः सा विष्णुपत्नी, विश्वव्यचा जगद्व्यापिनी, इषयन्तीषमन्नं[2] कुर्वती, सुभूतिः शोभनैश्वर्योपेता ॥

अथाग्नये वैश्वानराय द्वादशकपाल इत्यस्य याज्यानुवाक्ययोः प्रतीके दर्शयति—

वैश्वानरो न ऊत्या पृष्टो दिवि , इति ।

वैश्वानरो न ऊत्येति पुरोनुवाक्या । पृष्टो दिवीति याज्या । एतच्चोभयं प्रथमकाण्डस्य पञ्चमप्रपाठकस्यान्त्यानुवाके व्याख्यातम् ॥

अथानुमत्यै चरुरित्यस्य याज्यानुवाक्ययोः प्रतीके दर्शयति—

अनु नोऽद्यानुमतिरन्विदनुमते त्वम् , इति ।

अनु नोऽद्यानुमतिरिति पुरोनुवाक्या । अन्विदनुमते त्वमिति याज्या एतच्चोभयमिदं वामास्ये हविरित्यनुवाके व्याख्यातम् ॥

१ क. घ. ङ. 'ता नोऽस्मा' । २ क. घ. ङ. 'न्नं सर्वस्य कु' ।

(चित्यग्निहोमोक्तिः)

अथ काय एककपाल इत्यस्य याज्यानुवाक्ययोः प्रतीके दर्शयति—

कया नश्चित्र आ भुवत्को अद्य युङ्क्ते ॥, इति ॥

कया नश्चित्र आ भुवदिति पुरोनुवाक्या । को अद्य युङ्क्त इति याज्या । एतच्चोभयमिन्द्राग्नी रोचनेत्यस्मिन्ननुवाके व्याख्यातम् ॥

अत्र विनियोगसंग्रहः—

अथाश्वमेधे या त्विष्टिर्हविर्भिर्दर्शभिर्युता ।
विधीयतेऽग्नये गायेत्यनुवाकेन तत्र च ॥ १ ॥
द्वे द्वे याज्यानुवाक्ये स्तामित्यृचो विंशतिस्त्विह ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे चतुर्थप्रपाठके द्वादशोऽनुवाकः ॥ १२ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥ २ ॥

इति श्रीमद्विद्यातीर्थमहेश्वरापरावतारस्य श्रीमद्राजाधिराजपरमेश्वरस्य श्रीवीरबुक्कमहाराजस्याऽऽज्ञापरिपालकेन माधवाचार्येण विरचिते वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे चतुर्थः प्रपाठकः ॥ ४ ॥

(अथ चतुर्थाष्टके पञ्चमः प्रपाठकः ।)

(तत्र प्रथमोऽनुवाकः ।)

हरिः ॐ ।

नमस्ते रुद्र मन्यव उतो त इषवे नमः ।
नमस्ते अस्तु धन्वने बाहुभ्यामुत ते नमः ।
या त इषुः शिवतमा शिवं बभूव ते धनुः ।
शिवा शरव्या या तव तया नो रुद्र मृडय ।

या ते रुद्र शिवा तनूरघोराऽपापकाशिनी ।
तया नस्तनुवा शंतमया गिरिशन्ताभि चा-
कशीहि । यामिषुं गिरिशन्त हस्ते (१)
बिभर्ष्यस्तवे । शिवां गिरित्र तां कुरु मा
हिꣳसीः पुरुषं जगत् । शिवेन वचसा त्वा
गिरिशाच्छा वदामसि । यथा नः सर्वमिज्जग-
दयक्ष्मꣳ सुमना असत् । अध्यवोचदधिवक्ता
प्रथमो दैव्यो भिषक् । अहीꣳश्च सर्वाञ्जम्भ-
यन्त्सर्वाꣳश्च यातुधान्यः । असौ यस्ताम्रो अरुण
उत बभ्रुः सुमङ्गलः । ये चेमाꣳ रुद्रा अभितो
दिक्षु (२) श्रिताः सहस्रशोऽवैषाꣳ हेड
ईमहे । असौ योऽवसर्पति नीलग्रीवो विलो-
हितः । उतैनं गोपा अदृश्रन्नदृश्रन्नुदहार्यः ।
उतैनं विश्वा भूतानि स दृष्टो मृडयाति नः ।
नमो अस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे ।
अथो ये अस्य सत्वानोऽहं तेभ्योऽकरं नमः ।
प्र मुञ्च धन्वनस्त्वमुभयोरार्त्न्योर्ज्याम् । याश्च
ते हस्त इषवः (३) परा ता भगवो वप ।
अवतत्य धनुस्त्वꣳ सहस्राक्ष शतेषुधे । निशीर्य
शल्यानां मुखा शिवो नः सुमना भव ।

विज्यं धनुः कपर्दिनो विशल्यो बाणवाꣳ उत ।
अनेशन्नस्येषव आभुरस्य निषङ्गधिः । या ते
हेतिर्मीढुष्टम हस्ते बभूव ते धनुः । तयाऽ-
स्मान्विश्वतस्त्वमयक्ष्मया परि ब्भुज । नमस्ते
अस्त्वायुधायानातताय धृष्णवे । उभा-
भ्यामुत ते नमो बाहुभ्यां तव धन्वने । परि
ते धन्वनो हेतिरस्मान्वृणक्तु विश्वतः । अथो य
इषुधिस्तवारे अस्मन्नि धेहि तम् (४) ॥

(हस्ते दिक्षिवषव उभाभ्यां द्वाविꣳशतिश्च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके
पञ्चमप्रपाठके प्रथमोऽनुवाकः ॥ १ ॥

(अथ चतुर्थाष्टके पञ्चमप्रपाठके प्रथमोऽनुवाकः ।)

नमः । ते । रुद्र । मन्यवे । उतो इति । ते । इषवे । नमः । नमः । ते । अस्तु । धन्वने । बाहु-
भ्यामिति बाहु—भ्याम् । उत । ते । नमः । या । ते । इषुः । शिवतमेति शिव—तमा । शिवम् ।
बभूव । ते । धनुः । शिवा । शरव्या । या । तव । तया । नः । रुद्र । मृडय । या । ते । रुद्र । शिवा ।
तनूः । अघोरा । अपापकाशिनीत्यपाप—काशिनी ।

तया । नः । तनुवा । शंतमयेति शं—तमया । गिरिं-
शन्तेति गिरिं—शन्त । अभीति । चाकशीहि । या-
म् । इषुम् । गिरिशन्तेति गिरि—शन्त । हस्ते ।
(१) । बिभर्षि । अस्तवे । शिवाम् । गिरित्रेति
गिरि—त्र । ताम् । कुरु । मा । हिꣳसीः । पुरुषम् ।
जगत् । शिवेन । वचसा । त्वा । गिरिश । अच्छ ।
वदामसि । यथा । नः । सर्वम् । इत् । जगत् ।
अयक्ष्मम् । सुमना इति सु—मनाः । असत् । अधी-
ति । अवोचत् । अधिवक्तेत्यधि—वक्ता । प्रथमः ।
दैव्यः । भिषक् । अहीन् । च । सर्वान् । जम्भयन् ।
सर्वाः । च । यातुधान्य इति यातु—धान्यः । असौ ।
यः । ताम्रः । अरुणः । उत । बभ्रुः । सुमङ्गल इति
सु—मङ्गलः । ये । च । इमाम् । रुद्राः । अभितः ।
दिक्षु (२) । श्रिताः । सहस्रश इति सहस्र—शः ।
अवेति । एषाम् । हेडः । ईमहे । असौ । यः । अ-
वसर्पतीत्यव—सर्पति । नीलग्रीव इति नील—ग्रीवः ।
विलोहित इति वि—लोहितः । उत । एनम् । गोपा
इति गो—पाः । अदृश्रन् । अदृश्रन् । उदहार्य
इत्युद—हार्यः । उत । एनम् । विश्वा । भूतानि ।
सः । दृष्टः । मृडयाति । नः । नमः । अस्तु । नील-

ग्रीवायेति नील—ग्रीवाय । सहस्राक्षायेति सहस्र—
अक्षाय । मीढुषे । अथो इति । ये । अस्य । सत्वा-
नः । अहम् । तेभ्यः । अकरम् । नमः । प्रेति ।
मुञ्च । धन्वनः । त्वम् । उभयोः । आर्त्न्योः । ज्या-
म् । याः । च । ते । हस्ते । इषवः (३) । परेति ।
ताः । भगव इति भग—वः । वप । अवतत्येत्यव—
तत्य । धनुः । त्वम् । सहस्राक्षेति सहस्र—अक्ष ।
शतेषुध इति शत—इषुधे । निशीर्येति नि—शीर्य ।
शल्यानाम् । मुखा । शिवः । नः । सुमना इति
सु—मनाः । भव । विज्यमिति वि—ज्यम् । धनुः ।
कपर्दिनः । विशल्य इति वि—शल्यः । बाणवानिति
बाण—वान् । उत । अनेशन् । अस्य । इषवः ।
आभुः । अस्य । निषङ्गधिः । या । ते । हेतिः । मी-
ढुष्टमेति मीढुः—तम । हस्ते । बभूव । ते ।
धनुः । तया । अस्मान् । विश्वतः । त्वम् ।
अयक्ष्मया । परीति । भुज । नमः । ते । अस्तु ।
आयुधाय । अनातताय इत्यना—ताय । धृष्णवे ।
उभाभ्याम् । उत । ते । नमः । बाहुभ्यामिति
बाहु—भ्याम् । तव । धन्वने । परीति । ते ।
धन्वनः । हेतिः । अस्मान् । वृणक्तु । विश्वतः ।

अथो इति । यः । इषुधिरितीषु—धिः । तव । आरे ।
अस्मत् । निति । धेहि । तम् (४) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके
पञ्चमप्रपाठके प्रथमोऽनुवाकः ॥ १ ॥

(अथ चतुर्थाष्टके पञ्चमप्रपाठके प्रथमोऽनुवाकः ।)

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ॥
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥ १ ॥
इष्टकाचितयः सर्वाश्चतुर्थे हि समापिताः ।
रुद्राध्याये पञ्चमे तु चित्यग्नौ होम उच्यते ॥ २ ॥
कर्मप्रकरणे पाठात्कर्माङ्गत्वमपीष्यते ।
ज्ञानहेतुत्वमप्यस्य सर्वोपनिषदीरितम् ॥ ३ ॥
किं जप्येनामृतत्वं नो ब्रूहीत्युक्तो मुनिर्जगौ ।
शतरुद्रीयकेणेति जाबाला आमनन्ति हि[3] ॥ ४ ॥
स्मृत्यागमपुराणेषु रुद्राध्यायप्रशंसनम् ।
बह्वस्ति तद्विस्तरेण रुद्रकल्पेऽभिधास्यते ॥ ५ ॥
इह कर्माङ्गता यादृग्वर्णिता ब्राह्मणेन ताम् ।
बोद्धुं शब्दार्थमात्रस्य विवृतिः क्रियते स्फुटा ॥ ६ ॥

कल्पः—" शतरुद्रीयं जुहोति जतिलयवाग्वा वा गवीधुकयवाग्वा वाँ जतिलगवीधुकसक्तुभिर्वा कुशयवसर्षपाऽजाक्षीरेण मृगीक्षीरेण वाऽर्कपर्णेनोदङ्तिष्ठन्नुत्तरस्य पक्षस्य उत्तरापरस्यां सक्त्यां विकर्ण्यां स्वयमातृण्णायामनुपरिचारं (क्रामं) वा नमस्ते रुद्र मन्यव इत्येताननुवाकांस्त्रेधा विभज्यापि वा प्रथमादुपक्रम्य नमस्तक्षभ्य इति जानुदघ्ने धारयमाणो रथकारेभ्य इत्युपक्रम्य नमः स्वायुधायेति नाभिदघ्ने शेषेण प्रागवसानेभ्य आँस्यदघ्ने हुत्वा सहस्राणि सहस्रश इति दशावदानानि हुत्वाऽन्वारोहाञ्जुहोति नमो रुद्रेभ्यो ये पृथिव्यामिति जानुदघ्ने धारयमाणो नमो रुद्रेभ्यो येऽन्तरिक्ष इति नाभिदघ्ने नमो रुद्रेभ्यो ये दिवीत्यास्यदघ्ने हुत्वैतानेव यजमानं वाचयित्वैतानेव विपरीतान्प्रत्यवरोहान्हुत्वा संचरे पशूनामर्कपर्णमुदस्यति यं द्विष्यात्तस्य संचर इति " इति ॥

---

१ ख. °स्य तथोप° । २ ख. च. °त्युक्ते मु° । ३ ख. च. तत् । ४ ख. च. वा जुहुयाज्जार्ति° । घ. ङ. वा स° । ५ ख. च. °तिलैर्गवी° । ६ क. पक्षस । ७ घ. ङ. आरभ्याऽऽस्य° ।

तत्र प्रथमानुवाके प्रथमामृचमाह—

नमस्ते रुद्र मन्यव उतो त इषवे नमः । नमस्ते
अस्तु धन्वने बाहुभ्यामुत ते नमः ।, इति ।

हे रुद्र ते त्वदीयो यो मन्युः कोपस्तस्मै नमोऽस्तु । स मन्युरस्मद्वैरिष्वेव प्रसरतु नत्वस्मासु । उतापि च ते तवेषवे नमः । त्वदीयाय बाणाय नमोऽस्तु । तथा ते धन्वने त्वदीयाय धनुषे नमोऽस्तु । उतापि च ते बाहुभ्यां त्वदीयाभ्यां धनुर्बाणोपेताभ्यां हस्ताभ्यां नमोऽस्तु । एतत्सर्वं वैरिष्वेव प्रवर्तंतां नतु मयीत्यभिप्रायः ॥

द्वितीयामृचमाह—

या त इषुः शिवतमा शिवं बभूव ते धनुः । शिवा
शरव्या या तव तया नो रुद्र मृडय । , इति ।

हे रुद्र ते त्वदीया येयमिषुः शिवतमा शान्ततमा बभूव, तथा ते त्वदीयं यद्धनुः शिवं शान्तं बभूव, तथा या च तव शरव्या तवेषुधिस्तया शान्तयेष्वा तेन च शान्तेन धनुषा तया च शान्तया शरव्यया नोऽस्मान्मृडय सुखय । भक्तेषु प्रवृत्त्यभावात्तेषां शान्तत्वम् ॥

अथ तृतीयामृचमाह—

या ते रुद्र शिवा तनूरघोराऽपापका-
शिनी । तया नस्तनुवा शंतमया
गिरिशन्ताभि चाकशीहि । , इति ।

द्वे हि रुद्रस्य तनू । तथा चोपरिष्टादाम्नायते—" रुद्रो वा एष यदग्निस्तस्यैते तनुवौ घोराऽन्या शिवाऽन्या " इति । हिंसिका घोराऽनुग्राहिका शिवा । हे रुद्र ते तव या तनूः शिवाऽस्मास्वनुग्रहकारिण्यत एवाघोरा हिंसिका न भवति । अघोरत्वमेव स्पष्टी क्रियते—अपापकाशिनी पापं हिंसारूपमनिष्टं काशयतीति पापकाशिनी, तादृशी न भवतीत्यपापकाशिनी । गिरौ कैलासे स्थित्वा नित्यं प्राणिभ्यो यः शं सुखं तनोति स गिरिशंत-

---

१ ख. च. °भावस्तेषां ।

अथो अपि च ये केचिदस्य रुद्रस्य सत्त्वानो भृत्यरूपाः प्राणिनस्तेभ्यः सर्वेभ्योऽहं नमोऽकरं नमस्करोमि ॥

अथ दशमीमाह—

प्र मुञ्च धन्वनस्त्वमुभयोरार्त्न्योर्ज्याम् । याश्च ते हस्त इषवः परा ता भगवो वप । , इति ।

हे भगवो भगवन्पूजावन्महदैश्वर्यसंपन्न रुद्र त्वं धन्वनस्त्वदीयस्य धनुष उभयोरार्त्नियोः कोट्योरवस्थितां ज्यां मौर्वीं प्रमुञ्चावरोपय । याश्च ते हस्त इषवो वर्तन्ते ता अपि परावप परित्यज ॥

अथैकादशीमाह —

अवतत्य धनुस्त्वꣳ सहस्राक्ष शतेषुधे । निशीर्य शल्यानां मुखा शिवो नः सुमना भव ।, इति ।

इन्द्ररूपेण सहस्रसंख्याकान्यक्षीणि यस्यासौ सहस्राक्षः । शतसंख्याका इषुधयो बाणस्थापनकोशा यस्यासौ शतेषुधिः । तादृश हे रुद्र धनुरवतत्यावरोपितज्याकं कृत्वा शल्यानां मुखा मुखानीषुगतलोहानामग्राणि निशीर्येषुधिषु न्यग्भावेन शीर्णानि कृत्वा नोऽस्मान्प्रति सुमना अनुग्रहयुक्तः सन्शिवः शान्तो भव ॥

अथ द्वादशीमाह—

विज्यं धनुः कपर्दिनो विशल्यो बाणवाꣳ उत । अनेशन्नस्येषव आभुरस्य निषङ्गथिः । , इति ।

कपर्दो जटाजूटः सोऽस्यास्तीति कपर्दी रुद्रस्तस्य धनुर्विज्यं विगतज्याकमस्तु । उतापि च बाणा अस्मिंस्तिष्ठन्तीति बाणवानिषुधिः । स च विशल्योऽस्तु इषुगतानां शल्यानां तदुदरे गोपितत्वेन बहिराविर्भूतशल्यरहितोऽस्तु । अस्य रुद्रस्येषवो बाणा इषुधौ प्रक्षिप्ता अनेशन्वेद्धुमसमर्था भवन्तु । अस्य रुद्रस्य निषङ्गथिर्बाणाधार आभुरस्त्वीषत्प्रभुरस्तु । कुड्यनिखातशङ्कावासञ्जितत्वेन बाणान्धारयितुमेव प्रभवतु न तु बाणाकर्षणयोग्य इत्यर्थः । अथवा निषङ्गथिः खड्गकोशः । सोऽपि पूर्ववत्कचिदारोपितत्वेन खड्गं धारयितुमेव प्रभवतु नतु खड्गाकर्षणसमर्थः ॥

अथ त्रयोदशीमाह—

१ घ. ङ. °वन्रुद्र ।

या ते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः । तयाऽस्मान्विश्वतस्त्वमयक्ष्मया परि ब्भुज । , इति ।

हे मीढुष्टमातिशयेन कामाभिवर्षक या ते हेतिस्तव संबन्धि खड्गादिरूपं यदायुधं, यदपि ते तव हस्ते धनुर्बभूव, अयक्ष्मयाऽनुपद्रवकारिण्या तया हेत्या तथाविधेन धनुषा च त्वमस्मान्विश्वतः परिब्भुज सर्वतः परिपालय ॥

अथ चतुर्दशीमाह—

नमस्ते अस्त्वायुधायानाताय धृष्णवे । उभाभ्यामुत ते नमो बाहुभ्यां तव धन्वने ।, इति ।

हे रुद्र ते त्वदीयायाऽऽयुधाय बाणरूपाय नमोऽस्तु । कीदृशायाऽऽयुधाय, अनाताय धनुषि संधानाभावादप्रसारिताय, धृष्णवे स्वरूपेण प्रहर्तुं प्रगल्भाय । किंच ते त्वदीयाभ्यामुभाभ्यां बाहुभ्यां नमोऽस्तु । तथा तव त्वदीयाय धन्वने नमोऽस्तु ॥

अथ पञ्चदशीमाह—

परि ते धन्वनो हेतिरस्मान्वृणक्तु विश्वतः । अथो य इषुधिस्तवाऽऽरे अस्मन्नि धेहि तम् ।, इति ॥

हे रुद्र ते त्वदीयस्य धन्वनो हेतिर्बाणशल्यरूपाऽस्मान्विश्वतः सर्वतः परिवृणक्तु वर्जितान्करोतु मा बाधतामित्यर्थः । अथो अपि च यस्तवेषुधिस्तमस्मदारेऽस्मत्तो दूरे निधेहि स्थापय ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे पञ्चमप्रपाठके
प्रथमोऽनुवाकः ॥ १ ॥

(अथ चतुर्थाष्टके पञ्चमप्रपाठके द्वितीयोऽनुवाकः ।)

नमो हिरण्यबाहवे सेनान्ये दिशां च पतये नमो नमो वृक्षेभ्यो हरिकेशेभ्यः पशूनां पतये नमो नमः सस्पिञ्जराय त्विषीमते पथीनां पतये नमो नमो बभ्लुशाय विव्याधिनेऽ-

न्नानां पतये नमो नमो हरिकेशायोपवीतिने पुष्टानां पतये नमो नमो भवस्य हेत्यै जगतां पतये नमो नमो रुद्रायाऽऽततायिने क्षेत्राणां पतये नमो नमः सूतायाहन्त्याय वनानां पतये नमो नमः (१) रोहिताय स्थपतये वृक्षाणां पतये नमो नमो मन्त्रिणे वाणिजाय कक्षाणां पतये नमो नमो भुवन्तये वारिवस्कृतायौषधीनां पतये नमो नम उच्चैर्घोषायाऽऽक्रन्दयते पत्तीनां पतये नमो नमः कृत्स्नवीताय धावते सत्वनां पतये नमः (२) ॥

(वनानां पतये नमो नम एकान्नत्रिंशच्च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके पञ्चमप्रपाठके द्वितीयोऽनुवाकः ॥ २ ॥

(अथ चतुर्थाष्टके पञ्चमप्रपाठके द्वितीयोऽनुवाकः ।)

नमः । हिरण्यबाहव इति हिरण्य—बाहवे । सेनान्य इति सेना—न्ये । दिशाम् । च । पतये । नमः । नमः । वृक्षेभ्यः । हरिकेशेभ्य इति हरि—केशेभ्यः । पशूनाम् । पतये । नमः । नमः । सस्पिञ्जराय । त्विषीमत इति त्विषि—मते । पथीनाम् ।

पतये । नमः । नमः । बभ्लुशाय । विव्याधिन इति वि—व्याधिने । अन्नानाम् । पतये । नमः । नमः । हरिकेशायेति हरि—केशाय । उपवीतिन इत्युप—वीतिने । पुष्टानाम् । पतये । नमः । नमः । भवस्य । हेत्यै । जगताम् । पतये । नमः । नमः । रुद्राय । आतताविन इत्या—ततविने । क्षेत्राणाम् । पतये । नमः । नमः । सूताय । अहन्त्याय । वनानाम् । पतये । नमः । नमः (१) । रोहिताय । स्थपतये । वृक्षाणाम् । पतये । नमः । नमः । मन्त्रिणे । वाणिजाय । कक्षाणाम् । पतये । नमः । नमः । भुवन्तये । वारिवस्कृतायेति वारिवः—कृताय । ओषधीनाम् । पतये । नमः । नमः । उच्चैर्घोषायेत्युच्चैः—घोषाय । आक्रन्दयत इत्या—क्रन्दयते । पत्तीनाम् । पतये । नमः । नमः । कृत्स्नवीतायेति कृत्स्न—वीताय । धावते । सत्वनाम् । पतये । नमः (२) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके पञ्चमप्रपाठके द्वितीयोऽनुवाकः ॥ २ ॥

(अथ चतुर्थकाण्डे पञ्चमप्रपाठके द्वितीयोऽनुवाकः ।)

प्रथमानुवाके भगवतो रुद्रस्य या प्रधानभूता तनुस्तां बहुधा प्रसाद्य तस्य ये लीलाविग्रहा जगन्निर्वाहहेतवस्तेऽष्टभिरनुवाकैः प्रसाद्यन्ते । तेष्वनुवाकेषु

अथ त्रयोदशं यजुराह—

नमः कृत्स्नवीताय धावते सत्वनां पतये नमः ।, इति ॥

कृत्स्नं सैन्यं वीतं वेष्टितं येनासौ कृत्स्नवीतस्तस्मै । धावते पलायमानानां परकीयसैन्यानां पृष्ठतो गच्छन्धावंस्तस्मै नमोऽस्तु । सत्वानः सात्त्विकाः शरणागतास्तेषां पालकाय नमोऽस्तु ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे पञ्चमप्रपाठके द्वितीयोऽनुवाकः ॥ २ ॥

(अथ चतुर्थाष्टके पञ्चमप्रपाठके तृतीयोऽनुवाकः ।)

नमः सहमानाय निव्याधिनं आव्याधिनीनां पतये नमो नमः ककुभाय निषङ्गिणे स्तेनानां पतये नमो नमो निषङ्गिण इषुधिमते तस्कराणां पतये नमो नमो वञ्चते परिवञ्चते स्तायूनां पतये नमो नमो निचेरवे परिचरायारण्यानां पतये नमो नमः सृकाविभ्यो जिघाꣳसद्भ्यो मुष्णतां पतये नमो नमोऽसिमद्भ्यो नक्तं चरद्भ्यः प्रकृन्तानां पतये नमो नमः उष्णीषिणे गिरिचरायः कुलुञ्चानां पतये नमो नमः (१) इषुमद्भ्यो धन्वाविभ्यश्च वो नमो नमः आतन्वानेभ्यः प्रतिदधानेभ्यश्च वो नमो नमः आयच्छद्भ्यो विसृजद्भ्यश्च वो नमोनमोऽस्यद्भ्यो विध्यद्भ्यश्च वो

नमो नम आसीनेभ्यः शयानेभ्यश्च वो नमो नमः स्वपद्भ्यो जाग्रद्भ्यश्च वो नमो नमस्तिष्ठद्भ्यो धावद्भ्यश्च वो नमो नमः सभाभ्यः सभापतिभ्यश्च वो नमो नमो अश्वेभ्योऽश्वपतिभ्यश्च वो नमः (२) ॥

(कुलुञ्चानां पतये नमो नमोऽश्वपतिभ्यस्त्रीणि च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके पञ्चमप्रपाठके तृतीयोऽनुवाकः ॥ ३ ॥

(अथ चतुर्थाष्टके पञ्चमप्रपाठके तृतीयोऽनुवाकः ।)

नमः । सहमानाय । निव्याधिन इति नि—व्याधिने । आव्याधिनीनामित्या—व्याधिनीनाम् । पतये । नमः । नमः । ककुभाय । निषङ्गिण इति नि—सङ्गिने । स्तेनानाम् । पतये । नमः । नमः । निषङ्गिण इति नि—सङ्गिने । इषुधिमत इतीषुधि—मते । तस्कराणाम् । पतये । नमः । नमः । वञ्चते । परिवञ्चत इति परि—वञ्चते । स्तायूनाम् । पतये । नमः । नमः । निचेरव इति नि—चेरवे । परिचरायेति परि—चराय । अरण्यानाम् । पतये । नमः । नमः । सृकाविभ्य इति सृकावि—भ्यः । जिघाꣳसद्भ्य इति जिघाꣳसत्—भ्यः । मुष्णताम् । पतये ।

नमः । नमः । असिमद्भ्य इत्यसिमत्—भ्यः । नक्तम् । चरंद्भ्य इति चरत्—भ्यः । प्रकृन्तानामिति प्र—कृन्तानाम् । पतये । नमः । नमः । उष्णीषिणे । गिरिचरायेति गिरि—चराय । कुलुञ्चानाम् । पतये । नमः । नमः (१) । इषुमद्भ्य इतीषुमत्—भ्यः । धन्वाविभ्य इति धन्वावि—भ्यः । च । वः । नमः । नमः । आतन्वानेभ्य इत्या—तन्वानेभ्यः । प्रतिदधानेभ्य इति प्रति—दधानेभ्यः । च । वः । नमः । नमः । आयच्छद्भ्य इत्यायच्छत्—भ्यः । विसृजद्भ्य इति विसृजत्—भ्यः । च । वः । नमः । नमः । अस्यद्भ्य इत्यस्यत्—भ्यः । विध्यद्भ्य इति विध्यत्—भ्यः । च । वः । नमः । नमः । आसीनेभ्यः । शयानेभ्यः । च । वः । नमः । नमः । स्वपद्भ्य इति स्वपत्—भ्यः । जाग्रद्भ्य इति जाग्रत्—भ्यः । च । वः । नमः । नमः । तिष्ठद्भ्य इति तिष्ठत्—भ्यः । धावद्भ्य इति धावत्—भ्यः । च । वः । नमः । नमः । सभाभ्यः । सभापतिभ्य इति सभापति—भ्यः । च । वः । नमः । नमः । अश्वेभ्यः । अश्वपतिभ्य इत्यश्वपति—भ्यः । च । वः । नमः (२) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके पञ्चमप्रपाठके तृतीयोऽनुवाकः ॥ ३ ॥

(अथ चतुर्थकाण्डे पञ्चमप्रपाठके तृतीयोऽनुवाकः ।)

द्वितीयानुवाक उभयतोनमस्काराणि कानिचिद्यजूंष्युक्तानि । अथापराणि तथाविधान्येव तृतीयेऽस्पष्टार्थानि द्वादश यजूंष्युच्यन्ते ॥

तत्र प्रथमं यजुराह—

नमः सहमानाय निव्याधिन आव्याधिनीनां पतये नमः , इति ।

सहमानो विरोधिनोऽभिभवन् । नितरां विरोधिनो विध्यतीति निव्याधी, तादृशाय रुद्राय नमः । आ समन्ताद्विध्यन्तीत्याव्याधिन्यः शूराः सेनास्तासां पालकाय नमः ॥

अथ द्वितीयं यजुराह—

नमः ककुभाय निषङ्गिणे स्तेनानां पतये नमः , इति ।

ककुभाय ककुभसदृशाय प्रधानभूतायेत्यर्थः । निषङ्गी खड्गहस्तस्तस्मै नमः । स्तेना गुप्तचोरास्तेषां पालकाय नमः । रुद्रो हि लीलया नट इव तत्तद्वेषं धत्ते । यद्वा तस्य सर्वजगदात्मकत्वाद्ये यत्र यथा वर्तन्ते तत्र तथारूपेण रुद्रो वर्तत इति रुद्रस्य सार्वात्म्यमनुसंधातुं मन्त्रैरेवमुच्यते । स्तेनादिशरीरेषु रुद्रो द्वेधा वर्तते जीवरूपेणेश्वररूपेण च । तत्र च यज्जीवरूपं तत्स्तेनादिशब्दानां वाच्योऽर्थः । स एव शास्त्रेषु निन्द्यः । यत्त्वीश्वररूपं तत्स्तेनादिशब्दैरुपलक्ष्यते । तदनुसंधानं तु पापक्षयहेतुत्वेन परमपुरुषार्थ इति लक्ष्यार्थविवक्षया मन्त्रेषु लौकिकाः शब्दाः प्रयुज्यन्त इति द्रष्टव्यम् । उपलक्षकवाच्यार्थद्वारेण लक्ष्यार्थो मुग्धैरपि सहसा सम्यग्बोद्धुं शक्यते । यथा शाखाग्रे चन्द्र इत्यत्र । तस्माल्लक्ष्यार्थस्यैव विवक्षायामपि सुखावबोधद्वारत्वेन मुख्यार्थवाचकाः शब्दाः प्रयोक्तव्याः ॥

अथ तृतीयं यजुराह—

नमो निषङ्गिण इषुधिमते तस्कराणां पतये नमः,इति ।

धनुषि संधातुं हस्ते धृतो बाणो निषङ्गः । पृष्ठे बद्धो बाणाधार इषुधिः । तदुभययुक्ताय नमः । तस्कराः प्रकटचोरास्तेषां पालकाय नमः ॥

---

१ क. °ये द्वा° । च. °ये कानिचिदुच्य° । २ ख. °श स्पष्टार्थानि पञ्च कानिचिदुच्य° । ३ घ. ङ. °जूंष्याह—। ४ ख. च. °कुत्सद्द° ।

(चित्यग्निहोमोक्तिः)

नमः सभाभ्यः सभापतिभ्यश्च वो नमो नमो अश्वेभ्योऽश्वपतिभ्यश्च वो नमः॥ , इति ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे पञ्चमप्रपाठके तृतीयोऽनुवाकः ॥ ३ ॥

(अथ चतुर्थाष्टके पञ्चमप्रपाठके चतुर्थोऽनुवाकः ।)

नमं आव्याधिनीभ्यो विविध्यन्तीभ्यश्च वो नमो नम उगणाभ्यस्तृꣳहतीभ्यश्च वो नमो नमो गृत्सेभ्यो गृत्सपतिभ्यश्च वो नमो नमो व्रातेभ्यो व्रातपतिभ्यश्च वो नमो नमो गणेभ्यो गणपतिभ्यश्च वो नमो नमो विरूपेभ्यो विश्वरूपेभ्यश्च वो नमो नमो महद्भ्यः क्षुल्लकेभ्यश्च वो नमो नमो रथिभ्योऽरथेभ्यश्च वो नमो नमो रथेभ्यः (१) रथपतिभ्यश्च वो नमो नमः सेनाभ्यः सेनानिभ्यश्च वो नमो नमः क्षत्तृभ्यः संग्रहीतृभ्यश्च वो नमो नमस्तक्षभ्यो रथकारेभ्यश्च वो नमो नमः कुलालेभ्यः कर्मारेभ्यश्च वो नमो नमः पुञ्जिष्टेभ्यो निषादेभ्यश्च वो नमो नमं इषुकृद्भ्यो धन्वकृद्भ्यश्च वो नमो नमो मृगयुभ्यः श्वनिभ्यश्च

(चित्यग्निहोमोक्तिः)

वो नमो नमः श्वभ्यः श्वपतिभ्यश्च वो नमः (२) ॥

(रथेभ्यः श्वपतिभ्यश्च द्वे च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके पञ्चमप्रपाठके चतुर्थोऽनुवाकः ॥ ४ ॥

(अथ चतुर्थाष्टके पञ्चमप्रपाठके चतुर्थोऽनुवाकः ।)

नमः । आव्याधिनीभ्य इत्या—व्याधिनीभ्यः । विविध्यन्तीभ्य इति वि—विध्यन्तीभ्यः । च । वः । नमः । नमः । उगणाभ्यः । तृꣳहतीभ्यः । च । वः । नमः । नमः । गृत्सेभ्यः । गृत्सपतिभ्य इति गृत्सपति—भ्यः । च । वः । नमः । नमः । व्रातेभ्यः । व्रातपतिभ्य इति व्रातपति—भ्यः । च । वः । नमः । नमः । गणेभ्यः । गणपतिभ्य इति गणपति—भ्यः । च । वः । नमः । नमः । विरूपेभ्य इति वि—रूपेभ्यः । विश्वरूपेभ्य इति विश्व—रूपेभ्यः । च । वः । नमः । नमः । महद्भ्य इति महत्—भ्यः । क्षुल्लकेभ्यः । च । वः । नमः । नमः । रथिभ्य इति रथि—भ्यः । अरथेभ्यः । च । वः । नमः । नमः । रथेभ्यः (१) । रथपतिभ्य इति रथपति—भ्यः । च । वः । नमः । नमः । सेनाभ्यः । सेनानिभ्य

इति सेनानि—भ्यः । च । वः । नमः । नमः । क्षत्तृभ्य इति क्षत्तृ—भ्यः । संग्रहीतृभ्य इति संग्रहीतृ—भ्यः । च । वः । नमः । नमः । तक्षभ्य इति तक्ष—भ्यः । रथकारेभ्य इति रथ—कारेभ्यः । च । वः । नमः । नमः । कुलालेभ्यः । कर्मारेभ्यः । च । वः । नमः । नमः । पुञ्जिष्टेभ्यः । निषादेभ्यः । च । वः । नमः । नमः । इषुकृद्भ्य इतीषुकृत्—भ्यः । धन्वकृद्भ्य इति धन्वकृत्—भ्यः । च । वः । नमः । नमः । मृगयुभ्य इति मृगयु—भ्यः । श्वनिभ्य इति श्वनि—भ्यः । च । वः । नमः । नमः । श्वभ्य इति श्व—भ्यः । श्वपतिभ्य इति श्वपति—भ्यः । च । वः । नमः (२) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके पञ्चमप्रपाठके चतुर्थोऽनुवाकः ॥ ४ ॥

(अथ चतुर्थकाण्डे पञ्चमप्रपाठके चतुर्थोऽनुवाकः ।)

तृतीयानुवाके यान्युभयतोनमस्काराणि यजूंष्युक्तानि तेभ्योऽन्यानि कानिचिदुभयतोनमस्काराणि यजूंषि चतुर्थेऽभिधीयन्ते ॥

तत्र प्रथमं यजुराह—

नम आव्याधिनीभ्यो विविध्यन्तीभ्यश्च वो नमः, इति ।

आ समन्ताद्वेद्धुं शक्ताः स्त्रीमूर्तय आव्याधिन्यो विशेषेण वेद्धुं शक्ता विविध्यन्त्यस्ताभ्यो नमः ॥

अथ द्वितीयं यजुराह—

नम उगणाभ्यस्तृꣳहतीभ्यश्च वो नमः, इति ।

उत्कृष्टगणरूपाः सप्तमातृकाद्याः स्त्रिय उगणाः, हिंसितुं समर्था दुर्गाद्या उग्रदेवतास्तृंहत्यस्ताभ्यो नमः ॥

अथ तृतीयं यजुराह—

नमो गृत्सेभ्यो गृत्सपतिभ्यश्च वो नमः, इति ।

गर्धनशीला गृत्सा विषयलम्पटा इत्यर्थः । तेषां पालका गृत्सपतयस्तेभ्यो नमः ॥

अथ चतुर्थं यजुराह—

नमो व्रातेभ्यो व्रातपतिभ्यश्च वो नमः, इति ।

नानाजातीयानां संघा व्रातास्तेषां पालका व्रातपतयस्तेभ्यो नमः ॥

अथ पञ्चमं यजुराह—

नमो गणेभ्यो गणपतिभ्यश्च वो नमः, इति ।

देवस्यानुचरा भूतविशेषा गणास्तेषां पालका गणपतयस्तेभ्यो नमः ।

अथ षष्ठं यजुराह—

नमो विरूपेभ्यो विश्वरूपेभ्यश्च वो नमः, इति ।

विरूपा विकृतरूपा नग्नमुण्डादयः । विश्वरूपास्तुरंगगजवक्त्रादिनानाविधरूपधारिणो भृत्यास्तेभ्यो नमः ॥

अथ सप्तमं यजुराह—

नमो महद्भ्यः क्षुल्लकेभ्यश्च वो नमः, इति ।

अणिमाद्यैश्वर्योपेता महान्तस्तद्रहिताः क्षुल्लकास्तेभ्यो नमः ॥

अथाष्टमं यजुराह—

नमो रथिभ्योऽरथेभ्यश्च वो नमः, इति ।

रथमारूढा रथिनस्तद्रहिता अरथास्तेभ्यो नमः ।

अथ नवममारभ्य सप्तदशपर्यन्तानि स्पष्टार्थानि यजूंष्याह—

नमो रथेभ्यो रथपतिभ्यश्च वो नमो नमः सेनाभ्यः सेनानिभ्यश्च वो नमो नमः क्षत्तृभ्यः संग्रहीतृभ्यश्च वो नमो नमस्तक्षभ्यो रथकारे-

भ्यश्च वो नमो नमः कुलालेभ्यः कर्मारेभ्यश्च वो नमो नमः पुञ्जिष्टेभ्यो निषादेभ्यश्च वो नमो नम इषुकृद्भ्यो धन्वकृद्भ्यश्च वो नमो नमो मृगयुभ्यः श्वनिभ्यश्च वो नमो नमः श्वभ्यः श्वपतिभ्यश्च वो नमः॥ , इति ॥

पक्षिपुञ्जानां घातकाः पुञ्जिष्टाः । मत्स्यघातिनो निषादाः । शुनां गलेषु बद्धानां पाशानां धारकाः श्वनयः । अत्र द्वितीयानुवाको लीलार्थदेवतामूर्तिप्राधान्येन स्तोतुं प्रवृत्तः । तृतीयानुवाकश्चोरमूर्तिप्राधान्येन स्तोतुं प्रवृत्तः । चतुर्थोऽनुवाको नानाजातिमूर्तिप्राधान्येनेति विभागो द्रष्टव्यः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे पञ्चमप्रपाठके चतुर्थोऽनुवाकः ॥ ४ ॥

(अथ चतुर्थाष्टके पञ्चमप्रपाठके पञ्चमोऽनुवाकः ।)

नमो भवाय च रुद्राय च नमः शर्वाय च पशुपतये च नमो नीलग्रीवाय च शितिकण्ठाय च नमः कपर्दिने च व्युप्तकेशाय च नमः सहस्राक्षाय च शतधन्वने च नमो गिरिशाय च शिपिविष्टाय च नमो मीढुष्टमाय चेषुमते च नमो ह्रस्वाय च वामनाय च नमो बृहते च वर्षीयसे च नमो वृद्धाय च संवृध्वने च (१) नमो अग्रियाय च प्रथमाय च नमः

आशवे चाजिराय च नमः शीघ्रियाय च शीभ्याय च नम ऊर्म्याय चावस्वन्याय च नमः स्रोतस्याय च द्वीप्याय च (२) ॥

(संवृध्वने च पञ्चविंशतिश्च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके पञ्चमप्रपाठके पञ्चमोऽनुवाकः ॥ ५ ॥

(अथ चतुर्थाष्टके पञ्चमप्रपाठके पञ्चमोऽनुवाकः ।)

नमः । भवाय । च । रुद्राय । च । नमः । शर्वाय । च । पशुपतय इति पशु—पतये । च । नमः । नीलग्रीवायेति नील—ग्रीवाय । च । शितिकण्ठायेति शिति—कण्ठाय । च । नमः । कपर्दिने । च । व्युप्तकेशायेति व्युप्त—केशाय । च । नमः । सहस्राक्षायेति सहस्र—अक्षाय । च । शतधन्वन इति शत—धन्वने । च । नमः । गिरिशाय । च । शिपिविष्टायेति शिपि—विष्टाय । च । नमः । मीढुष्टमायेति मीढुः—तमाय । च । इषुमत इतीषु—मते । च । नमः । ह्रस्वाय । च । वामनाय । च । नमः । बृहते । च । वर्षीयसे । च । नमः । वृद्धाय । च । संवृध्वन इति सं—वृध्वने । च (१) । नमः । अग्रियाय । च । प्रथमाय । च । नमः । आशवे ।

च । अजिरायं । च । नमः । शीघ्रियाय । च । शीभ्यांय । च । नमः । ऊर्म्यांय । च । अवस्वन्यां-येत्यव—स्वन्यांय । च । नमः । स्रोतस्यांय । च । द्वीप्यांय । च (२) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके पञ्चमप्रपाठके पञ्चमोऽनुवाकः ॥ ५ ॥

(अथ चतुर्थकाण्डे पञ्चमप्रपाठके पञ्चमोऽनुवाकः ।)

चतुर्थेऽनुवाक उभयतोनमस्काराणि यजूंषि समापितानि । अथ पञ्चममारभ्य नवमान्तेष्वनुवाकेषु नमस्कारोपक्रमाण्येव यजूंष्यान्नायन्ते ॥

तत्र पञ्चमानुवाके प्रथमं यजुरारभ्य पञ्चदंश[1] यजूंष्याह—

नमो भवाय च रुद्राय च नमः शर्वाय च पशुपतये च नमो नीलग्रीवाय च शितिकण्ठाय च नमः कपर्दिने च व्युप्तकेशाय च नमः सहस्राक्षाय च शतधन्वने च नमो गिरिशाय च शिपिविष्टाय च नमो मीढुष्टमाय चेषुमते च नमो ह्रस्वाय च वामनाय च नमो बृहते च वर्षीयसे च नमो वृद्धाय च संवृध्वने च नमो अग्रियाय च प्रथमाय च नम आशवे चाजिराय च नमः शीघ्रियाय च शीभ्याय च नम ऊर्म्याय चावस्वन्याय च नमः स्रोतस्याय च द्वीप्याय च ।, इति ।

भवन्ति प्राणिनोऽस्मादिति भवः । रुद्रोदनहेतुभूतं दुःखं द्रावयतीति रुद्रः ।

---

१ ख. च. °दशान्तानि य° ।

शृणाति हिनस्ति पापमिति शर्वः । पशुसमानानज्ञानिनः पुरुषान्पालयतीति पशुपतिः । कालकूटधारणेन नीलवर्णो ग्रीवैकदेशो यस्यासौ नीलग्रीवः । शितिः श्वेतवर्णोऽवशिष्टः कण्ठप्रदेशो यस्यासौ शितिकण्ठः । कपर्दो जटाजूटो यस्यास्तीति कपर्दी । मुण्डितकेशो व्युप्तकेशः । पाशुपतादिवेषेण कपर्दित्वम् । यत्यादिवेषेण मुण्डितकेशत्वम् । इन्द्रवेषेण सहस्राक्षत्वम् । सहस्रभुजावतारित्वेन शतसंख्याकैर्धनुर्भिरुपेतत्वम् । गिरौ कैलासे शेते तिष्ठतीति गिरिशः । विष्णुमूर्तिधारी शिपिविष्टः । " विष्णुः शिपिविष्टः " इति श्रुतेः । मेघरूपेणात्यन्तं वर्षयिता मीढुष्टमः । बाणधारक इषुमान् । शरीरेऽल्पप्रमाणत्वं ह्रस्वत्वम् । अङ्गुल्याद्यवयवसंकोचाद्वामनत्वम् । आकारेण प्रौढो बृहन् । गुणैः समृद्धो वर्षीयान् । वयसाऽधिको वृद्धः । सम्यक्स्तुतिभिर्वर्धितः संवृध्वा । जगदुत्पत्तेः पूर्वमवस्थितोऽग्रियः । सभायां मुख्यः प्रथमः । आशुर्व्यापी । अजिरो गमनकुशलः । शीघ्रियः शीघ्रगामी । शीभशब्द उदकप्रवाहवाची, तत्रावस्थितः शीभ्यः । ऊर्मौ तरङ्गे स्थित ऊर्म्यः । अवस्वने ध्वनिरहिते स्थिरजलेऽवस्थितोऽवस्वन्यः । स्रोतसि प्रवाहे स्थितः स्रोतस्यः । द्वीपे वारिमध्यवर्तिभूमौ स्थितो द्वीप्यः । अत्रैकैकस्मिन्यजुषि चतुर्थ्यन्ताभ्यां पदाभ्यां नमःशब्दं पृथगन्वेतुं समुच्चयार्थौ चकारौ पठितौ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे पञ्चमप्रपाठके पञ्चमोऽनुवाकः ॥ ५ ॥

(अथ चतुर्थाष्टके पञ्चमप्रपाठके षष्ठोऽनुवाकः ।)

नमो ज्येष्ठाय च कनिष्ठाय च नमः पूर्वजाय चापरजाय च नमो मध्यमाय चापगल्भाय च नमो जघन्याय च बुध्नियाय च नमः सोभ्याय च प्रतिसर्याय च नमो याम्याय च क्षेम्याय च नम उर्वर्याय च खल्याय च नमः श्लोक्याय चावसान्याय च नमो व-

न्याय च कक्ष्याय च नमः श्रवाय च प्रतिश्र-
वाय च (१) नम आशुषेणाय चाऽऽशुर-
थाय च नमः शूराय चावभिन्दते च नमो
वर्मिणे च वरूथिने च नमो बिल्मिने च कव-
चिने च नमः श्रुताय च श्रुतसेनाय च (२) ॥

(प्रतिश्रवाय च पञ्चविंशतिश्च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके
पञ्चमप्रपाठके षष्ठोऽनुवाकः ॥ ६ ॥

(अथ चतुर्थाष्टके पञ्चमप्रपाठके षष्ठोऽनुवाकः ।)

नमः । ज्येष्ठाय । च । कनिष्ठाय । च । नमः । पूर्वजायेति पूर्व—जाय । च । अपरजायेत्यपर—जा-
य । च । नमः । मध्यमाय । च । अपगल्भायेत्य-
प—गल्भाय । च । नमः । जघन्याय । च । बुध्नि-
याय । च । नमः । सोभ्याय । च । प्रतिसर्यायेति
प्रति—सर्याय । च । नमः । याम्याय । च । क्षे-
म्याय । च । नमः । उर्वर्याय । च । खल्याय ।
च । नमः । श्लोक्याय । च । अवसान्यायेत्यव—
सान्याय । च । नमः । वन्याय । च । कक्ष्याय ।
च । नमः । श्रवाय । च । प्रतिश्रवायेति प्रति—

श्रवाय । च (१) । नमः । आशुषेणायेत्याशु—
सेनाय । च । आशुरथायेत्याशु—रथाय । च । नमः ।
शूराय । च । अवभिन्दत इत्यव—भिन्दते । च ।
नमः । वर्मिणे । च । वरूथिने । च । नमः । बि-
ल्मिने । च । कवचिने । च । नमः । श्रुताय ।
च । श्रुतसेनायेति श्रुत—सेनाय । च (२) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके
पञ्चमप्रपाठके षष्ठोऽनुवाकः ॥ ६ ॥

(अथ चतुर्थकाण्डे पञ्चमप्रपाठके षष्ठोऽनुवाकः ।)

पञ्चमेऽनुवाके कानिचिदन्यतरतोनमस्काराणि यजूंष्युक्तानि । अथ षष्ठे तथाविधान्येवान्यानि कानिचिद्यजूंष्युच्यन्ते ॥

तत्र विद्यमानानि पञ्चदश यजूंष्याह—

नमो ज्येष्ठाय च कनिष्ठाय च नमः पूर्व-
जाय चापरजाय च नमो मध्यमाय चाप-
गल्भाय च नमो जघन्याय च बुध्नियाय
च नमः सोभ्याय च प्रतिसर्याय च नमो
याम्याय च क्षेम्याय च नम उर्वर्याय च
खल्याय च नमः श्लोक्याय चावसान्याय च
नमो वन्याय च कक्ष्याय च नमः श्रवाय
च प्रतिश्रवाय च नम आशुषेणाय चाऽऽशुर-
थाय च नमः शूराय चावभिन्दते च नमो
वर्मिणे च वरूथिने च नमो बिल्मिने च कव-
चिने च नमः श्रुताय च श्रुतसेनाय च ।, इति ।

---

१ ख. च. °न्येव का° ।

विद्यैश्वर्यादिभिरधिको ज्येष्ठः । तै रहितोऽल्पः कनिष्ठः । पूर्वं जगदादौ हिरण्यगर्भरूपेणोत्पन्नः पूर्वजः । अपरस्मिञ्जगदवसानकाले संहर्तुं कालाग्न्यादिरूपेणोत्पन्नोऽपरजः । मध्यकाले देवतिर्यगादिरूपेणोत्पन्नो मध्यमः । अपगल्भोऽप्ररूढेन्द्रियो बालः । जघने गवादीनां पश्चाद्भागे वत्सादिरूपेण भवो जघन्यः । बुध्ने वृक्षादीनां मूले शाखादिरूपेणोत्पन्नो बुध्नियः । उभाभ्यां पुण्यपापाभ्यां सह वर्तत इति सोभो मनुष्यलोकः । अत एवाऽऽथर्वणिका आमनन्ति—'पुण्येन पुण्यं लोकं जयति पापेन पापमुभाभ्यामेव मनुष्यलोकम्' इति । तत्र भवः सोभ्यः । प्रतिसरो विवाहादौ हस्ते धार्यमाणो रक्षाबन्धस्तमर्हतीति प्रतिसर्यः । यमलोके पापिशिक्षकरूपेणोत्पन्नो याम्यः । क्षेमो मोक्षस्तमर्हतीति क्षेम्यः । उर्वरा सर्वसस्याढ्या भूमिस्तामर्हति धान्यविशेषरूपेणेत्युर्वर्यः । खलो धान्यविवेचनदेशस्तमर्हति मेढ्यादिरूपेणेति खल्यः । श्लोका वैदिकमन्त्रास्तत्प्रतिपाद्यत्वेन तत्र भवः श्लोक्यः । अवसानं वेदान्तस्तत्प्रतिपाद्यत्वेन तत्र भवोऽवसान्यः । वने वृक्षादिरूपेण भवो वन्यः । कक्षे लतादिरूपेण भवः कक्ष्यः । श्रूयत इति श्रवः शब्दः । प्रतिश्रवः प्रतिध्वनिः । आशुः शीघ्रगामिनी सेना यस्यासावाशुषेणः । आशुः शीघ्रगामी रथो यस्यासावाशुरथः । शूरो युद्धे धैर्यवान् । अवभिन्दन्वैरिणां प्रहर्ता । वर्मी कञ्चुकोपेतः । वरूथी गृहोपेतः । बिल्मं बिलोपेतं युद्धे शिरोरक्षकं तदस्यास्तीति बिल्मी । कवचः शरीररक्षकः सोऽस्यास्तीति कवची । श्रुतो वेदेषु प्रसिद्धः । श्रुता वेदेषु प्रसिद्धा सेना यस्यासौ श्रुतसेनः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे पञ्चमप्रपाठके
षष्ठोऽनुवाकः ॥ ६ ॥

(अथ चतुर्थाष्टके पञ्चमप्रपाठके सप्तमोऽनुवाकः ।)

नमो॑ दुन्दु॒भ्याय॑ चाऽऽहनन्या॒य॑ च॒ नमो॑
धृ॒ष्णवे॑ च प्रमृ॒शाय॑ च॒ नमो॑ दू॒ताय॑ च॒ प्रहि॑-
ताय च॒ नमो॑ निषङ्गि॒णे॑ चेषुधि॒मते॑ च॒ नम॑-

१ ख. च. 'ल्भोऽप्रौढे' । २ ख. च. नयति ।

स्ती॒क्ष्णेष॑वे चाऽऽयु॒धिने॑ च॒ नमः॑ स्वायु॒धाय॑
च सुधन्व॑ने च॒ नमः॑ स्रु॒त्याय॑ च॒ पथ्या॑य च॒
नमः॑ का॒ट्याय॑ च नी॒प्याय॑ च॒ नमः॑ सू॒द्याय॑
च सर॒स्याय॑ च॒ नमो॑ ना॒द्याय॑ च वैश॒न्ताय॑
च (१) नमः॑ कू॒प्याय॑ चाव॒ट्याय॑ च॒ नमो॑
वर्ष्या॑य चावर्ष्या॑य च॒ नमो॑ मे॒घ्याय॑ च
विद्यु॒त्याय॑ च॒ नम॑ ईध्रि॒याय॑ चाऽऽत॒प्याय॑ च॒
नमो॑ वात्या॑य च रेष्मि॒याय॑ च॒ नमो॑ वास्त॒-
व्या॑य च वास्तु॒पाय॑ च (२) ॥

(वैशन्ताय च त्रिंशच्च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके
पञ्चमप्रपाठके सप्तमोऽनुवाकः ॥ ७ ॥

(अथ चतुर्थाष्टके पञ्चमप्रपाठके सप्तमोऽनुवाकः ।)

नमः॑ । दुन्दु॒भ्याय॑ । च॒ । आ॒ह॒न॒न्या॒यायेत्या॑—
ह॒न॒न्या॒य॑ । च॒ । नमः॑ । धृ॒ष्णवे॑ । च॒ । प्र॒मृ॒शायेति॑ प्र—मृ॒शाय॑ । च॒ । नमः॑ । दू॒ताय॑ । च॒ । प्रहि॑ताये॒ति॑ प्र—हि॒ताय॑ । च॒ । नमः॑ । नि॒ष॒ङ्गि॒ण॒ इति॑ नि—स॒ङ्गि॒णे॑ । च॒ । इ॒षु॒धि॒मत॒ इती॑षुधि—म॒ते॑ । च॒ । नमः॑ । ती॒क्ष्णेष॑व॒ इति॑ ती॒क्ष्ण—इ॒षवे॑ । च॒ । आ॒यु॒धिने॑ । च॒ । नमः॑ । स्वा॒यु॒धाये॒ति॑ सु—आ॒यु॒धाय॑ । च॒ ।

सुधन्वंन इतिं सु—धन्वंने । च । नमंः । स्रुत्यांय ।
च । पथ्यांय । च । नमंः । काट्यांय । च । नीप्यां-
य । च । नमंः । सूद्यांय । च । सरस्यांय । च ।
नमंः । नाद्यार्य । च । वैशन्तार्य । च (१)।
नमंः । कूप्यांय । च । अवट्यांय । च । नमंः ।
वर्ष्यांय । च । अवर्ष्यार्य । च । नमंः । मेघ्यांय ।
च । विद्युत्यांयेतिं वि—द्युत्यांय । च । नमंः । ईध्रियांय ।
च । आतप्यांयेत्यां—तप्यांय । च । नमंः । वात्यांय ।
च । रेष्मियाय । च । नमंः । वास्तव्यांय । च ।
वास्तुपायेतिं वास्तु—पार्य । च (२)॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके
पञ्चमप्रपाठके सप्तमोऽनुवाकः ॥ ७ ॥

(अथ चतुर्थकाण्डे पञ्चमप्रपाठके सप्तमोऽनुवाकः ।)

षष्ठेऽनुवाके यान्यन्यतरतोनमस्काराणि यजूंष्युक्तानि तेभ्योऽन्यानि कानिचिद्यजूंषि सप्तमेऽभिधीयन्ते ॥

तत्र विद्यमानानि षोडश यजूंष्याह—

नमो दुन्दुभ्याय चाऽऽहनन्याय च नमो
धृष्णवे च प्रमृशाय च नमो दूताय च प्रहि-
ताय च नमो निषङ्गिणे चेषुधिमते च नम-
स्तीक्ष्णेषवे चाऽऽयुधिने च नमः स्वायुधाय
च सुधन्वने च नमः स्रुत्याय च पथ्याय च
नमः काट्याय च नीप्याय च नमः सूद्याय

च सरस्याय च नमो नाद्याय च वैशन्ताय
च नमः कूप्याय चावट्याय च नमो
वर्ष्याय चावर्ष्याय च नमो मेघ्याय च
विद्युत्याय च नम ईध्रियाय चाऽऽतप्याय
च नमो वात्याय च रेष्मियाय च नमो
वास्तव्याय च वास्तुपाय च ॥, इति ॥

दुन्दुभौ भेर्यां भवः शब्दो दुन्दुभ्यः । आहन्यते ताड्यतेऽनेनेत्याहननं दुन्दुभ्याघातार्थो दण्डस्तत्र ताडनरूपेणोत्पन्न आहनन्यः । धृष्णुर्युद्धे पलायनरहितः । प्रमृशः परसैन्यवृत्तान्तपरामर्शकः । दूतस्तद्वृत्तान्तज्ञापनकुशलः । प्रहितः स्वामिना प्रेषितः पुरुषः । निषङ्गी खड्गयुक्तः । इषुधिमान्बाणाधारयुक्तः । तीक्ष्णा इषवो यस्यासौ तीक्ष्णेषुः । बहून्यायुधानि यस्य सन्तीत्यायुधी । शोभनमायुधं त्रिशूलरूपं यस्यासौ स्वायुधः । शोभनं धन्व पिनाकरूपं यस्यासौ सुधन्वा । स्रुतिः पादसंचारमात्रयोग्यः क्षुद्रमार्गस्तमर्हतीति स्रुत्यः । पन्था रथाश्वादिसंचारक्षमः प्रौढो मार्गस्तमर्हतीति पथ्यः । कुत्सितमटति जलमत्रेति काटोऽल्पप्रवाहयोग्यः कुल्याप्रदेशस्तत्र जलरूपेण भवः काट्यः । यस्मिन्प्रदेशे पर्वताग्राज्जलं न्यग्भावेन पतति स प्रदेशो नीपस्तत्र जलरूपेणावस्थितो नीप्यः । सूदः कर्दमप्रदेशस्तत्रत्यजलरूपः सूद्यः । सरः प्रसिद्धं, तत्रत्यजलरूपः सरस्यः । नदीगतजलरूपो नाद्यः । अल्पसरो वेशन्तस्तत्रत्यजलरूपो वैशन्तः । कूपस्थजलरूपः कूप्यः । अवटस्थजलरूपोऽवट्यः । वर्षजलरूपो वर्ष्यः । वर्षनिरपेक्षजलरूपोऽवर्ष्यः । मेघेषु स्थितो मेघ्यः । विद्युता सह चरतीति विद्युत्यः । ईध्रं निर्मलत्वेन दीप्यमानं शरदभ्रं तत्र भव ईध्रियः । आतपेन सह वृष्ट आतप्यः । वातेन सह वृष्टो वात्यः । रिष्यन्ति विनश्यन्ति भूतान्यत्रेति रेष्मः प्रलयकालस्तत्र भवः शर्करापाषाणादिसहितो वृष्टिजलविशेषो रेष्मियः । वस्तु धनं (न) गवाश्वादिपदार्थरूपं तत्र तत्कार्यरूपेणावस्थितो वास्तव्यः । गृहनिर्माणार्था भूमिर्वास्तु तत्पालको वास्तुपः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे पञ्चमप्रपाठके
सप्तमोऽनुवाकः ॥ ७ ॥

---

१ ख. च. खड्गहस्तः । २ ख. च. °ह चरितो वि° । ३ ख. च. °स्तुस्तत्पा° ।

(अथ चतुर्थाष्टके पञ्चमप्रपाठकेऽष्टमोऽनुवाकः ।)

नमः सोमाय च रुद्राय च नमस्ताम्राय चारुणाय च नमः शङ्गाय च पशुपतये च नम उग्राय च भीमाय च नमो अग्रेवधाय च दूरेवधाय च नमो हन्त्रे च हनीयसे च नमो वृक्षेभ्यो हरिकेशेभ्यो नमस्ताराय नमः शंभवे च मयोभवे च नमः शंकराय च मयस्कराय च नमः शिवाय च शिवतराय च (१) नमस्तीर्थ्याय च कूल्याय च नमः पार्याय चावार्याय च नमः प्रतरणाय चोत्तरणाय च नम आतार्याय चाऽऽलाद्याय च नमः शष्प्याय च फेन्याय च नमः सिकत्याय च प्रवाह्याय च (२) ॥

(शिवतराय च त्रिंशच्च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके पञ्चमप्रपाठकेऽष्टमोऽनुवाकः ॥ ८ ॥

(अथ चतुर्थकाण्डे पञ्चमप्रपाठकेऽष्टमोऽनुवाकः ।)

नमः । सोमाय । च । रुद्राय । च । नमः । ताम्राय । च । अरुणाय । च । नमः । शङ्गाय । च । पशुपतय इति पशु—पतये । च । नमः । उग्राय ।

च । भीमाय । च । नमः । अग्रेवधायेत्यग्रे—वधाय । च । दूरेवधायेति दूरे—वधाय । च । नमः । हन्त्रे । च । हनीयसे । च । नमः । वृक्षेभ्यः । हरिकेशेभ्य इति हरि—केशेभ्यः । नमः । ताराय । नमः । शंभव इति शं—भवे । च । मयोभव इति मयः—भवे । च । नमः । शंकरायेति शं—कराय । च । मयस्करायेति मयः—कराय । च । नमः । शिवाय । च । शिवतरायेति शिव—तराय । च (१) । नमः । तीर्थ्याय । च । कूल्याय । च । नमः । पार्याय । च । अवार्याय । च । नमः । प्रतरणायेति प्र—तरणाय । च । उत्तरणायेत्युत्—तरणाय । च । नमः । आतार्यायेत्या—तार्याय । च । आलाद्यायेत्या—लाद्याय । च । नमः । शष्प्याय । च । फेन्याय । च । नमः । सिकत्याय । च । प्रवाह्यायेति प्र—वाह्याय । च (२) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके पञ्चमप्रपाठकेऽष्टमोऽनुवाकः ॥ ८ ॥

(अथ चतुर्थकाण्डे पञ्चमप्रपाठकेऽष्टमोऽनुवाकः ।)

सप्तमेऽनुवाके यान्यन्यतरतोनमस्काराणि यजूंष्युक्तानि तेभ्योऽन्यानि कानिचिदन्यतरतोनमस्काराण्यष्टमेऽनुवाके कथ्यन्ते ॥

तत्र विद्यमानानि सप्तदश यजूंष्याह—

नमः सोमाय च रुद्राय च नमस्ताम्राय चारुणाय च नमः शङ्गाय च पशुपतये च नम उग्राय च भीमाय च नमो अग्रेवधाय च दूरेवधाय च नमो हन्त्रे च हनीयसे च नमो वृक्षेभ्यो हरिकेशेभ्यो नमस्ताराय नमः शंभवे च मयोभवे च नमः शंकराय च मयस्कराय च नमः शिवाय च शिवतराय च नमस्तीर्थ्याय च कूल्याय च नमः पार्याय चावार्याय च नमः प्रतरणाय चोत्तरणाय च नम आतार्याय चाऽऽलाद्याय च नमः शष्प्याय च फेन्याय च नमः सिकत्याय च प्रवाह्याय च ॥, इति ॥

उमया सह वर्तत इति सोमः । रुद्रोदनहेतुर्दुःखं तद्द्रावयति विनाशयतीति रुद्रः । आदित्यरूपेणोदयकालेऽत्यन्तं रक्तस्ताम्रः । उदयादूर्ध्वमीषद्रक्तोऽरुणः । शं सुखं गमयति प्रापयतीति शंगः । पशूनां पालयिता पशुपतिः । विरोधिनो नाशयितुं क्रोधयुक्त उग्रः । दर्शनमात्रेण विरोधिनां भयहेतुर्भीमः । अग्रे पुरतो वधोऽस्येत्यग्रेवधः । एवं दूरेवधः । पुरतो दूरे वा वर्तमानं विरोधिनमनायासेनैव हन्तीत्यर्थः । लोकेऽपि यो यत्र विरोधिनं हन्ति तत्र तद्रूपेणायमेव हन्ता । अत एवेश्वरेणार्जुनं प्रत्युक्तम्—

" मयैवैते निहताः पूर्वमेव निमित्तमात्रं भव सव्यसाचिन् " इति ।

संहारकालेऽतिशयेन च सर्वेषां हन्ता हनीयान् । हरितवर्णानि केशसदृशानि पर्णानि येषां ते हरिकेशास्तथाविधा ये वृक्षाः कल्पतरुप्रभृतयस्तद्रूपोऽयं रुद्र इत्यर्थः । तारः प्रणवप्रतिपाद्यः । शं सुखं भावयत्युत्पादयतीति शंभुः । मयः सुखं भावयतीति मयोभूः । एकं विषयसुखमपरं मोक्षसुखमिति तयोर्विवेकः । पित्रादिरूपेण शं लौकिकसुखं करोतीति शंकरः । आचार्यशास्त्रादिरूपेण मोक्षसुखं करोतीति मयस्करः । साक्षात्सुखकारित्वमेताभ्यां पदाभ्यामुक्तमेतन्मुखेन कारयितृत्वं पूर्वाभ्यां पदाभ्यामिति विवेकः । शिवः कल्याणरूपः स्वयं निष्कल्मष इत्यर्थः । अतिशयेन शिवः शिवतरः स्वभक्तानपि निष्कल्मषान्करोतीत्यर्थः । तीर्थे प्रयागादौ संनिहितस्तीर्थ्यः । कूले नदीतीरे प्रतिष्ठापितलिङ्गरूपेणावतिष्ठत इति कूल्यः । पारे संसारसमुद्रस्य परतीरे मुमुक्षुभिर्ध्येयत्वेनावतिष्ठत इति पार्यः । अवारेऽर्वाक्तीरे संसारमध्ये काम्यफलप्रदत्वेनावतिष्ठत इत्यवार्यः । प्रकृष्टेन मन्त्रजपादिरूपेण पापतरणहेतुः प्रतरणः । तत्त्वज्ञानरूपेण कृत्स्नसंसारोत्तरणहेतुरुत्तरणः । संभवत्यपि संसारोत्तरणहेतौ तत्त्वज्ञाने तदुपेक्ष्य काम्यकर्मानुष्ठानेन संसारे पुनरागमनमातारस्तमर्हतीत्यातार्यः, काम्यफलप्रद इत्यर्थः । अलं संपूर्णं यथा भवति तथा कर्मफलमत्तीत्यलादो जीवः । " तयोरन्यः पिप्पलं स्वाद्वत्ति " इति श्रुतेः । तस्य प्रेरकत्वेन तत्संबन्धित्वादालाद्यः । शष्पं बालतृणं गङ्गातीरादावुत्पन्नं कुशाङ्कुरादि तदर्हतीति शष्प्यः । नदीमध्यगतं फेनमर्हतीति फेन्यः । सिकतामर्हतीति सिकत्यः । प्रवाहमर्हतीति प्रवाह्यः । यः पुरुषः श्रद्धालुः सन्स्नानादितत्परो निरन्तरं गङ्गादितीरे वर्तते तद्रूप इति शष्प्यादिशब्दानां चतुर्णां तात्पर्यार्थः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहितामाष्ये चतुर्थकाण्डे पञ्चमप्रपाठकेऽ-
ष्टमोऽनुवाकः ॥ ८ ॥

(अथ चतुर्थाष्टके पञ्चमप्रपाठके नवमोऽनुवाकः ।)

नमः इरिण्याय च प्रपथ्याय च नमः किंशिलाय च क्षयणाय च नमः कपर्दिने च पुलस्तये च नमो गोष्ठ्याय च गृह्याय च नमस्तल्प्याय च गेह्याय च नमः काट्याय च गह्वरेष्ठाय च नमो ह्रद्यय च निवेष्प्याय च नमः पांसव्याय च रजस्याय च नमः शुष्क्याय च हरित्याय च नमो लो-

प्यांय चोलुप्यांय च (१) नमं ऊर्व्यांय च सूर्म्यांय च नमः पूर्ण्यांय च पर्णशद्यांय च नमोऽपगुरमांणाय चाभिघ्नते च नमं आक्खिदते चं प्रक्खिदते च नमो वः किरिकेभ्यो देवानाꣳ हृदयेभ्यो नमो विक्षीणकेभ्यो नमो विचिन्वत्केभ्यो नमं आनिर्हतेभ्यो नमं आमीवत्केभ्यः (२)।

(उलप्यांय च त्रयस्त्रिꣳशच्च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके पञ्चमप्रपाठके नवमोऽनुवाकः ॥ ९ ॥

(अथ चतुर्थाष्टके पञ्चमप्रपाठके नवमोऽनुवाकः ।)

नमः । इरिण्यांय । च । प्रपथ्यांयेतिं प्र—पथ्यांय । च । नमः । किꣳशिलायं । च । क्षयंणाय । च । नमः । कपर्दिनें । च । पुलस्तयें । च । नमः । गोष्ठ्यायेति गो—स्थ्याय । च । गृह्यांय । च । नमः । तल्प्यांय । च । गेह्यांय । च । नमः । काट्यांय । च । गह्वरेष्ठायेतिं गह्वरे—स्थायं । च । नमः । हृदय्यांय । च । निवेष्प्यांयेतिं नि—वेष्प्यांय । च । नमः । पाꣳसव्यांय । च । रजस्यांय । च । नमः ।

शुष्क्यांय । च । हरित्यांय । च । नमः । लोप्यांय । च । उलप्यांय । च (१) । नमः । ऊर्व्यांय । च । सूर्म्यांय । च । नमः । पूर्ण्यांय । च । पर्णशद्यांयेतिं पर्ण—शद्यांय । च । नमः । अपगुरमांणायेत्यप—गुरमांणाय । च । अभिघ्नत इत्यभि—घ्नते । च । नमः । आक्खिदत इत्या—खिदते । च । प्रक्खिदत इतिं प्र—खिदते । च । नमः । वः । किरिकेभ्यः । देवानांम् । हृदयेभ्यः । नमः । विक्षीणकेभ्य इतिं वि—क्षीणकेभ्यः । नमः । विचिन्वत्केभ्य इतिं वि—चिन्वत्केभ्यः । नमः । आनिर्हतेभ्य इत्यानिः—हतेभ्यः । नमः । आमीवत्केभ्य इत्या—मीवत्केभ्यः (२) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके पञ्चमप्रपाठके नवमोऽनुवाकः ॥ ९ ॥

(अथ चतुर्थकाण्डे पञ्चमप्रपाठके नवमोऽनुवाकः ।)

अष्टमानुवाके यान्यन्यतरतोनमस्काराणि यजूंष्युक्तानि तेभ्योऽप्यन्यानि कानिचिन्नवमेऽनुवाक उच्यन्ते ॥

तत्र विद्यमानान्येकोनविंशतिसंख्याकानि यजूंष्याह—

नम इरिण्याय च प्रपथ्याय च नमः किꣳशिलाय च क्षयणाय च नमः कपर्दिने च पुलस्तये च नमो गोष्ठ्याय च गृह्याय च नमस्तल्प्याय च गेह्याय च नमः काट्याय च

(चित्यग्निहोमोक्तिः)

गह्वरेष्ठाय च नमो ह्रदय्याय च निवेष्प्याय च नमः पाꣳसव्याय च रजस्याय च नमः शुष्क्याय च हरित्याय च नमो लोप्याय चोलप्याय च नम ऊर्व्याय च सूर्म्याय च नमः पर्ण्याय च पर्णशद्याय च नमोऽपगुरमाणाय चाभिघ्नते च नम आक्खिदते च प्रक्खिदते च नमो वः किरिकेभ्यो देवानाꣳ हृदयेभ्यो नमो विक्षीणकेभ्यो नमो विचिन्वत्केभ्यो नम आनिर्हतेभ्यो नम आमीवत्केभ्यः ॥ , इति ॥

इरिणमूषरं तत्र भव इरिण्यः । प्रपथो बहुभिः सेवितो मार्गस्तत्र भवः प्रपथ्यः । कुत्सिताः क्षुद्राः शिला यत्र प्रदेशे तादृशः शार्करिलः प्रदेशः किंशिलः । क्षयणो निवासयोग्यो देशः । कपर्दी जटाबन्धवान् । भक्तानां पुरतस्तिष्ठतीति पुलस्तिः । गवां स्थानं गोष्ठं तत्र भवो गोष्ठ्यः । गृहे भवो गृह्यः । तल्पे खट्वायां शयानस्तल्प्यः । गेहे प्रासादे भवो गेह्यः । कुत्सितमटति कण्टकलतादिपूर्णतया दुष्प्रवेशत्वं प्राप्नोतीति दुर्गमोऽरण्यविशेषः काटस्तत्र भवः काट्यः । गह्वरे विषमे गिरिगुहादौ तिष्ठतीति गह्वरेष्ठः । ह्रदेष्वगाधजलेषु भवो ह्रदय्यः । निवेष्पं नीहारजलं तत्र भवो निवेष्प्यः । पांसुषु परमाणुष्ववस्थितः पांसव्यः । रजसि विस्पष्टायां धूल्यामवस्थितो रजस्यः । शुष्केषु काष्ठेषु भवः शुष्क्यः । हरितमार्द्रं तत्र भवो हरित्यः । लुप्यते तृणादिकमस्मिन्निति लोपः कठिनप्रदेशस्तत्र भवो लोप्यः । उलपा बल्वजतृणादयस्तत्र भव उलप्यः । उर्व्यां पृथिव्यां भव ऊर्व्यः । शोभना ऊर्मयो यस्यां नद्यां सेयं सूर्मिस्तत्र भवः सूर्म्यः । पर्णेषु पत्रेषु भवः पर्ण्यः । शुष्काणां पर्णानां संघातः पर्णशदस्तत्र भवः पर्णशद्यः । अपगुरमाण उद्यतायुधः । अभिघ्नन्प्रहरन् । आक्खिदन्नीषत्खेदयन् । प्रक्खिदन्नत्यन्तं खेदयन् । किरन्ति भक्तेभ्यो धनानीति किरिका उदारा रुद्रावताराः । ते च देवानां हृदयभूताः सर्वदेवप्रियत्वात्तादृशेभ्यो वो युष्मभ्यं नमः । क्षीणकेभ्यो विपरीता विक्षीणकाः कदाचिदपि क्षयरहिता इत्यर्थः । विचिन्वन्त्यपेक्षितमर्थं संपादयन्तीति विचिन्वत्काः । आ समन्तान्निःशेषेण हतं पापं यैस्त आनिर्हताः । आ समन्तान्मीवन्ति स्थूलीभावं प्राप्नुवन्तीत्यामीवत्काः ।

(चित्यग्निहोमोक्तिः)

अत्र विक्षीणकविचिन्वत्कानिर्हतामीवत्केषु देवानाꣳ हृदयेभ्य इत्यनुषज्जते । पञ्चमानुवाकमारभ्य नवमान्तेष्वनुवाकेष्वन्यतरतोनमस्काराणि बहूनि यजूंष्यभिहितानि । तैः सर्वैः परमेश्वरस्य सार्वात्म्यं प्रतिपादयितुमेकैकेन यजुषा स्थावरं जङ्गमं चैकैकं रूपमभिहितम् । अनुवाकभेदस्तु क्रतोर्बहिः प्रयोगे मन्त्रभेदाभिप्रायेण द्रष्टव्यः । एकैकोऽनुवाक एकैको मन्त्रः । तत्र तस्य पुरश्चरणादिप्रकारस्तु रुद्रकल्पेऽभिधास्यते ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे पञ्चमप्रपाठके
नवमोऽनुवाकः ॥ ९ ॥

(अथ चतुर्थाष्टके पञ्चमप्रपाठके दशमोऽनुवाकः ।)

द्रापे अन्धꣳसस्पते दरिद्रन्नीललोहित । एषां पुरुषाणामेषां पशूनां मा भेर्माऽरो मो एषां किं चनाऽऽममत् । या ते रुद्र शिवा तनूः शिवा विश्वाहभेषजी । शिवा रुद्रस्य भेषजी तया नो मृड जीवसे । इमाꣳ रुद्राय तवसे कपर्दिने क्षयद्वीराय प्र भरामहे मतिम् । यथा नः शमसद्द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे अस्मिन् (१) अनातुरम् । मृडा नो रुद्रोत नो मयस्कृधि क्षयद्वीराय नमसा विधेम ते । यच्छं च योश्च मनुरायजे पिता तदश्याम तव रुद्र प्रणीतौ । मा नो महान्तमुत मा नो अर्भकं मा न उक्षन्तमुत मा न उक्षितम् । मा नो

वधीः पितरं मोत मातरं प्रिया मा नस्तनुवः (२) रुद्र रीरिषः । मा नस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः । वीरान्मा नो रुद्र भामितो वधीर्हविष्मन्तो नमसा विधेम ते । आरात्ते गोघ्न उत पूरुषघ्ने क्षयद्वीराय सुम्नमस्मे ते अस्तु । रक्षा च नो अधि च देव ब्रूह्यधा च नः शर्म यच्छ द्विबर्हाः । स्तुहि (३) श्रुतं गर्तसदं युवानं मृगं न भीममुपहत्नुमुग्रम् । मृडा जरित्रे रुद्र स्तवानो अन्यं ते अस्मन्नि वपन्तु सेनाः । परि णो रुद्रस्य हेतिर्वृणक्तु परि त्वेषस्य दुर्मतिरघायोः । अव स्थिरा मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तनयाय मृडय । मीढुष्टम शिवतम शिवो नः सुमना भव । परमे वृक्ष आयुधं निधाय कृत्तिं वसान आ चर पिनाकम् (४) बिभ्रदा गहि । विकिरिद विलोहित नमस्ते अस्तु भगवः । यास्ते सहस्रꣳ हेतयोऽन्यमस्मन्नि वपन्तु ताः । सहस्राणि सहस्रधा बाहुवोस्तव हेतयः । तासामीशानो भगवः पराचीना मुखा कृधि (५) ॥

(अस्मिꣳस्तनुवः स्तुहि पिनाकमेकान्नत्रिꣳशच्च)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके पञ्चमप्रपाठके दशमोऽनुवाकः ॥ १० ॥

(अथ चतुर्थाष्टके पञ्चमप्रपाठके दशमोऽनुवाकः ।)

द्राघे । अन्धसः । पते । दरिद्रन् । नीललोहितेति नील—लोहित । एषाम् । पुरुषाणाम् । एषाम् । पशूनाम् । मा । भेः । मा । अरः । मो इति । एषाम् । किम् । चन । आममत् । या । ते । रुद्र । शिवा । तनूः । शिवा । विश्वाहभेषजीति विश्वाहं—भेषजी । शिवा । रुद्रस्य । भेषजी । तया । नः । मृड । जीवसे । इमाम् । रुद्राय । तवसे । कपर्दिने । क्षयद्वीरायेति क्षयत्—वीराय । प्रेति । भरामहे । मतिम् । यथा । नः । शम् । असत् । द्विपदिति द्वि—पदे । चतुष्पदिति चतुः—पदे । विश्वम् । पुष्टम् । ग्रामे । अस्मिन् (१) । अनातुरमित्यनातुरम् । मृड । नः । रुद्र । उत । नः । मयः । कृधि । क्षयद्वीरायेति क्षयत्—वीराय । नमसा । विधेम । ते । यत् । शम् । च । योः । च । मनुः । आयजइत्या—यजे । पिता । तत् । अश्याम । तव । रुद्र । प्रणीतावितिप्र—नीतौ । मा । नः । महा-

न्तम् । उत । मा । नः । अर्भकम् । मा । नः । उक्ष-
न्तम् । उत । मा । नः । उक्षितम् । मा । नः । वधीः ।
पितरम् । मा । उत । मातरम् । प्रियाः । मा । नः ।
तनुवः (२) । रुद्र । रीरिषः । मा । नः । तोके ।
तनये । मा । नः । आयुषि । मा । नः । गोषु ।
मा । नः । अश्वेषु । रीरिषः । वीरान् । मा । नः ।
रुद्र । भामितः । वधीः । हविष्मन्तः । नमसा ।
विधेम । ते । आरात् । ते । गोघ्न इति गो—घ्ने ।
उत । पूरुषघ्न इति पूरुष—घ्ने । क्षयद्वीरायेति क्षय-
त्—वीराय । सुम्नम् । अस्मे इति । ते । अस्तु ।
रक्ष । च । नः । अधीति । च । देव । ब्रूहि । अध ।
च । नः । शर्म । यच्छ । द्विबर्हा इति द्वि—बर्हाः ।
स्तुहि (३) । श्रुतम् । गर्तसदमिति गर्त—सदम् ।
युवानम् । मृगम् । न । भीमम् । उपहत्नुम् । उग्र-
म् । मृड । जरित्रे । रुद्र । स्तवानः । अन्यम् । ते ।
अस्मत् । नीति । वपन्तु । सेनाः । परीति । नः ।
रुद्रस्य । हेतिः । वृणक्तु । परीति । त्वेषस्य । दुर्म-
तिरिति दुः—मतिः । अघायोरित्यघ—योः । अवेति ।
स्थिरा । मघवद्भ्य इति मघवत्—भ्यः । तनुष्व ।
मीढ्वः । तोकाय । तनयाय । मृडय । मीढुष्टमेति

मीढुः—तम । शिवतमेति शिव—तम । शिवः । नः ।
सुमना इति सु—मनाः । भव । परमे । वृक्षे । आ-
युधम् । निधायेति नि—धाय । कृत्तिम् । वसानः ।
एति । चर । पिनाकम् (४) । बिभ्रत् । एति ।
गहि । विकिरिदेति वि—किरिद । विलोहितेति
वि—लोहित । नमः । ते । अस्तु । भगव इति भ-
ग—वः । याः । ते । सहस्रम् । हेतयः । अन्यम् ।
अस्मत् । नीति । वपन्तु । ताः । सहस्राणि । सह-
स्रधेति सहस्र—धा । बाहुवोः । तव । हेतयः । ता-
साम् । ईशानः । भगव इति भग—वः । पराचीनाः ।
मुखा । कृधि (५) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके
पञ्चमप्रपाठके दशमोऽनुवाकः ॥ १० ॥

(अथ चतुर्थकाण्डे पञ्चमप्रपाठके दशमोऽनुवाकः ।)

द्वितीयमारभ्य नवमान्तेष्वनुवाकेषु विविधानि यजूंष्युभयतोनमस्काराण्यन्य-
तरतोनमस्काराणि चोक्तानि । अथ दशमेऽनुवाक ऋचूपा मन्त्रा उच्यन्ते ॥
तत्र प्रथमामृचमाह—

द्रापे अन्धसस्पते दरिद्रन्नीललोहित ।
एषां पुरुषाणामेषां पशूनां मा भेर्माऽरो
मो एषां किं चनाऽऽममत् ।, इति ।

द्रापयति कुत्सितां गतिं प्रापयतीति द्रापिः पापिनो नरकपदानेन क्लेश-

यथोक्तविशेषणत्रयविशिष्ट हे रुद्र ते तुभ्यं नमोऽस्तु । ते तव सहस्रं सहस्रसंख्याका हेतयो यान्यायुधानि सन्ति ताः सर्वा अस्मदन्यं विरोधिनं निवपन्तु विनाशयन्तु ॥

अथ द्वादशीमाह—

सहस्राणि सहस्रधा बाहुवोस्तव
हेतयः । तासामीशानो भगवः
पराचीना मुखा कृधि ।, इति ॥

हे रुद्र तव बाहुवोर्हस्तयोर्हेतयः सहस्रधा सहस्रप्रकाराः सहस्राणि सहस्रसंख्याका विद्यन्ते । धनुः खड्गास्त्रिशूलमित्येवं जातिभेदेन सहस्रप्रकारत्वम् । एकैकस्यां जातौ बहवः सहस्रसंख्याकाः । हे भगवः षड्गुणोपेत त्वमीशानः समर्थः संस्तासां हेतीनां मुखा मुखानि शल्यानि पराचीना कुध्यस्मत्तः पराञ्चुखानि कुरु ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे पञ्चमप्रपाठके
दशमोऽनुवाकः ॥ १० ॥

(अथ चतुर्थाष्टके पञ्चमप्रपाठक एकादशोऽनुवाकः ।)

सहस्राणि सहस्रशो ये रुद्रा अधिभूम्याम् ।
तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि । अ-
स्मिन्महत्यर्णवेऽन्तरिक्षे भवा अधि । नील-
ग्रीवाः शितिकण्ठाः शर्वा अधः क्षमाचराः ।
नीलग्रीवाः शितिकण्ठा दिवꣳ रुद्रा उपश्रिताः ।
ये वृक्षेषु सस्पिञ्जरा नीलग्रीवा विलोहिताः ।
ये भूतानामधिपतयो विशिखासः कपर्दिनः ।
ये अन्नेषु विविध्यन्ति पात्रेषु पिबतो जनान् ।

ये पथां पथिरक्षय ऐलबृदा यव्युधः । ये
तीर्थानि (१) प्रचरन्ति सृकावन्तो निषङ्गिणः ।
य एतावन्तश्च भूयाꣳसश्च दिशो रुद्रा वितस्थिरे । तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि । नमो रुद्रेभ्यो ये पृथिव्यां येऽन्तरिक्षे ये
दिवि येषामन्नं वातो वर्षमिषवस्तेभ्यो दश
प्राचीर्दशं दक्षिणा दशं प्रतीचीर्दशोदीचीर्दशोध्वास्तेभ्यो नमस्ते नो मृडयन्तु ते यं द्विष्मो
यश्चं नो द्वेष्टि तं वो जम्भे दधामि (२) ॥

(तीर्थानि यश्च षट्चं ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके
पञ्चमप्रपाठक एकादशोऽनुवाकः ॥ ११ ॥

नमस्ते नमो हिरण्यबाहवे नमः सेनानाय नमं आव्याधिनीभ्यो नमो
भवाय च नमो ज्येष्ठाय च नमो दुन्दुभ्याय च नमः सोमाय च
नमं ईरिण्याय च द्रापे सहस्राण्येकादश ॥ ११ ॥
नमस्ते नमो भवाय च द्रापे सप्तविꣳशतिः ॥ २७ ॥

हरिः ॐ ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके
पञ्चमः प्रपाठकः ॥ ५ ॥

(अथ चतुर्थाष्टके पञ्चमप्रपाठक एकादशोऽनुवाकः ।)

सहस्राणि । सहस्रश इति सहस्र—शः । ये ।

रुद्राः । अधीति । भूम्याम् । तेषाम् । सहस्रयोजन
इति सहस्र—योजने । अवेति । धन्वानि । तन्मसि ।
अस्मिन् । महति । अर्णवे । अन्तरिक्षे । भवाः ।
अधि । नीलग्रीवा इति नील—ग्रीवाः । शितिकण्ठा
इति शिति—कण्ठाः । शर्वाः । अधः । क्षमाचराः ।
नीलग्रीवा इति नील—ग्रीवाः । शितिकण्ठा इति
शिति—कण्ठाः । दिवम् । रुद्राः । उपश्रिता इत्यु-
प—श्रिताः । ये । वृक्षेषु । सस्पिञ्जराः । नीलग्रीवा
इति नील—ग्रीवाः । विलोहिता इति वि—लोहि-
ताः । ये । भूतानाम् । अधिपतय इत्यधि—पतयः ।
विशिखास इति वि—शिखासः । कपर्दिनः । ये ।
अन्नेषु । विविध्यन्तीति वि—विध्यन्ति । पात्रेषु ।
पिबतः । जनान् । ये । पथाम् । पथिरक्षय इति
पथि—रक्षयः । ऐलबृदाः । यव्युधः । ये । तीर्था-
नि (१) । प्रचरन्तीति प्र—चरन्ति । सृकावन्त इति
सृका—वन्तः । निषङ्गिण इति नि—सङ्गिनः । ये ।
एतावन्तः । च । भूयांसः । च । दिशः । रुद्राः ।
वितस्थिर इति वि—तस्थिरे । तेषाम् । सहस्रयोजन
इति सहस्र—योजने । अवेति । धन्वानि । तन्मसि ।
नमः । रुद्रेभ्यः । ये । पृथिव्याम् । ये । अन्तरिक्षे ।

ये । दिवि । येषाम् । अन्नम् । वातः । वर्षम् । इष-
वः । तेभ्यः । दश । प्राचीः । दश । दक्षिणा ।
दश । प्रतीचीः । दश । उदीचीः । दश । ऊर्ध्वाः ।
तेभ्यः । नमः । ते । नः । मृडयन्तु । ते । यम् ।
द्विष्मः । यः । च । नः । द्वेष्टि । तम् । वः । जम्भे ।
दधामि (२) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके
पञ्चमप्रपाठक एकादशोऽनुवाकः ॥ ११ ॥

हरिः ॐ ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके
पञ्चमः प्रपाठकः ॥ ५ ॥

(अथ चतुर्थकाण्डे पञ्चमप्रपाठक एकादशोऽनुवाकः ।)

दशमेऽनुवाक ऋग्रूपाः केचिन्मन्त्रा उक्ताः । अथैकादशे शिष्टा ऋचः शिष्टानि यजूंषि चोच्यन्ते ॥

तत्राऽऽदौ दशसंख्याका ऋचः । तासु प्रथमामाह—

सहस्राणि सहस्रशो ये रुद्रा अधि भूम्याम् ।
तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि, इति ।

भूम्यामधि भूमेरुपरि ये रुद्राः सहस्रशः सहस्रप्रकाराः सहस्राणि सहस्रसंख्याकाः सन्ति, सहस्रश इति जात्युक्तिः । विनायकप्रथम(मथ)शैलादयो जातिभेदाः, ते सर्वेऽपि रुद्रविशेषाः । तत्राप्येकस्यां जातौ बहुभिः सहस्रैः संख्याता मूर्तिविशेषाः । तेषां सर्वेषां धन्वानि धनूंषि सहस्रयोजनेऽस्मत्तः सहस्रयोजनव्यवहितदेशेऽवतन्मसि अवततज्याकानि स्थापयामः ॥

अथ द्वितीयामाह—

धिना सह जर्तिलादेरेकवाक्यत्वेनार्थवादत्वं युक्तम् । ग्राम्यारण्यपशुर्हिसारा-हित्येन प्रशस्तयोरपि जर्तिलगवीधुकयोरग्निहोमं प्रत्याहुतित्वं नास्ति । पय-सस्तु तदस्ति । इत्थं महाभागं पय इति । तस्मादर्थवादः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे पञ्चमप्रपाठक एकादशोऽनुवाकः ॥ ११ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ॥
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥ १ ॥

इति श्रीमद्विद्यातीर्थमहेश्वरापरावतारस्य श्रीमद्राजाधिराजपरमेश्वरस्य श्रीवीरबुक्कमहाराजस्याऽऽज्ञापरिपालकेन माधवाचार्येण विर-चिते वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे पञ्चमः प्रपाठकः ॥ ५ ॥

(अथ चतुर्थाष्टके षष्ठः प्रपाठकः ।)

(तत्र प्रथमोऽनुवाकः ।)

हरिः ॐ ।

अश्मन्नूर्जं पर्वते शिश्रियाणां वातं पर्जन्ये वरुणस्य शुष्मं । अद्भ्य ओषधीभ्यो वनस्प-तिभ्योऽधि संभृतां तां न इषमूर्जं धत्त मरुतः सꣳ रराणाः । अश्मंꣳस्ते क्षुदमुं ते शुगृच्छतु यं द्विष्मः । समुद्रस्य त्वाऽवाकयाऽग्ने परि व्ययामसि । पावको अस्मभ्यꣳ शिवो भव । हिमस्य त्वा जरायुणाऽग्ने परि व्ययामसि । पावको अस्मभ्यꣳ शिवो भव । उप (१)

ज्मन्नुप वेतसेऽवत्तरं नदीष्वा । अग्ने पित्तमपामसि । मण्डूकि ताभिरा गहि सेमं नो यज्ञम् । पावकवर्णꣳ शिवं कृधि । पावक आ चितय-न्त्या कृपा । क्षामन्रुरुच उषसो न भानुना । तूर्वन्न यामन्नेतशस्य नू रण आ यो घृणे । न तृषाणो अजरः । अग्ने पावक रोचिषा मन्द्रया देव जिह्वया । आ देवान् (२) वक्षि यक्षि च । स नः पावक दीदिवोऽग्ने देवाꣳ इहाऽऽ वह । उप यज्ञꣳ हविश्च नः । अपा-मिदं न्ययनꣳ समुद्रस्य निवेशनम् । अन्यं ते अस्मत्तपन्तु हेतयः पावको अस्मभ्यꣳ शिवो भव । नमस्ते हरसे शोचिषे नमस्ते अस्त्व-र्चिषे । अन्यं ते अस्मत्तपन्तु हेतयः पावको अस्मभ्यꣳ शिवो भव । नृषदे वट् (३) अप्सुषदे वड्वनसदे वड्बर्हिषदे वट्सुवर्विदे वट् । ये देवा देवानां यज्ञिया यज्ञियानाꣳ संवत्सरीणमुप भागमासते । अहुतादो हविषो यज्ञे अस्मिन्त्स्वयं जुहुध्वं मधुनो घृतस्य । ये देवा देवेष्वधि देवत्वमायन्ये ब्रह्मणः पुरएतारो अस्य । येभ्यो नर्ते पवते धाम किं चन न ते

दिवो न पृथिव्या अधि स्नुषु। प्राणदाः (४) अपानदा व्यानदाश्चक्षुर्दा वर्चोदा वरिवोदाः। अन्यं ते अस्मत्तपन्तु हेतयः पावको अस्मभ्यं शिवो भव। अग्निस्तिग्मेन शोचिषा यꣳसद्विश्वं न्यत्रिणम्। अग्निर्नो वꣳसते रयिम्। सैनाऽनीकेन सुविदत्रो अस्मे यष्टा देवाꣳआयजिष्ठः स्वस्ति। अदब्धो गोपा उत नः परस्पा अग्ने द्युमदुत रेवदिदीहि (४)॥

(उप देवान्वट्प्राणदाश्चतुश्चत्वारिꣳशच्च।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके षष्ठप्रपाठके प्रथमोऽनुवाकः॥ १॥

(अथ चतुर्थाष्टके षष्ठः प्रपाठकः।)

(तत्र प्रथमोऽनुवाकः।)

हरिः ॐ।

अश्मन्। ऊर्जम्। पर्वते। शिश्रियाणाम्। वाते। पर्जन्ये। वरुणस्य। शुष्मे। अद्भ्य इत्यद्—भ्यः। ओषधीभ्य इत्योषधि—भ्यः। वनस्पतिभ्य इति वनस्पति—भ्यः। अधीति। संभृतामिति सं—भृताम्। ताम्। नः। इषम्। ऊर्जम्। धत्त। मरुतः। सꣳरराणा इति सं—रराणाः। अश्मन्। ते।

क्षुत्। अमुम्। ते। शुक्। ऋच्छतु। यम्। द्विष्मः। समुद्रस्य। त्वा। अवाकया। अग्ने। परीति। व्ययामसि। पावकः। अस्मभ्यमित्यस्म—भ्यम्। शिवः। भव। हिमस्य। त्वा। जरायुणा। अग्ने। परीति। व्ययामसि। पावकः। अस्मभ्यमित्यस्म—भ्यम्। शिवः। भव। उपेति (१)। ज्मन्। उपेति। वेतसे। अवत्तरमित्यवत्—तरम्। नदीषु। आ। अग्ने। पित्तम्। अपाम्। असि। मण्डूकि। ताभिः। एति। गहि। सा। इमम्। नः। यज्ञम्। पावकवर्णमिति पावक—वर्णम्। शिवम्। कृधि। पावके। एति। चितयन्त्या। कृपा। क्षामन्। रुरुचे। उषसः। न। भानुना। तूर्वन्। न। यामन्। एतशस्य। नु। रणे। एति। यः। घृणे। न। ततृषाणः। अजरः। अग्ने। पावक। रोचिषा। मन्द्रया। देव। जिह्वया। एति। देवान् (२)। वक्षि। यक्षि। च। सः। नः। पावक। दीदिवः। अग्ने। देवान्। इह। एति। वह। उपेति। यज्ञम्। हविः। च। नः। अपाम्। इदम्। न्ययनमिति नि—अयनम्। समुद्रस्य। निवेशनमिति नि—वेशनम्। अन्यम्। ते। अस्मत्। तपन्तु। हेतयः।

पावकः । अस्मभ्यमित्यस्म—भ्यम् । शिवः । भव ।
नमः । ते । हरसे । शोचिषे । नमः । ते । अस्तु ।
अर्चिषे । अन्यम् । ते । अस्मत् । तपन्तु । हेतयः ।
पावकः । अस्मभ्यमित्यस्म—भ्यम् । शिवः । भव ।
नृषद इति नृ—सदे । वट् (३) । अप्सुषद इत्यप्सु—सदे । वट् । वनसद इति वन—सदे । वट् ।
बर्हिषद इति बर्हिः—सदे । वट् । सुवर्विद इति
सुवः—विदे । वट् । ये । देवाः । देवानाम् । याज्ञि-
याः । याज्ञियानाम् । संवत्सरीणमिति सं—वत्सरी-
णम् । उपेति । भागम् । आसते । अहुताद इत्यहुत—अदः । हविषः । यज्ञे । अस्मिन् । स्वयम् ।
जुहुध्वम् । मधुनः । घृतस्य । ये । देवाः । देवेषु ।
अधीति । देवत्वमिति देव—त्वम् । आयन् । ये ।
ब्रह्मणः । पुरएतार इति पुरः—एतारः । अस्य ।
येभ्यः । न । ऋते । पवते । धाम । किम् । चन ।
न । ते । दिवः । न । पृथिव्याः । अधीति । स्नुषु ।
प्राणदा इति प्राण—दाः (४) । अपानदा इत्यपान—दाः । व्यानदा इति व्यान—दाः । चक्षुर्दा इति
चक्षुः—दाः । वर्चोदा इति वर्चः—दाः । वरिवोदा
इति वरिवः—दाः । अन्यम् । ते । अस्मत् । तप-

न्तु । हेतयः । पावकः । अस्मभ्यमित्यस्म—भ्यम् ।
शिवः । भव । अग्निः । तिग्मेन । शोचिषा । यः-
सत् । विश्वम् । नीति । अत्रिणम् । अग्निः । नः ।
वस्ते । रयिम् । सः । एना । अनीकेन । सुवि-
दत्र इति सु—विदत्रः । अस्मे इति । यष्टा । देवान् ।
आयजिष्ठ इत्या—यजिष्ठः । स्वस्ति । अदब्धः ।
गोपा इति गो—पाः । उत । नः । परस्पा इति
परः—पाः । अग्ने । द्युमदिति द्यु—मत् । उत ।
रेवत् । दिदीहि (५) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके
षष्ठप्रपाठके प्रथमोऽनुवाकः ॥ १ ॥

(अथ चतुर्थकाण्डे षष्ठः प्रपाठकः ।)

(तत्र प्रथमोऽनुवाकः ।)

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥ १ ॥
प्रपाठके पञ्चमे हि चितिसंपूर्त्यनन्तरम् ।
वर्णितो रुद्रहोमोऽथ षष्ठे वाच्याऽग्निसंस्कृतिः ॥ २ ॥
परिषेचनमारभ्य संस्कारा ये चिकीर्षिताः ।
ते पञ्चस्वनुवाकेषु प्रोक्ताः शेषोऽश्वमेधगः ॥ ३ ॥

तत्र प्रथमानुवाके परिषेचनविकर्षणादयोऽभिधीयन्ते ।
कल्पः—" उदकुम्भमादायाध्वर्युरग्नमूर्जमिति त्रिः प्रदक्षिणमग्निं परिषिञ्चन्पर्येति " इति ।

१ क घ. ङ. °मेधिकः । तं° ।

प्रोक्षति " इति । शाखाग्रे मण्डूकं बद्ध्वा तेन विकर्षतीत्यर्थः । ते च विकर्षणप्रोक्षणे प्रतीष्टकं कर्तव्ये । कुतः, चिताभ्य इष्टकाभ्यः पृथगग्निशब्दार्थस्य कस्यचिदवयविद्रव्यस्याभावादिति चेन्नैवम् । उपहिताभिरिष्टकाभिः संयुक्तस्य प्रदेशस्यावयविद्रव्यत्वात् । तस्य चाग्न्याधारत्वेनाग्निशब्दार्थत्वम् । तस्मादग्नेरेकत्वात्सकृदेव विकर्षणप्रोक्षणे कुर्यात् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे षष्ठप्रपाठके प्रथमोऽनुवाकः ॥ १ ॥

(अथ चतुर्थाष्टके षष्ठप्रपाठके द्वितीयोऽनुवाकः ।)

य इमा विश्वा भुवनानि जुह्वदृषिर्होता निषसादा पिता नः । स आशिषा द्रविणमिच्छमानः परमच्छदो वर आ विवेश । विश्वकर्मा मनसा यद्विहाया धाता विधाता परमोत संदृक् । तेषामिष्टानि समिषा मदन्ति यत्र सप्तर्षीन्पर एकमाहुः । यो नः पिता जनिता यो विधाता यो नः सतो अभ्या सजजान (१) । यो देवानां नामधा एक एव तꣳ संप्रश्नं भुवना यन्त्यन्या । त आऽयजन्त द्रविणꣳ समस्मा ऋषयः पूर्वे जरितारो न भूना । असूर्ता सूर्ता रजसो विमाने ये भूतानि समकृण्वन्निमानि । न तं विदाथ य इदं जजानान्यद्युष्माकमन्तरं बभूव । नीहारेण प्रावृता जल्प्या चासुतृपं उक्थशासश्चरन्ति । परो दिवा पर एना (२) पृथिव्या परो देवेभिरसुरैर्गुहा यत् । कꣳ स्विद्गर्भं प्रथमं दध्र आपो यत्र देवाः समगच्छन्त विश्वे । तमिद्गर्भं प्रथमं दध्र आपो यत्र देवाः समगच्छन्त विश्वे । अजस्य नाभावध्येकमर्पितं यस्मिन्निदं विश्वं भुवनमधि श्रितम् । विश्वकर्मा ह्यजनिष्ट देव आदिद्गन्धर्वो अभवद्द्वितीयः । तृतीयः पिता जनितौषधीनाम् (३) अपां गर्भं व्यदधात्पुरुत्रा । चक्षुषः पिता मनसा हि धीरो घृतमेने अजनन्नन्नमाने । यदेदन्ता अदꣳहन्त पूर्व आदिद्द्यावापृथिवी अप्रथेताम् । विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतो हस्त उत विश्वतस्पात् । सं बाहुभ्यां नमति सं पतत्रैर्द्यावापृथिवी जनयन्देव एकः । किꣳ स्विदासीदधिष्ठानमारम्भणं कतमत्स्वित्कथासीत् । यदी भूमिं जनयन् (४) विश्वकर्मा वि द्यामौर्णोन्महिना विश्वचक्षाः । किꣳ स्विद्वनं क उ स वृक्ष आसीद्यतो द्यावापृथिवी निष्टतक्षुः । मनीषिणो मनसा पृच्छतेदु तद्यदध्य-

तिष्ठद्भुवनानि धारयन् । या ते धामानि परमाणि याऽवमा या मध्यमा विश्वकर्मन्नुतेमा । शिक्षा सखिभ्यो हविषि स्वधावः स्वयं यजस्व तनुवं जुषाणः । वाचस्पतिं विश्वकर्माणमूतये (५) मनोयुजं वाजे अद्या हुवेम । स नो नेदिष्ठा हवनानि जोषते विश्वशंभूरवसे साधुकर्मा । विश्वकर्मन्हविषा वावृधानः स्वयं यजस्व तनुवं जुषाणः । मुह्यन्त्वन्ये अभितः सपत्ना इहास्माकं मघवा सूरिरस्तु । विश्वकर्मन्हविषा वर्धनेन त्रातारमिन्द्रमकृणोरवध्यम् । तस्मै विशः समनमन्त पूर्वीरयमुग्रो विहव्यो यथाऽसत् । समुद्राय वयुनाय सिन्धूनां पतये नमः । नदीनाꣳ सर्वासां पित्रे जुहुता विश्वकर्मणे विश्वाऽहाऽमर्त्यꣳ हविः(६)॥

(जजानैनौषधीनां भूमिं जनयन्नूतये नमो नवं च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके षष्ठप्रपाठके द्वितीयोऽनुवाकः ॥ २ ॥

(अथ चतुर्थाष्टके षष्ठप्रपाठके द्वितीयोऽनुवाकः ।)

यः । इमा । विश्वा । भुवनानि । जुह्वत् । ऋषिः । होता । निषसादेति नि—ससाद । पिता ।

नः । सः । आशिषेत्या—शिषा । द्रविणम् । इच्छमानः । परमच्छद इति परम—छदः । वरे । एति । विवेश । विश्वकर्मेति विश्व—कर्मा । मनसा । यत् । विहाया इति वि—हायाः । धाता । विधातेति वि—धाता । परमा । उत । संदृगिति सं—दृक् । तेषाम् । इष्टानि । समिति । इषा । मदन्ति । यत्र । सप्तर्षीनिति सप्त—ऋषीन् । परः । एकम् । आहुः । यः । नः । पिता । जनिता । यः । विधातेति वि—धाता । यः । नः । सतः । अभि । एति । सत् । जजान (७) । यः । देवानाम् । नामधा इति नाम—धाः । एकः । एव । तम् । संप्रश्नमिति सं—प्रश्नम् । भुवना । यन्ति । अन्या । ते । एति । अयजन्त । द्रविणम् । समिति । अस्मै । ऋषयः । पूर्वे । जरितारः । न । भूना । असूर्ता । सूर्ता । रजसः । विमान इति वि—माने । ये । भूतानि । समकृण्वन्निति सम्—अकृण्वन् । इमानि । न । तम् । विदाथ । यः । इदम् । जजान । अन्यत् । युष्माकम् । अन्तरम् । भवाति । नीहारेण । प्रावृताः । जल्प्या । च । असुतृप इत्यसु—तृपः । उक्थशास इत्युक्थ—शासः । चरन्ति । परः । दिवा । परः । एना (२) । पृथि-

व्या । परः । देवेभिः । असुरैः । गुहा । यत् । कम् ।
स्वित् । गर्भम् । प्रथमम् । दध्रे । आपः । यत्र ।
देवाः । समगच्छन्तेति सम्—अगच्छन्त । विश्वे ।
तम् । इत् । गर्भम् । प्रथमम् । दध्रे । आपः । यत्र ।
देवाः । समगच्छन्तेति सम्—अगच्छन्त । विश्वे ।
अजस्य । नाभौ । अधीति । एकम् । अर्पितम् । यस्मिन् ।
न् । इदम् । विश्वम् । भुवनम् । अधीति । श्रितम् ।
विश्वकर्मेति विश्व—कर्मा । हि । अजनिष्ट । देवः ।
आत् । इत् । गन्धर्वः । अभवत् । द्वितीयः । तृतीयः । पिता । जनिता । ओषधीनाम् (३) । अपाम् । गर्भम् । वीति । अदधात् । पुरुत्रेति पुरु—त्रा ।
चक्षुषः । पिता । मनसा । हि । धीरः । घृतम् ।
एने इति । अजनत् । ननमाने इति । यदा । इत् ।
अन्ताः । अदृंहन्त । पूर्वे । आत् । इत् । द्यावापृथिवी इति द्यावा—पृथिवी । अप्रथेताम् । विश्वतश्चक्षुरिति विश्वतः—चक्षुः । उत । विश्वतोमुख इति विश्वतः—मुखः । विश्वतोहस्त इति विश्वतः—हस्तः । उत । विश्वतस्पादिति विश्वतः—पात् । सम्
इति । बाहुभ्यामिति बाहु—भ्याम् । नमति । सम्
इति । पतत्रैः । द्यावापृथिवी इति द्यावा—पृथिवी ।

जनयन् । देवः । एकः । किम् । स्वित् । आसीत् । अधिष्ठानमित्यधि—स्थानम् । आरम्भणमित्या—रम्भणम् । कतमत् । स्वित् । किम् । आसीत् । यदि ।
भूमिम् । जनयन् (४) । विश्वकर्मेति विश्व—कर्मा ।
वीति । द्याम् । और्णोत् । महिना । विश्वचक्षा इति विश्व—चक्षाः । किम् । स्वित् । वनम् । कः । उ ।
सः । वृक्षः । आसीत् । यतः । द्यावापृथिवी इति द्यावा—पृथिवी । निष्टतक्षुरिति निः—ततक्षुः । मनीषिणः । मनसा । पृच्छत । इत् । उ । तत् । यत् ।
अध्यतिष्ठदित्यधि—अतिष्ठत् । भुवनानि । धारयन् ।
या । ते । धामानि । परमाणि । या । अवमा । या ।
मध्यमा । विश्वकर्मन्निति विश्व—कर्मन् । उत । इमा ।
शिक्ष । सखिभ्य इति सखि—भ्यः । हविषि । स्वधाव
इति स्वधा—वः । स्वयम् । यजस्व । तनुवम् ।
जुषाणः । वाचः । पतिम् । विश्वकर्माणमिति विश्व—कर्माणम् । ऊतये (५) । मनोयुजमिति मनः—युजम् । वाजे । अद्य । हुवेम । सः । नः ।
नेदिष्ठा । हवनानि । जोषते । विश्वशंभूरिति विश्व—शंभूः । अवसे । साधुकर्मेति साधु—कर्मा । विश्वकर्मन्निति विश्व—कर्मन् । हविषा । वावृधानः । स्वयम् । यज-

स्व । तनुवम् । जुषाणः । मुह्यन्तु । अन्ये । अभितः । सपत्नाः । इह । अस्माकम् । मघवेति मघ—वा । सूरिः । अस्तु । विश्वकर्मन्निति विश्व—कर्मन् । हविषा । वर्धनेन । त्रातारम् । इन्द्रम् । अकृणोः । अवध्यम् । तस्मै । विशः । समिति । अनमन्त । पूर्वीः । अयम् । उग्रः । विहव्य इति वि—हव्यः । यथा । असत् । समुद्राय । वयुनाय । सिन्धूनाम् । पतये । नमः । नदीनाम् । सर्वासाम् । पित्रे । जुहुत । विश्वकर्मण इति विश्व—कर्मणे । विश्वा । अहा । अमर्त्यम् । हविः (६) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके षष्ठप्रपाठके द्वितीयोऽनुवाकः ॥ २ ॥

(अथ चतुर्थकाण्डे षष्ठप्रपाठके द्वितीयोऽनुवाकः।)

प्रथमानुवाके परिषेचनादिकमुक्तम्। अथ द्वितीयानुवाके सूक्ताभ्यां होमा उच्येते।

कल्पः—"षोडशगृहीतेन स्रुचं पूरयित्वा वैश्वकर्मणानि जुहोति य इमा विश्वा भुवनानि जुह्वच्चक्षुषः पिता मनसा हि धीर इति नानासूक्ताभ्यां द्वे आहुती यं कामयेत चिरं पाप्मनो निर्मुच्येतेत्येकैकं तस्येत्युक्तम्" इति।

तत्र प्रथमसूक्ते प्रथमामृचमाह—

य इमा विश्वा भुवनानि जुह्वदृषिर्होता निषसादा पिता नः। स आशिषा द्रविणमिच्छमानः परमच्छदो वर आ विवेश।, इति।

यो विश्वकर्मा परमेश्वर इमा विश्वा भुवनानि जुह्वत्प्रलयकाले पृथिव्यादीनिमान्सर्वाँल्लोकान्स्वात्मन्याहुतिप्रक्षेपवत्संहरन्नृषिरतीन्द्रियद्रष्टा सर्वज्ञो होता संसारहोमैकर्ता नोऽस्माकं पिता जनको निषसाद स्वयं स्थितवान्, प्रलयकाले प्राप्ते सति सर्वाँल्लोकान्संहृत्यास्माकमपि संहर्ता पुनः स्रष्टा च सन्सर्वज्ञोऽयं परमेश्वरः स्वयमेक एवाऽऽसीत्। अत एव सर्वा अप्युपनिषद एवमाहुः—"आत्मा वा इदमेक एवाग्र आसीन्नान्यत्किंचन मिषत्सदेव सोम्येदमग्र आसीत्। एकमेवाद्वितीयम्" इत्याद्याः। स तादृशः परमेश्वर आशिषा बहु स्यां प्रजायेयेत्येवंरूपया पुनःसिसृक्षया द्रविणमिच्छमानो धनोपलक्षितं जगद्भोगमपेक्षमाणः परमच्छदः परमं स्वकीयमेवाद्वितीयं[1] परमार्थरूपमावृण्वन्वरे स्वेन सृष्टे शरीरमध्यवर्तिनि पुण्डरीकस्थान आविवेश जीवरूपेण प्रविष्टः। एतच्च सर्वमुपनिषद्यान्नातम्—"सोऽकामयत। बहु स्यां प्रजायेयेति। स तपोऽतप्यत। स तपस्तप्त्वा। इदꣳ सर्वमसृजत। यदिदं किंच। तत्सृष्ट्वा। तदेवानुप्राविशत्" इति। एवमन्या अप्युपनिषद उदाहार्याः॥

अथ द्वितीयामृचमाह—

विश्वकर्मा मनसा याद्विहाया धाता विधाता परमोत संदृक्। तेषामिष्टानि समिषा मदन्ति यत्र सप्तर्षीन्पर एकमाहुः।, इति।

विश्वविषयाणि कर्माणि सृष्टिस्थितिसंहाररूपाणि यस्यासौ विश्वकर्मा। तस्य च तेषु कर्मसु सत्यत्वादय एव साधनं सत्यसंकल्पत्वात्। यद्यस्मादयं मनसा संकल्पमात्रेण विश्वकर्मा तस्माद्धाता विधाता विहाया इति चोच्यते। धातोत्पादकः। विधाता पोषकः। विशेषेण जहाति परित्यजतीति विहायाः संहर्तेत्यर्थः। उतापि चात एव परमा परमः सर्वेभ्य उत्कृष्टः सम्यक्पश्यतीति संदृक्सर्वज्ञ इत्यर्थः। यत्र यस्मिन्परे परस्मिन्नीश्वरे सप्तर्षीनेकमाहुः, य एते मरीच्यत्रिप्रमुखाः सप्तर्षयो विविधा दृश्यन्ते ते सर्वे सृष्टेः प्राक्परस्मिन्नेकीभूता इति वेदान्तपारगा आहुः। स च परमेश्वरस्तेषां सप्तर्षिप्रभृतीनामिष्टान्यपेक्षितानि स्थानानीषा स्वेच्छामात्रेण संपादयतीति। तेन च ते महर्षयो हृष्यन्ति॥

अथ तृतीयामृचमाह—

यो नः पिता जनिता यो विधाता यो नः

---

१ क. घ. ङ. °रूपस्य हो°। २ क. घ. ङ. °मस्य क°। ३ च. बहुः। ४ ख. घ. ङ. च. °यं पार°।

कर्माकारेण सर्वासां नदीनां पितोत्पादकः। तादृशाय विश्वकर्मणे हे ऋत्विग्यजमाना विश्वाऽहा सर्वाण्यहानि निरन्तरमित्यर्थः। अमर्त्यमविनश्वरं हविर्जुहुत ॥

अग्निस्तिग्मेनेति मन्त्रद्वयेन 'य इमा विश्वा' इति सूक्तद्वयेन च साध्यं होमं विधातुं प्रस्तौति—

" इन्द्रो वृत्रमहन्तं वृत्रो हतः षोडशभिर्भोगैरसिनात्स एतामग्नयेऽनीकवत आहुतिमपश्यत्तामजुहोत्तस्याग्निरनीकवान्त्स्वेन भागधेयेन प्रीतः षोडशधा वृत्रस्य भोगानप्यदहद्वैश्वकर्मणेन पाप्मनो निरमुच्यत " [सं० का० ५ प्र० ४ अ० ५] इति।

इन्द्रो यदा वृत्रं वज्रेण प्रहृतवांस्तदा वज्रप्रहृतः स वृत्र आसुरमायया सहसा षोडश सर्पाकाराणि शरीराणि स्वी चकार। स्वीकृत्य च भोगशब्दाभिधेयैस्तैः सर्पाकारशरीरैस्तमिन्द्रं हस्तपादाद्यवयवेषु बहुधाऽसिनाद्भक्ष, तदानीमिन्द्रः प्रतीकारं विचार्यानीकेन सैन्येन युक्तायाग्नय एतामग्निस्तिग्मेनेति मन्त्रद्वयेन साध्यामाहुतिं दृष्ट्वा हुतवान्। ततः सोऽग्निरनीकवांस्तृप्तो वृत्रस्य षोडश सर्पाकाराणि शरीराण्यदहत्। तत ऊर्ध्वमिन्द्रो य इमा विश्वेति सूक्तद्वयसाध्येन वैश्वकर्मणहोमेन वृत्रवधजन्यात्पाप्मनो निर्मुक्तः ॥

इदानीं तदुभयं विधत्ते—

" यदग्नयेऽनीकवत आहुतिं जुहोत्यग्निरेवास्यानीकवान्त्स्वेन भागधेयेन प्रीतः पाप्मानमपि दहति वैश्वकर्मणेन पाप्मनो निर्मुच्यते " [सं० का० ५ प्र० ४ अ० ५] इति।

रोगादिरूपदृष्टबाधहेतोः पापस्यानीकवत आहुत्या दाहः। पारलौकिकान्नरकहेतोः पापाद्वैश्वकर्मणहोमेन निर्मोकः ॥

तत्रेदं चिन्त्यते—किमयं वैश्वकर्मणहोमः प्रतिमन्त्रं पृथक्कार्यः, किंवा सूक्तद्वयं सहोच्चार्य सकृदनुष्ठेयः, आहोस्विदेकैकं सूक्तमुच्चार्यानुष्ठेय इति। तत्राऽऽद्यं पक्षद्वयं शाखान्तरगतत्वेनाङ्गी करोति—

" यं कामयेत चिरं पाप्मनो निर्मुच्येतेत्येकैकं तस्य जुहुयाच्चिरमेव पाप्मनो निर्मुच्यते यं कामयेत ताजक्पाप्मनो निर्मुच्येतेति सर्वाणि तस्यानुद्रुत्य जुहुयात्ताजगेव पाप्मनो निर्मुच्यतेऽथो खलु नानैव सूक्ताभ्यां जुहोति नानैव सूक्तयोर्वीर्यं दधात्यथो प्रतिष्ठित्यै " [सं० का० ५ प्र० ४ अ० ५] इति।

एकैकमन्त्रहोमेन शनैः शनैः पापनिर्मोको भवति। सर्वसूक्तहोमेन तु तदा-

१ ख. च. 'कैकं म°'।

नीमेव पापनिर्मोकः। पृथक्सूक्तद्वयेऽपि सामर्थ्यं पृथक्संपादितं भवति। अपि च, सूक्तद्वित्वं यजमानस्य प्रतिष्ठायै संपद्यते। तस्मादयमेव पक्षः श्रेयानित्यर्थः ॥

अत्र विनियोगसंग्रहः—

य इमा चक्षुषो द्वाभ्यां सूक्ताभ्यामाहुतिद्वयम्।
समुद्रेति जले होमो मन्त्राः सप्तदशेरिताः ॥ १ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे षष्ठप्रपाठके द्वितीयोऽनुवाकः ॥ २ ॥

(अथ चतुर्थाष्टके षष्ठप्रपाठके तृतीयोऽनुवाकः।)

उदेनमुत्तरां नयाग्ने घृतेनाऽऽहुत। राय-स्पोषेण सꣳ सृज प्रजया च धनेन च। इन्द्रेमं प्रतरां कृधि सजातानामसद्वशी। समेनं वर्चसा सृज देवेभ्यो भागधा असत्। यस्य कुर्मो हविर्गृहे तमग्ने वर्धया त्वम्। तस्मै देवा अधि ब्रवन्नयं च ब्रह्मणस्पतिः। उदु त्वा विश्वे देवाः (1) अग्ने भरन्तु चित्तिभिः। स नो भव शिवतमः सुप्रतीको विभावसुः। पञ्च दिशो दैवीर्यज्ञमवन्तु देवीरपामतिं दुर्मतिं बाधमानाः। रायस्पोषे यज्ञपतिमाभजन्तीः। रायस्पोषे अधि यज्ञो अस्थात्समिद्धे अग्नावधि मामहानः। उक्थपत्र ईड्यो गृभीतस्तप्तं

घर्मं परिगृह्यायजन्त । ऊर्जा यज्ञमशमन्त देवा दैव्याय धर्त्रे जोष्ट्रे । देवश्रीः श्रीमणाः शतपयाः (२) परिगृह्य देवा यज्ञमायन् । सूर्यरश्मिर्हरिकेशः पुरस्तात्सविता ज्योतिरुदयाꣳ अजस्रम् । तस्य पूषा प्रसवं यात्ति देवः संपश्यन्विश्वा भुवनानि गोपाः । देवा देवेभ्यो अध्वर्यन्तो अस्थुर्वीतꣳ शमित्रे शमिता यजध्यै । तुरीयो यज्ञो यत्र हव्यमेति ततः पावका आशिषो नो जुषन्ताम् । विमानं एष दिवो मध्य आस्त आपप्रिवान्रोदसी अन्तरिक्षम् । स विश्वाचीरभि (३) चष्टे घृताचीरन्तरा पूर्वमपरं च केतुम् । उक्षा समुद्रो अरुणः सुपर्णः पूर्वस्य योनिं पितुरा विवेश । मध्ये दिवो निहितः पृश्निरश्मा वि चक्रमे रजसः पात्यन्तौ । इन्द्रं विश्वा अवीवृधन्त्समुद्रव्यचसं गिरः । रथीतमꣳ रथीनां वाजानाꣳ सत्पतिं पतिम् । सुम्नहूर्यज्ञो देवाꣳ आ च वक्षद्यक्षदग्निर्देवो देवाꣳ आ च वक्षत् । वाजस्य मा प्रसवेनोद्ग्राभेणोदग्रभीत् । अथा सपत्नाꣳ इन्द्रो मे निग्राभेणाधराꣳ अकः । उद्ग्राभं च

निग्राभं च ब्रह्म देवा अवीवृधन् । अथा सपत्नांनिन्द्राग्नी मे विषूचीनान्व्यस्यताम् (४)॥

(विश्वे देवाः शतपया अभि वाजस्य षड्विꣳशतिश्च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके षष्ठप्रपाठके तृतीयोऽनुवाकः ॥ ३ ॥

(अथ चतुर्थाष्टके षष्ठप्रपाठके तृतीयोऽनुवाकः ।)

उदिति । एनम् । उत्तरामित्युत्—तराम् । नय । अग्ने । घृतेन । आहुतेत्या—हुत । रायः । पोषेण । समिति । सृज । प्रजयेति प्र—जया । च । धनेन । च । इन्द्र । इमम् । प्रतरामिति प्र—तराम् । कृधि । सजातानामिति स—जातानाम् । असत् । वशी । समिति । एनम् । वर्चसा । सृज । देवेभ्यः । भागधा इति भाग—धाः । असत् । यस्य । कुर्मः । हविः । गृहे । तम् । अग्ने । वर्धय । त्वम् । तस्मै । देवाः । अधीति । ब्रुवन् । अयम् । च । ब्रह्मणः । पतिः । उदिति । उ । त्वा । विश्वे । देवाः (१) । अग्ने । भरन्तु । चित्तिभिरिति चित्ति—भिः । सः । नः । भव । शिवतम इति शिव—तमः । सुप्रतीक इति सु—प्रतीकः । विभावसुरिति विभा—वसुः । पश्च । दिशः । दैवीः । यज्ञम् । अवन्तु ।

देवीः । अपेतिं । अमतिम् । दुर्मतिमितिं दुः—मतिम् । बाधमानाः । रायः । पोषे । यज्ञपतिमितिं यज्ञ—पतिम् । आभजन्तीरित्या—भजन्तीः । रायः । पोषे । अधीतिं । यज्ञः । अस्थात् । समिद्ध इति सम्—इद्धे । अग्नौ । अधीतिं । मामहानः । उक्थपत्र इत्युक्थ—पत्रः । ईड्यः । गृभीतः । तप्तम् । घर्मम् । परिगृह्येतिं परि—गृह्य । अयजन्त । ऊर्जा । यत् । यज्ञम् । अशमन्त । देवाः । दैव्याय । धत्रे । जोष्ट्रे । देवश्रीरितिं देव—श्रीः । श्रीर्मणा इति श्री—मनाः । शतपया इतिं शत—पयाः (२) । परिगृह्येतिं परि—गृह्य । देवाः । यज्ञम् । आयन् । सूर्यरश्मिरिति सूर्य—रश्मिः । हरिकेश इति हरि—केशः । पुरस्तात् । सविता । ज्योतिः । उदितिं । अयान् । अजस्रम् । तस्य । पूषा । प्रसवमितिं प्र—सवम् । याति । देवः । संपश्यन्नितिं सं—पश्यन् । विश्वा । भुवनानि । गोपा इतिं गो—पाः । देवाः । देवेभ्यः । अध्वर्यन्तः । अस्थुः । वीतम् । शमित्रे । शमिता । यजध्यै । तुरीयः । यज्ञः । यत्र । हव्यम् । एतिं । ततः । पावकाः । आशिष इत्या—शिषः । नः । जुषन्ताम् । विमान इतिं वि—मानः । एषः । दिवः । मध्ये । आस्ते । आपप्रिवानित्या—

पप्रिवान् । रोदसी इतिं । अन्तरिक्षम् । सः । विश्वाचीः । अभीतिं (३) । चष्टे । घृताचीः । अन्तरा । पूर्वम् । अपरम् । च । केतुम् । उक्षा । समुद्रः । अरुणः । सुपर्ण इतिं सु—पर्णः । पूर्वस्य । योनिम् । पितुः । एतिं । विवेश । मध्ये । दिवः । निहित इति नि—हितः । पृश्निः । अश्मा । वीतिं । चक्रमे । रजसः । पाति । अन्तौ । इन्द्रम् । विश्वाः । अवीवृधन् । समुद्रव्यचसमितिं समुद्र—व्यचसम् । गिरः । रथीतममितिं रथि—तमम् । रथीनाम् । वाजानाम् । सत्पतिमिति सत्—पतिम् । पतिम् । सुम्नहूरितिं सुम्न—हूः । यज्ञः । देवान् । एतिं । च । वक्षत् । यक्षत् । अग्निः । देवः । देवान् । एतिं । च । वक्षत् । वाजस्य । मा । प्रसवेनेतिं प्र—सवेन । उद्ग्राभेणेत्युत्—ग्राभेण । उदितिं । अग्रभीत् । अधं । सपत्नान् । इन्द्रः । मे । निग्राभेणेतिं नि—ग्राभेणं । अधरान् । अकः । उद्ग्राभमित्युत्—ग्राभम् । च । निग्राभमितिं नि—ग्राभम् । च । ब्रह्म । देवाः । अवीवृधन् । अधं । सपत्नान् । इन्द्राग्नी इतीन्द्र—अग्नी । मे । विषूचीनान् । वीतिं । अस्यताम् (४) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके षष्ठप्रपाठके तृतीयोऽनुवाकः ॥ ३ ॥

सुम्नहूः सुम्नस्य प्रजापशुरूपस्य सुखस्याऽऽहाता संपादयिता यज्ञश्च देवानावक्षदावहतु । यक्षदग्निश्च पूर्वोक्ताग्निरपि देवानावक्षदाहयतु ॥

अथ तृतीयामाह—

वाजस्य मा प्रसवेनोद्ग्राभेणोदग्रभीत् । अथा सपत्नाꣳ इन्द्रो मे निग्राभेणाधराꣳ अकः ।, इति ।

इन्द्रः परमैश्वर्ययुक्तोऽग्निर्वाजस्यान्नस्य प्रसूतिनिमित्तेनोद्ग्राभेणोद्ग्रहणसामर्थ्येन मां यजमानमुदग्रभीदुत्कर्षं प्रापितवान् । अथानन्तरमिन्द्रः परमैश्वर्ययुक्तोऽयमग्निर्निग्राभेण निग्रहसामर्थ्येन मे सपत्नान्मदीयान्वैरिणोऽधरानकर्निगृहीतान्करोतु ॥

अथ चतुर्थीमाह—

उद्ग्राभं च निग्राभं च ब्रह्म देवा अवीवृधन् । अथा सपत्नानिन्द्राग्नी मे विषूचीनान्व्यस्यताम् ॥ , इति ॥

देवाः सर्वे ब्रह्म परिवृढमुद्ग्राभमस्मदीयमुत्कर्षं निग्राभं च वैरिणो निकर्षं चावीवृधन्वर्धितवन्तः । अथानन्तरमिन्द्राग्नी विषूचीनान्सर्वतः पलायमानान्मे सपत्नान्मदीयान्वैरिणो व्यस्यतां विनाशयताम् ॥

अत्र विनियोगसंग्रहः—

उत्त्रिभिः समिधो दध्यादुदु त्वोद्यच्छतेऽनलम् ।
पञ्चेति पञ्चभिर्हुत्वा विद्राभ्यामश्मनः स्थितिः ॥
इन्द्रं चतुर्भिरापुच्छाद्गच्छेत्पञ्चदशेरिताः ॥ १ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे षष्ठप्रपाठके
तृतीयोऽनुवाकः ॥ ३ ॥

(अथ चतुर्थाष्टके षष्ठप्रपाठके चतुर्थोऽनुवाकः ।)

आशुः शिशानो वृषभो न युध्मो घनाघनः क्षोभणश्चर्षणीनाम् । संक्रन्दनोऽनिमिष एकवीरः शतꣳ सेना अजयत्साकमिन्द्रः । संक्र-

न्दनेनानिमिषेण जिष्णुना युत्कारेण दुश्च्यवनेन धृष्णुना । तदिन्द्रेण जयत तत्सहध्वं युधो नर इषुहस्तेन वृष्णा । स इषुहस्तैः स निषङ्गिभिर्वशी सꣳस्रष्टा स युध इन्द्रो गणेन । सꣳसृष्टजित्सोमपा बाहुशर्ध्यूर्ध्वधन्वा प्रतिहिताभिरस्ता । बृहस्पते परि दीय (१) रथेन रक्षोहाऽमित्राꣳ अपबाधमानः । प्रभञ्जन्त्सेनाः प्रमृणो युधा जयन्नस्माकमेध्यविता रथानाम् । गोत्रभिदं गोविदं वज्रबाहुं जयन्तमज्म प्रमृणन्तमोजसा । इमꣳ सजाता अनु वीरयध्वमिन्द्रꣳ सखायोऽनु सꣳ रभध्वम् । बलविज्ञायः स्थविरः प्रवीरः सहस्वान्वाजी सहमान उग्रः । अभिवीरो अभिसत्त्वा सहोजा जैत्रमिन्द्र रथमा तिष्ठ गोवित् । अभि गोत्राणि सहसा गाहमानोऽदायः (२) वीरः शतमन्युरिन्द्रः । दुश्च्यवनः पृतनाषाडयुध्योऽस्माकꣳ सेना अवतु प्र युत्सु । इन्द्रं आसां नेता बृहस्पतिर्दक्षिणा यज्ञः पुर एतु सोमः । देवसेनानामभिभञ्जतीनां जयन्तीनां मरुतो यन्त्वग्रं । इन्द्रस्य वृष्णो वरुणस्य राज्ञ आदित्यानां मरु-

ताꣳ शर्धं उग्रम् । महामनसां भुवनच्यवानां
घोषो देवानां जयतामुदस्थात् । अस्माकमिन्द्रः
समृतेषु ध्वजेष्वस्माकं या इषवस्ता जयन्तु(३)॥
अस्माकं वीरा उत्तरे भवन्त्वस्मानु देवा अवता
हवेषु । उद्धर्षय मघवन्नायुधान्युत्सत्वनां माम-
कानां महाꣳसि । उद्वृत्रहन्वाजिनां वाजि-
नान्युद्रथानां जयतामेतु घोषः । उप प्रेत
जयता नरः स्थिरा वः सन्तु बाहवः । इन्द्रो
वः शर्म यच्छत्वनाधृष्या यथाऽसथ । अव-
सृष्टा परा पत शरव्ये ब्रह्मसꣳशिता । गच्छा-
मित्रान्प्र (४) विश मैषां कं चनोच्छिषः ।
मर्माणि ते वर्मभिश्छादयामि सोमस्त्वा
राजाऽमृतेनाभि वस्ताम् । उरोर्वरीयो वरि-
वस्ते अस्तु जयन्तं त्वानु मदन्तु देवाः ।
यत्र बाणाः सम्पतन्ति कुमारा विशिखा इव ।
इन्द्रो नस्तत्र वृत्रहा विश्वाहा शर्म यच्छतु(५)॥

(दीयादायो जयन्त्वमित्रान्प्र चत्वारिꣳशच्च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके
षष्ठप्रपाठके चतुर्थोऽनुवाकः ॥ ४ ॥

(अथ चतुर्थाष्टके षष्ठप्रपाठके चतुर्थोऽनुवाकः ।)

आशुः । शिशानः । वृषभः । न । युध्मः । घना-
घनः । क्षोभणः । चर्षणीनाम् । संक्रन्दन इति सं—
क्रन्दनः । अनिमिष इत्यनि—मिषः । एकवीर इत्येक—
वीरः । शतम् । सेनाः । अजयत् । साकम् ।
इन्द्रः । संक्रन्दनेनेति सं—क्रन्दनेन । अनिमिषेणेत्यनि—
मिषेण । जिष्णुना । युत्कारेणेति युत्—कारेण । दुश्च्यवनेनेति दुः—च्यवनेन । धृष्णुना । तत् ।
इन्द्रेण । जयत । तत् । सहध्वम् । युधः । नरः ।
इषुहस्तेनेतीषु—हस्तेन । वृष्णा । सः । इषुहस्तैरि-
तीषु—हस्तैः । सः । निषङ्गिभिरिति निषङ्गि—भिः ।
वशी । सꣳसृष्टेति सं—सृष्टा । सः । युधः । इन्द्रः ।
गणेन । सꣳसृष्टजिदिति सꣳसृष्ट—जित् । सोमपा
इति सोम—पाः । बाहुशर्धीति बाहु—शर्धी ।
ऊर्ध्वधन्वेत्यूर्ध्व—धन्वा । प्रतिहिताभिरिति प्रति—हि-
ताभिः । अस्ता । बृहस्पते । परीति । दीय (१) ।
रथेन । रक्षोहेति रक्षः—हा । अमित्रान् । अपबाध-
मान इत्यप—बाधमानः । प्रभञ्जन्निति प्र—भञ्जन् ।
सेनाः । प्रमृण इति प्र—मृणः । युधा । जयन् ।
अस्माकम् । एधि । अविता । रथानाम् । गोत्रभि-

दमितिं गोत्र—भिदम् । गोविदमितिं गो—विदम् । वज्रंबाहुमिति वज्र—बाहुम् । जयन्तम् । अज्मं । प्रमृणन्तमितिं प्र—मृणन्तम् । ओजसा । इमम् । सजाता इतिं स—जाताः । अन्वितिं । वीरयध्वम् । इन्द्रम् । सखायः । अनु । समितिं । रमध्वम् । बलविज्ञाय इतिं बल—विज्ञायः । स्थविरः । प्रवीर इति प्र—वीरः । सहस्वान् । वाजी । सहमानः । उग्रः । अभिवीर इत्यभि—वीरः । अभिसत्वेत्यभि—सत्वा । सहोजा इतिं सहः—जाः । जैत्रम् । इन्द्र । रथम् । एतिं । तिष्ठ । गोविदितिं गो—वित् । अभीतिं । गोत्राणिं । सहसा । गाहमानः । अदायः (२) । वीरः । शतमन्युरितिं शत—मन्युः । इन्द्रः । दुश्यवन इतिं दुः—च्यवनः । पृतनाषाट् । अयुध्यः । अस्माकम् । सेनाः । अवतु । प्रेतिं । युत्स्वितिं युत्—सु । इन्द्रः । आसाम् । नेता । बृहस्पतिः । दक्षिणा । यज्ञः । पुरः । एतु । सोमः । देवसेनानामितिं देव—सेनानाम् । अभिभञ्जतीनामित्यभि—भञ्जतीनाम् । जयन्तीनाम् । मरुतः । यन्तु । अग्रे । इन्द्रस्य । वृष्णः । वरुणस्य । राज्ञः । आदित्यानाम् । मरुताम् । शर्धः । उग्रम् । महामनसामितिं महा—

मनसाम् । भुवनच्यवानामितिं भुवन—च्यवानाम् । घोषः । देवानाम् । जयताम् । उदितिं । अस्थात् । अस्माकम् । इन्द्रः । समृतेष्वितिं सम्—ऋतेषु । ध्वजेषु । अस्माकम् । याः । इषवः । ताः । जयन्तु । (३) । अस्माकम् । वीराः । उत्तर इत्युत्—तरे । भवन्तु । अस्मान् । उ । देवाः । अवत । हवेषु । उदितिं । हर्षय । मघवन्नितिं मघ—वन् । आयुधानि । उदितिं । सत्वनाम् । मामकानाम् । महांसि । उदितिं । वृत्रहन्नितिं वृत्र—हन् । वाजिनाम् । वाजिनानि । उदितिं । रथानाम् । जयताम् । एतु । घोषः । उप । प्रेतिं । इत । जयत । नरः । स्थिराः । वः । सन्तु । बाहवः । इन्द्रः । वः । शर्म । यच्छतु । अनाधृष्या इत्यना—धृष्याः । यथा । असथ । अवसृष्टेत्यव—सृष्टा । परेतिं । पत । शरव्ये । ब्रह्मसंशितेति ब्रह्म—संशिता । गच्छ । अमित्रान् । प्रेतिं (४) । विश । मा । एषाम् । कम् । चन । उदितिं । शिषः । मर्माणि । ते । वर्मभिरिति वर्म—भिः । छादयामि । सोमः । त्वा । राजा । अमृतेन । अभीतिं । वस्ताम् । उरोः । वरीयः । वरिवः । ते । अस्तु । जयन्तम् । त्वाम् । अन्वितिं । मदन्तु ।

देवाः । यत्र । बाणाः । संपतन्तीति सं—पतन्ति । कुमाराः । विशिखा इति वि—शिखाः । इव । इन्द्रः । नः । तत्र । वृत्रहेति वृत्र—हा । विश्वाहेति विश्व—हा । शर्म । यच्छतु (५) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके षष्ठप्रपाठके चतुर्थोऽनुवाकः ॥ ४ ॥

(अथ चतुर्थकाण्डे षष्ठप्रपाठके चतुर्थोऽनुवाकः ।)

तृतीयेऽनुवाकेऽग्निप्रणयनमुक्तम् । अथाप्रतिरथसूक्तमुच्यते ।

कल्पः—" आशुः शिशान इति दक्षिणतो ब्रह्मा दशर्चेनान्वेति मैत्रावरुणः प्रतिप्रस्थाता वा " इति ।

तत्र प्रथमामाह—

आशुः शिशानो वृषभो न युध्मो घनाघनः क्षोभणश्चर्षणीनाम् । संक्रन्दनोऽनिमिष एकवीरः शतꣳ सेना अजयत्साकमिन्द्रः । , इति ।

अयमिन्द्रः परमैश्वर्योपेतः शतं सेनाः शतसंख्याकाः परकीयसेनाः साकमेकप्रयत्नेनाजयत् । कीदृश इन्द्रः, आशुः शीघ्रकारी, शिशानस्तीक्ष्णोऽत्युग्र इत्यर्थः । तत्र दृष्टान्तः—वृषभो न युध्मः । यथा वृषभो वृषभान्तरेण योद्धुमुत्सुकस्तद्वदयमपि घनाघनोऽतिशयेन शत्रूणां हिंसको घातकः । चर्षणीनां परसेनागतमनुष्याणां क्षोभणः क्षोभहेतुः । संक्रन्दनः समीचीनं क्रन्दनं परभयहेतुर्ध्वनिविशेषो यस्यासौ संक्रन्दनः । अनिमिषः कदाचिदपि निमेषं न करोत्यत्यन्तसावधान इत्यर्थः । एकवीरः परानपेक्षेण (क्षः) स्वयमेक एव जेतुं समर्थः शूरः ॥

अथ द्वितीयामाह—

संक्रन्दनेनानिमिषेण जिष्णुना युत्कारेण

१ ख. च. 'मुत्सहते तद्व' ।

दुश्च्यवनेन धृष्णुना । तदिन्द्रेण जयत तत्सहध्वं युधो नर इषुहस्तेन वृष्णा । , इति ।

युधो युद्धार्थिनो हे नरो मनुष्या इन्द्रेणानुगृहीताः सन्तस्तत्परबलं जयत वशी कुरुत । वशीकृत्य च तत्सहध्वमभिभवत विनाशयतेत्यर्थः । कीदृशेनेन्द्रेण, संक्रन्दनेनानिमिषेण । पूर्ववद्व्याख्येयम् । जिष्णुना जयशीलेन, युत्कारेण युद्धकारिणा, दुश्च्यवनेन च्यावयितुं दुःशक्येन, धृष्णुना भीतिरहितेन, इषुहस्तेन बाणाद्यायुधोपेतेन, वृष्णा कामानां वर्षकेण ॥

अथ तृतीयामाह—

स इषुहस्तैः स निषङ्गिभिर्वशी सꣳस्रष्टा स युध इन्द्रो गणेन । सꣳसृष्टजित्सोमपा बाहुशर्ध्यूर्ध्वधन्वा प्रतिहिताभिरस्ता ।, इति ।

इषवो हस्तेषु येषां भटानां त इषुहस्तास्तैः साकं स इन्द्रो वशी परबलं स्ववशं करोति । निषङ्गिणः खड्गहस्तास्तैः साकं स इन्द्रो वशी स्वकीयैर्धानुष्कैः खड्गहस्तैश्चोपेतत्वात्परसैन्यं वशी करोतीत्यर्थः । यद्वा परसैन्यगतैर्धानुष्कैः खड्गहस्तैश्च सहितं तद्वशी करोति । स इन्द्रो युधो योद्धा सन्गणेन परकीयभटसमूहेन संस्रष्टा सहसा गत्वा सम्यङ्मिश्रितो भवति । मिश्रीभूय च ये स्वेन संसृष्टास्तान्सर्वाञ्जयतीति संसृष्टजित् । यजमानानां यागेषु सोमं पिबतीति सोमपा अत एव बाहुशर्धी बाहुबलोपेत ऊर्ध्वधन्वा निरन्तरमुद्यतधनुष्कः प्रतिहिताभिस्तेन धनुषा प्रेरिताभिरिषुभिरस्ता क्षेप्ता विनाशयतीत्यर्थः ॥

अथ चतुर्थीमाह—

बृहस्पते परि दीया रथेन रक्षोहाऽमित्राꣳ अपबाधमानः । प्रभञ्जन्त्सेनाः प्रमृणो युधा जयन्नस्माकमेध्यविता रथानाम् ।,इति ।

बृहद्वाक्तस्याः पालको बृहस्पतिरिन्द्रः । अत एव शाखान्तरे समाम्नातम्—" वाग्वै बृहत्तस्या एष पतिस्तस्माद्बृहस्पतिरेषः " इति । व्याकरणकर्तृत्वमिन्द्रस्य वाक्पतित्वम् । तच्चान्यत्राऽऽम्नातम्—"ते देवा इन्द्रमब्रुवन्निमां नो वाचं व्याकुर्वीति " इति । तथाविध हे इन्द्र त्वं रथेन परिदीय सर्वतो

(अथ चतुर्थाष्टके षष्ठप्रपाठके पञ्चमोऽनुवाकः।)

प्राचीमनु प्रदिशं प्रेहि विद्वानग्नेरग्ने पुरो-
अग्निर्भवेह। विश्वा आशा दीद्यानो वि भा-
ह्यूर्जं नो धेहि द्विपदे चतुष्पदे। क्रमध्वमग्निना
नाकमुख्यꣳ हस्तेषु बिभ्रतः। दिवः पृष्ठꣳ
सुवर्गत्वा मिश्रा देवेभिराध्वम्। पृथिव्या
अहमुदन्तरिक्षमाऽरुहमन्तरिक्षाद्दिवमाऽरुहम्।
दिवो नाकस्य पृष्ठात्सुवर्ज्योतिरगाम् (१)
अहम्। सुवर्यन्तो नापेक्षन्त आ द्याꣳ रोहन्ति
रोदसी। यज्ञं ये विश्वतोधारꣳ सुविद्वाꣳसो
वितेनिरे। अग्ने प्रेहि प्रथमो देवयतां चक्षुर्देवा-
नामुत मर्त्यानाम्। इयक्षमाणा भृगुभिः
सजोषाः सुवर्यन्तु यजमानाः स्वस्ति। नक्तो-
षासा समनसा विरूपे धापयेते शिशुमेकꣳ
समीची। द्यावा क्षामा रुक्मो अन्तर्वि भाति
देवा अग्निं धारयन्द्रविणोदाः। अग्ने सहस्राक्ष
(२) शतमूर्धञ्छतं ते प्राणाः सहस्रमपानाः।
त्वꣳ साहस्रस्य राय ईशिषे तस्मै ते विधेम
वाजाय स्वाहा। सुपर्णोऽसि गरुत्मान्पृथि-
व्याꣳ सीद पृष्ठे पृथिव्याः सीद भासाऽन्तरि-

क्षमा पृण ज्योतिषा दिवमुत्तभान तेजसा दिश
उद्दꣳह। आजुह्वानः सुप्रतीकः पुरस्तादग्ने स्वां
योनिमा सीद साध्या। अस्मिन्त्सधस्थे अध्यु-
त्तरस्मिन्विश्वे देवाः (३) यजमानश्च सीदत।
प्रेद्धो अग्ने दीदिहि पुरो नोऽजस्रया सूर्म्या
यविष्ठ। त्वाꣳ शश्वन्त उपयन्ति वाजाः।
विधेम ते परमे जन्मन्नग्ने विधेम स्तोमैरवरे
सधस्थे। यस्माद्योनेरुदारिथा यजे तं प्र त्वे
हवीꣳषि जुहुरे समिद्धे। ताꣳ सवितुर्वरेण्यस्य
चित्रामाऽहं वृणे सुमतिं विश्वजन्याम्। यामस्य
कण्वो अदुहत्प्रपीनाꣳ सहस्रधाराम् (४)
पयसा महीं गाम्। सप्त ते अग्ने समिधः सप्त
जिह्वाः सप्तर्षयः सप्त धाम प्रियाणि। सप्त
होत्राः सप्तधा त्वा यजन्ति सप्त योनीरा पृणस्वा
घृतेन। ईदृङ्चान्यादृङ्चैतादृङ्च प्रतिदृङ्च
मितश्च संमितश्च सभराः। शुक्रज्योतिश्च चित्र-
ज्योतिश्च सत्यज्योतिश्च ज्योतिष्माꣳश्च सत्य-
श्चर्तपाश्चात्यꣳहाः (५)। ऋतजिच्च सत्यजिच्च
सेनाजिच्च सुषेणश्चान्त्यमित्रश्च दूरेऽमित्रश्च
गणः। ऋतश्च सत्यश्च ध्रुवश्च धरुणश्च धर्ता

चं विधर्ता चं विधारयः । ईदृक्षांस एता-
दृक्षांस ऊ षु णः सदृक्षांसः प्रतिसदृक्षास
एतन । मितासश्च संमितासश्च न ऊतये सभ-
रसो मरुतो यज्ञे अस्मिन्निन्द्रं देवीर्विशो मरु-
तोऽनुवर्त्मानो यथेन्द्रं देवीर्विशो मरुतोऽनुव-
र्त्मान एवमिमं यजमानं देवीश्च विशो मानु-
षीश्चानुवर्त्मानो भवन्तु (६) ॥

(अगाश्सहस्राक्ष देवाः सहस्रधारामत्यश्हा अनुवर्त्मानः षोडश च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके
षष्ठप्रपाठके पञ्चमोऽनुवाकः ॥ ५ ॥

(अथ चतुर्थाष्टके षष्ठप्रपाठके पञ्चमोऽनुवाकः ।)

प्राचीम् । अन्वितिं । प्रदिशामितिं प्र—दिशम् ।
प्रेतिं । इहि । विद्वान् । अग्नेः । अग्ने । पुरोअग्नि-
रितिं पुरः—अग्निः । भव । इह । विश्वाः । आशाः ।
दीद्यानः । वीतिं । भाहि । ऊर्जम् । नः । धेहि ।
द्विपद इतिं द्वि—पदे । चतुष्पद इति चतुः—पदे ।
क्रमध्वम् । अग्निना । नाकम् । उरुयम् । हस्तेषु ।
बिभ्रतः । दिवः । पृष्ठम् । सुवः । गत्वा । मिश्राः ।
देवेभिः । आध्वम् । पृथिव्याः । अहम् । उदितिं ।
अन्तरिक्षम् । एतिं । अरुहम् । अन्तरिक्षात् । दिवम् ।

एतिं । अरुहम् । दिवः । नाकस्य । पृष्ठात् । सुवः ।
ज्योतिः । अगाम् (१) । अहम् । सुवः । यन्तः ।
न । अपेतिं । ईक्षन्ते । एतिं । द्याम् । रोहन्ति ।
रोदसी इतिं । यज्ञम् । ये । विश्वतोधारमितिं विश्व-
तः—धारम् । सुविद्वाश्स इति सु—विद्वाश्सः । विते-
निर इतिं वि—तेनिरे । अग्ने । प्रेतिं । इहि । प्रथमः ।
देवयतामितिं देव—यताम् । चक्षुः । देवानाम् ।
उत । मर्त्यानाम् । इयक्षमाणाः । भृगुभिरिति भृगु—
भिः । सजोषा इतिं स—जोषाः । सुवः । यन्तु ।
यजमानाः । स्वस्ति । नक्तोषासा । समनसेति स—
मनसा । विरूपे इति वि—रूपे । धापयेते इतिं ।
शिशुम् । एकम् । समीची इतिं । द्यावा । क्षामं ।
रुक्मः । अन्तः । वीतिं । भाति । देवाः । अग्निम् ।
धारयन् । द्रविणोदा इतिं द्रविणः—दाः । अग्ने ।
सहस्राक्षेतिं सहस्र—अक्ष (२) । शतमूर्धन्निति
शत—मूर्धन् । शतम् । ते । प्राणा इतिं प्र—अनाः ।
सहस्रम् । अपाना इत्यप—अनाः । त्वम् । साह-
स्रस्य । रायः । ईशिषे । तस्मै । ते । विधेम ।
वाजाय । स्वाहा । सुपर्ण इतिं सु—पर्णः । असि ।
गरुत्मान् । पृथिव्याम् । सीद । पृष्ठे । पृथिव्याः ।

सीद । भासा । अन्तरिक्षम् । एति । पृण । ज्योतिषा । दिवम् । उदिति । स्तभान । तेजसा । दिशः । उदिति । दृꣳह । आजुह्वान इत्या—जुह्वानः । सुप्रतीक इति सु—प्रतीकः । पुरस्तात् । अग्ने । स्वाम् । योनिम् । एति । सीद । साध्या । अस्मिन् । सधस्थ इति सध—स्थे । अधीति । उत्तरस्मिन्नित्युत्—तरस्मिन् । विश्वे । देवाः (३) । यजमानः । च । सीदत । प्रेद्ध इति प्र—इद्धः । अग्ने । दीदिहि । पुरः । नः । अजस्रया । सुर्म्या । यविष्ठ । त्वाम् । शश्वन्तः । उपेति । यन्ति । वाजाः । विधेम । ते । परमे । जन्मन् । अग्ने । विधेम । स्तोमैः । अवरे । सधस्थ इति सध—स्थे । यस्मात् । योनेः । उदारिथेत्युत्—आरिथ । यजे । तम् । प्रेति । त्वे इति । हवीꣳषि । जुहुरे । समिद्ध इति सम्—इद्धे । ताम् । सवितुः । वरेण्यस्य । चित्राम् । एति । अहम् । वृणे । सुमतिमिति सु—मतिम् । विश्वजन्यामिति विश्व—जन्याम् । याम् । अस्य । कण्वः । अदुहत् । प्रपीनामिति प्र—पीनाम् । सहस्रधारामिति सहस्र—धाराम् (४) । पयसा । महीम् । गाम् । सप्त । ते । अग्ने । समिध इति सम्—इधः । सप्त । जिह्वाः ।

सप्त । ऋषयः । सप्त । धाम । प्रियाणि । सप्त । होत्राः । सप्तधेति सप्त—धा । त्वा । यजन्ति । सप्त । योनीः । एति । पृणस्व । घृतेन । ईदृङ् । च । अन्यादृङ् । च । एतादृङ् । च । प्रतिदृङ्ङिति प्रति—दृङ् । च । मितः । च । संमित इति सं—मितः । च । सभरा इति स—भराः । शुक्रज्योतिरिति शुक्र—ज्योतिः । च । चित्रज्योतिरिति चित्र—ज्योतिः । च । सत्यज्योतिरिति सत्य—ज्योतिः । च । ज्योतिष्मान् । च । सत्यः । च । ऋतपा इत्यृत—पाः । च । अत्यꣳहा इत्यति—अꣳहाः (५) । ऋतजिदित्यृत—जित् । च । सत्यजिदिति सत्य—जित् । च । सेनजिदिति सेन—जित् । च । सुषेण इति सु—सेनः । च । अन्त्यमित्र इत्यन्ति—अमित्रः । च । दूरेऽमित्र इति दूरे—अमित्रः । च । गणः । ऋतः । च । सत्यः । च । ध्रुवः । च । धरुणः । च । धर्ता । च । विधर्तेति वि—धर्ता । च । विधारय इति वि—धारयः । ईदृक्षासः । एतादृक्षासः । उ । स्विति । नः । सदृक्षासः । प्रतिसदृक्षास इति प्रति—सदृक्षासः । एति । इतन । मितासः । च । संमितास इति सं—मितासः । च । नः । ऊतये । सभं-

रस् इति स—भरसः । मरुतः । यज्ञे । अस्मिन् । इन्द्रम् । दैवीः । विशः । मरुतः । अनुवर्त्मान् इत्यनु—वर्त्मानः । यथा । इन्द्रम् । दैवीः । विशः । मरुतः । अनुवर्त्मान् इत्यनु—वर्त्मानः । एवम् । इमम् । यजमानम् । दैवीः । च । विशः । मानुषीः । च । अनुवर्त्मान् इत्यनु—वर्त्मानः । भवन्तु (६) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके षष्ठप्रपाठके पञ्चमोऽनुवाकः ॥ ५ ॥

(अथ चतुर्थकाण्डे षष्ठप्रपाठके पञ्चमोऽनुवाकः ।)

चतुर्थेऽनुवाकेऽग्निप्रणयनाङ्गमप्रतिरथसूक्तमुक्तम् । अथ पञ्चमेऽग्निस्थापनमुच्यते ।

कल्पः—" प्राचीमनु प्रदिशमिति पञ्चभिरग्निमधिरुह्य " इति ।

तत्र प्रथमामाह—

प्राचीमनु प्रदिशं प्रेहि विद्वानग्नेरग्ने पुरोअग्निर्भवेह । विश्वा आशा दीद्यानो वि भाह्यूर्जं नो धेहि द्विपदे चतुष्पदे।, इति ।

अग्न इदानीमानीत हे वह्ने प्राचीं [प्र]दिशं प्रागारव्यां प्रकृष्टां दिशं विद्वांस्त्वमनुप्रेहि अनुक्रमेण प्रकर्षो यथा भवति तथा गच्छ । त्वमग्नेरिष्टकानिष्पादितस्य चितिरूपस्य वह्नेरिहास्मिन्कर्मणि पुरोअग्निर्भव पूर्वभागवर्ती वह्निर्भव । यद्वा पुरोगन्ता मुख्योऽग्निर्भवेत्यर्थः । विश्वा आशाः सर्वा अपि दिशो दीद्यानः प्रकाशयन्विभाहि त्वमपि विशेषेण प्रकाशस्व । ततो नोऽस्मदीयाय द्विपदे चतुष्पदे चोर्जमन्नं धेहि संपादय ॥

अथ द्वितीयामाह—

क्रमध्वमग्निना नाकमुख्यꣳ हस्तेषु बिभ्रतः । दिवः पृष्ठꣳ सुवर्गत्वा मिश्रा देवेभिराध्वम् ।, इति ।

हे ऋत्विग्यजमाना नाकं स्वर्गसाधनमुख्यमुखायां पूर्वं संपादितमग्निं हस्तेषु बिभ्रतो धारयन्तस्तेनाग्निना सह क्रमध्वमग्नेरुपरि पादान्विक्षिपत । ततो दिवः पृष्ठमाकाशस्योपरि वर्तमानं सुवर्गत्वा स्वर्गलोकं प्राप्य देवेभिर्मिश्रा देवैरेकीभूताः सन्त आध्वमुपविशत ॥

अथ तृतीयामाह—

पृथिव्या अहमुदन्तरिक्षमाऽरुहमन्तरिक्षाद्दिवमाऽरुहम् । दिवो नाकस्य पृष्ठात्सुवर्ज्योतिरगामहम् । , इति ।

अहं यजमानः पृथिव्या उद्गत एतदन्तरिक्षमारुहमारूढोऽस्मि । तस्मादेवान्तरिक्षादुद्गतो दिवमारुहं द्युलोकमारूढोऽस्मि । दिवो द्युलोकसंबन्धी नाको दुःखरहितो यः प्रदेशस्तस्य पृष्ठादुपरिष्टात्स्वर्गलोकवासिज्योतिर्मण्डलमादित्यरूपमहमगां प्राप्तोऽस्मि यद्वा प्राप्स्यामि ॥

अथ चतुर्थीमाह—

सुवर्यन्तो नापेक्षन्त आ द्याꣳ रोहन्ति रोदसी । यज्ञं ये विश्वतोधारꣳ सुविद्वाꣳसो वितेनिरे ।, इति ।

ये यजमानाः सुविद्वांसः सुष्ठु कर्मानुष्ठानप्रकारं जानन्तो विश्वतोधारं सर्वस्य जगतो धारणहेतुं यमग्निं वितेनिरे विस्तरेणानुतिष्ठन्ति ते यजमाना द्यामन्तरिक्षमारोहन्ति । तथा रोदसी द्यावापृथिव्यावारोहन्ति । ततः सुवर्यन्तः स्वर्गनिवासमादित्यमण्डलं प्राप्नुवन्तोऽन्यत्किमपि स्थानं नापेक्षन्ते ॥

अथ पञ्चमीमाह—

अग्ने प्रेहि प्रथमो देवयतां चक्षुर्देवानामुत मर्त्यानाम् । इयक्षमाणा भृगुभिः सजोषाः सुवर्यन्तु यजमानाः स्वस्ति । , इति ।

देवानात्मन इच्छन्तो देवयन्तो यजमानास्तेषामुपकाराय हेऽग्ने त्वं प्रथमः प्रेहि पुरतो गच्छ । यतस्त्वं देवानां मनुष्याणां च चक्षुस्थानीयः । लोके हि

जीमूतस्येव भवति प्रतीकं यद्वर्मी याति समदामुपस्थे । अनाविद्धया तनुवा जय त्वꣳ स त्वा वर्मणो महिमा पिपर्तु । धन्वना गा धन्वनाऽऽजिं जयेम धन्वना तीव्राः समदो जयेम । धनुः शत्रोरपकामं कृणोति धन्वना सर्वाः प्रदिशो जयेम । वक्ष्यन्तीवेदा गनीगन्ति कर्णं प्रियꣳ सखायं परिषस्वजाना । योषेव शिङ्क्ते वितताऽधि धन्वन् (१) ज्या इयꣳ समने पारयन्ती । ते आचरन्ती समनेव योषा मातेव पुत्रं बिभृतामुपस्थे । अप शत्रून्विध्यताꣳ संविदाने आर्त्नी इमे विष्फुरन्ती अमित्रान् । बह्वीनां पिता बहुरस्य पुत्रश्चिश्चा कृणोति समनाऽवगत्य । इषुधिः सङ्काः पृतनाश्च सर्वाः पृष्ठे निनद्धो जयति प्रसूतः । रथे तिष्ठन्नयति वाजिनः पुरो यत्रंयत्र कामयते सुषारथिः । अभीशूनां महिमानम् (२) पनायत मनः पश्चादनु यच्छन्ति रश्मयः । तीव्रान्घोषान्कृण्वते वृषपाणयोऽश्वा रथेभिः सह वाजयन्तः । अवक्रामन्तः प्रपदै-

रमित्रान्क्षिणन्ति शत्रूꣳरनपव्ययन्तः । रथवाहनꣳ हविरस्य नाम यत्राऽऽयुधं निहितमस्य वर्म । तत्रा रथमुप शुग्मꣳ सदेम विश्वाहा वयꣳ सुमनस्यमानाः । स्वादुष्ꣳसदः पितरो वयोधाः कृच्छ्रेश्रितः शक्तीवन्तो गभीराः । चित्रसेना इषुबला अमृध्राः सतोवीरा उरवो व्रातसाहाः । ब्राह्मणासः (३) पितरः सोम्यासः शिवे नो द्यावापृथिवी अनेहसा । पूषा नः पातु दुरितादृतावृधो रक्षा माकिर्नो अघशꣳस ईशत । सुपर्ण वस्ते मृगो अस्या दन्तो गोभिः सनद्धा पतति प्रसूता । यत्रा नरः सं च वि च द्रवन्ति तत्रास्मभ्यमिषवः शर्म यꣳसन् । ऋजीते परि वृङ्ग्धि नोऽश्मा भवतु नस्तनूः । सोमो अधि ब्रवीतु नोऽदितिः (४) शर्म यच्छतु । आ जङ्घन्ति सान्वेषां जघनाꣳ उप जिघ्नते । अश्वाजनि प्रचेतसोऽश्वान्त्समत्सु चोदय । अहिरिव भोगैः पर्येति बाहुं ज्याया हेतिं परिबाधमानः । हस्तघ्नो विश्वा वयुनानि विद्वान्पुमान्पुमाꣳसं परि पातु विश्वतः । वनस्पते वीड्वङ्गो हि भूया अस्म-

त्संखा प्रतरणः सुवीरः । गोभिः संनद्धो असि वीडयस्वाऽऽस्थाता ते जयतु जेत्वानि । दिवः पृथिव्याः परि (५) ओज उद्भृतं वनस्पतिभ्यः पर्याभृतꣳ सहः । अपामोज्मानं परि गोभिरावृतमिन्द्रस्य वज्रꣳ हविषा रथं यज । इन्द्रस्य वज्रो मरुतामनीकं मित्रस्य गर्भो वरुणस्य नाभिः । सेमां नो हव्यदातिं जुषाणो देव रथ प्रति हव्या गृभाय । उप श्वासय पृथिवीमुत द्यां पुरुत्रा ते मनुतां विष्टितं जगत् । स दुन्दुभे सजूरिन्द्रेण देवैर्दूराद् (६) दवीयो अप सेध शत्रून् । आ क्रन्दय बलमोजो न आ धा निष्टनिहि दुरिता बाधमानः । अप प्रोथ दुन्दुभे दुच्छुनाꣳ इत इन्द्रस्य मुष्टिरसि वीडयस्व । आऽमूरज प्रत्यावर्तयेमाः केतुमद्दुन्दुभिर्वावदीति । समश्वपर्णाश्चरन्ति नो नरोऽस्माकमिन्द्र रथिनो जयन्तु (७) ॥

(धन्वन्महिमानं ब्राह्मणासोऽदितिः पृथिव्याः परि दूरादेकंचत्वारिꣳशच ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके षष्ठप्रपाठके षष्ठोऽनुवाकः ॥ ६ ॥

जीमूतस्य । इव । भवति । प्रतीकम् । यत् । वर्मी । याति । समदामिति स—मदाम् । उपस्थ इत्युप—स्थे । अनाविद्धयेत्यना—विद्धया । तनुवा । जय । त्वम् । सः । त्वा । वर्मणः । महिमा । पिपर्तु । धन्वना । गाः । धन्वना । आजिम् । जयेम । धन्वना । तीव्राः । समद इति स—मदः । जयेम । धनुः । शत्रोः । अपकाममित्यप—कामम् । कृणोति । धन्वना । सर्वाः । प्रदिश इति प्र—दिशः । जयेम । वक्ष्यन्ती । इव । इत् । एति । गनीगन्ति । कर्णम् । प्रियम् । सखायम् । परिषस्वजानेति परि—सस्वजाना । योषा । इव । शिङ्क्ते । विततेति वि—तता । अधीति । धन्वन् (१) । ज्या । इयम् । समने । पारयन्ती । ते इति । आचरन्ती इत्या—चरन्ती । समना । इव । योषा । माता । इव । पुत्रम् । बिभृताम् । उपस्थ इत्युप—स्थे । अधेति । शत्रून् । विध्यताम् । संविदाने इति सं—विदाने । आर्त्नी इति । इमे इति । विष्फुरन्ती इति वि—स्फुरन्ती । अमित्रान् । बह्वीनाम् । पिता । बहुः । अस्य । पुत्रः । चिश्चा । कृणोति । समना । अव-

गत्येत्यंव—गत्यं । इषुधिरितीषु—धिः । सङ्काः ।
पृतनाः । च । सर्वाः । पृष्ठे । निनद्ध इति नि—
नद्धः । जयति । प्रसूत इति प्र—सूतः । रथे ।
तिष्ठन् । नयति । वाजिनः । पुरः । यत्रंयत्रेति
यत्र—यत्र । कामयते । सुषारथिरिति सु—सारथिः ।
अभीशूनाम् । महिमानम् (२) । पनायत ।
मनः । पश्चात् । अन्विति । यच्छन्ति । रश्मयः ।
तीव्रान् । घोषान् । कृण्वते । वृषपाणय इति वृष—
पाणयः । अश्वाः । रथेभिः । सह । वाजयन्तः ।
अवक्रामन्त इत्यंव—क्रामन्तः । प्रपदैरिति प्र—
पदैः । अमित्रान् । क्षिणन्ति । शत्रून् । अनपव्य-
यन्त इत्यनप—व्ययन्तः । रथवाहनमिति रथ—
वाहनम् । हविः । अस्य । नाम । यत्र । आयु-
धम् । निहितमिति नि—हितम् । अस्य । वर्म ।
तत्र । रथम् । उपेति । शग्मम् । सदेम । विश्वा-
हेति विश्वा—अहा । वयम् । सुमनस्यमाना इति
सु—मनस्यमानाः । स्वादुष्सद इति स्वादु—
सुंसदः । पितरः । वयोधा इति वयः—धाः ।
कृच्छ्रेश्रित इति कृच्छ्रे—श्रितः । शक्तीवन्त इति
शक्ति—वन्तः । गभीराः । चित्रसेना इति चित्र—

सेनाः । इषुबला इतीषु—बलाः । अमृध्राः ।
सतोवीरा इति सतः—वीराः । उरवः । व्रात-
साहा इति व्रात—साहाः । ब्राह्मणासः (३) ।
पितरः । सोम्यासः । शिवे इति । नः । द्यावापृ-
थिवी इति द्यावा—पृथिवी । अनेहसा । पूषा । नः ।
पातु । दुरितादिति दुः—इतात् । ऋतावृध इत्यृत—
वृधः । रक्षा । माकिः । नः । अघशंस इत्यघ—
शंसः । ईशत । सुपर्णमिति सु—पर्णम् । वस्ते ।
मृगः । अस्याः । दन्तः । गोभिः । संनद्धेति सं—
नद्धा । पतति । प्रसूतेति प्र—सूता । यत्र । नरः ।
समिति । च । वीति । च । द्रवन्ति । तत्र । अस्म-
भ्यमित्यस्म—भ्यम् । इषवः । शर्म । यंसन् ।
ऋजीते । परीति । वृङ्ग्धि । नः । अश्मा । भवतु ।
नः । तनूः । सोमः । अधीति । ब्रवीतु । नः । अ-
दितिः (४) । शर्म । यच्छतु । एति । जङ्घन्ति ।
सानु । एषाम् । जघनान् । उपेति । जिघ्नते । अश्वा-
जनीत्यश्व—अजनि । प्रचेतस इति प्र—चेतसः । अ-
श्वान् । समस्विति समत्—सु । चोदय । अहिः ।
इव । भोगैः । परीति । एति । बाहुम् । ज्यायाः ।
हेतिम् । परिबाधमान इति परि—बाधमानः । हस्त-

घ्न इति हस्त—घ्नः । विश्वा । वयुनानि । विद्वान् । पुमान् । पुमांꣳ सम् । परीति । पातु । विश्वतः । वनस्पते । वीड्वङ्ग इति वीडु—अङ्गः । हि । भूयाः । अस्मत्सखेत्यस्मत्—सखा । प्रतरण इति प्र—तरणः । सुवीर इति सु—वीरः । गोभिः । संनद्ध इति सं—नद्धः । असि । वीडयस्व । आस्थातेत्या—स्थाता । ते । जयतु । जेत्वानि । दिवः । पृथिव्याः । परीति । (५) । ओजः । उद्भृतमित्युत्—भृतम् । वनस्पतिभ्य इति वनस्पति—भ्यः । परीति । आभृतमित्या—भृतम् । सहः । अपाम् । ओज्मानम् । परीति । गोभिः । आवृतमित्या—वृतम् । इन्द्रस्य । वज्रम् । हविषा । रथम् । यज । इन्द्रस्य । वज्रः । मरुताम् । अनीकम् । मित्रस्य । गभिः । वरुणस्य । नाभिः । सः । इमाम् । नः । हव्यदातिमिति हव्य—दातिम् । जुषाणः । देव । रथ । प्रतीति । हव्या । गृभाय । उपेति । श्वासय । पृथिवीम् । उत । द्याम् । पुरुत्रेति पुरु—त्रा । ते । मनुताम् । विष्टितमिति वि—स्थितम् । जगत् । सः । दुन्दुभे । सजूरिति स—जूः । इन्द्रेण । देवैः । दूरात् (६) । दवीयः । अपेति । सेध । शत्रून् । एति । क्रन्दय । बलम् ।

ओजः । नः । एति । धाः । निरिति । स्तनिहि । दुरितेति दुः—इता । बाधमानः । अपेति । प्रोथ । दुन्दुभे । दुच्छुनान् । इतः । इन्द्रस्य । मुष्टिः । असि । वीडयस्व । एति । अमूः । अज । प्रत्यावर्तयेति प्रति—आवर्तय । इमाः । केतुमदिति केतु—मत् । दुन्दुभिः । वावदीति । समिति । अश्वंपर्णा इत्यश्वं—पर्णाः । चरन्ति । नः । नरः । अस्माकम् । इन्द्र । रथिनः । जयन्तु (७) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके षष्ठप्रपाठके षष्ठोऽनुवाकः ॥ ६ ॥

(अथ चतुर्थकाण्डे षष्ठप्रपाठके षष्ठोऽनुवाकः ।)

पञ्चमेऽनुवाके चित्यारोहणादयो मारुतहोमान्ता अङ्गविशेषा उक्ताः । अथ षष्ठेऽश्वमेधकर्तृ रथसज्जीकरणभाविनि[1] कवचस्वीकारादीन्यङ्गान्युच्यन्ते । तस्य चाग्निप्रकरणे संबन्धाभावादित उत्कृष्याश्वमेधप्रकरणे संबन्धो द्रष्टव्यः । अध्ययनार्थमेव केवलमत्र मन्त्रपाठः ।

कल्पः—" जीमूतस्येति कवचमध्यूहते " इति ।

पाठस्तु—

जीमूतस्येव भवति प्रतीकं यद्वर्मी याति समदामुपस्थे । अनाविद्धया तनुवा जयत्वꣳ स त्वा वर्मणो महिमा पिपर्तु ।, इति ।

यद्यदा वर्मी कवचयुक्तो राजा समदां शत्रूणामुपस्थे समीपे याति, अनेन सह मात्सर्येण माद्यन्तीति समदः शत्रवः, तदा जीमूतस्य मेघस्य प्रतीकं मुख-

१ क. घ. ङ. °भाविनि ।

वरुणस्य नाभिः । सेमां नो हव्यदातिं जुषाणो
देव रथ प्रति हव्या गृभाय । , इति ।

यथेन्द्रस्य वज्रोऽत्यन्तं दृढः, यथा च मरुतामनीकं सैन्यं बहुभिर्भटैरुपेतं, यथा मित्रस्य गर्भोऽत्यन्तं सुरक्षितः, यथा वरुणस्य नाभिः केनापि तिरस्कर्तुमशक्यस्तथाविधैर्गुणैरुपेत हे देव रथ नोऽस्मदीयामिमां हव्यदातिं हविर्दानं जुषाणो हव्याऽस्मद्दत्तानि हव्यानि प्रति गृभाय प्रत्येकं गृहाण ॥

चतुर्थीमाह—

उप श्वासय पृथिवीमुत द्यां पुरुत्रा ते मनुतां
विष्ठितं जगत् । स दुन्दुभे सजूरिन्द्रेण देवै-
र्दूराद्दवीयो अप सेध शत्रून् । , इति ।

रथसमीपवर्तिदुन्दुभिरपि एवंमहिमा किमुत रथ इति विवक्षया दुन्दुभिः प्रशस्यते । हे दुन्दुभे पृथिवीमुपश्वासय त्वदीयेन शब्देन पूरय । उतापि च द्यां द्युलोकमप्युपश्वासय । पुरुत्रा पुरुषु द्युलोकभूलोकादिस्थानेषु विष्ठितं विशेषेण स्थितं सर्वं जगत्ते तव शब्दं मनुतां जानातु । स त्वमिन्द्रेणान्यैर्देवैश्च सजूः समानप्रीतिः सञ्शत्रूनस्मदीयान्दूराद्दवीयो दूरादप्यत्यन्तं दूरदेशं प्रत्यपसेधापसारय ॥

पञ्चमीमाह—

आ क्रन्दय बलमोजो न आ धा निष्टनिहि
दुरिता बाधमानः । अप प्रोथ दुन्दुभे दुच्छु-
नाः इत इन्द्रस्य मुष्टिरसि वीडयस्व । , इति ।

हे दुन्दुभे बलं परकीयसैन्यं प्रत्याक्रन्दयाऽऽक्रोशं कुरु अमुं जह्यमुं प्रहरेत्यत्यन्तभीतिहेतुं शब्दं कुरु । नोऽस्माकमोजो बलमाधा आधेहि सम्यक्संपादय । दुरिता बाधमानोऽस्मदीयानि दुरितानि विनाशयन्निष्टनिहि गर्जनसमानमस्मदुत्साहहेतुं शब्दं कुरु । दुच्छुनान्दुष्टचित्तान्पुरुषानितोऽस्मादपप्रोथापसारय । त्वमिन्द्रस्य मुष्टिरसि वज्रधारकमुष्टिसमानोऽस्यतो वीडयस्व दृढी भव । ईदृशैर्दुन्दुभिध्वनिभिः सहितोऽयं रथः प्रवर्तत इति तात्पर्यार्थः ॥

कल्पः—" आऽमूरजेति दुन्दुभिं संहादयन्ति " इति ।

पाठस्तु—

आऽमूरज प्रत्यावर्तयेमाः केतुमद्दुन्दुभिर्वा-

वदीति । समश्वपर्णाश्चरन्ति नो नरोऽ-
स्माकमिन्द्र रथिनो जयन्तु ॥ , इति ॥

हे इन्द्रामूः परकीयसेनाः समन्तादज प्रेरय पलायिताः कुरु । इमा अस्मदीयाः सेनाः प्रत्यावर्तयाक्षताः सत्यो यथा प्रत्यावृत्ता भवन्ति तथा कुरु । अयं दुन्दुभिः केतुमज्ज्ञानवदस्मदीयो जयो यथा सर्वैर्ज्ञायते तथा वावदीति भृशं ध्वनिं करोति । अश्वपर्णा अश्वपत्रा अश्ववाहनयुक्ता इत्यर्थः । तादृशा नो नरोऽस्मदीयाः पुरुषाः संचरन्ति सम्यग्विश्रम्भेण चरन्तु । अस्माकं संबन्धिनो ये रथिनो मुख्यपुरुषास्ते जयन्तु ॥

अत्र विनियोगसंग्रहः—

अथाश्वमेधे जीमूत कवचं प्रतिमुञ्चति ।
धन्वना धनुरादत्ते वक्ष्यन्ती ज्यामभिस्पृशेत् ॥ १ ॥
ते संमृशेद्धनुष्कोट्यौ बर्हीतीषुधिबन्धनम् ।
रथेति सारथिं तीव्रानश्वानप्यभिमन्त्रयेत् ॥ २ ॥
रथ काले रथः स्थाप्यो भजेत्स्वादुत्रयात्पितॄन् ।
ऋज्यात्मानमभिस्पृश्य ह्या जङ्घेत्याहरेत्कशाम् ॥ ३ ॥
हस्तं (स्तघ्नं) मन्त्रयतेऽहीति(येचाही) रथंतु वनपञ्चभिः ।
दुन्दुभिं वादयेदाऽमूरत्र मन्त्रास्तु विंशतिः ॥ ४ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे षष्ठप्रपाठके
षष्ठोऽनुवाकः ॥ ६ ॥

(अथ चतुर्थाष्टके षष्ठप्रपाठके सप्तमोऽनुवाकः ।)

यदक्रन्दः प्रथमं जायमान उद्यन्त्समुद्रादुत
वा पुरीषात् । श्येनस्य पक्षा हरिणस्य बाहू
उपस्तुत्यं महि जातं ते अर्वन् । यमेन दत्तं
त्रित एनमायुनगिन्द्र एणं प्रथमो अध्यतिष्ठत् ।
गन्धर्वो अस्य रशनामगृभ्णात्सूरादश्वं वसवो

निरंतष्ट । असि॑ यमो॒ अस्यादित्यो॒ अर्व॒न्नसि॑
त्रि॒तो गुह्ये॑न व्र॒तेन॑ । असि॒ सोमे॑न समया॒
विपृ॑क्तः (१) आहु॒स्ते॒ त्रीणि॑ दि॒वि बन्ध॑ना॒-
नि । त्रीणि॑ त आहु॒र्दि॒वि बन्ध॑नानि॒ त्रीण्य॒प्सु
त्रीण्य॒न्तः स॑मु॒द्रे । उ॒तेव॑ मे वरु॒णश्छ॑न्त्स्यर्व॒-
न्यत्रा॑ त आहुः प॒रमं ज॒नित्र॑म् । इ॒मा ते॑
वाजिन्नव॒मार्ज॑नानी॒मा श॒फाना॑ꣳ सनि॒तुर्नि॒धा-
ना॑ । अत्रा॑ ते भ॒द्रा र॑श॒ना अ॑पश्यमृ॒तस्य॒ या
अ॑भि॒रक्ष॑न्ति गो॒पाः । आ॒त्मान॑ ते॒ मन॑सा॒ऽऽ-
रादजानामव॒ो दि॒वा (२) प॒तय॑न्तं पत॒ङ्गम् ।
शिरो॑ अपश्यं प॒थिभि॑: सु॒गेभि॑ररे॒णुभि॒र्जेह॑मानं
पत॒त्रि । अत्रा॑ ते रू॒पमु॑त्त॒मम॑पश्यं जिगी॒षमा-
ण॒मिष॒ आ प॒दे गोः । य॒दा ते॒ मर्तो॒ अनु॒
भोग॒मान॒डादिद्ध॑सि॒ष्ठ ओष॑धीरजीगः । अनु॑
त्वा॒ रथो॒ अनु॑ मर्यो॒ अर्व॒न्ननु॒ गावो॒ऽनु॒ भग॑:
क॒नीना॑म् । अनु॒ व्राता॑सस्तव॒ सख्य॑मी॒युरनु॑
दे॒वा म॑मिरे वी॒र्यं॑ (३) ते । हिर॑ण्यशृ-
ङ्गोऽयो॒ अस्य॒ पादा॒ मनो॑जवा॒ अव॑र॒ इन्द्र॑
आसीत् । दे॒वा इद॑स्य हवि॒रद्य॑माय॒न्यो अर्व॑न्तं
प्रथ॒मो अ॒ध्यति॑ष्ठत् । ई॒र्मान्ता॑सः सिलि॒कम-

ध्यमा॒सः सꣳशूर॑णासो दि॒व्यासो॒ अत्या॑: ।
ह॒ꣳसा इ॑व श्रेणि॒शो य॑तन्ते॒ यदाक्षि॑षुर्दि॒व्यम-
ज्ममश्वा॑: । तव॒ शरी॑रं पतयिष्ण्व॒र्वन्तव॑ चि॒त्तं
वात॑ इव॒ ध्रजी॑मान् । तव॒ शृङ्गा॑णि॒ विष्ठि॑ता
पुरु॒त्राऽर॑ण्येषु॒ जर्भु॑राणा॒ चर॑न्ति । उप॑ (४)
प्रागा॒च्छस॑नं वा॒ज्यर्वा॑ दे॒वद्री॑चा॒ मन॑सा॒
दी॒ध्या॑नः । अ॒जः पु॒रो नी॑यते॒ नाभि॑रस्या॒नु
प॒श्चात्क॑वयो॒ यन्ति॑ रे॒भाः । उप॒ प्रागा॑त्पर॒मं
यत्स॒धस्थ॒मर्वाꣳ॑ अ॒च्छा पि॒तरं॑ मा॒तरं॑ च ।
अ॒द्या दे॒वान्जु॒ष्ट॒तमो॒ हि ग॒म्या अथा॑ऽऽशा॒स्ते
दा॒शुषे॒ वार्या॑णि (५) ॥

(विपृ॑क्तो॒ दिवा॑ वी॒र्यमु॒पैकान्नचत्वारिꣳशच्च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके षष्ठप्रपाठके सप्तमोऽनुवाकः ॥ ७ ॥

(अथ चतुर्थाष्टके षष्ठप्रपाठके सप्तमोऽनुवाकः ।)

यत् । अक्रन्दः । प्रथमम् । जायमानः । उद्य-
न्नित्युत्—यन् । समुद्रात् । उत । वा । पुरीषात् ।
श्येनस्य । पक्षा । हरिणस्य । बाहू इति । उपस्तुत्य-
मित्युप—स्तुत्यम् । महि । जातम् । ते । अर्वन् ।
यमेन । दत्तम् । त्रितः । एनम् । आयुनक् । इन्द्रः ।

एनम् । प्रथमः । अधीतिं । अतिष्ठत् । गन्धर्वः । अस्य । रशनाम् । अगृभ्णात् । सूरात् । अश्वम् । वसवः । निरितिं । अतष्ट । असिं । यमः । असिं । आदित्यः । अर्वन् । असिं । त्रितः । गुह्येन । व्रतेन । असिं । सोमेन । समयां । विपृक्त इति वि—पृक्तः (१) । आहुः । ते । त्रीणिं । दिवि । बन्धनानि । त्रीणिं । ते । आहुः । दिवि । बन्धनानि । त्रीणिं । अप्स्वित्यप्—सु । त्रीणिं । अन्तः । समुद्रे । उत । इव । मे । वरुणः । छन्त्सि । अर्वन् । यत्र । ते । आहुः । परमम् । जनित्रम् । इमा । ते । वाजिन् । अवमार्जनानीत्यव—मार्जनानि । इमा । शफानाम् । सनितुः । निधानेतिं नि—धाना । अत्र । ते । भद्राः । रशनाः । अपश्यम् । ऋतस्य । याः । अभिरक्षन्तीत्यभि—रक्षन्ति । गोपा इतिं गो—पाः । आत्मानम् । ते । मनसा । आरात् । अजानाम् । अवः । दिवा (२) । पतयन्तम् । पतङ्गम् । शिरः । अपश्यम् । पथिभिरितिं पथि—भिः । सुगेभिरितिं सु—गेभिः । अरेणुभिरित्यरेणु—भिः । जेहमानम् । पतत्रि । अत्र । ते । रूपम् । उत्तममित्युत्—तमम् । अपश्यम् । जिगीषमाणम् । इषः । एतिं । पदे ।

गोः । यदा । ते । मतिः । अन्वितिं । भोगम् । आनट् । आत् । इत् । ग्रसिष्ठः । ओषधीः । अजीगः । अन्वितिं । त्वा । रथः । अन्वितिं । मर्यः । अर्वन् । अन्वितिं । गावः । अन्वितिं । भगः । कनीनाम् । अन्वितिं । व्रातासः । तव । सख्यम् । ईयुः । अन्वितिं । देवाः । ममिरे । वीर्यम् (३) । ते । हिरण्यशृङ्ग इति हिरण्य—शृङ्गः । अयः । अस्य । पादाः । मनोजवा इति मनः—जवाः । अवरः । इन्द्रः । आसीत् । देवाः । इत् । अस्य । हविरद्यमितिं हविः—अद्यम् । आयन् । यः । अर्वन्तम् । प्रथमः । अध्यतिष्ठदित्यधि—अतिष्ठत् । ईर्मान्तासः इतीर्म—अन्तासः । सिलिकमध्यमास इति सिलिक—मध्यमासः । समितिं । शूरणासः । दिव्यासः । अत्याः । हंसाः । इव । श्रेणिश इतिं श्रेणि—शः । यतन्ते । यत् । आक्षिषुः । दिव्यम् । अज्मम् । अश्वाः । तव । शरीरम् । पतयिष्णु । अर्वन् । तव । चित्तम् । वातः । इव । ध्रजीमान् । तव । शृङ्गाणि । विष्ठितेति वि—स्थिता । पुरुत्रेतिं पुरु—त्रा । अरण्येषु । जर्भुराणा । चरन्ति । उप (४) । प्रेतिं । अगात् । शसनम् । वाजी । अर्वा ।

देवद्रीचेति देव—द्रीचा । मनसा । दीध्यानः । अजः ।
पुरः । नीयते । नाभिः । अस्य । अन्विति ।
पश्चात् । कवयः । यन्ति । रेभाः । उप । प्रेति ।
अगात् । परमम् । यत् । सधस्थमिति सध—
स्थम् । अर्वान् । अच्छ । पितरम् । मातरम् ।
च । अद्य । देवान् । जुष्टतम इति जुष्ट—तमः ।
हि । गम्याः । अथ । एति । शास्ते । दाशुषे ।
वार्याणि (५) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके
षष्ठप्रपाठके सप्तमोऽनुवाकः ॥ ७ ॥

(अथ चतुर्थकाण्डे षष्ठप्रपाठके सप्तमोऽनुवाकः ।)

षष्ठेऽनुवाके कवचादिसंनाहोऽभिहितः । अथ सप्तमाद्यनुवाकत्रये होमोऽभिधीयते ।

कल्पः—" यदक्रन्दः प्रथमं जायमान इत्येतैस्त्रिभिरनुवाकैः षट्त्रिंशतमश्वस्तोमीयाञ्जुहोति " इति ।

तत्र सप्तमानुवाके प्रथमामृचमाह—

यदक्रन्दः प्रथमं जायमान उद्यन्त्समुद्रादुत
वा पुरीषात् । श्येनस्य पक्षा हरिणस्य बाहू
उपस्तुत्यं महि जातं ते अर्वन् ।, इति ।

हेऽर्वन्यद्यस्मात्कारणाज्जायमान उत्पद्यमान एव प्रथममादावक्रन्दः क्रन्दितवानसि अहो अग्न्यादीनामहं साधनमिति महान्तं शब्दमकरोस्तस्मात्कारणात्ते तव जातं महि महत् । अत एवोपस्तुत्यं समीचीनमिति सर्वैरपि स्तोतव्यमासीत् । जायमानमे(ए)व विशदी क्रियते—समुद्रादुद्यन्समुद्रोपलक्षितादुदकादुत्पद्यमानः । अप्सुयोनिर्वा अश्व इति श्रुतेः । उत वा पुरीषात्, अथवा

लौकिकदृष्ट्या पुरीषात्पुंस्त्वशक्तिसंपन्नान्महतोऽश्वादुत्पद्यमानः । जन्मन उपस्तुत्यत्वे दृष्टान्तद्वयमुच्यते—श्येनस्य पक्षा हरिणस्य बाहू । इवशब्दोऽत्राध्याहर्तव्यः । यथा श्येनारव्यस्य पक्षिणः पक्षौ शीघ्रोत्पतनहेतुत्वात्सर्वैरुपस्तुत्यौ, यथा वा हरिणस्य मृगस्य बाहू पादौ शीघ्रगमनहेतुत्वादुपस्तुत्यौ तद्वदित्यर्थः ॥

अथ द्वितीयामृचमाह—

यमेन दत्तं त्रित एनमायुनगिन्द्र एणं प्रथमो
अध्यतिष्ठत् । गन्धर्वो अस्य रशनामगृभ्णात्सूरादश्वं वसवो निरतष्ट ।, इति ।

अत्र यमोऽग्निः । अग्निर्वाव यम इति श्रुत्यन्तरात् । त्रिषु लोकेषु त्रायते विस्तार्यत इति त्रितो वायुः । यमेनाग्निना दत्तमेनमश्वं त्रितो वायुरायुनग्रथे योजितवान् । तत इन्द्रः प्रथमः सर्वेषु देवेषु मध्ये प्रथमं प्रवृत्तः सन्नेनमश्वमध्यतिष्ठदधिष्ठितवान्योगक्षेमं संपादयितुमभिमानं कृतवानित्यर्थः । गन्धर्वः कश्चिदस्याश्वस्य रशनां बन्धनहेतुं रज्जुमगृभ्णात्स्वीकृतवान् । हे वसवो यूयं सूरादादित्यादिमश्वं निरतष्ट निःशेषेण प्रकाशितवन्तः । यस्याश्वस्याग्निरानेता, वायुर्योजयिता, इन्द्रोऽभिमन्ता, गन्धर्वो रज्जुग्रहीता, सूर्यप्रकाशेन वसवः प्रकाशयितारस्तादृशोऽयमश्व इति स्तूयते ॥

अथ तृतीयामृचमाह—

असि यमो अस्यादित्यो अर्वन्नसि त्रितो
गुह्येन व्रतेन । असि सोमेन समया विपृक्त
आहुस्ते त्रीणि दिवि बन्धनानि ।, इति ।

हेऽर्वन्नश्व त्वं यमाभिधोऽग्निरसि । तथाऽऽदित्योऽसि । तथा त्रितो वायुरसि । पूर्वोक्तप्रकारेण वाय्वादित्ययोरनुगृहीतत्वात्तद्रूपत्वम् । तथा गुह्येन गोप्येनाश्वमेधाख्येन कर्मणा तत्रत्येन सोमेन च समया समये प्राप्तकाले विपृक्तो विशेषेण युक्तोऽसि । ईदृशस्य ते तव द्युलोके बन्धनानि बन्धनसाधनानि दामानि त्रीणीत्येवमभिज्ञा आहुः । वणिजो हि शक्त्याधिक्येनात्युग्रमश्वं विक्रेतुं ग्रामान्तरे नयन्तस्त्रिभिर्दामभिर्बध्नन्ति । दक्षिणवामपार्श्वयोर्दामद्वयमुभौ पुरुषौ गृह्णीतः । यदा दक्षिणभागवर्तिनं द्रष्टुमुद्युङ्क्ते तदा वामभागवर्ती तमाकर्षति । तं चेद्द्रष्टुमुद्युङ्क्ते तदानीमितर आकर्षति । यदा सहसा पुरतः पलायनं करोति तदा तं वारयितुं गले बद्धमेकं दाम गृहीत्वा पृष्ठतः कश्चिदाकर्षति ।

पश्चात्पृष्ठभागे कवयो विद्वांस ऋत्विजो रेभा यन्ति स्तुतिं कुर्वाणा गच्छन्ति ॥

त्रयोदशीमृचमाह—

उप प्रागात्परमं यत्सधस्थमर्वाꣳ अच्छा पितरं मातरं च । अद्या देवान्जुष्टतमो हि गम्या अथाऽऽ शास्ते दाशुषे वार्याणि॥, इति ॥

अर्वाञ्शीघ्रगमनवानयमश्वः परममुत्कृष्टं यत्सधस्थं शमितृभिः सह स्थातुं योग्यं यत्स्थानमस्ति तदुपप्रागात्तत्समीपं प्राप्तवान् । किमर्थम्, पितरं मातरं चापि प्राप्तुं, स्वर्गलोके दिव्यो यः पिता या च माता दिव्या तावुभौ प्राप्तुं देवताजन्मन इत्यर्थः । हेऽश्वाद्यास्मिन्दिने जुष्टतमोऽतिशयेन प्रीतः सन्देवान्गम्याः प्राप्नुहि । अथानन्तरं दाशुषे हविर्दत्तवते यजमानाय वार्याणि वरणीयानि फलानि अयमृत्विक्संघ आशास्ते प्रार्थयति ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे षष्ठप्रपाठके
सप्तमोऽनुवाकः ॥ ७ ॥

(अथ चतुर्थाष्टके षष्ठप्रपाठकेऽष्टमोऽनुवाकः ।)

मा नो मित्रो वरुणो अर्यमाऽऽयुरिन्द्र ऋभुक्षा मरुतः परि ख्यन् । यद्वाजिनो देवजातस्य सप्तेः प्रवक्ष्यामो विदथे वीर्याणि । यन्निर्णिजा रेक्णसा प्रावृतस्य रातिं गृभीतां मुखतो नयन्ति । सुप्राङजो मेम्यद्विश्वरूप इन्द्रापूष्णोः प्रियमप्येति पाथः । एष च्छागः पुरो अश्वेन वाजिना पूष्णो भागो नीयते विश्वदेव्यः । अभिप्रियं यत्पुरोडाशमर्वता त्वष्टेदु (१)

१ क. चाभिप्रा' ।

एनꣳ सौश्रवसाय जिन्वति । यद्धविष्यमृतुशो देवयानं त्रिर्मानुषाः पर्यश्वं नयन्ति । अत्रा पूष्णः प्रथमो भाग एति यज्ञं देवेभ्यः प्रतिवेदयन्नजः । होताऽध्वर्युरावया अग्निमिन्धो ग्रावग्राभ उत शꣳस्ता सुविप्रः । तेन यज्ञेन स्वरंकृतेन स्विष्टेन वक्षणा आ पृणध्वम् । यूपव्रस्का उत ये यूपवाहाश्चषालं ये अश्वयूपाय तक्षति । ये चार्वते पचनꣳ सम्भरन्त्युतो (२) तेषामभिगूर्तिर्न इन्वतु । उप प्रागात्सुमन्मेऽधायि मन्म देवानामाशा उप वीतपृष्ठः । अन्वेनं विप्रा ऋषयो मदन्ति देवानां पुष्टे चकृमा सुबन्धुम् । यद्वाजिनो दामं सन्दानमर्वतो या शीर्षण्या रशना रज्जुरस्य । यद्वा घास्य प्रभृतमास्ये तृणꣳ सर्वा ता ते अपि देवेष्वस्तु । यदश्वस्य क्रविषः (३) मक्षिकाऽऽश यद्वा स्वरौ स्वधितौ रिप्तमस्ति । यद्धस्तयोः शमितुर्यन्नखेषु सर्वा ता ते अपि देवेष्वस्तु । यदूवध्यमुदरस्यापवाति य आमस्य क्रविषो गन्धो अस्ति । सुकृता तच्छमितारः कृण्वन्तूत मेधꣳ शृतपाकं पचन्तु । यत्ते गा-

त्रादग्निना पच्यमानादभि शूलं निहतस्याव-
धावति । मा तद्भूम्यामा श्रिषन्मा तृणेषु देवे-
भ्यस्तदुशद्भ्यो रातमस्तु (४) ॥

(इदुतो क्रविषः श्रिषत्सप्त च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके
षष्ठप्रपाठकेऽष्टमोऽनुवाकः ॥ ८ ॥

(अथ चतुर्थाष्टके षष्ठप्रपाठकेऽष्टमोऽनुवाकः ।)

मा । नः । मित्रः । वरुणः । अर्यमा । आयुः ।
इन्द्रः । ऋभुक्षा इत्यृभु—क्षाः । मरुतः । परीतिं ।
वव्यन् । यत् । वाजिनः । देवजातस्येति देव—जा-
तस्य । सप्तेः । प्रवक्ष्याम इति प्र—वक्ष्यामः । विद-
थे । वीर्याणि । यत् । निर्णिजेति निः—निजा ।
रेक्णसा । प्रावृतस्य । रातिम् । गृभीताम् । मुखतः ।
नयन्ति । सुप्राङिति सु—प्राङ् । अजः । मेम्यत् ।
विश्वरूप इति विश्व—रूपः । इन्द्रापूष्णोरितीन्द्रा—
पूष्णोः । प्रियम् । अपीति । एति । पाथः । एषः ।
छागः । पुरः । अश्वेन । वाजिना । पूष्णः । भागः ।
नीयते । विश्वदेव्यइति विश्व—देव्यः । अभिप्रिय-
मित्यभि—प्रियम् । यत् । पुरोडाशम् । अर्वता । त्वष्टा ।

इत् (१) । एनम् । सौश्रवसाय । जिन्वति । यत् ।
हविष्यम् । ऋतुश इत्यृतु—शः । देवयानमिति देव—
यानम् । त्रिः । मानुषाः । परीति । अश्वम् । नय-
न्ति । अत्र । पूष्णः । प्रथमः । भागः । एति ।
यज्ञम् । देवेभ्यः । प्रतिवेदयन्निति प्रति—वेदयन् ।
अजः । होता । अध्वर्युः । आवया इत्या—वयाः ।
अग्निमिन्ध इत्यग्निम्—इन्धः । ग्रावग्राभ इति ग्राव—
ग्राभः । उत । शꣳस्ता । सुविप्र इति सु—विप्रः ।
तेन । यज्ञेन । स्वरंकृतेनेति सु—अरंकृतेन । स्विष्ट-
नेति सु—इष्टेन । वक्षणाः । एति । पृणध्वम् । यूपव्र-
स्का इति यूप—व्रस्काः । उत । ये । यूपवाहा इति
यूप—वाहाः । चषालम् । ये । अश्वयूपायेत्यश्व—यूपाय ।
तक्षति । ये । च । अर्वते । पचनम् । संभरन्तीति
सं—भरन्ति । उतो इति (२) । तेषाम् । अभि-
गूर्तिरित्यभि—गूर्तिः । नः । इन्वतु । उप । प्रेति ।
अगात् । सुमदिति सु—मत् । मे । अधायि । मन्म ।
देवानाम् । आशाः । उपेति । वीतपृष्ठ इति वीत—
पृष्ठः । अन्विति । एनम् । विप्राः । ऋषयः । मदन्ति ।
देवानाम् । पुष्टे । चक्रम । सुबन्धुमिति सु—बन्धुम् ।
यत् । वाजिनः । दाम । संदानमिति सं—दानम् ।

अर्वतः । या । शीर्षण्या । रशना । रज्जुः । अस्य ।
यत् । वा । घ । अस्य । प्रभृतमिति प्र—भृतम् ।
आस्ये । तृणम् । सर्वा । ता । ते । अपीति । देवेषु ।
अस्तु । यत् । अश्वस्य । क्रविषः (३) । मक्षिका ।
आशं । यत् । वा । स्वरौ । स्वधितावितिं स्व—
धितौ । रिप्तम् । अस्ति । यत् । हस्तयोः । शमितुः ।
यत् । नखेषु । सर्वा । ता । ते । अपीति । देवेषु । अस्तु ।
यत् । ऊवध्यम् । उदरस्य । अपवातीत्यप—वाति ।
यः । आमस्य । क्रविषः । गन्धः । अस्ति । सुकृ-
तेति सु—कृता । तत् । शमितारः । कृण्वन्तु ।
उत । मेधम् । शृतपाकमिति शृत—पाकम् । पचन्तु ।
यत् । ते । गात्रात् । अग्निना । पच्यमानात् ।
अभीति । शूलम् । निहतस्येति नि—हतस्य । अव-
धावतीत्यव—धावति । मा । तत् । भूम्याम् । एति ।
श्रिषत् । मा । तृणेषु । देवेभ्यः । तत् । उशद्भ्य
इत्युशत्—भ्यः । रातम् । अस्तु (४) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके
षष्ठप्रपाठकेऽष्टमोऽनुवाकः ॥ ८ ॥

(अथ चतुर्थकाण्डे षष्ठप्रपाठकेऽष्टमोऽनुवाकः ।)

सप्तमेऽनुवाकेऽश्वस्तोमीयमन्त्राः केचिदुक्ताः । अश्वस्तोत्रमश्वस्तोमस्तत्प्रति-

पादका अश्वस्तोमीयाः । अथाष्टमे त एवान्ये केचिदुच्यन्ते । अनुवाकभेदस्तु सांप्रदायिकोऽयज्ञसंयुक्तेषु प्रयोगेषु मन्त्रभेदार्थो वा ।

तत्राष्टमेऽनुवाके प्रथममृचमाह—

मा नो मित्रो वरुणो अर्यमाऽऽयुरिन्द्र ऋभुक्षा
मरुतः परि ख्यन् । यद्वाजिनो देवजातस्य
सप्तेः प्रवक्ष्यामो विदथे वीर्याणि ।, इति ।

मित्रादयः प्रसिद्धाः । एति सर्वदा गच्छती+त्यायुः । ऋभवो देवाः क्षी-(क्षि)यन्ति निवसन्त्यस्मिन्निति ऋभुक्षाः प्रजापतिः । मरुतो देवान्तराणि । ते सर्वेऽपि नोऽस्मान्मा परिख्यन्मा निन्दयन्तु(न्दन्तु) । यद्यस्माद्वाजिनो यागद्वाराऽन्नसाधनस्य देवजातस्य देवार्थमुत्पन्नस्य सप्तेरश्वस्य वीर्याणि सामर्थ्यानि विदथेऽस्मिन्यज्ञे प्रवक्ष्यामो वयं प्रकर्षेण कथयिष्यामस्तस्मादस्मन्निन्दा न युक्तेत्यर्थः ॥

अथ द्वितीयामृचमाह—

यन्निर्णिजा रेक्णसा प्रावृतस्य रातिं गृभीतां
मुखतो नयन्ति । सुप्राङजो मेम्यद्विश्वरूप
इन्द्रापूष्णोः प्रियमप्येति पाथः ।, इति ।

निर्णिजा प्रोक्षणादिकृतया शुद्ध्या रेक्णसा सुवर्णरजतादिमणिरूपेण धनेन च प्रावृतस्य प्रकर्षेण सर्वतो वेष्टितस्य, अश्वमेधे हि चत्वार ऋत्विजः समुक्षन्तीति प्रोक्षणं हिरण्ययाः काचा इत्यादिना सुवर्णादिमणिभिरलंकारश्चाभिधीयते । अतस्तथाविधस्य संबन्धिनीं गृभीतां हस्ते स्वीकृतां रातिं हविषो दानं मुखतोऽग्रे यद्यदा नयन्ति ऋत्विजः संपादयन्ति तदानीमजो गतिमानश्वः सुप्राङ्सुष्ठु प्रकृष्टान्देवान्प्राप्नुवन्मेम्यत्, मेम्यदिति हेषाशब्दस्यानुकरणं, विश्वरूपो नानारूपः सन्निन्द्रापूष्णोरिन्द्रपूषप्रभृतीनां देवानां प्रियं पाथोऽप्येति प्रीतिकरमन्नभावं प्राप्नोति ॥

अथ तृतीयामृचमाह—

एष च्छागः पुरो अश्वेन वाजिना पूष्णो भागो
नीयते विश्वदेव्यः । अभिप्रियं यत्पुरोडाश-
मर्वता त्वष्टेदेनꣳ सौश्रवसाय जिन्वति ।, इति ।

+ ख पुस्तके " आयुर्वायुरित्येवंरूपः क्वचित्पाठो भवितुं युक्तः " इति टिप्पणी ।

ताम् । यथेह लोके सर्वसाधनसंपूर्णोऽश्वस्तवास्ति तद्वत्परलोकेऽप्यस्त्वित्यर्थः॥

अथ नवमीमृचमाह—

यदश्वस्य क्रविषो मक्षिकाऽऽश यद्वा स्वरौ
स्वधितौ रिप्तमस्ति । यद्धस्तयोः शमितुर्यन्नखेषु सर्वा ता ते अपि देवेष्वस्तु ।, इति ।

अस्याश्वस्य क्रविषः क्रव्यं यन्मांसं मक्षिकाऽऽश मक्षिका भक्षितवती, यद्वा यच्च रक्तं स्वरावञ्जनार्थे शकले स्वधितौ छेदनहेतौ शस्त्रे च रिप्तमीषल्लिप्तमस्ति, यदपि शमितुर्हस्तयोर्लिप्तं, यच्च तदीयेषु नखेषु लिप्तं, हेऽश्व ते त्वदीयं सर्वा ता तत्सर्वं देवेष्वप्यस्तु देवेष्वेव हुतं भवतु । यथा पूर्वमन्त्रे नियोजनकालीना गलशिरःपादादिबन्धनरज्जवो देवेषु समर्पिता, एवमत्र मांसलेशोऽपि देवेषु समर्प्यते ॥

अथ दशमीमृचमाह—

यदूवध्यमुदरस्यापवाति य आमस्य क्रविषो
गन्धो अस्ति । सुकृता तच्छमितारः कृण्वन्तूत मेधꣳ श्रृतपाकं पचन्तु ।, इति ।

उदरस्य मध्ये यदूवध्यमर्धजीर्णपक्वं शकृदादि दुर्गन्धरूपेण वायुना सहाऽऽगच्छति, य आमस्यापक्वस्य क्रविषो मांसस्य गन्धो दुःसहोऽस्ति तत्सर्वं सुकृता सुकृतं यथा भवति तथा शमितारः कृण्वन्तु । उतापि च मेधं यज्ञयोग्यं श्रृतपाकमपाकविपाकौ परित्यज्य सम्यक्पक्वं यथा भवति तथा पचन्तु ॥

अथैकादशीमृचमाह—

यत्ते गात्रादग्निना पच्यमानादभि शूलं निहतस्यावधावति । मा तद्भूम्यामा श्रिषन्मा तृणेषु देवेभ्यस्तदुशद्भ्यो रातमस्तु ॥ , इति ॥

हेऽश्वाग्निना पच्यमानात्ते तव गात्राच्छरीरावयवसकाशाद्यदल्पमवधावति अशृतं सद्भूमौ पतति, निहतस्य नितरां हन्यमानस्य तवाभि शूलं शूले सक्तं

१ ख. घ. ङ. च. °र्धं जीर्ण प°।

यद्यदङ्गमवधावति, तदङ्गं भूम्यामपि मा श्रिषच्छ्लिष्टं लग्नं मा भूत्तृणेष्वपि लग्नं मा भूत्, किंतूशद्भ्यः कामयमानेभ्यो देवेभ्यो रातं दत्तमस्तु ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे षष्ठप्रपाठकेऽ-
ष्टमोऽनुवाकः ॥ ८ ॥

(अथ चतुर्थाष्टके षष्ठप्रपाठके नवमोऽनुवाकः ।)

ये वाजिनं परिपश्यन्ति पक्वं य ईमाहुः सुरभिर्निर्हरेति । ये चार्वतो मांसभिक्षामुपासत उतो तेषामभिगूर्तिर्न इन्वतु । यन्नीक्षणं मांस्पचन्या उखाया या पात्राणि यूष्ण आसेचनानि । ऊष्मण्यांऽपिधानां चरूणामङ्काः सूनाः परि भूषन्त्यश्वम् । निक्रमणं निषदनं विवर्तनं यच्च पड्बीशमर्वतः । यच्च पपौ यच्च घासिम् (१) जघास सर्वा ता ते अपि देवेष्वस्तु । मा त्वाऽग्निर्ध्वनयिद्धूमगन्धिर्मोखा भ्राजन्त्यभि विक्त जघ्रिः । इष्टं वीतमभिगूर्तं वषट्कृतं तं देवासः प्रति गृभ्णन्त्यश्वम् । यदश्वाय वासं उपस्तृणन्त्यधीवासं या हिरण्यान्यस्मै । संदानमर्वन्तं पड्बीशं प्रिया देवेष्वा यामयन्ति । यत्ते सादे महसा शूकृतस्य पार्ष्ण्या वा कशया (२) वा तुतोद ।

सुचेव ता हविषो अध्वरेषु सर्वा ता ते ब्रह्मणा सूदयामि । चतुस्त्रिंश्द्वाजिनो देवबन्धोर्वङ्क्रीरश्वस्य स्वधितिः समेति । अच्छिद्रा गात्रा वयुना कृणोत परुष्परुरनुघुष्या वि शंस्त । एकस्त्वष्टुरश्वस्या विशस्ता द्वा यन्तारा भवतस्तथर्तुः । या ते गात्राणामृतुथा कृणोमि ताता पिण्डानां प्र जुहोम्यग्नौ । मा त्वा तपत् (३) प्रिय आत्माऽपियन्तं मा स्वधितिस्तनुव आ तिष्ठिपत्ते । मा ते गृध्नुरविशस्ताऽतिहाय छिद्रा गात्राण्यसिना मिथू कः । न वा उ एतन्म्रियसे न रिष्यसि देवाꣳ इदेषि पथिभिः सुगेभिः । हरी ते युञ्जा पृषती अभूतामुपास्था-द्वाजी धुरि रासभस्य । सुगव्यं नो वाजी स्वश्व्यं पुꣳसः पुत्राꣳ उत विश्वापूषꣳ रयिम् । अनागास्त्वं नो अदितिः कृणोतु क्षत्रं नो अश्वो वनताꣳ हविष्मान् (४) ॥

(घासिं कशया तपद्वार्यं नवं च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके षष्ठप्रपाठके नवमोऽनुवाकः ॥ ९ ॥

अश्मन्य इमोदनमाशुः शिशानः प्राचीं जीमूतस्य यदक्रन्दो मा नो मित्रो वरुणो ये वाजिनं नवं ॥ ९ ॥

अश्मन्मनोयुजं प्राचीमनु शर्मं यच्छतु तेषामभिगूर्तिः षट्चत्वारिꣳशत् ॥४६॥

हरिः ॐ ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके षष्ठः प्रपाठकः ॥ ६ ॥

(अथ चतुर्थाष्टके षष्ठप्रपाठके नवमोऽनुवाकः ।)

ये । वाजिनम् । परिपश्यन्तीति परि—पश्यन्ति । पक्वम् । ये । ईम् । आहुः । सुरभिः । निरिति । हर । इति । ये । च । अर्वन्तः । माꣳसभिक्षामिति माꣳस—भिक्षाम् । उपासत इत्युप—आसते । उतो इति । तेषाम् । अभिगूर्तिरित्यभि—गूर्तिः । नः । इन्वतु । यत् । नीक्षणम् । माꣳसपचन्याः । उखायाः । या । पात्राणि । यूष्णः । आसेचनानीत्या—सेचनानि । ऊष्मण्या । अपिधानेत्यपि—धाना । चरूणाम् । अङ्काः । सूनाः । परीति । भूषन्ति । अश्वम् । निक्रमणमिति नि—क्रमणम् । निषदनमिति नि—सदनम् । विवर्तनमिति वि—वर्तनम् । यत् । च । पड्बीशम् । अर्वतः । यत् । च । पपौ । यत् । च । घासिम् (१) । जघास । सर्वा । ता । ते । अपीति । देवेषु । अस्तु । मा । त्वा । अग्निः ।

ध्वनयित्व् । धूमगंन्धिरितिं धूम—गन्धिः । मा । उखा । भ्राजंन्ती । अभीतिं । विक्त । जघ्रिंः । इष्टम् । वीतम् । अभिगूर्तमित्यभि—गूर्तम् । वषट्कृतमितिं वषट्—कृतम् । तम् । देवासंः । प्रतीतिं । गृभ्णन्ति । अश्वंम् । यत् । अश्वांय । वासंः । उपस्तृणन्तीत्युंप—स्तृणन्तिं । अधीवासमित्यंधि—वासम् । या । हिरंण्यानि । अस्मै । संदानमितिं सं—दानम् । अर्वन्तम् । पड्बींशम् । प्रिया । देवेषुं । एतिं । यामयन्ति । यत् । ते । सादे । महंसा । शूकृंतस्येतिं शू—कृतस्य । पार्ष्णिंया । वा । कशंया (२) । वा । तुतोदं । सुचा । इव । ता । हविषंः । अध्वरेषुं । सर्वा । ता । ते । ब्रह्मंणा । सूदयामि । चतुंस्त्रिंश्शदितिं चतुंः—त्रिंश्शत् । वाजिनंः । देवबन्धोरितिं देव—बन्धोः । वङ्क्रीः । अश्वंस्य । स्वधितिरितिं स्व—धितिः । समितिं । एति । अच्छिंद्रा । गात्रा । वयुना । कृणोत । परुंष्परुरितिं परुंः—परुः । अनुघुष्येत्यंनु—घुष्य । वीतिं । शस्त । एकंः । त्वष्टुः । अश्वंस्य । विशस्तेतिं वि—शस्ता । द्वा । यन्तारा । भवतः । तथा । ऋतुः । या । ते । गात्रांणाम् । ऋतुथेत्यृतु—था । कृणोमिं । तातेति ता—ता । पिण्डा-

नाम् । प्रेतिं । जुहोमि । अग्नौ । मा । त्वा । तपत् (३)। प्रियः । आत्मा । अपियन्तमित्यंपि—यन्तम् । मा । स्वधितिरितिं स्व—धितिः । तनुवंः । एतिं । तिष्ठिपत् । ते । मा । ते । गृध्नुः । अविशस्तेत्यंवि—शस्ता । अतिहायेत्यंति—हायं । छिद्रा । गात्रांणि । असिना । मिथुं । कः । न । वै । उ । एतत् । म्रियसे । न । रिष्यसि । देवान् । इत् । एषि । पथिभिरितिं पथि—भिः । सुगेभिरितिं सु—गेभिः । हरी इतिं । ते । युञ्जा । पृषंती इतिं । अभूताम् । उपेतिं । अस्थात् । वाजी । धुरि । रासंभस्य । सुगव्यमितिं सु—गव्यम् । नः । वाजी । स्वश्वियमितिं सु—अश्वियम् । पुंसः । पुत्रान् । उत । विश्वापुषमितिं विश्व—पुषम् । रयिम् । अनागास्त्वमित्यनागाः—त्वम् । नः । अदितिंः । कृणोतु । क्षत्रम् । नः । अश्वंः । वनताम् । हविष्मान् (४) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके षष्ठप्रपाठके नवमोऽनुवाकः ॥ ९ ॥

हरिंः ॐ ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके षष्ठः प्रपाठकः ॥ ६ ॥

(अथ चतुर्थाष्टके सप्तमः प्रपाठकः ।)

(तत्र प्रथमोऽनुवाकः ।)

हरिः ॐ ।

अग्नाविष्णू सजोषसेमा वर्धन्तु वां गिरः । द्युम्नैर्वाजेभिरा गतम् । वाजश्च मे प्रसवश्च मे प्रयतिश्च मे प्रसितिश्च मे धीतिश्च मे क्रतुश्च मे स्वरश्च मे श्लोकश्च मे श्रावश्च मे श्रुतिश्च मे ज्योतिश्च मे सुवश्च मे प्राणश्च मेऽपानः (१) च मे व्यानश्च मेऽसुश्च मे चित्तं च म आधीतं च मे वाक्च मे मनश्च मे चक्षुश्च मे श्रोत्रं च मे दक्षश्च मे बलं च म ओजश्च मे सहश्च म आयुश्च मे जरा च म आत्मा च मे तनूश्च मे शर्म च मे वर्म च मेऽङ्गानि च मेऽस्थानि च मे परूंषि च मे शरीराणि च मे (२) ॥

(अपानस्तनूश्च मेऽष्टादश च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके सप्तमप्रपाठके प्रथमोऽनुवाकः ॥ १ ॥

(अथ चतुर्थाष्टके सप्तमः प्रपाठकः ।)

(तत्र प्रथमोऽनुवाकः ।)

हरिः ॐ ।

अग्नाविष्णू इत्यग्नौ—विष्णू । सजोषसेति स—जोषसा । इमाः । वर्धन्तु । वाम् । गिरः । द्युम्नैः । वाजेभिः । एति । गतम् । वाजः । च । मे । प्रसव इति प्र—सवः । च । मे । प्रयतिरिति प्र—यतिः । च । मे । प्रसितिरिति प्र—सितिः । च । मे । धीतिः । च । मे । क्रतुः । च । मे । स्वरः । च । मे । श्लोकः । च । मे । श्रावः । च । मे । श्रुतिः । च । मे । ज्योतिः । च । मे । सुवः । च । मे । प्राण इति प्र—अनः । च । मे । अपान इत्यप—अनः (१) । च । मे । व्यान इति वि—अनः । च । मे । असुः । च । मे । चित्तम् । च । मे । आधीतमित्या—धीतम् । च । मे । वाक् । च । मे । मनः । च । मे । चक्षुः । च । मे । श्रोत्रम् । च । मे । दक्षः । च । मे । बलम् । च । मे । ओजः । च । मे । सहः । च । मे । आयुः । च । मे । जरा । च । मे । आत्मा । च । मे । तनूः । च ।

मे । शर्म । च । मे । वर्म । च । मे । अङ्गानि ।
च । मे । अस्थानि । च । मे । परूंषि । च । मे ।
शरीराणि । च । मे (२) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके
सप्तमप्रपाठके प्रथमोऽनुवाकः ॥ १ ॥

(अथ चतुर्थकाण्डे सप्तमः प्रपाठकः ।)

(तत्र प्रथमोऽनुवाकः ।)

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥१ ॥
परिषेचनमुख्यास्तु संस्काराः षष्ठ ईरिताः ।
वसोर्धारादयः शिष्टाः प्रोच्यन्तेऽस्मिंस्तु सप्तमे ॥ २ ॥

कल्पः—" अग्नाविष्णू सजोषसेति चतुर्गृहीतं हुत्वौदुम्बरीं स्रुचं *व्यायमात्रीं[1] मृदा प्रदिग्धां पश्चादासेचनवतीं घृतस्य पूरयित्वा वाजश्च मे प्रसवश्च म इति संततां वसोर्धारां जुहोत्या मन्त्रसमापनात् " इति ।

अत्र ह्येकादशभिरनुवाकैर्मन्त्रः समाप्यते ।

चतुर्गृहीतहोममन्त्रपाठस्तु—

अग्नाविष्णू सजोषसेमा वर्धन्तु वां
गिरः । द्युम्नैर्वाजेभिरा गतम् ।, इति ।

हेऽग्नाविष्णू युवां सजोषसा समानप्रीती भवेतम् । वां युवयोरिमा गिरः स्तुतिरूपा वाचो वर्धन्तु वृद्धिं प्राप्नुवन्तु । युवामपि द्युम्नैर्धनैर्वाजेभिरन्नैश्च युक्ता-
वागतमिहाऽऽगच्छतम् ॥

अथैकादशानुवाकात्मको मन्त्र उच्यते । अनुवाकभेदस्त्वयज्ञसंयुक्ते कर्मणि पृथङ्मन्त्रत्वेनानुष्ठेयत्वादुपपद्यते ।

---

* व्याममात्रीमिति भवितव्यम् ।

---

१ ख. °मात्रां मृ° । २ ख. च. भवतम् ।

तत्र प्रथमानुवाकपाठस्तु—

वाजश्च मे प्रसवश्च मे प्रयतिश्च मे प्रसि-
तिश्च मे धीतिश्च मे क्रतुश्च मे स्वरश्च मे
श्लोकश्च मे श्रावश्च मे श्रुतिश्च मे ज्योतिश्च
मे सुवश्च मे प्राणश्च मेऽपानश्च मे
व्यानश्च मेऽसुश्च मे चित्तं च म आधीतं
च मे वाक्च मे मनश्च मे चक्षुश्च मे
श्रोत्रं च मे दक्षश्च मे बलं च म
ओजश्च मे सहश्च म आयुश्च मे जरा
च म आत्मा च मे तनूश्च मे शर्म च
मे वर्म च मेऽङ्गानि च मे ऽस्थानि च मे
परूंषि च मे शरीराणि च मे ॥ , इति ॥

वाजोऽन्नम् । चशब्दो वक्ष्यमाणद्रव्यापेक्षया समुच्चयार्थः । मे मम कल्पतामिति पदं दशमानुवाके वक्ष्यमाणं सर्वत्रानुषज्यते संपद्यतामित्यर्थः । प्रसवोऽन्नस्यानुज्ञानम् । प्रयतिः शुद्धिः । प्रसितिर्बन्धनमन्नविषयकमौत्सुक्यम् । धीतिरन्नधारणम् । क्रतुरन्नहेतुर्यज्ञः । स्वरो मन्त्रगत उदात्तादिः । श्लोकः स्तुतिः । श्रावः श्रावयितृत्वसामर्थ्यम् । श्रुतिः श्रवणसामर्थ्यम् । ज्योतिः प्रकाशः । सुवः स्वर्गः । प्राणापानव्याना वायुवृत्तिविशेषाः । असुस्तद्वृत्तिमान्वायुः । चित्तं मनोजन्यं ज्ञानम् । आधीतं तेन ज्ञानेन सर्वदा वीषयीकृतं द्रव्यम् । वागादयश्चत्वारः प्रसिद्धाः । दक्षो ज्ञानेन्द्रियगतं कौशलम् । बलं कर्मेन्द्रियगतं सामर्थ्यम् । ओजो बलहेतुरष्टमो धातुः । सहो वैरिविषयमभिभवितृत्वम् । आयुः प्रसिद्धम् । जराऽऽयुषो वलीपलितादिपर्यन्तत्वम् । आत्मा शास्त्रप्रसिद्धः परमात्मा । तनूः शोभनसंनिवेशं वपुः । शर्म सुखम् । वर्म शरीररक्षकं कवचादि । अङ्गानि संपूर्णावयवाः । अस्थानि यथास्थानं स्थितान्यस्थीनि । परूंषि अङ्गुल्यादिपर्वाणि । शरीराणि पूर्वमनुक्ताः शरीरावयवाः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे सप्तमप्रपाठके
प्रथमोऽनुवाकः ॥ १ ॥

(अथ चतुर्थाष्टके सप्तमप्रपाठके द्वितीयोऽनुवाकः ।)

ज्यैष्ठ्यं च म आधिपत्यं च मे मन्युश्च मे भामश्च मेऽमश्च मेऽम्भश्च मे जेमा च मे महिमा च मे वरिमा च मे प्रथिमा च मे वर्ष्मा च मे द्राघुया च मे वृद्धं च मे वृद्धिश्च मे सत्यं च मे श्रद्धा च मे जगच्च (१) मे धनं च मे वशश्च मे त्विषिश्च मे क्रीडा च मे मोदश्च मे जातं च मे जनिष्यमाणं च मे सूक्तं च मे सुकृतं च मे वित्तं च मे वेद्यं च मे भूतं च मे भविष्यच्च मे सुगं च मे सुपथं च म ऋद्धं च म ऋद्धिश्च मे क्लृप्तं च मे क्लृप्तिश्च मे मतिश्च मे सुमतिश्च मे (२) ॥

(जगच्चर्द्धिश्चतुर्दश च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके सप्तमप्रपाठके द्वितीयोऽनुवाकः ॥ २ ॥

(अथ चतुर्थाष्टके सप्तमप्रपाठके द्वितीयोऽनुवाकः ।)

ज्यैष्ठ्यम् । च । मे । आधिपत्यमित्याधि—पत्यम् । च । मे । मन्युः । च । मे । भामः । च । मे । अमः । च । मे । अम्भः । च । मे । जेमा । च । मे । महिमा । च । मे । वरिमा । च । मे । प्रथि-

मा । च । मे । वर्ष्मा । च । मे । द्राघुया । च । मे । वृद्धम् । च । मे । वृद्धिः । च । मे । सत्यम् । च । मे । श्रद्धेति श्रत्—धा । च । मे । जगत् । च (१) । मे । धनम् । च । मे । वशः । च । मे । त्विषिः । च । मे । क्रीडा । च । मे । मोदः । च । मे । जातम् । च । मे । जनिष्यमाणम् । च । मे । सूक्तमिति सु—उक्तम् । च । मे । सुकृतमिति सु—कृतम् । च । मे । वित्तम् । च । मे । वेद्यम् । च । मे । भूतम् । च । मे । भविष्यत् । च । मे । सुगमिति सु—गम् । च । मे । सुपथमिति सु—पथम् । च । मे । ऋद्धम् । च । मे । ऋद्धिः । च । मे । क्लृप्तम् । च । मे । क्लृप्तिः । च । मे । मतिः । च । मे । सुमतिरिति सु—मतिः । च । मे । (२) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके सप्तमप्रपाठके द्वितीयोऽनुवाकः ॥ २ ॥

(अथ चतुर्थकाण्डे सप्तमप्रपाठके द्वितीयोऽनुवाकः ।)

अथ द्वितीयमाह—

ज्यैष्ठ्यं च म आधिपत्यं च मे मन्युश्च मे भामश्च मेऽमश्च मेऽम्भश्च मे जेमा च मे महिमा च मे वरिमा च मे प्रथिमा च मे वर्ष्मा च मे द्राघुया च मे वृद्धं च मे

वृद्धिश्च मे सत्यं च मे श्रद्धा च मे जगच्च मे धनं च मे वशश्च मे त्विषिश्च मे क्रीडा च मे मोदश्च मे जातं च मे जनिष्यमाणं च मे सूक्तं च मे सुकृतं च मे वित्तं च मे वेद्यं च मे भूतं च मे भविष्यच्च मे सुगं च मे सुपथं च म ऋद्धं च म ऋद्धिश्च मे क्लृप्तं च मे क्लृप्तिश्च मे मतिश्च मे सुमतिश्च मे॥,इति ॥

ज्यैष्ठ्यं प्रशस्ततमत्वम् । आधिपत्यं स्वामित्वम् । मन्युभामशब्दौ क्रोधावान्तरविशेषवाचिनौ । एको मानसोऽपरोऽक्षमादिलिङ्गजन्यो बाह्यः । अमोऽप्रमेयत्वं विरोधिभिरियत्तया परिच्छेत्तुमशक्यत्वम् । अम्भः शैत्यमाधुर्योपेतमुदकम् । जेमा जयसामर्थ्यम् । महिमा महत्त्वं जयसंपादितधनादिसंपत्तिः । वरिमा वरणीयत्वं पूज्यत्वम् । प्रथिमा गृहक्षेत्रादिविस्तारः । वर्ष्मा पुत्रपौत्रादिशरीराणि । द्राघुया पुत्रपौत्रादिविषयं दीर्घत्वमविच्छिन्ना संततिरित्यर्थः । वृद्धं प्रभूतमन्नं धनं च । वृद्धिर्विद्यादिगुणैरुत्कर्षः । सत्यं यथार्थभाषणम् । श्रद्धा परलोकोऽस्तीति बुद्धिः । जगज्जङ्गमाजङ्गमात्मकम् । धनं सुवर्णादि । वशः सर्वस्वाधीनत्वम् । त्विषिः शरीरकान्तिः । क्रीडाऽक्षद्यूतादिः । मोदस्तज्जन्यो हर्षः । जातं पूर्वसिद्धापत्यम् । जनिष्यमाणं भविष्यदपत्यम् । सूक्तमृक्समूहः । सुकृतं तज्जन्यमपूर्वम् । वित्तं पूर्वलब्धम् । वेद्यमितः परं लब्धव्यं द्रव्यजातम् । भूतं पूर्वसिद्धं क्षेत्रादि । भविष्यत्संपत्स्यमानम् । सुगं सुष्ठु गन्तव्यं बन्धुजनयुक्तग्रामान्तरादि । सुपथं चोरादिरहितो मार्गः । ऋद्धं वर्धितं धनादिकमनुष्ठितकर्मफलं वा । ऋद्धिरनुष्ठास्यमानसत्रफलम् । क्लृप्तं समर्थं स्वकार्यक्षमद्रव्यम् । क्लृप्तिः स्वकीयसामर्थ्यम् । मतिः पदार्थमात्रनिश्चयः । सुमतिर्दुर्घटराजकार्यादिनिश्चयः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे सप्तमप्रपाठके द्वितीयोऽनुवाकः ॥ २ ॥

---

१ क. °मात्म° ।

(अथ चतुर्थाष्टके सप्तमप्रपाठके तृतीयोऽनुवाकः ।)

शं च मे मयश्च मे प्रियं च मेऽनुकामश्च मे कामश्च मे सौमनसश्च मे भद्रं च मे श्रेयश्च मे वस्यश्च मे यशश्च मे भगश्च मे द्रविणं च मे यन्ता च मे धर्ता च मे क्षेमश्च मे धृतिश्च मे विश्वं च (१) मे महश्च मे संविच्च मे ज्ञात्रं च मे सूश्च मे प्रसूश्च मे सीरं च मे लयश्च म ऋतं च मेऽमृतं च मेऽयक्ष्मं च मेऽनामयच्च मे जीवातुश्च मे दीर्घायुत्वं च मेऽनमित्रं च मेऽभयं च मे सुगं च मे शयनं च मे सूषा च मे सुदिनं च मे (२) ॥

(विश्वं च शयनमष्टौ च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके सप्तमप्रपाठके तृतीयोऽनुवाकः ॥ ३ ॥

(अथ चतुर्थाष्टके सप्तमप्रपाठके तृतीयोऽनुवाकः ।)

शम् । च । मे । मयः । च । मे । प्रियम् । च । मे । अनुकाम इत्यनु—कामः । च । मे । कामः । च । मे । सौमनसः । च । मे । भद्रम् । च । मे । श्रेयः । च । मे । वस्यः । च । मे । यशः । च । मे ।

भगः । च । मे । द्रविणम् । च । मे । यन्ता । च । मे । धर्ता । च । मे । क्षेमः । च । मे । धृतिः । च । मे । विश्वम् । च (१) । मे । महः । च । मे । संविदिति सं—वित् । च । मे । ज्ञात्रम् । च । मे । सूः । च । मे । प्रसूरिति प्र—सूः । च । मे । सीरम् । च । मे । लयः । च । मे । ऋतम् । च । मे । अमृतम् । च । मे । अयक्ष्मम् । च । मे । अनामयत् । च । मे । जीवातुः । च । मे । दीर्घायुत्वमिति दीर्घायु—त्वम् । च । मे । अनमित्रम् । च । मे । अभयम् । च । मे । सुगमिति सु—गम् । च । मे । शयनम् । च । मे । सूषेति सु—उषा । च । मे । सुदिनमिति सु—दिनम् । च । मे (२) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके सप्तमप्रपाठके तृतीयोऽनुवाकः ॥ ३ ॥

(अथ चतुर्थकाण्डे सप्तमप्रपाठके तृतीयोऽनुवाकः ।)

तृतीयमाह—

शं च मे मयश्च मे प्रियं च मेऽनुकामश्च मे कामश्च मे सौमनसश्च मे भद्रं च मे श्रेयश्च मे वस्यश्च मे यशश्च मे भगश्च मे द्रविणं च मे यन्ता च मे धर्ता च मे क्षेमश्च मे धृतिश्च मे विश्वं च मे महश्च मे संविच्च मे

ज्ञात्रं च मे सूश्च मे प्रसूश्च मे सीरं च मे लयश्च म ऋतं च मेऽमृतं च मेऽयक्ष्मं च मेऽनामयच्च मे जीवातुश्च मे दीर्घायुत्वं च मेऽनमित्रं च मेऽभयं च मे सुगं च मे शयनं च मे सूषा च मे सुदिनं च मे ॥ , इति ॥

शंशब्द ऐहिकसुखवाची । मयःशब्द आमुष्मिकसुखवाची । प्रियं प्रीतिकारणं वस्तु । अनुकामोऽनुकूलत्वनिमित्तेन काम्यमानः पदार्थः । एतदुभयमैहिकमेव तारतम्योपेतम् । काम आमुष्मिकः स्वर्गादिः । सौमनसो मनःस्वास्थ्यकरो बन्धुवर्गः । भद्रं कल्याणमिह लोके रमणीयम् । श्रेयः परलोकहितम् । वस्यो निवासहेतुर्गृहादिः । यशः कीर्तिः । भगः सौभाग्यम् । द्रविणं धनम् । यन्ता नियामक आचार्यादिः । धर्ता पोषकः पित्रादिः । क्षेमो विद्यमानधनस्य रक्षणशक्तिः । धृतिर्धैर्यमापद्यपि निश्चलत्वम् । विश्वं सर्वजनानुकूल्यम् । महः पूजा । संविद्वेदशास्त्रादिविज्ञानम् । ज्ञात्रं ज्ञापयितृत्वसामर्थ्यम् । सूः पुत्रादिप्रेरणसामर्थ्यम् । प्रसूर्भृत्यादिप्रेरणसामर्थ्यम् । सीरं लाङ्गलादिकृषिसाधनसंपत्तिः । लयस्तत्प्रतिबन्धनिवृत्तिः । ऋतं यज्ञादिकर्म । अमृतं तत्फलम् । अयक्ष्मं राजयक्ष्मादिप्रबलव्याधिराहित्यम् । अनामयज्ज्वराद्यल्पव्याधिराहित्यम् । जीवातुर्जीवनकारणं व्याधिपरिहारार्थमौषधम् । दीर्घायुत्वमपमृत्युराहित्यम् । अनमित्रं वैरिराहित्यम् । अभयं भयराहित्यम् । सुगं शोभनगमनं सर्वैरङ्गीकृताचरणमित्यर्थः । शयनं शय्योपधानादिसंपत्तिः । सूषा स्नानसंध्यावन्दनादियुक्तः शोभनः प्रातःकालः । सुदिनं यज्ञदानाध्ययनादियुक्तं कृत्स्नं दिनम् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे सप्तमप्रपाठके तृतीयोऽनुवाकः ॥ ३ ॥

(अथ चतुर्थाष्टके सप्तमप्रपाठके चतुर्थोऽनुवाकः ।)

ऊर्क्च मे सूनृता च मे पयश्च मे रसश्च मे

१ क. घ. ङ. 'रं गोला' ।

घृतं च मे मधु च मे सग्धिश्च मे सपीतिश्च मे कृषिश्च मे वृष्टिश्च मे जैत्रं च म औद्भिद्यं च मे रयिश्च मे रायश्च मे पुष्टं च मे पुष्टिश्च मे विभु चं (१) मे प्रभु चं मे बहु चं मे भूयश्च मे पूर्ण चं मे पूर्णतरं च मेऽक्षितिश्च मे कूयवाश्च मेऽन्नं च मेऽक्षुच्च मे व्रीहयश्च मे यवाश्च मे माषाश्च मे तिलाश्च मे मुद्गाश्च मे खल्वाश्च मे गोधूमाश्च मे मसुराश्चमे प्रियंगवश्च मेऽणवश्च मे श्यामाकाश्च मे नीवाराश्च मे (२)॥

(विभु चं मसुराश्चतुर्दश च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके सप्तमप्रपाठके चतुर्थोऽनुवाकः ॥ ४ ॥

(अथ चतुर्थाष्टके सप्तमप्रपाठके चतुर्थोऽनुवाकः ।)

ऊर्क्। च। मे। सूनृता। च। मे। पयः। च। मे। रसः। च। मे। घृतम्। च। मे। मधु। च। मे। सग्धिः। च। मे। सपीतिरिति स—पीतिः। च। मे। कृषिः। च। मे। वृष्टिः। च। मे। जैत्रम्। च। मे। औद्भिद्यमित्यौत्—भिद्यम्। च। मे। रयिः। च। मे। रायः। च। मे। पुष्टम्।

च। मे। पुष्टिः। च। मे। विभ्विति वि—भु। च (१)। मे। प्रभ्विति प्र—भु। च। मे। बहु। च। मे। भूयः। च। मे। पूर्णम्। च। मे। पूर्णतरमिति पूर्ण—तरम्। च। मे। अक्षितिः। च। मे। कूयवाः। च। मे। अन्नम्। च। मे। अक्षुत्। च। मे। व्रीहयः। च। मे। यवाः। च। मे। माषाः। च। मे। तिलाः। च। मे। मुद्गाः। च। मे। खल्वाः। च। मे। गोधूमाः। च। मे। मसुराः। च। मे। प्रियंगवः। च। मे। अणवः। च। मे। श्यामाकाः। च। मे। नीवाराः। च। मे (२)॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके सप्तमप्रपाठके चतुर्थोऽनुवाकः ॥ ४ ॥

(अथ चतुर्थकाण्डे सप्तमप्रपाठके चतुर्थोऽनुवाकः ।)

चतुर्थमाह—

ऊर्क् मे सूनृता च मे पयश्च मे रसश्च मे घृतं च मे मधु च मे सग्धिश्च मे सपीतिश्च मे कृषिश्च मे वृष्टिश्च मे जैत्रं च म औद्भिद्यं च मे रयिश्च मे रायश्च मे पुष्टं च मे पुष्टिश्च मे विभु च मे प्रभु च मे बहु च मे भूयश्च मे पूर्णं च मे पूर्णतरं च मेऽक्षितिश्च मे कूयवाश्च मेऽन्नं च

मेऽक्षुच्च मे व्रीहयश्च मे यवाश्च मे माषाश्च मे तिलाश्च मे मुद्गाश्च मे खल्वाश्च मे गोधूमाश्च मे मसुराश्च मे प्रियंगवश्च मेऽणवश्च मे श्यामाकाश्च मे नीवाराश्च मे॥, इति ॥

ऊर्गन्नसामान्यम् । सूनृता प्रियोक्तिः । पयःप्रभृतयोऽन्नविशेषाः । पयः क्षीरम् । रसस्तत्त्वं सारम् । घृतमधुनी प्रसिद्धे । सग्धिर्बन्धुभिः सह भोजनमित्यर्थः । तथा सपीतिः सहपानम् । कृषिवृष्टी अन्नस्य हेतुत्वेन प्रसिद्धे । जैत्रं जयशीलं सुक्षेत्रमित्यर्थः । औद्भिद्यमुद्भिदां तरुगुल्मादीनामुत्पत्तिः । रयिः सुवर्णम् । रायो मणिमुक्तादिः । पुष्टं पूर्वोक्तमेव सुवर्णमतिसमृद्धम् । पुष्टिः शरीरपोषः । विभ्वादयोऽक्षित्यन्ता धान्यविषया उत्तरोत्तराभिवृद्धयः सप्तापि तारतम्येन द्रष्टव्याः । न केवलं प्रवृद्धान्येव धान्यानि किं त्वल्पान्यपीत्युच्यन्ते—कूयवाः कुत्सितयवाः । अन्नं प्रसिद्धम् । अक्षुदन्नसाध्यः क्षुत्परिहारः । व्रीहियवमाषतिलमुद्गाः प्रसिद्धाः । खल्वा मुद्गेभ्योऽपि स्थूलबीजाः । गोधूमाः प्रसिद्धाः । मसुरा मुद्गवत्सूपहेतवः । प्रियंगवः प्रसिद्धाः । अणवः सूक्ष्मशालयः । श्यामाका ग्राम्या धान्यविशेषाः । नीवारा आरण्याः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे सप्तमप्रपाठके चतुर्थोऽनुवाकः ॥ ४ ॥

(अथ चतुर्थाष्टके सप्तमप्रपाठके पञ्चमोऽनुवाकः ।)

अश्मा च मे मृत्तिका च मे गिरयश्च मे पर्वताश्च मे सिकताश्च मे वनस्पतयश्च मे हिरण्यं च मेऽयश्च मे सीसं च मे त्रपुश्च मे श्यामं च मे लोहं च मेऽग्निश्च म आपश्च मे वीरुधश्च म ओषधयश्च मे कृष्टपच्यं च (१) मेऽकृष्टपच्यं च मे ग्राम्याश्च मे पशव

आरण्याश्च यज्ञेन कल्पन्तां वित्तं च मे वित्तिश्च मे भूतं च मे भूतिश्च मे वसु च मे वसतिश्च मे कर्म च मे शक्तिश्च मेऽर्थश्च म एमश्च म इतिश्च मे गतिश्च मे (२) ॥

(कृष्टपच्यं चाष्टाचत्वारिꣳ शच्च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके सप्तमप्रपाठके पञ्चमोऽनुवाकः ॥ ५ ॥

अथ चतुर्थाष्टके सप्तमप्रपाठके पञ्चमोऽनुवाकः ।

अश्मा । च । मे । मृत्तिका । च । मे । गिरयः । च । मे । पर्वताः । च । मे । सिकताः । च । मे । वनस्पतयः । च । मे । हिरण्यम् । च । मे । अयः । च । मे । सीसम् । च । मे । त्रपुः । च । मे । श्यामम् । च । मे । लोहम् । च । मे । अग्निः । च । मे । आपः । च । मे । वीरुधः । च । मे । ओषधयः । च । मे । कृष्टपच्यमिति कृष्ट—पच्यम् । च (१) । मे । अकृष्टपच्यमित्यकृष्ट—पच्यम् । च । मे । ग्राम्याः । च । मे । पशवः । आरण्याः । च । यज्ञेन । कल्पन्ताम् । वित्तम् । च । मे । वित्तिः । च । मे । भूतम् । च । मे । भूतिः । च । मे । वसु । च । मे । वसतिः । च । मे । कर्म । च । मे । शक्तिः ।

च । मे । अर्थः । च । मे । एमः । च । मे । इतिः ।
च । मे । गतिः । च । मे (२) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके
सप्तमप्रपाठके पञ्चमोऽनुवाकः ॥ ५ ॥

(अथ चतुर्थकाण्डे सप्तमप्रपाठके पञ्चमोऽनुवाकः ।)

पञ्चममाह—

अश्मा च मे मृत्तिका च मे गिरयश्च मे
पर्वताश्च मे सिकताश्च मे वनस्पतयश्च मे
हिरण्यं च मेऽयश्च मे सीसं च मे त्रपुश्च
मे श्यामं च मे लोहं च मेऽग्निश्च म
आपश्च मे वीरुधश्च म ओषधयश्च मे
कृष्टपच्यं च मेऽकृष्टपच्यं च मे ग्राम्याश्च
मे पशव आरण्याश्च यज्ञेन कल्पन्तां
वित्तं च मे वित्तिश्च मे भूतं च मे भूतिश्च
मे वसु च मे वसतिश्च मे कर्म च
मे शक्तिश्च मेऽर्थश्च म एमश्च म
इतिश्च मे गतिश्च मे ॥ , इति ॥

अश्मादयः प्रसिद्धाः । श्यामं कृष्णायसं, लोहं, कांस्यताम्रादि । अग्न्यादयः प्रसिद्धाः । ग्राम्यारण्यपशवो यज्ञेन निमित्तीभूतेन कल्पन्तां समर्था भवन्तु । वित्तं पूर्वलब्धम् । वित्तिर्भाविलाभः । भूतमैश्वर्योपेतं पुत्रादिकम् । भूतिः स्वकीयमैश्वर्यादिकम् । वसु निवाससाधनं गवादिकम् । वसतिर्निवासाधारो गृहादि । कर्माग्निहोत्रादिकम् । शक्तिस्तदनुष्ठानसामर्थ्यम् ।

---

१ ख. 'मित्तभू' ।

अर्थः प्रयोजनविशेषः । एम एतव्यं प्राप्तव्यं सुखम् । इतिरयनमिष्टप्राप्त्युपायः । गतिरिष्टप्राप्तिः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे सप्तमप्रपाठके पञ्चमोऽनुवाकः ॥ ५ ॥

(अथ चतुर्थाष्टके सप्तमप्रपाठके षष्ठोऽनुवाकः ।)

अग्निश्च म इन्द्रश्च मे सोमश्च म इन्द्रश्च मे
सविता च म इन्द्रश्च मे सरस्वती च म इन्द्र-
श्च मे पूषा च म इन्द्रश्च मे बृहस्पतिश्च म
इन्द्रश्च मे मित्रश्च म इन्द्रश्च मे वरुणश्च म
इन्द्रश्च मे त्वष्टा च (१) म इन्द्रश्च मे धाता
च म इन्द्रश्च मे विष्णुश्च म इन्द्रश्च मेऽश्विनौ
च म इन्द्रश्च मे मरुतश्च म इन्द्रश्च मे विश्वे
च मे देवा इन्द्रश्च मे पृथिवी च म इन्द्रश्च
मेऽन्तरिक्षं च म इन्द्रश्च मे द्यौश्च म इन्द्रश्च
मे दिशश्च म इन्द्रश्च मे मूर्धा च म इन्द्रश्च मे
प्रजापतिश्च म इन्द्रश्च मे (२) ।

(त्वष्टा च द्यौश्च म एकविंश शतिश्च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके
सप्तमप्रपाठके षष्ठोऽनुवाकः ॥ ६ ॥

(अथ चतुर्थाष्टके सप्तमप्रपाठके षष्ठोऽनुवाकः ।)

अग्निः । च । मे । इन्द्रः । च । मे । सोमः । च । मे । इन्द्रः । च । मे । सविता । च । मे । इन्द्रः । च । मे । सरस्वती । च । मे । इन्द्रः । च । मे । पूषा । च । मे । इन्द्रः । च । मे । बृहस्पतिः । च । मे । इन्द्रः । च । मे । मित्रः । च । मे । इन्द्रः । च । मे । वरुणः । च । मे । इन्द्रः । च । मे । त्वष्टा । च । (१) । मे । इन्द्रः । च । मे । धाता । च । मे । इन्द्रः । च । मे । विष्णुः । च । मे । इन्द्रः । च । मे । अश्विनौ । च । मे । इन्द्रः । च । मे । मरुतः । च । मे । इन्द्रः । च । मे । विश्वे । च । मे । देवाः । इन्द्रः । च । मे । पृथिवी । च । मे । इन्द्रः । च । मे । अन्तरिक्षम् । च । मे । इन्द्रः । च । मे । द्यौः । च । मे । इन्द्रः । च । मे । दिशः । च । मे । इन्द्रः । च । मे । मूर्धा । च । मे । इन्द्रः । च । मे । प्रजापतिरिति प्रजा—पतिः । च । मे । इन्द्रः । च । मे (२) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके सप्तमप्रपाठके षष्ठोऽनुवाकः ॥ ६ ॥

(अथ चतुर्थकाण्डे सप्तमप्रपाठके षष्ठोऽनुवाकः ।)

षष्ठमाह—

अग्निश्च म इन्द्रश्च मे सोमश्च म इन्द्रश्च मे सविता च म इन्द्रश्च मे सरस्वती च म इन्द्रश्च मे पूषा च म इन्द्रश्च मे बृहस्पतिश्च म इन्द्रश्च मे मित्रश्च म इन्द्रश्च मे वरुणश्च म इन्द्रश्च मे त्वष्टा च म इन्द्रश्च मे धाता च म इन्द्रश्च मे विष्णुश्च म इन्द्रश्च मेऽश्विनौ च म इन्द्रश्च मे मरुतश्च म इन्द्रश्च मे विश्वे च मे देवा इन्द्रश्च मे पृथिवी च म इन्द्रश्च मेऽन्तरिक्षं च म इन्द्रश्च मे द्यौश्च म इन्द्रश्च मे दिशश्च म इन्द्रश्च मे मूर्धा च म इन्द्रश्च मे प्रजापतिश्च म इन्द्रश्च मे ॥ , इति ॥

अग्न्यादयः प्रसिद्धा देवताः । तैः सर्वैः सह समानभागोपेतत्वादिन्द्र एकैकया देवतया सह पठ्यते । दिक्शब्देन प्राच्याद्याश्चतस्र उच्यन्ते । मूर्धशब्देन चोर्ध्वा दिक् । सा च मुख्यत्वाभिप्रायेण पृथङ्निर्दिष्टा ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे सप्तमप्रपाठके षष्ठोऽनुवाकः ॥ ६ ॥

(अथ चतुर्थाष्टके सप्तमप्रपाठके सप्तमोऽनुवाकः ।)

अꣳशुश्च मे रश्मिश्च मेऽदाभ्यश्च मेऽधिपतिश्च म उपाꣳशुश्च मेऽन्तर्यामश्च म ऐन्द्रवायवश्च मे मैत्रावरुणश्च म आश्विनश्च मे प्रतिप्रस्थानश्च मे शुक्रश्च मे मन्थी च म

आग्रयणश्चं मे वैश्वदेवश्चं मे ध्रुवश्चं मे वैश्वानरश्चं म ऋतुग्रहाश्चं (१) मेऽतिग्राह्याश्च म ऐन्द्राग्नश्चं मे वैश्वदेवश्चं मे मरुत्वतीयाश्च मे माहेन्द्रश्चं म आदित्यश्चं मे सावित्रश्चं मे सारस्वतश्चं मे पौष्णश्चं मे पात्नीवतश्चं मे हारियोजनश्चं मे (२) ॥

(ऋतुग्रहाश्च चतुस्त्रिंशच्च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके सप्तमप्रपाठके सप्तमोऽनुवाकः ॥ ७ ॥

(अथ चतुर्थाष्टके सप्तमप्रपाठके सप्तमोऽनुवाकः ।)

अꣳशुः । च । मे । रश्मिः । च । मे । अदाभ्यः । च । मे । अधिपतिरित्यधि—पतिः । च । मे । उपाꣳशुरित्युप—अꣳशुः । च । मे । अन्तर्यामं इत्यन्तः—यामः । च । मे । ऐन्द्रवायव इत्यैन्द्र—वायवः । च । मे । मैत्रावरुण इति मैत्रा—वरुणः । च । मे । आश्विनः । च । मे । प्रतिप्रस्थान इति प्रति—प्रस्थानः । च । मे । शुक्रः । च । मे । मन्थी । च । मे । आग्रयणः । च । मे । वैश्वदेव इति वैश्व—देवः । च । मे । ध्रुवः । च । मे । वैश्वानरः । च । मे । ऋतुग्रहा इत्यृतु—ग्रहाः । च (१) ।

मे । अतिग्राह्या इत्यति—ग्राह्याः । च । मे । ऐन्द्राग्न इत्यैन्द्र—अग्नः । च । मे । वैश्वदेव इति वैश्व—देवः । च । मे । मरुत्वतीयाः । च । मे । माहेन्द्र इति माहा—इन्द्रः । च । मे । आदित्यः । च । मे । सावित्रः । च । मे । सारस्वतः । च । मे । पौष्णः । च । मे । पात्नीवत इति पात्नी—वतः । च । मे । हारियोजन इति हारि—योजनः । च । मे (२) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके सप्तमप्रपाठके सप्तमोऽनुवाकः ॥ ७ ॥

(अथ चतुर्थकाण्डे सप्तमप्रपाठके सप्तमोऽनुवाकः ।)

सप्तममाह—

अꣳशुश्च मे रश्मिश्च मेऽदाभ्यश्च मेऽधिपतिश्च म उपाꣳशुश्च मेऽन्तर्यामश्च म ऐन्द्रवायवश्च मे मैत्रावरुणश्च म आश्विनश्च मे प्रतिप्रस्थानश्च मे शुक्रश्च मे मन्थी च म आग्रयणश्च मे वैश्वदेवश्च मे ध्रुवश्च मे वैश्वानरश्च म ऋतुग्रहाश्च मेऽतिग्राह्याश्च म ऐन्द्राग्नश्च मे वैश्वदेवश्च मे मरुत्वतीयाश्च मे माहेन्द्रश्च म आदित्यश्च मे सावित्रश्च मे सारस्वतश्च मे पौष्णश्च मे पात्नीवतश्च मे हारियोजनश्च मे ॥, इति ॥

अꣳशादयः सोमग्रहविशेषाः सोमप्रकरणे प्रसिद्धाः । तत्र रश्मिग्रहादर्श-

नाददाभ्यस्यैव ग्रहस्य गृह्यमाणत्वदशां पृथक्कृत्य रश्मिशब्देन निर्दिश्यते। रश्मीनां तु तद्ग्रहणसाधनत्वात्। तथा च तद्ग्रहणमन्त्रः पठ्यते—" शुक्रं ते शुक्रेण गृह्णाम्यह्नो रूपेण सूर्यस्य रश्मिभिः" इति। अधिपतिशब्देन दधिग्रहो विवक्षितः। तस्य चै श्रेष्ठ्यादाधिपत्यम्। अत एव श्रूयते—" ज्येष्ठो वा एष ग्रहाणाम् " इति। प्रतिप्रस्थानशब्देन द्विदेवत्यग्रहसहभावी प्रतिनिर्ग्राह्यो विवक्षितः। ध्रुवाख्यस्यैव ग्रहस्यावनयनदशायां वैश्वानरसूक्तपाठात्तदवैस्थापन्नो वैश्वानरशब्देनोच्यते। आद्यो वैश्वदेवः प्रातःसवनगतः। उत्तरस्तृतीयसवनगतः। सारस्वतग्रहोऽभिषेचनीयाख्यविकृतौ द्रष्टव्यः। " सारस्वतं ग्रहं गृह्णाति " इति तत्राऽऽम्नानात्। एवं पौष्णोऽपि विकृतिगामी द्रष्टव्यः॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे सप्तमप्रपाठके सप्तमोऽनुवाकः॥ ७॥

(अथ चतुर्थाष्टके सप्तमप्रपाठकेऽष्टमोऽनुवाकः।)

इध्मश्चं मे बर्हिश्चं मे वेदिश्च मे धिष्णियाश्च मे स्रुचश्च मे चमसाश्चं मे ग्रावाणश्च मे स्वरवश्च म उपरवाश्चं मेऽधिषवणे च मे द्रोणकलशश्चं मे वायव्यानि च मे पूतभृच्चं म आधवनीयश्च म आग्नीध्रं च मे हविर्धानं च मे गृहाश्चं मे सदश्च मे पुरोडाशाश्च मे पचताश्चं मेऽवभृथश्चं मे स्वगाकारश्चं मे(१)॥

(गृहाश्च षोडश च।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके सप्तमप्रपाठकेऽष्टमोऽनुवाकः॥ ८॥

१ ख. च. च ज्येष्ठ°। २ ख. घ. ङ. च. °वसत्नो।

(अथ चतुर्थाष्टके सप्तमप्रपाठकेऽष्टमोऽनुवाकः।)

इध्मः। च। मे। बर्हिः। च। मे। वेदिः। च। मे। धिष्णियाः। च। मे। स्रुचः। च। मे। चमसाः। च। मे। ग्रावाणः। च। मे। स्वरवः। च। मे। उपरवा इत्युप—रवाः। च। मे। अधिषवणे इत्यधि—सवने। च। मे। द्रोणकलश इति द्रोण—कलशः। च। मे। वायव्यानि। च। मे। पूतभृदिति पूत—भृत्। च। मे। आधवनीय इत्या—धवनीयः। च। मे। आग्नीध्रमित्याग्नि—इध्रम्। च। मे। हविर्धानमिति हविः—धानम्। च। मे। गृहाः। च। मे। सदः। च। मे। पुरोडाशाः। च। मे। पचताः। च। मे। अवभृथ इत्यव—भृथः। च। मे। स्वगाकार इति स्वगा—कारः। च। मे (१)॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके सप्तमप्रपाठकेऽष्टमोऽनुवाकः॥ ८॥

(अथ चतुर्थकाण्डे सप्तमप्रपाठके नवमोऽनुवाकः।)

अष्टममाह—

इध्मश्च मे बर्हिश्च मे वेदिश्च मे धिष्णियाश्च मे स्रुचश्च मे चमसाश्च मे ग्रावाणश्च मे स्वरवश्च म उपरवाश्च मेऽधिषवणे च मे द्रोणकलशश्च मे वायव्यानि च मे पूतभृच्च म आधव-

नीयश्च म आग्नीध्रं च मे हविर्धानं च मे गृहाश्च मे सदश्च मे पुरोडाशाश्च मे पचताश्च मेऽवभृथश्च मे स्वगाकारश्च मे ॥ , इति ॥

इध्मादीनि यज्ञाङ्गद्रव्याणि यज्ञप्रकरणे प्रसिद्धानि । गृहाः पत्नीशालादयः। पचताः शामित्रादयः । स्वगाकारः शंयुवाकः । तेन हि यथास्वं देवतानां हविर्गमनं क्रियते ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे सप्तमप्रपाठकेऽष्टमोऽनुवाकः ॥ ८ ॥

(अथ चतुर्थाष्टके सप्तमप्रपाठके नवमोऽनुवाकः ।)

अग्निश्च मे घर्मश्च मेऽर्कश्च मे सूर्यश्च मे प्राणश्च मेऽश्वमेधश्च मे पृथिवी च मेऽदितिश्च मे दितिश्च मे द्यौश्च मे शक्वरीरङ्गुलयो दिशश्च मे यज्ञेन कल्पन्तामृक्च मे साम च मे स्तोमश्च मे यजुश्च मे दीक्षा च मे तपश्च म ऋतुश्च मे व्रतं च मेऽहोरात्रयोर्वृष्ट्या बृहद्रथंतरे च मे यज्ञेन कल्पेताम् (१) ।

(दीक्षाऽष्टादश च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके सप्तमप्रपाठके नवमोऽनुवाकः ॥ ९ ॥

(अथ चतुर्थाष्टके सप्तमप्रपाठके नवमोऽनुवाकः ।)

अग्निः । च । मे । घर्मः । च । मे । अर्कः । च ।

मे । सूर्यः । च । मे । प्राण इति प्र—अनः । च । मे । अश्वमेध इत्यश्व—मेधः । च । मे । पृथिवी । च । मे । अदितिः । च । मे । दितिः । च । मे । द्यौः । च । मे । शक्वरीः । अङ्गुलयः । दिशः । च । मे । यज्ञेन । कल्पन्ताम् । ऋक् । च । मे । साम । च । मे । स्तोमः । च । मे । यजुः । च । मे । दीक्षा । च । मे । तपः । च । मे । ऋतुः । च । मे । व्रतम् । च । मे । अहोरात्रयोरित्यहः—रात्रयोः । वृष्ट्या । बृहद्रथंतरे इति बृहत्—रथंतरे । च । मे । यज्ञेन । कल्पेताम् (१) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके सप्तमप्रपाठके नवमोऽनुवाकः ॥ ९ ॥

(अथ चतुर्थकाण्डे सप्तमप्रपाठके नवमोऽनुवाकः ।)

नवममाह—

अग्निश्च मे घर्मश्च मेऽर्कश्च मे सूर्यश्च मे प्राणश्च मेऽश्वमेधश्च मे पृथिवी च मेऽदितिश्च मे दितिश्च मे द्यौश्च मे शक्वरीरङ्गुलयो दिशश्च मे यज्ञेन कल्पन्तामृक्च मे साम च मे स्तोमश्च मे यजुश्च मे दीक्षा च मे तपश्च म ऋतुश्च मे व्रतं च मेऽहोरात्रयोर्वृष्ट्या बृहद्रथंतरे च मे यज्ञेन कल्पेताम् , इति ॥

अग्निश्चीयमानो वह्निः । घर्मः प्रवर्ग्यः । इन्द्रायार्कवते पुरोडाशमिति विहितो यागोऽर्कः । सौर्य चरुमिति विहितो यागः सूर्यः । प्राणाय स्वाहेति विहितो होमः प्राणः । अश्वमेधः प्रसिद्धः । पृथिव्यादयो देवताविशेषाः । शकरीः शकर्यः । अङ्गुलयोऽङ्गुलिवद्विराट्पुरुषस्यावयवविशेषाः । दिशः प्राच्याद्याः । चशब्दाद्विदिशोऽपि । ताः सर्वा मे मदीयेन यज्ञेन कल्पन्तां स्वस्वव्यापारसमर्था भवन्तु । ऋगादयो मन्त्रविशेषाः । स्तोमः सामाद्यात्मकः स्तोत्रम् । दीक्षा यजमानसंस्कारः । तपः पापक्षयार्थमनशनादि । ऋतुर्यज्ञाङ्गभूतः कालः । व्रतमेकस्तनादि । अहोरात्रयोः संबन्धिनी या दृष्टिस्तया मदीयं सस्यं कल्पतामिति शेषः । बृहद्रथंतरे सामनी, ते च मदीयेन यज्ञेन कल्पेतां स्वस्वव्यवहारसमर्थे भवेताम् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे सप्तमप्रपाठके
नवमोऽनुवाकः ॥ ९ ॥

(अथ चतुर्थाष्टके सप्तमप्रपाठके दशमोऽनुवाकः ।)

गर्भाश्च मे वत्साश्च मे त्र्यविश्च मे त्र्यवी च मे दित्यवाट्च मे दित्यौही च मे पञ्चाविश्च मे पञ्चावी च मे त्रिवत्सश्च मे त्रिवत्सा च मे तुर्यवाट्च मे तुर्यौही च मे पष्ठवाच्च मे पष्ठौही च म उक्षा च मे वशा च म ऋषभश्च (१) मे वेहच्च मेऽनड्वाञ्च मे धेनुश्च म आयुर्यज्ञेन कल्पतां प्राणो यज्ञेन कल्पतामपानो यज्ञेन कल्पतां व्यानो यज्ञेन कल्पतां चक्षुर्यज्ञेन कल्पताꣳ श्रोत्रं यज्ञेन कल्पतां

मनो यज्ञेन कल्पतां वाग्यज्ञेन कल्पतामात्मा यज्ञेन कल्पतां यज्ञो यज्ञेन कल्पताम् (२)॥

(ऋषमश्च चत्वारिꣳशच्च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके
सप्तमप्रपाठके दशमोऽनुवाकः ॥ १० ॥

(अथ चतुर्थाष्टके सप्तमप्रपाठके दशमोऽनुवाकः ।)

गर्भाः । च । मे । वत्साः । च । मे । त्र्यविरिति त्रि—अविः । च । मे । त्र्यवीति त्रि—अवी । च । मे । दित्यवाडिति दित्य—वाट् । च । मे । दित्यौही । च । मे । पञ्चाविरिति पञ्च—अविः । च । मे । पञ्चावीति पञ्च—अवी । च । मे । त्रिवत्स इति त्रि—वत्सः । च । मे । त्रिवत्सेति त्रि—वत्सा । च । मे । तुर्यवाडिति तुर्य—वाट् । च । मे । तुर्यौही । च । मे । पष्ठवादिति पष्ठ—वाट् । च । मे । पष्ठौही । च । मे । उक्षा । च । मे । वशा । च । मे । ऋषभः । च (१) । मे । वेहत् । च । मे । अनड्वान् । च । मे । धेनुः । च । मे । आयुः । यज्ञेन । कल्पताम् । प्राण इति प्र—अनः । यज्ञेन । कल्पताम् । अपान इत्यप—अनः । यज्ञेन । कल्पताम् । व्यान इति वि—अनः । यज्ञेन । कल्पताम् । चक्षुः । यज्ञेन ।

कल्पताम् । श्रोत्रम् । यज्ञेन । कल्पताम् । मनः । यज्ञेन । कल्पताम् । वाक् । यज्ञेन । कल्पताम् । आत्मा । यज्ञेन । कल्पताम् । यज्ञः । यज्ञेन । कल्पताम् (२) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके सप्तमप्रपाठके दशमोऽनुवाकः ॥ १० ॥

(अथ चतुर्थकाण्डे सप्तमप्रपाठके दशमोऽनुवाकः ।)

दशममाह—

गर्भाश्च मे वत्साश्च मे त्र्यविश्च मे त्र्यवी च मे दित्यवाट्च मे दित्यौही च मे पञ्चाविश्च मे पञ्चावी च मे त्रिवत्सश्च मे त्रिवत्सा च मे तुर्यवाट्च मे तुर्यौही च मे पष्ठवाच्च मे पष्ठौही च म उक्षा च मे वशा च म ऋषभश्च मे वेहच्च मेऽनड्वाच्च मे धेनुश्च म आयुर्यज्ञेन कल्पतां प्राणो यज्ञेन कल्पतामपानो यज्ञेन कल्पतां व्यानो यज्ञेन कल्पतां चक्षुर्यज्ञेन कल्पताꣳ श्रोत्रं यज्ञेन कल्पतां मनो यज्ञेन कल्पतां वाग्यज्ञेन कल्पतामात्मा यज्ञेन कल्पतां यज्ञो यज्ञेन कल्पताम् ॥, इति ॥

गर्भा वत्साश्च प्रसिद्धाः । सार्धसंवत्सरो वत्सरूपः पुंगवरूपविः । तथाविधा गौरुपवी । द्विसंवत्सर ऋषभो दित्यवाट् । तथाविधा गौर्दित्यौही । सार्धद्विसंवत्सर ऋषभः पञ्चाविः । तथाविधा गौः पञ्चावी । संवत्सरत्रयोपेत ऋषभस्त्रिवत्सः । तथाविधा गौस्त्रिवत्सा । सार्धत्रिवत्सर ऋषभस्तुर्यवाट् ।

तथाविधा गौस्तुर्यौही । चतुःसंवत्सर ऋषभः पष्ठवात् । तथाविधा गौः पष्ठौही । सेचनसमर्थ ऋषभ उक्षा । वन्ध्या गौर्वशा । उष्णोऽप्यधिकवयस्क ऋषभः । गर्भघातिनी गौर्वेहत् । शकटस्य वाहकोऽनड्वान् । नवप्रसूता गौर्धेनुः । आयुरादयः प्रसिद्धाः । आत्मा शरीरम् । उक्ता आयुरादयो मदीयेन यज्ञेन कार्यक्षमा भवन्तु । यज्ञः करिष्यमाणोऽश्वमेधादिः । सोऽप्यनेनानुष्ठीयमानेन यज्ञेन स्वकार्यक्षमो भवतु ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे सप्तमप्रपाठके दशमोऽनुवाकः ॥ १० ॥

(अथ चतुर्थाष्टके सप्तमप्रपाठक एकादशोऽनुवाकः ।)

एका च मे तिस्रश्च मे पञ्च च मे सप्त च मे नव च म एकादश च मे त्रयोदश च मे पञ्चदश च मे सप्तदश च मे नवदश च म एकविꣳशतिश्च मे त्रयोविꣳशतिश्च मे पञ्चविꣳशतिश्च मे सप्तविꣳशतिश्च मे नवविꣳशतिश्च म एकत्रिꣳशच्च मे त्रयस्त्रिꣳशच्च मे चतस्रश्च मेऽष्टौ च मे द्वादश च मे षोडश च मे विꣳशतिश्च मे चतुर्विꣳशतिश्च मेऽष्टाविꣳशतिश्च मे द्वात्रिꣳशच्च मे षट्त्रिꣳशच्च मे चत्वारिꣳशच्च मे चतुश्चत्वारिꣳशच्च मेऽष्टाचत्वारिꣳशच्च मे वाजश्च प्रसवश्चापिजश्च

---

१ ख. च. °ज्ञः क्षिप्यमा° ।

क्रतुश्च सुवश्च मूर्धा च व्यश्नियश्चाऽऽन्त्यायन-
श्चान्त्यश्च भौवनश्च भुवनश्चाधिपतिश्च (२)॥

(त्रयस्त्रिंशच्च व्यश्निय एकादश च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके
सप्तमप्रपाठक एकादशोऽनुवाकः ॥ ११ ॥

(अथ चतुर्थाष्टके सप्तमप्रपाठक एकादशोऽनुवाकः ।)

एका । च । मे । तिस्रः । च । मे । पञ्च । च । मे । सप्त । च । मे । नव । च । मे । एकादश । च । मे । त्रयोदशेति त्रयः—दश । च । मे । पञ्चदशेति पञ्च—दश । च । मे । सप्तदशेति सप्त—दश । च । मे । नवदशेति नव—दश । च । मे । एकविंशतिरित्येक—विंशतिः । च । मे । त्रयोविंशतिरिति त्रयः—विंशतिः । च । मे । पञ्चविंशतिरिति पञ्च—विंशतिः । च । मे । सप्तविंशतिरिति सप्त—विंशतिः । च । मे । नवविंशतिरिति नव—विंशतिः । च । मे । एकत्रिंशदित्येक—त्रिंशत् । च । मे । त्रयस्त्रिंशदिति त्रयः—त्रिंशत् । च (१) । मे । चतस्रः । च । मे । अष्टौ । च । मे । द्वादश । च । मे । षोडश । च । मे । विंशतिः । च । मे । चतुर्विंशातिरिति

चतुः—विंशतिः । च । मे । अष्टाविंशतिरित्यष्टा—विंशतिः । च । मे । द्वात्रिंशत् । च । मे । षट्त्रिंशदिति षट्—त्रिंशत् । च । मे । चत्वारिंशत् । च । मे । चतुश्चत्वारिंशदिति चतुः—चत्वारिंशत् । च । मे । अष्टाचत्वारिंशदित्यष्टा—चत्वारिंशत् । च । मे । वाजः । च । प्रसव इति प्र—सवः । च । अपिज इत्यपि—जः । च । क्रतुः । च । सुवः । च । मूर्धा । च । व्यश्निय इति वि—अश्नियः । च । आन्त्यायनः । च । अन्त्यः । च । भौवनः । च । भुवनः । च । अधिपतिरित्यधि—पतिः । च (२) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके
सप्तमप्रपाठक एकादशोऽनुवाकः ॥ ११ ॥

(अथ चतुर्थकाण्डे सप्तमप्रपाठक एकादशोऽनुवाकः ।)

एकादशमाह—

एका च मे तिस्रश्च मे पञ्च च मे सप्त च मे नव च म एकादश च मे त्रयोदश च मे पञ्चदश च मे सप्तदश च मे नवदश च म एकविंशतिश्च मे त्रयोविंशतिश्च मे पञ्चविंशतिश्च मे सप्तविंशतिश्च मे नवविंशतिश्च म एकत्रिंशच्च मे त्रयस्त्रिंशच्च मे चत-

अथ मीमांसा ।

द्वादशाध्यायस्य तृतीयपादे चिन्तितम्—

मन्त्रादौ किं वसोर्धारा मन्त्रान्ते वाऽत्र संततेः ।
आद्यो होमेषु संतत्या द्वादशान्तेषु तद्द्युतिः ॥

अग्नौ किंचित्कर्म विहितं " संततां वसोर्धारां जुहोति " इति । तत्र सांतत्यं निश्छिद्रत्वम् । तच्च मन्त्रकर्मणोः सहोपक्रमे सत्युपपद्यते । तस्मान्मन्त्रादौ कर्मसंनिपात इति प्राप्ते ब्रूमः—तस्मिन्वसोर्धारारूये कर्मणि द्वादश द्वादशानि जुहोतीति श्रुतम् । द्वादशभिर्मन्त्रवाक्यैः संपाद्यमेकमाहुतिस्वरूपं द्वादशम् । तद्यथा—" वाजश्च मे प्रसवश्च मे प्रयतिश्च मे प्रसितिश्च मे धीतिश्च मे क्रतुश्च मे स्वरश्च मे श्लोकश्च मे श्रावश्च मे श्रुतिश्च मे ज्योतिश्च मे सुवश्च मे " इत्येतैर्द्वादशभिर्मन्त्रवाक्यैरेकाऽऽहुतिर्होतव्या । एकादशोत्तराहुतयः " प्राणश्च मेऽपानश्च मे " इत्यादिभिर्निष्पाद्यन्ते । एतेषु च होमद्वादशकेषु मध्ये विलम्बाभावः सांतत्यं, न तु मन्त्रकर्मणोः सहोपक्रमः । तस्मात्पूर्वन्यायेन मन्त्रान्ते कर्मसंनिपातस्य नास्ति विघ्नः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे सप्तमप्रपाठक
एकादशोऽनुवाकः ॥ ११ ॥

(अथ चतुर्थाष्टके सप्तमप्रपाठके द्वादशोऽनुवाकः ।)

वाजो नः सप्त प्रदिशश्चतस्रो वा परावतः । वाजो नो विश्वैर्देवैर्धनसाताविहावतु । विश्वे अद्य मरुतो विश्व ऊती विश्वे भवन्त्वग्नयः समिद्धाः । विश्वे नो देवा अवसाऽऽ गमन्तु विश्वमस्तु द्रविणं वाजो अस्मे । वाजस्य प्रसवं देवा रथेर्याता हिरण्ययैः । अग्निरिन्द्रो बृहस्पतिर्मरुतः सोमपीतये । वाजेवाजेऽवत वाजिनो नो धनेषु (१) विप्रा अमृता ऋतज्ञाः ।

अस्य मध्वः पिबत मादयध्वं तृप्ता यात पथिभिर्देवयानैः । वाजः पुरस्तादुत मध्यतो नो वाजो देवाꣳ ऋतुभिः कल्पयाति । वाजस्य हि प्रसवो नन्नमीति विश्वा आशा वाजपतिर्भवेयम् । पयः पृथिव्यां पय ओषधीषु पयो दिव्यन्तरिक्षे पयो धाम् । पयस्वतीः प्रदिशः सन्तु मह्यम् । सं मा सृजामि पयसा घृतेन सं मा सृजाम्यपः (२) ओषधीभिः । सोऽहं वाजꣳ सनेयमग्ने । नक्तोषासा समनसा विरूपे धापयेते शिशुमेकꣳ समीची । द्यावा क्षामा रुक्मो अन्तर्वि भाति देवा अग्निं धारयन्द्रविणोदाः । समुद्रोऽसि नभस्वानार्द्रदानुः शंभूर्मयोभूरभि मा वाहि स्वाहा मारुतोऽसि मरुतां गणः शंभूर्मयोभूरभि मा वाहि स्वाहाऽवस्युरसि दुवस्वाञ्छंभूर्मयोभूरभि मा वाहि स्वाहा (३) ॥

(धेनष्वपो दुवस्वाञ्छंभूर्मयोभूरभि मा द्वे च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके
सप्तमप्रपाठके द्वादशोऽनुवाकः ॥ १२ ॥

(अथ चतुर्थाष्टके सप्तमप्रपाठके द्वादशोऽनुवाकः ।)

वाजः । नः । सप्त । प्रदिश इति प्र—दिशः ।

चतस्रः । वा । परावत इति परा—वतः । वाजः । नः । विश्वैः । देवैः । धनसाताविति धन—सातौ । इह । अवतु । विश्वे । अद्य । मरुतः । विश्वे । ऊती । विश्वे । भवन्तु । अग्नयः । समिद्धा इति सम्—इद्धाः । विश्वे । नः । देवाः । अवसा । एति । गमन्तु । विश्वम् । अस्तु । द्रविणम् । वाजः । अस्मे इति । वाजस्य । प्रसवमिति प्र—सवम् । देवाः । रथैः । यात । हिरण्ययैः । अग्निः । इन्द्रः । बृहस्पतिः । मरुतः । सोमपीतय इति सोम—पीतये । वाजेवाज इति वाजे—वाजे । अवत । वाजिनः । नः । धनेषु (१) । विप्राः । अमृताः । ऋतज्ञा इत्यृत—ज्ञाः । अस्य । मध्वः । पिबत । मादयध्वम् । तृप्ताः । यात । पथिभिरिति पथि—भिः । देवयानैरिति देव—यानैः । वाजः । पुरस्तात् । उत । मध्यतः । नः । वाजः । देवान् । ऋतुभिरित्यृतु—भिः । कल्पयाति । वाजस्य । हि । प्रसव इति प्र—सवः । नन्नमीति । विश्वाः । आशाः । वाजपतिरिति वाज—पतिः । भवेयम् । पयः । पृथिव्याम् । पयः । ओषधीषु । पयः । दिवि । अन्तरिक्षे । पयः । धाम् । पयस्वतीः । प्रदिश इति प्र—दिशः । सन्तु । मह्यम् । समिति । मा ।

सृजामि । पयसा । घृतेन । समिति । मा । मृजामि । अपः (२) । ओषधीभिरित्योषधि—भिः । सः । अहम् । वाजम् । सनेयम् । अग्ने । नक्तोषासा । समनसेति स—मनसा । विरूपे इति वि—रूपे । धापयेते इति । शिशुम् । एकम् । समीची इति । द्यावा । क्षाम । रुक्मः । अन्तः । वीति । भाति । देवाः । अग्निम् । धारयन् । द्रविणोदा इति द्रविणः—दाः । समुद्रः । असि । नभस्वान् । आर्द्रदानुरित्यार्द्र—दानुः । शंभूरिति शं—भूः । मयोभूरिति मयः—भूः । अभीति । मा । वाहि । स्वाहा । मारुतः । असि । मरुताम् । गणः । शंभूरिति शं—भूः । मयोभूरिति मयः—भूः । अभीति । मा । वाहि । स्वाहा । अवस्युः । असि । दुवस्वान् । शंभूरिति शं—भूः । मयोभूरिति मय—भूः । अभीति । मा । वाहि । स्वाहा (३) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके सप्तमप्रपाठके द्वादशोऽनुवाकः ॥ १२ ॥

(अथ चतुर्थकाण्डे सप्तमप्रपाठके द्वादशोऽनुवाकः ।)

एतैरेकादशभिरनुवाकैर्वसोर्धाराहोम उक्तः । अथ द्वादशे वाजप्रसवीयहोम उच्यते ।

कल्पः—" वाजप्रसवीयं जुहोति सप्त ग्राम्या ओषधयः सप्ताऽऽरण्याः

इदमाम्नायते—" अग्निचिद्वर्षति न धावेन्न स्त्रियमुपेयात् " इति । तान्येतान्यग्निचिद्व्रतानि चितौ निष्पन्नायां सत्यां तदा प्रभृति प्रवर्तन्ते, न तु चितेऽग्नौ क्रत्वनुष्ठानं प्रतीक्षन्ते । कुतः । अग्निचित्पदे चयनस्य निमित्तत्वेनोपन्यासात् । न हि सति निमित्ते नैमित्तिकस्य विलम्बो युक्त इति प्राप्ते ब्रूमः—क्रतावुपयोक्तुमग्निश्चयनेन संस्क्रियते । न चानिष्पन्ने क्रतौ चयनसंस्कारः सफलो भवति । तस्मात्क्रतौ निष्पन्ने सति पश्चाच्चयनसाफल्यादयं पुरुषोऽग्निं चितवानित्यमुमर्थमर्हतीति क्रत्वन्ते तानि व्रतानि ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे सप्तमप्रपाठके द्वादशोऽनुवाकः ॥ १२ ॥

(अथ चतुर्थाष्टके सप्तमप्रपाठके त्रयोदशोऽनुवाकः ।)

अग्निं युनज्मि शवसा घृतेनं दिव्यꣳ सुपर्णं वयसा बृहन्तम् । तेनं वयं पतेम ब्रध्नस्यं विष्टपꣳ सुवो रुहाणा अधि नाकं उत्तमे । इमौ तें पक्षावजरौ पतत्रिणौ याभ्याꣳ रक्षाꣳस्यपहꣳस्यग्ने । ताभ्यां पतेम सुकृतामु लोकं यत्रर्षयः प्रथमजा ये पुराणाः । चिदंसि समुद्रयोनिरिन्दुर्दक्षः श्येन ऋतावा । हिरण्यपक्षः शकुनो भुरण्युर्महान्त्सधस्थे ध्रुवः (१) आ निषत्तः । नमस्ते अस्तु मा मा हिꣳसीर्विश्वस्य मूर्द्धन्नधि तिष्ठसि श्रितः । समुद्रे ते हृदयमन्तरायुर्द्यावापृथिवी भुवनेष्वार्पिते ।

---

१ ख. च. ततः ।

उद्नो दत्तोदधिं भिन्त दिवः पर्जन्यादन्तरिक्षात्पृथिव्यास्ततो नो वृष्ट्याऽवत । दिवो मूर्धाऽसि पृथिव्या नाभिरूर्गपामोषधीनाम् । विश्वायुः शर्म सप्रथा नमस्पथे । येनर्षयस्तपसा सत्रमासतेन्धाना अग्निꣳ सुवराभरन्तः । तस्मिन्नहं नि दधे नाके अग्निमेतं यमाहुर्मनवः स्तीर्णबर्हिषम् । तं पत्नीभिरनु गच्छेम देवाः पुत्रैर्भ्रातृभिरुत वा हिरण्यैः । नाकं गृह्णानाः सुकृतस्य लोके तृतीये पृष्ठे अधि रोचने दिवः । आ वाचो मध्यमरुहद्भुरण्युरयमग्निः सत्पतिश्चेकितानः । पृष्ठे पृथिव्या निहितो दविद्युतदधस्पदं कृणुते (२) ये पृतन्यवः । अयमग्निर्वीरतमो वयोधाः सहस्रियो दीप्यतामप्रयुच्छन् । विभ्राजमानः सरिरस्य मध्य उप प्र यात दिव्यानि धाम । सं प्र चयंवध्वमनु सं प्र यातामग्नेः पथो देवयानान्कृणुध्वम् । अस्मिन्त्सधस्थे अध्युत्तरस्मिन्विश्वे देवा यजमानश्च सीदत । येना सहस्रं वहसि येनाग्ने सर्ववेदसम् । तेनेमं यज्ञं नो वह देवयानो यः (४) उत्तमः । उद्बुध्य-

स्वाग्ने प्रति जागृह्येनमिष्टापूर्ते सꣳ सृजेथा-
मयं च । पुनः कृण्वꣳस्त्वा पितरं युवानम-
न्वाताꣳसीत्त्वयि तन्तुमेतम् । अयं ते योनि-
र्ऋत्वियो यतो जातो अरोचथाः । तं जानन्नग्न
आ रोहाथा नो वर्धया रयिम् (५) ॥

(ध्रुवः सत्रं कृणुते यः सप्तत्रिꣳशच्च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके
सप्तमप्रपाठके त्रयोदशोऽनुवाकः ॥ १३ ॥

(अथ चतुर्थाष्टके सप्तमप्रपाठके त्रयोदशोऽनुवाकः ।)

अग्निम् । युनज्मि । शवसा । घृतेन । दिव्यम् ।
सुपर्णमिति सु—पर्णम् । वयसा । बृहन्तम् । तेन ।
वयम् । पतेम । ब्रध्नस्य । विष्टपम् । सुवः । रुहा-
णाः । अधीति । नाके । उत्तम इत्युत्—तमे । इमौ ।
ते । पक्षौ । अजरौ । पतत्रिणः । याभ्याम् । रक्षाꣳ-
सि । अपहꣳसीत्यप—हꣳसि । अग्ने । ताभ्याम् ।
पतेम । सुकृतामिति सु—कृताम् । उ । लोकम् ।
यत्र । ऋषयः । प्रथमजा इति प्रथम—जाः । ये ।
पुराणाः । चित् । असि । समुद्रयोनिरिति समुद्र—
योनिः । इन्दुः । दक्षः । श्येनः । ऋतावेत्यृत—वा ।
हिरण्यपक्ष इति हिरण्य—पक्षः । शकुनः । भुरण्युः ।

महान् । सधस्थ इति सध—स्थे । ध्रुवः (१) ।
एति । निषत्त इति नि—सत्तः । नमः । ते । अस्तु ।
मा । मा । हिꣳसीः । विश्वस्य । मूर्धन् । अधीति ।
तिष्ठसि । श्रितः । समुद्रे । ते । हृदयम् । अन्तः ।
आयुः । द्यावापृथिवी इति द्यावा—पृथिवी । भुवने-
षु । अर्पिते इति । उद्नः । दत्त । उदधिमित्युद—धि-
म् । भिन्त । दिवः । पर्जन्यात् । अन्तरिक्षात् ।
पृथिव्याः । ततः । नः । वृष्ट्या । अवत । दिवः ।
मूर्धा । असि । पृथिव्याः । नाभिः । ऊर्क् । अपाम् ।
ओषधीनाम् । विश्वायुरिति विश्व—आयुः । शर्म ।
सप्रथा इति स—प्रथाः । नमः । पृथे । येन । ऋष-
यः । तपसा । सत्रम् (२) । आसत । इन्धानाः ।
अग्निम् । सुवः । आभरन्त इत्या—भरन्तः । तस्मि-
न् । अहम् । नीति । दधे । नाके । अग्निम् । एत-
म् । यम् । आहुः । मनवः । स्तीर्णबर्हिषमिति स्ती-
र्ण—बर्हिषम् । तम् । पत्नीभिः । अन्विति । गच्छे-
म । देवाः । पुत्रैः । भ्रातृभिरिति भ्रातृ—भिः । उत ।
वा । हिरण्यैः । नाकम् । गृह्णानाः । सुकृतस्येति
सु—कृतस्य । लोके । तृतीये । पृष्ठे । अधीति । रो-
चने । दिवः । एति । वाचः । मध्यम् । अरुहत् ।

मुरण्युः । अयम् । अग्निः । सत्पतिरिति सत्—पतिः । चेकितानः । पृष्ठे । पृथिव्याः । निहित इति नि—हितः । दविद्युतत् । अधस्पदमित्यधः—पदम् । कृणुते (३) । ये । पृतन्यवः । अयम् । अग्निः । वीरतम इति वीर—तमः । वयोधा इति वयः—धाः । सहस्रियः । दीप्यताम् । अप्रयुच्छन्नित्यप्र—युच्छन् । विभ्राजमान इति वि—भ्राजमानः । सरिरस्य । मध्ये । उप । प्रेति । यात । दिव्यानि । धाम । सम् । प्रेति । च्यवध्वम् । अन्विति । सम् । प्रेति । यात । अग्ने । पथः । देवयानानिति देव—यानान् । कृणुध्वम् । अस्मिन् । सधस्थ इति सध—स्थे । अधीति । उत्तरस्मिन्नित्युत्—तरस्मिन् । विश्वे । देवाः । यजमानः । च । सीदत । येन । सहस्रम् । वहसि । येन । अग्ने । सर्ववेदसमिति सर्व—वेदसम् । तेन । इमम् । यज्ञम् । नः । वह । देवयान इति देव—यानः । यः (४) । उत्तम इत्युत्—तमः । उदिति । बुध्यस्व । अग्ने । प्रतीति । जागृहि । एनम् । इष्टापूर्त इतीष्टा—पूर्तः । समिति । सृजेथाम् । अयम् । च । पुनः । कृण्वन् । त्वा । पितरम् । युवानम् । अन्वाताꣳसीदित्यनु—आताꣳसीत् ।

त्वयि । तन्तुम् । एतम् । अयम् । ते । योनिः । ऋत्वियः । यतः । जातः । अरोचथाः । तम् । जानन् । अग्ने । एति । रोह । अथ । नः । वर्धय । रयिम् (५) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके सप्तमप्रपाठके त्रयोदशोऽनुवाकः ॥ १३ ॥

(अथ चतुर्थकाण्डे सप्तमप्रपाठके त्रयोदशोऽनुवाकः ।)

द्वादशे वाजप्रसवीयहोमोऽभिहितः । अथ त्रयोदशेऽग्नियोगोऽभिधीयते । कल्पः—" पुरस्तात्प्रातरनुवाकादग्निं युनज्मीति तिसृभिरभिमृशन्नग्निं युनक्ति " इति ।

तत्र प्रथमामाह—

अग्निं युनज्मि शवसा घृतेन दिव्यꣳ सुपर्णं वयसा बृहन्तम् । तेन वयं पतेम ब्रध्नस्य विष्टपꣳ सुवो रुहाणा अधि नाक उत्तमे । , इति ।

अग्निं चितमेतं वह्निं शवसा बलेन घृतेन घृतादिद्रव्ययुक्तेन कर्मणा युनज्मि रथेनाश्वमिवाहं योजयामि । कीदृशमग्निं, दिव्यं द्योतनात्मकं सुपर्णं पक्ष्याकारं वयसा बृहन्तं चिरकालभाविनम् । तेनाग्निना वयं यजमाना ब्रध्नस्याऽऽदित्यस्य विष्टपं तापरहितं स्थानं पतेम प्राप्नुयाम । कीदृशा वयम्, उत्तमे नाकेऽत्युत्कृष्टे स्वर्गलोके सुवोऽधिरुहाणाः सुखमापकप्रदेशमधिरोढुकामाः ॥

अथ द्वितीयामाह—

इमौ ते पक्षावजरौ पतत्रिणो याभ्याꣳ रक्षाꣳस्यपहꣳस्यग्ने । ताभ्यां पतेम सुकृतामु लोकं यत्रर्षयः प्रथमजा ये पुराणाः । , इति ।

पतत्रिणः पक्ष्याकारस्य ते तवाग्नेरिमौ पक्षावजरौ कदाचिदपि जीर्णौ न भवतः । हेऽग्ने याभ्यां पक्षाभ्यां त्वं रक्षांस्यपहंसि मारयसि ताभ्यां वयं

भाण्डे जलं गलति तद्वत् । स्रवन्तीं तामाहुतिमनु यज्ञो नश्यति, यज्ञमनु यजमानोऽपि नश्यति । अत आहुतिप्रतिष्ठार्थं पुनश्चितिं कुर्यात् । तत आहुतियज्ञयजमानाः प्रतितिष्ठन्ति ॥

अस्यां चितावेष्टकासंख्यां विधत्ते—

" अष्टावुप दधात्यष्टाक्षरा गायत्री गायत्रेणैवैनं छन्दसा चिनुते " [सं० का० ५ प्र० ४ अ० १०] इति ॥

एतच्छाखान्नातमन्त्रानुसारेण संख्यां विधाय शाखान्तरानुसारेणान्यौ द्वौ पक्षौ विधत्ते—

" यदेकादश त्रैष्टुभेन यद्वादश जागतेन छन्दोभिरेवैनं चिनुते " [सं० का० ५ प्र० ४ अ० १०] इति ॥

प्रकारान्तरेण पुनश्चितिं प्रशंसति—

" नपात्को वै नामैषोऽग्निर्यत्पुनश्चितिर्यं एवं विद्वान्पुनश्चितिं चिनुत आतृतीयात्पुरुषादन्नमत्ति " [सं० का० ५ प्र० ४ अ० १०] इति ।

न पातयति न विनाशयत्याहुतिं न स्रावयतीति पुनश्चितिरूपस्याग्नेर्नपात्क इति नामधेयम् । एवं ज्ञात्वा चितवान्पुरुषः पुत्रपौत्रपर्यन्तमन्नसमृद्धो भवति ॥

पुनःशब्दतात्पर्यं दृष्टान्तेन दर्शयति—

" यथा वै पुनराधेय एवं पुनश्चितिर्योऽग्न्याधेयेन नह्यति स पुनराधेयमाधत्ते योऽग्निं चित्वा नह्यति स पुनश्चितिं चिनुते यत्पुनश्चितिं चिनुत ऋद्ध्यै " [सं० का० ५ प्र० ४ अ० १०] इति ।

पुनराधेयपुनश्चित्योः पूर्वमृद्ध्यभावेन पश्चादृद्धिसद्भावेन च सादृश्यम् ॥

अत्र पूर्वपक्षत्वेन शाखान्तरमतमुपन्यस्यति—

" अथो खल्वाहुर्न चेतव्येति रुद्रो वा एष यदग्निर्यथा व्याघ्रꣳ सुप्तं बोधयति तादृगेव तत् " [सं० का० ५ प्र० ४ अ० १०] इति ।

यथा लोके सुप्तो व्याघ्रः केनचिन्मार्गे गच्छता पुरुषेण बोधितस्तमेव बोधयितारं मारयति, एवमयं क्रूरोऽग्निः पूर्वं चितः कथंचित्पुण्यवशात्सुप्तवच्छान्तो वर्तते । स चेत्पुनश्चीयेत प्रबोधितव्याघ्रवन्मारयेत् । तस्मान्न चेतव्येयं पुनश्चितिरिति पूर्वः पक्षः ॥

तमिमं पक्षमनादृत्य स्वपक्षमेव स्थापयति—

" अथो खल्वाहुश्चेतव्येति यथा वसीयाꣳसं भागधेयेन बोधयति तादृगेव तत् " [सं० का० ५ प्र० ४ अ० १०] इति ।

लोके धनाढ्यं प्रभुं चिरकालव्यवधानेन विस्मृतवन्तं भृत्यः पुनरप्युपायैर्

नमानीय यथा बोधयति, स च बोधित एवाभीष्टसिद्धिं करोति, एवमयं प्रभुरग्निः पुनश्चितः सन्नभीष्टं साधयतीति चेतव्येयं पुनश्चितिः ॥

तस्याः पुनश्चितेः समृद्धिहेतुत्वमुदाहरणमुखेन स्पष्टयति—

" मनुरग्निमचिनुत तेन नाऽऽध्नोत्स एतां पुनश्चितिमपश्यत्तामचिनुत तया वै स आध्नोद्यत्पुनश्चितिं चिनुत ऋद्ध्यै " [सं० का० ५ प्र० ४ अ० १०] इति ॥

अत्र विनियोगसंग्रहः—

अग्नित्रयं पुरा प्रातरनुवाकात्स्पृशेदिह(?)[1] ।
नमोद्वाभ्यां वह्निमर्शो येनाष्टाविष्टकाष्टकम् ॥
पुनश्चितिरिति प्रोक्ता मन्त्रा अत्र त्रयोदश ॥ १ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे सप्तमप्रपाठके त्रयोदशोऽनुवाकः ॥ १३ ॥

(अथ चतुर्थाष्टके सप्तमप्रपाठके चतुर्दशोऽनुवाकः ।)

ममाग्ने वर्चो विहवेष्वस्तु वयं त्वेन्धानास्तनुवं पुषेम । मह्यं नमन्तां प्रदिशश्चतस्रस्त्वयाऽध्यक्षेण पृतना जयेम । मम देवा विहवे सन्तु सर्व इन्द्रावन्तो मरुतो विष्णुरग्निः । ममान्तरिक्षमुरु गोपमस्तु मह्यं वातः पवतां कामे अस्मिन् । मयि देवा द्रविणमा यजन्तां मय्याशीरस्तु मयि देवहूतिः । दैव्या होतारा वनिषन्त (१) पूर्वेऽरिष्टाः स्याम तनुवा सुवीराः । मह्यं यजन्तु मम यानि

---

१ ख. घ. ङ. च. 'दिदम् । न' ।

हव्याऽऽकूतिः सत्या मनसो मे अस्तु । एनो मा नि गां कतमच्चनाहं विश्वे देवासो अधि वोचता मे । देवीः षड्वीरुरु णः कृणोत विश्वे देवास इह वीरयध्वम् । मा हास्महि प्रजया मा तनूभिर्मा रधाम द्विषते सोम राजन् । अग्निर्मन्युं प्रतिनुदन्पुरस्तात् (२) अदब्धो गोपाः परि पाहि नस्त्वम् । प्रत्यञ्चो यन्तु निगुतः पुनस्तेऽमैषां चित्तं प्रबुधा वि नेशत् । धाता धातॄणां भुवनस्य यस्पतिर्देवꣳ सविता रमभिमातिषाहम् । इमं यज्ञमश्विनोभा बृहस्पतिर्देवाः पान्तु यजमानं न्यर्थात् । उरुव्यचा नो महिषः शर्म यꣳसदस्मिन्हवे पुरुहूतः पुरुक्षु । स नः प्रजायै हर्यश्व मृडयेन्द्र मा (३) नो रीरिषो मा परा दाः । ये नः सपत्ना अप ते भवन्त्विन्द्राग्निभ्यामव बाधामहे तान् । वसवो रुद्रा आदित्या उपरिस्पृशं मोग्रं चेत्तारमधिराजमक्रन् । अर्वाञ्चमिन्द्रममुतो हवामहे यो गोजिद्धनजिदश्वजिद्यः । इमं नो यज्ञं विहवे जुषस्वास्य कुर्मो हरिवो मेदिनं त्वा (४) ॥

(वनिषन्त पुरस्तान्मा त्रिचत्वारिꣳशच्च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके सप्तमप्रपाठके चतुर्दशोऽनुवाकः ॥ १४ ॥

(अथ चतुर्थाष्टके सप्तमप्रपाठके चतुर्दशोऽनुवाकः ।)

मम । अग्ने । वर्चः । विहवेष्विति वि—हवेषु । अस्तु । वयम् । त्वा । इन्धानाः । तनुवम् । पुषेम । मह्यम् । नमन्ताम् । प्रदिश इति प्र—दिशः । चतस्रः । त्वया । अध्यक्षेणेत्यधि—अक्षेण । पृतनाः । जयेम । मम । देवाः । विहव इति वि—हवे । सन्तु । सर्वे । इन्द्रावन्त इतीन्द्र—वन्तः । मरुतः । विष्णुः । अग्निः । मम । अन्तरिक्षम् । उरु । गोपम् । अस्तु । मह्यम् । वातः । पवताम् । कामे । अस्मिन् । मयि । देवाः । द्रविणम् । एति । यजन्ताम् । मयि । आशीरित्या—शीः । अस्तु । मयि । देवहूतिरिति देव—हूतिः । दैव्या । होतारा । वनिषन्त (१) । पूर्वे । अरिष्टाः । स्याम । तनुवा । सुवीरा इति सु—वीराः । मह्यम् । यजन्तु । मम । यानि । हव्या । आकूतिरित्या—कूतिः । सत्या । मनसः । मे । अस्तु । एनः । मा । नीति । गाम् । कतमत् । चन । अहम् । विश्वे । देवासः । अधीति । वोचत । मे । देवीः ।

षड्वींरितिं षट्—उर्वीः । उरु । नः । कृणोत । विश्वे । देवासः । इह । वीरयध्वम् । मा । हास्महि । प्रजयेतिं प्र—जया । मा । तनूभिः । मा । रधाम । द्विषते । सोम । राजन् । अग्निः । मन्युम् । प्रतिनुदन्नितिं प्रति—नुदन् । पुरस्तात् (२) । अदंब्धः । गोपा इतिं गो—पाः । परीतिं । पाहि । नः । त्वम् । प्रत्यञ्चः । यन्तु । निगुत इतिं नि—गुतः । पुनः । ते । अमा । एषाम् । चित्तम् । प्रबुधेतिं प्र—बुधा । वीतिं । नेशत् । धाता । धातृणाम् । भुवनस्य । यः । पतिः । देवम् । सवितारम् । अभिमातिषाहमित्यंभिमाति—साहम् । इमम् । यज्ञम् । अश्विना । उभा । बृहस्पतिः । देवाः । पान्तु । यजमानम् । न्यर्थादितिं नि—अर्थात् । उरुव्यचा इत्युरु—व्यचाः । नः । महिषः । शर्म । यंसत् । अस्मिन् । हवे । पुरुहूत इतिं पुरु—हूतः । पुरुक्षु । सः । नः । प्रजाया इतिं प्र—जायै । हर्यश्वेतिं हरि—अश्व । मृडय । इन्द्र । मा (३) । नः । रीरिषः । मा । परेतिं । दाः । ये । नः । सपत्नाः । अपेतिं । ते । भवन्तु । इन्द्राग्निभ्यामितीन्द्राग्नि—भ्याम् । अवेतिं । बाधामहे । तान् । वसवः । रुद्राः । आदित्याः ।

उपरिस्पृशमित्युपरि—स्पृशम् । मा । उग्रम् । चेत्तारम् । अधिराजमित्यधि—राजम् । अक्रन् । अर्वाञ्चम् । इन्द्रम् । अमुतः । हवामहे । यः । गोजिदितिं गो—जित् । धनजिदितिं धन—जित् । अश्वजिदित्यश्व—जित् । यः । इमम् । नः । यज्ञम् । विहव इतिं वि—हवे । जुषस्व । अस्य । कुर्मः । हरिव इतिं हरि—वः । मेदिनम् । त्वा (४) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके सप्तमप्रपाठके चतुर्दशोऽनुवाकः ॥ १४ ॥

(अथ चतुर्थकाण्डे सप्तमप्रपाठके चतुर्दशोऽनुवाकः ।)

त्रयोदशे पुनश्चितिरुक्ता । अथ चतुर्दशे विहव्याख्या इष्टका उच्यन्ते । कल्पः—" ममाग्ने वर्चो विहवेष्वित्यनुवाकेन प्रतिमन्त्रमिष्टकाभिर्धिष्णियाश्चिनोत्यश्मनवमा आशीर्ध्रीय उपदधाति द्वादश षोडशैकविंशतिं चतुर्विंशतिं वा होत्रीय एकादश ब्राह्मणाच्छंसीये षण्मार्जालीयेऽष्टावष्टावन्येषु धिष्णियेषूपदधातीति विज्ञायते " इति ।

तत्र प्रथमामाह—

ममाग्ने वर्चो विहवेष्वस्तु वयं त्वेन्धानास्तनुवं पुषेम । मह्यं नमन्तां प्रदिशश्चतस्रस्त्वयाऽध्यक्षेण पृतना जयेम । , इति ।

हेऽग्ने विहवेषु यज्ञेषु यद्वर्चः फलं तन्ममास्तु । वयमृत्विग्यजमानास्त्वामग्निमिन्धानाः प्रज्वलयन्तस्तनुवं त्वदीयं शरीरं पुषेम पुष्टं कुर्मः । मह्यं यजमानाय प्राच्याद्याश्चतस्रः प्रदिशो नमन्तां वश्या भवन्तु, तत्रत्या जना मदधीना भवन्तु । अध्यक्षेण स्वामिना त्वया सहिता वयं पृतना विरोधिसेना जयेम ॥

स्यान्तिमं पञ्चममुत्तरभागस्यान्तिमं दशमं चाऽऽवृत्त्या वर्धयित्वा संख्या पूरणीया ॥

स्थानान्तरेषु संख्यां विधत्ते—

" अष्टावष्टावन्येषु धिष्णियेषूप दधात्यष्टाशफाः पशवः पशूनेवाव रुन्धे " [सं० का० ५ प्र० ४ अ० ११] इति ।

प्रशास्त्रीयपोत्रीयनेष्ट्रीयाच्छावाकीयादीन्यन्यानि धिष्णियानि । तत्र नवमदशममन्त्रयोर्लोपेनाष्टसंख्याऽवगन्तव्या ॥

क्वचित्संख्यान्तरं विधत्ते—

" षण्मार्जालीये षड्वा ऋतव ऋतवः खलु वै देवाः पितर ऋतूनेव देवान्पितॄन्प्रीणाति " [सं० का० ५ प्र० ४ अ० ११] इति ।

दैविकस्य पैतृकस्य च कर्मणश्चिदतौ कर्तव्यत्वाद्दतूनां देवत्वं पितृत्वं च। अत्र सप्तमादीनां चतुर्णां मन्त्राणां लोपः ॥

अत्र विनियोगसंग्रहः—

ममाग्ने दशभिर्मन्त्रैर्धिष्णियेषु यथायथम् ।
इष्टका उपधत्तेऽत्र वह्निकाण्डः समापितः ॥ १ ॥

अथ मीमांसा ।

तृतीयाध्यायस्याष्टमपादे चतुर्दशाधिकरणे चिन्तितम्—

ममाग्न इति कस्यात्र फलं लिङ्गेन वक्तृगम् ।
श्रुत्या स्वामिनि न क्रीते लिङ्गं तत्रोपचर्यताम् ॥

ममाग्ने वर्चो विहवेष्वित्यँयं मन्त्र इष्टकाचयनाङ्गभूतोऽध्वर्युणा पठ्यते। विशिष्टं हवनं येषां यज्ञानां ते विहवास्तेषु वर्चस्तेजसोपलक्षितं यत्फलं तन्ममास्त्वित्यनेन लिङ्गेन मन्त्रमुच्चारयितुरध्वर्योस्तत्फलमिति चेन्मैवम् । ×अग्निं चिनुत इत्यात्मनेपदश्रुत्या साङ्गप्रधानफलस्य यजमानगामित्वं प्रतीयते । न च परिक्रीतस्याध्वर्योर्दक्षिणातिरिक्तफलसंबन्धो न्याय्यः । तस्माच्छ्रुतिन्यायाभ्यां विरुद्धं तल्लिङ्गं यजमानपरत्वेनोपचरणीयम् । मदीययजमानस्य तद्वर्चोऽस्त्विति ह्युपचारः । तस्माद्यजमानेन पाठ्येष्वायुर्दा अग्नेऽस्यायुर्मे देहीत्या-

* न्यायमालायां ' त्वयमाहवनीयस्यान्वाधाने करणभूतो मन्त्रोऽध्व ' इति पाठः ।
× ' दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत ' इति न्यायमालापाठः ।

दिषु क्रियमाणानुवादिषु प्रत्यगाशीर्मन्त्रेषु श्रुतं फलं यथा याजमानं तथैवाध्वर्युणा पाठ्येषु करणमन्त्रेषु श्रुतमपि फलं याजमानमेव ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे सप्तमप्रपाठके
चतुर्दशोऽनुवाकः ॥ १४ ॥

(अथ चतुर्थाष्टके सप्तमप्रपाठके पञ्चदशोऽनुवाकः ।)

अग्नेर्मन्वे प्रथमस्य प्रचेतसो यं पाञ्चजन्यं बहवः समिन्धते । विश्वस्यां विशि प्रविविशिवाꣳसमीमहे स नो मुञ्चत्वꣳहसः । यस्येदं प्राणन्निमिषद्यदेजति यस्य जातं जनमानं च केवलम् । स्तौम्यग्निं नाथितो जोहवीमि स नो मुञ्चत्वꣳहसः । इन्द्रस्य मन्ये प्रथमस्य प्रचेतसो वृत्रघ्नः स्तोमा उप मामुपागुः । यो दाशुषः सुकृतो हवमुप गन्ता (१) स नो मुञ्चत्वꣳहसः । यः सङ्ग्रामं नयति सं वशी युधे यः पुष्टानि सꣳसृजति त्रयाणि । स्तौमीन्द्रं नाथितो जोहवीमि स नो मुञ्चत्वꣳहसः । मन्वे वां मित्रावरुणा तस्य वित्तꣳ सत्यौजसा दꣳहणा यं नुदेथे । या राजानꣳ सरथं याथ उग्रा ता नो मुञ्चतमागसः । यो वाꣳ रथꣳऋजुरश्मिः सत्यधर्मा मिथु श्चरन्तमुपयाति दूषयन् ।

स्तौमि (२) मित्रावरुणा नाथितो जोहवीमि तौ नो मुञ्चतमागंसः । वायोः सवितुर्विदथानि मन्महे यावात्मन्वद्बिभृतो यौ च रक्षतः । यौ विश्वस्य परिभू बभूवतुस्तौ नो मुञ्चतमागंसः । उप श्रेष्ठा न आशिषो देवयोर्धर्मन् अस्थिरन् । स्तौमि वायुꣳ सवितारं नाथितो जोहवीमि तौ नो मुञ्चतमागंसः । रथीतमौ रथीनामह्व ऊतये शुभं गमिष्ठौ सुयमेभिरश्वैः । ययोः (३) वां देवौ देवेष्वनिशितमोजस्तौ नो मुञ्चतमागंसः । यदयातं वहतुꣳ सूर्यायास्त्रिचक्रेण सꣳसदमिच्छमानौ । स्तौमि देवावश्विनौ नाथितो जोहवीमि तौ नो मुञ्चतमागंसः । मरुतां मन्वे अधि नो ब्रुवन्तु प्रेमां वाचं विश्वामवन्तु विश्वे । आशून्हुवे सुयमानूतये ते नो मुञ्चन्त्वेनसः । तिग्ममायुधं वीडितꣳ सहस्वद्विव्यꣳ शर्धः (४) पृतनासु जिष्णु । स्तौमि देवान्मरुतो नाथितो जोहवीमि ते नो मुञ्चन्त्वेनसः । देवानां मन्वे अधि नो ब्रुवन्तु प्रेमां वाचं विश्वामवन्तु विश्वे । आशून्हुवे सुयमानूतये ते नो मुञ्चन्त्वेनसः । यदिदं मांऽभिशोचति पौरुषेयेण दैव्येन । स्तौमि विश्वान्देवान्नाथितो जोहवीमि ते नो मुञ्चन्त्वेनसः । अनु नोऽद्यानुमतिरनु (५) इदनुमते त्वं वैश्वानरो नं ऊत्या पृष्टो दिवि । ये अप्रथेतामभितेभिरोजोभिर्ये प्रतिष्ठे अभवतां वसूनाम् । स्तौमि द्यावापृथिवी नाथितो जोहवीमि ते नो मुञ्चतमꣳहसः । उर्वी रोदसी वरिवः कृणोतं क्षेत्रस्य पत्नी अधि नो ब्रूयातम् । स्तौमि द्यावापृथिवी नाथितो जोहवीमि ते नो मुञ्चतमꣳहसः । यत्ते वयं पुरुषत्रा यविष्ठाविद्वाꣳसश्चकृमा कच्चन (६) आगः । कृधी स्वस्माꣳ अदितेरनागा व्येनाꣳसि शिश्रथो विष्वगग्ने । यथा ह तद्वसवो गौर्यं चित्पदि षिताममुञ्चता यजत्राः । एवा त्वमस्मत्प्र मुञ्चा व्यꣳहः प्रातार्यग्ने प्रतरां न आयुः (७) ॥

(गन्ता दूषयन्त्स्तौमि ययोः शर्धोऽनु मतिरनु चन चतुस्त्रिꣳशच्च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके सप्तमप्रपाठके पञ्चदशोऽनुवाकः ॥ १५ ॥

अग्नाविष्णू ज्यैष्ठ्यꣳ शं चोर्क्चाꣳसा चाग्निश्चाꣳशुश्चेध्मश्चाग्निश्च घर्म गर्भा-
श्चैका च वाजो नोऽग्निं युनज्मि ममाग्नेऽग्नेर्मन्वे पञ्चदश ॥ १९ ॥

अग्नाविष्णू अग्निश्च वाजो नो अदंब्धो गोपा एकान्नचत्वा-
रिꣳशत् ॥ ३९ ॥

हरिः ॐ ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके
सप्तमः प्रपाठकः ॥ ७ ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां
चतुर्थाष्टकः ॥ ४ ॥

(अथ चतुर्थाष्टके सप्तमप्रपाठके पञ्चदशोऽनुवाकः ।)

अग्नेः । मन्वे । प्रथमस्य । प्रचेतस इति प्र—
चेतसः । यम् । पाञ्चजन्यमिति पाञ्च—जन्यम् ।
बहवः । समिन्धत इति सम्—इन्धते । विश्वस्याम् ।
विशि । प्रविविशिवाꣳसमिति प्र—विविशिवाꣳसम् ।
ईमहे । सः । नः । मुञ्चतु । अꣳहसः । यस्य ।
इदम् । प्राणदिति प्र—अनत् । निमिषदिति नि—
मिषत् । यत् । एजति । यस्य । जातम् । जनमा-
नम् । च । केवलम् । स्तौमि । अग्निम् । नाथितः ।
जोहवीमि । सः । नः । मुञ्चतु । अꣳहसः । इन्द्रस्य ।
मन्ये । प्रथमस्य । प्रचेतस इति प्र—चेतसः । वृत्रघ्न

इति वृत्र—घ्नः । स्तोमाः । उपेति । माम् । उपागु-
रित्युप—आगुः । यः । दाशुषः । सुकृत इति सु—
कृतः । हवम् । उपेति । गन्ता (१) । सः । नः ।
मुञ्चतु । अꣳहसः । यः । सङ्ग्राममिति सं—ग्रामम् ।
नयति । समिति । वशी । युधे । यः । पुष्टानि ।
सꣳसृजतीति सं—सृजति । त्रयाणि । स्तौमि ।
इन्द्रम् । नाथितः । जोहवीमि । सः । नः । मुञ्चतु ।
अꣳहसः । मन्वे । वाम् । मित्रावरुणेति मित्रा—
वरुणा । तस्य । वित्तम् । सत्यौजसेति सत्य—
ओजसा । दꣳहणा । यम् । नुदेथे इति । या ।
राजानम् । सरथमिति स—रथम् । याथः । उग्रा ।
ता । नः । मुञ्चतम् । आगंसः । यः । वाम् । रथः ।
ऋजुरश्मिरित्यृजु—रश्मिः । सत्यधर्मेति सत्य—
धर्मा । मिथु । चरन्तम् । उपयातीत्युप—याति ।
दूषयन् । स्तौमि (२) । मित्रावरुणेति मित्रा—
वरुणा । नाथितः । जोहवीमि । तौ । नः । मुञ्चतम् ।
आगंसः । वायोः । सवितुः । विदथानि । मन्महे ।
यौ । आत्मन्वदित्यात्मन्—वत् । बिभृतः । यौ ।
च । रक्षतः । यौ । विश्वस्य । परिभू इति परि—
भू । बभूवतुः । तौ । नः । मुञ्चतम् । आगंसः ।

उपेतिं । श्रेष्ठाः । नः । आशिष इत्याशि—शिषः । देवयोः । धर्मे । अस्थिरन् । स्तौमि । वायुम् । सवितारम् । नाथितः । जोहवीमि । तौ । नः । मुञ्चतम् । आगंसः । रथीतमाविति रथी—तमौ । रथीनाम् । अह्वे । ऊतये । शुभम् । गमिष्ठौ । सुयमेभिरिति सु—यमेभिः । अश्वैः । ययोः (३) । वाम् । देवौ । देवेषु । अनिंशितमित्यनि—शितम् । ओजः । तौ । नः । मुञ्चतम् । आगंसः । यत् । अयातम् । वहतुम् । सूर्यायाः । त्रिचक्रेणेति त्रि—चक्रेण । सꣳसदमिति सं—सदम् । इच्छमानौ । स्तौमि । देवौ । अश्विनौ । नाथितः । जोहवीमि । तौ । नः । मुञ्चतम् । आगंसः । मरुताम् । मन्वे । अधीति । नः । ब्रुवन्तु । प्रेति । इमाम् । वाचम् । विश्वाम् । अवन्तु । विश्वे । आशून् । हुवे । सुयमानिति सु—यमान् । ऊतये । ते । नः । मुञ्चन्तु । एनसः । तिग्मम् । आयुधम् । वीडितम् । सहस्वत् । दिव्यम् । शर्धः (४) । पृतनासु । जिष्णु । स्तौमि । देवान् । मरुतः । नाथितः । जोहवीमि । ते । नः । मुञ्चन्तु । एनसः । देवानाम् । मन्वे । अधीति । नः । ब्रुवन्तु । प्रेति । इमाम् । वाचम् । विश्वाम् । अवन्तु । विश्वे । आ-

शून् । हुवे । सुयमानिति सु—यमान् । ऊतये । ते । नः । मुञ्चन्तु । एनसः । यत् । इदम् । मा । अभिशोचतीत्यभि—शोचति । पौरुषेयेण । दैव्येन । स्तौमि । विश्वान् । देवान् । नाथितः । जोहवीमि । ते । नः । मुञ्चन्तु । एनसः । अन्विति । नः । अद्य । अनुमतिरित्यनु—मतिः । अन्विति (५) । इत् । अनुमत इत्यनु—मते । त्वम् । वैश्वानरः । नः । ऊत्या । पृष्टः । दिवि । ये इति । अप्रथेताम् । अमितेभिः । ओजोभिरित्योजः—भिः । ये इति । प्रतिष्ठे इति प्रति—स्थे । अभवताम् । वसूनाम् । स्तौमि । द्यावापृथिवी इति द्यावा—पृथिवी । नाथितः । जोहवीमि । ते इति । नः । मुञ्चतम् । अꣳहसः । उर्वी इति । रोदसी इति । वरिवः । कृणोतम् । क्षेत्रस्य । पत्नी इति । अधीति । नः । ब्रूयातम् । स्तौमि । द्यावापृथिवी इति द्यावा—पृथिवी । नाथितः । जोहवीमि । ते इति । नः । मुञ्चतम् । अꣳहसः । यत् । ते । वयम् । पुरुषत्रेति पुरुष—त्रा । यविष्ठ । अविद्वाꣳसः । चकृम । कत् । चन (६) । आगंः । कृधि । स्विति । अस्मान् । अदितेः । अनागाः । वीति । एनाꣳसि । शिश्रथः ।

विष्वंक् । अग्ने । यथा । हु । तत् । वसवः । गौर्यम् । चित् । पदि । सिताम् । अमुञ्चत । यजत्राः । एवा । त्वम् । अस्मत् । प्रेतिं । मुञ्च । वीतिं । अꣳहः । प्रेतिं । अतारि । अग्ने । प्रतरामितिं प्र—तराम् । नः । आयुः (७) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके सप्तमप्रपाठके पञ्चदशोऽनुवाकः ॥ १५ ॥

हरिः ॐ ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टके सप्तमः प्रपाठकः ॥ ७ ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे चतुर्थाष्टकः ॥ ४ ॥

(अथ चतुर्थकाण्डे सप्तमप्रपाठके पञ्चदशोऽनुवाकः ।)

चतुर्दशानुवाके विहव्याख्या इष्टका उक्ताः । तावतेष्टकाचयनमन्त्राः समाप्ताः । अथ पञ्चदशेऽश्वमेधसंबन्धिन्यो याज्यानुवाक्या उच्यन्ते । अयं चानुवाकोऽस्मात्काण्डादुत्कृष्टव्यः ।

कल्पः—" अग्नयेऽꣳहोमुचेऽष्टाकपाल इति दशहविषं मृगारेष्टिमनुनिर्वपति समानं तु स्विष्टकृदिडमग्नेर्मन्वे प्रथमस्य प्रचेतस इति यथालिङ्गं याज्यानुवाक्याः " इति ।

तत्रोदाहृतस्य प्रथमहविषः पुरोनुवाक्यामाह—

अग्नेर्मन्वे प्रथमस्य प्रचेतसो यं पाञ्चजन्यं बहवः समिन्धते । विश्वस्यां विशि प्रविविशिवाꣳसमीमहे स नो मुञ्चत्वꣳहसः । , इति ।

पञ्चजना निषादपञ्चमा वर्णास्तेभ्यो हितः पाञ्चजन्यस्तादृशं यमग्निं बहवो यजमानाः समिन्धते प्रदीपयन्ति, प्रथमस्य सृष्ट्यादावुत्पन्नस्य प्रचेतसः प्रकृष्टज्ञानवतस्तस्याग्नेर्मूर्तिं मन्वे मनसा चिन्तयामि । विश्वस्यां विशि सर्वस्यां प्रजायां प्रविविशिवांसं जाठराग्निरूपेण प्रविष्टवन्तं तमग्निमीमहे वयं प्राप्नुमः । सोऽग्निर्नोऽस्मानंहसः पापान्मुञ्चतु मुक्तान्करोतु ॥

तत्रैव याज्यामाह—

यस्येदं प्राणन्निमिषद्यदेजति यस्य जातं जनमानं च केवलम् । स्तौम्यग्निं नाथितो जोहवीमि स नो मुञ्चत्वꣳहसः । , इति ।

प्राणच्छ्वासोपेतं निमिषन्निमेषोपेतं यदिदं जगदेजति कम्पते चेष्टत इत्यर्थः । तत्सर्वं यस्याग्नेरधीनं जातं पूर्वमुत्पन्नं जनमानमितः परं जनिष्यमाणं च जगत्सर्वं केवलं परनिरपेक्षं सद्यस्याधीनं तमग्निं स्तौमि । नाथितः फलयाच्ञायुक्तोऽहं जोहवीमि पुनः पुनर्जुहोमि । शेषं पूर्ववत् ।

अथेद्रायाꣳहोमुच एकादशकपाल इत्यस्य पुरोनुवाक्यामाह—

इन्द्रस्य मन्ये प्रथमस्य प्रचेतसो वृत्रघ्नः स्तोमा उप मामुपागुः । यो दाशुषः सुकृतो हवमुप गन्ता स नो मुञ्चत्वꣳहसः । , इति ।

प्रथमस्य सृष्ट्यादावुत्पन्नस्य प्रचेतसः प्रकृष्टज्ञानवत इन्द्रस्य मूर्तिं मन्येऽहं मनसा चिन्तयामि । वृत्रघ्नः शत्रुघातिन इन्द्रस्योप समीपं प्राप्ताः स्तोमाः स्तोत्राणि मां यजमानमुपागुः प्राप्ताः । इन्द्रगुणकथनपराणि स्तोत्राणि मज्जिह्वायामवस्थितानीत्यर्थः । य इन्द्रो दाशुषो हविर्दत्तवतः सुकृतः सुष्ठु कर्मानुतिष्ठतो यजमानस्य हवमाह्वानं यज्ञं वोपगन्ता प्राप्स्यति ॥

तत्रैव याज्यामाह—

यः सङ्ग्रामं नयति सं वशी युधे यः पुष्टानि सꣳसृजति त्रयाणि । स्तौमीन्द्रं नाथितो जोहवीमि स नो मुञ्चत्वꣳहसः । , इति ।

य इन्द्रो युधे योद्धुं वशी स्वाधीनपरिवारोपेतः सङ्ग्रामं युद्धदेशं प्रति संनयति स्वकीयां सेनां सम्यक्प्रापयति । यश्चेन्द्रः पुष्टानि संपूर्णानि त्रयाणि गवाश्वपुरुषरूपाणि संसृजति यजमानेन योजयति । शेषं पूर्ववत् ॥

पुरुषेषु यत्कच्चनाऽऽगो यं कमप्यपराधं चकृम कृतवन्तः । अदितेरखण्डनीयस्य तवास्माननागा अपराधरहितान्सुकृधि सुष्ठु कुरु । हेऽग्न एनांस्यस्मदीयानि पापानि विष्वक्सर्वथा विशिश्रथो विशेषेण श्रथितानि कुरु ॥

तत्रैव याज्यामाह—

**यथा ह तद्वसवो गौर्यं चित्पदि षिताममु-
ञ्चता यजत्राः । एवा त्वमस्मत्प्र मुञ्चा
व्यꣳहः प्रातार्यग्ने प्रतरां न आयुः ॥ , इति ॥**

यजत्रा यष्टव्या वसवो जगन्निवासहेतवोऽग्निना सहिता हे देवाः पदि सितां बन्धनस्थाने स्वकीयस्य पाशस्याऽऽक्रमणेन पादे बद्धां गौर्यंचिद्गौरीमपि यां कांचिद्गौरवर्णां गाममुञ्चत बन्धान्मुक्तां कृतवन्तः । हेऽग्ने तद्यथा ह येनैव प्रकारेण तद्बन्धमोचनं कृतमेवा त्वमेवमेव त्वमपि अस्मदस्मत्सकाशाद्व्यंहो विविधं पापं प्रमुञ्च प्रकर्षेण मुक्तं कुरु । नोऽस्मदीयमायुः प्रतरामत्यधिकं यथा भवति तथा प्रातारि प्रतर संपादय ॥

अत्र विनियोगसंग्रहः—

अग्नयेऽꣳहोमुचेऽष्टाकपाल इत्यादिनेरिताः ।
इष्टयोऽग्नेर्मन्वयुक्ता याज्यास्तासु क्रमादिमाः ॥ १ ॥
अग्नेराग्नेयके द्वी(ही)न्द्रस्यैन्द्रे मन्वे ह्यनन्तरे ।
मैत्रावरुणके वायोर्वायोसावित्रके रथी ॥ २ ॥
आश्विने मरुतां मारुते देवा वैश्वदेविके ।
अनुद्वयोश्चाऽऽ(यं चाऽऽ)नुमते वैश्वा वैश्वानरे तथा ॥ ३ ॥
द्यावापृथिव्यके ये तु यत्ते स्विष्टकृतीर्यते ।
अनुवाके पञ्चदशे मन्त्रा द्वाविंशतिर्मताः ॥ ४ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे सप्तमप्रपाठके पञ्चदशोऽनुवाकः ॥ १५ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥ १ ॥

इति श्रीमद्विद्यातीर्थमहेश्वरापरावतारस्य श्रीमद्राजाधिराजपरमेश्वरस्य श्रीवीरबुक्कमहाराजस्याऽऽज्ञापरिपालकेन माधवाचार्येण विरचिते वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे सप्तमः प्रपाठकः ॥ ७ ॥

इति श्रीमद्विद्यातीर्थमहेश्वरापरावतारस्य श्रीमद्राजाधिराजपरमेश्वरस्य श्रीवीरबुक्कमहाराजस्याऽऽज्ञापरिपालकेन माधवाचार्येण विरचिते वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये चतुर्थः काण्डः समाप्तः ॥ ४ ॥

मूलक्रमेण चतुर्थाष्टके....प्र० ७ अनु० ७२
भाष्यक्रमेण चतुर्थकाण्डे—प्र० ७ अनु० ७२
मूलक्रमेणाऽऽदितः समष्टयङ्काः....अष्ट० ४ प्र० २६ अ० ३४८
भाष्यक्रमेणाऽऽदितः समष्टयङ्काः—का० ४ प्र० २६ अ० ३४३

समाप्तोऽयं श्रीमत्सायणाचार्यविरचितभाष्यसमेतायाः
सपदपाठायाः कृष्णयजुर्वेदीयतैत्तिरीयसंहिता-
यामश्रतुर्थः काण्डः ।